00047477

00047477

Digitized with financial assistance from
Shri Brihad Bhartiya Samaj
on 11 March, 2020

TRIVANDRUM SANSKRIT SERIES.

NO. XXXIV.

THE MAṆIDARPAṆA

(Sabdaparichchheda)

OF

RÂJACHÛḌÂMAṆIMAKHIN

EDITED

BY

T. GAṆAPATI SÂSTRÎ

Curator of the Department for the publication of Sanskrit manuscripts

TRIVANDRUM

47477

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJAH OF TRAVANCORE.

TRIVANDRUM:

PRINTED AT THE TRAVANCORE GOVERNMENT PRESS.

1913.

(*All Rights Reserved.*)

अनन्तशयनसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ३४.

मणिदर्पणः

(शब्दपरिच्छेदः)

श्रीराजचूडामणिमखिकृतः

संस्कृतग्रन्थप्रकाशनकार्याध्यक्षेण

त. गणपतिशास्त्रिणा

संशोधितः ।

2330

स च

अनन्तशयने

महामहिमश्रीमूलकरामवर्मकुलशेखरमहाराजशासनेन

राजकीयमुद्रणयन्त्रालये

मुद्रयित्वा प्रकाशितः ।

कोल्लम्वाब्दाः १०८९, क्रैस्ताब्दाः १९१३.

PREFACE.

Tattvachintâmani popularly known among the Naiyâyikas as Mani is a work on logic which is highly developed by the successive commentaries of Raghunâthabhattâchârya, Gadâdharabhattâchârya and others. The work Manidarpana, the Sabdakhanda (शब्दखण्ड) of which is now published, is a paraphrase of the Mani, just as Kâvyadarpana is of the Kâvyaprakâsa of Mammata. From the colophon (quoted *infra*) of Kâvyadarpana, we learn that there are two more Khandas (खण्ड) of the Manidarpana, which have not come to our hands.

The edition of the work is based on two palm-leaf manuscripts, one of which, marked क. in Malayalam character was kindly lent to us by the Raja of Panthalam. The other manuscript, ख. in Tamil grantha character, more correct but a little wanting at the end was obtained through Mr. Sakti Sastrial of Ayikudi.

The author of the work is the famous Râjachûdamani Dikshita. He has written a commentary, called Tantrasikhâmani, on Jaimini's Pûrvamîmâmsâ Sûtras. Of this commentary, we have in our possession the 7th, 8th and 9th chapters. In the beginning of the 7th chapter, the author states the date of the composition of the commentary

"धीमन्मान्ये शकस्याब्दे हायने चेश्वराभिधे ।
चूडामणिः कलयते यज्वा तन्त्रशिखामणिम् ॥"

to be Saka year 1559 corresponding to 1636 A. D. That the author composed a Kâvya called Rukmini Kalyâna, when Raghunâtha Bhûpa was reigning in Tanjore is evident from the following verse in the Kâvya itself.

"अध्यास्य तञ्जानगरीममुष्मिन् (रघुनाथे) सर्वंसहां शासति सार्वभौमे ।
श्रीराजचूडामणियायजूकश्चित्रं निबध्नाति हरेश्चरित्रम् ॥"

A list of works of Râjachûdâmani Dikshita is given in the following verses from his Kâvyadarpana :—

"अधीत्य निखिलं शास्त्रमग्रजादीश्वरेरितः ।
विदुषां प्रीतये येन व्याकृता **शास्त्रदीपिका** ॥
यत्नं विनैव विहितो येन **तन्त्रशिखामणिः** ।
नव्या सङ्कर्षकाण्डस्य **न्यायमुक्तावली** तथा ॥
व्याकृता याजुषी शाखा तथोपनिषदोऽखिलाः ।
प्रणीता चाग्निहोत्रादेः **प्रायश्चित्तप्रदीपिका** ॥
न्यायचूडामणिर्नाम्ना न्यायजालोपबृंहिता ।
रुचिदत्तस्य च व्याख्या रुचिरा येन निर्मिता ॥
मणिदर्पणनामानं (?) महितं वाङ्मुखं मणेः ।
खण्डत्रयस्य दुर्वादिखण्डनाय व्यधत्त यः ॥
येन **शृङ्गारसर्वस्व**नामा भाणोऽप्यभण्यत ।
यश्चैकाङ्का भोजचम्पोर्युद्धकाण्डमपूरयत् ॥
येन **भारतचम्पुश्च वृत्ततारावली** तथा ।
विहिते **शङ्कराचार्यतारावल्याः** सहोदरे ॥
सर्वतन्त्रस्वतन्त्रस्य श्रीनिवासमखीशितुः ।
कर्तुर्विश्वजितो येन तातस्य यमिता कथा ॥
रघुवीरस्य कृष्णस्य पाण्डवानां च यः कथाः ।
प्रत्यक्षरश्लेषमयैः पद्यैर्हृद्यैरवर्णयत् ॥
यमिता मञ्जुभाषिण्या येन सीतापतेः कथा ।
शङ्कराभ्युदयाभिख्यं काव्यं येनैव निर्मितम् ॥
काव्यं **कंसवधं रुक्मिण्युद्वाहमपि** यो व्यधात् ।
येनोदिता **कदलिनीकलहंसाख्यनाटिका** ॥
आनन्दराघवं नाम नाटकं च प्रपञ्चितम् ।
येन व्यतान्यलङ्कारचूडामण्यभिधा कृतिः ॥
अथ वृत्तिविवेकेन विचित्रा **चित्रमञ्जरी** ।
तेन व्यतानि श्रीराजचूडामणिमखीन्दुना ॥
काव्यदर्पणनामासौ प्रबन्धो विदुषां मुदे ।"

Trivandrum. T. GANAPATI SÂSTRÎ.

निवेदना ।

मणिर्मणिरिति नामैकदेशग्रहणेन व्यवहृतो यस्तत्त्वचिन्तामणिर्नाम श्रीरघुनाथ–गदाधरभट्टाचार्यादीनां व्याख्यानपरम्परया दूरप्रपञ्चितार्थो न्यायग्रन्थः, तस्योपन्यासरूप एष **मणिदर्पणः**, **काव्यदर्पण** इव **काव्यप्रकाशस्य** । अस्य शब्दखण्डोऽयमिदानीं प्रकाश्यते । **मणिदर्पणस्य** खण्डद्वयमन्यदप्यस्तीत्युदाहरिष्यमाण**काव्यदर्पण**वचनतोऽवगतम् । तत्त्वस्माभिर्नोपलब्धम् ।

शब्दखण्डस्यास्य संशोधनाधारभूतौ द्वावादर्शौ तालपत्रात्मकौ । तयोरेकः **पन्तलराज**सकाशादासादितः केरलीयलिपिः प्रायः शुद्धः क.संज्ञः । द्वितीयः (आयक्कुटि) **शक्ति**शास्त्रिभ्योऽधिगतो द्रविलग्रन्थलिपिः ख.संज्ञः पूर्वस्माच्छुद्धतरः किञ्चिन्न्यूनः ।

मणिदर्पणस्य प्रणेता श्री**राजचूडामणि**दीक्षितः । एतत्प्रणीतस्य **तन्त्रशिखामणे**र्नाम द्वादशलक्षणीविवरणस्य सप्तमादिनवमान्ताध्यायात्मको भागोऽस्माभिरुपलब्धः । अस्यारम्भे —

"धीमन्मान्ये शकस्याब्दे हायने चेश्वराभिधे ।
चूडामणिः कलयत यज्वा **तन्त्रशिखामणिम्** ॥"

इति वदन् **राजचूडामणि**दीक्षितः १५९०तमे शकाब्दे १६३६तमक्रैस्ताब्दतुल्ये स्वस्य स्थितिं स्पष्टमेवोक्तवान् । एष **तञ्जा**पुरमधिष्ठाय **रघुनाथ**भूमृ† महीं शासति **रुक्मिणीकल्याणं** नाम काव्यं निबबन्धेति तस्य प्रथमसर्गे प्रतिपादितम् । यथा —

"अध्यास्य **तञ्जा**नगरीममुष्मिन्† सर्वंसहां शासति सार्वभौमे ।
श्रीराजचूडामणिर्यायजूकक्षितिं निबध्नाति हरेश्चरित्रम् ॥"

इति ।

"अधीत्य निखिलं शास्त्रमग्रजादीश्वरेष्टिनः ।
विदुषां प्रीतये येन व्याकृता **शास्त्रदीपिका** ॥
यत्नं विनैव विहितो येन **तन्त्रशिखामणिः** ।
नव्या सङ्कर्षकाण्डस्य **न्यायमुक्तावली** तथा ॥

† रघुनाथे

व्याकृता याजुषी शाखा तथोपनिषदोऽखिलाः ।
प्रणीता चाग्निहोत्रादेः **प्रायश्चित्तप्रदीपिका** ॥
न्यायचूडामणिर्नाम्ना न्यायजालोपबृंहिता ।
रुचिदत्तस्य च व्याख्या रुचिरा येन निर्मिता ॥
मणिदर्पणनामानं (?) महितं वाङ्मुखं मणेः ।
खण्डत्रयस्य दुर्वादिखण्डनाय व्यधत्त यः ॥
येन **शृङ्गारसर्वस्व**नामा भाणोऽप्यभण्यत ।
यश्चैकाह्ना भोजचम्पोर्युद्धकाण्डमपूरयत् ॥
येन **भारतचम्पु**श्च **वृत्ततारावली** तथा ।
विहिते **शङ्कराचार्यतारावल्याः** सहोदरे ॥
सर्वतन्त्रस्वतन्त्रस्य **श्रीनिवास**सखीशितुः ।
कर्तुर्विश्वजितो येन तातस्य यमिता कथा ॥
रघुवीरस्य कृष्णस्य पाण्डवानां च यः कथाः ।
प्रत्यक्षरश्लेषमयैः पद्यैर्हृद्यैरवर्णयत् ॥
यमिता मञ्जुभाषिण्या येन सीतापतेः कथा ।
शङ्कराभ्युदयाभिख्यं काव्यं येनैव निर्मितम् ॥
काव्यं **कंसवधं रुक्मिण्युद्वाह**मपि यो व्यधात् ।
येनोदिता **कमलिनीकलहंसा**ख्यनाटिका ॥
आनन्दराघवं नाम नाटकं च प्रपञ्चितम् ।
येन व्यतान्यलङ्कारचूडामण्यभिधा कृतिः ॥
अथ वृत्तिविवेकेन विचित्रा **चित्रमञ्जरी** ।
तेन व्यतानि **श्रीराजचूडामणि**मखीन्दुना ॥
काव्यदर्पणनामासौ प्रबन्धो विदुषां मुदे ।"

इत्येतेभ्यः **काव्यदर्पण**स्यान्तिमश्लोकेभ्यो बहवो ग्रन्थाः **शास्त्रदीपिकाव्याख्या**-प्रभृतयः **श्रीराजचूडामणिदीक्षितेन** विरचिता विज्ञायन्ते ।

अनन्तशयनम्. **त. गणपतिशास्त्री.**

॥ श्रीः ॥

राजचूडामणिमखिकृतं

मणिदर्पणम् ।

शब्दपरिच्छेदः ।

सङ्गतिवादः ।

अश्रान्तमुत्पुलकजालमजस्रमाविस्स्वेदाम्बुबिन्दु सततार्द्रनिमीलिताक्षम् ।
नित्यं दरोच्छ्वसितनीवि सदा सकम्पं श्यामारुणं भवतु धाम शिवङ्करं नः ॥

अधीत्य निखिलं शास्त्रमग्रजादीश्वरेष्टिनः ।
राजचूडामणिमखी कुरुते मणिदर्पणम् ॥

अथ शक्तिग्राहकतयोपमानस्य शब्दोपजीव्यत्वादुपमाननिरूपणानन्तरं शब्दो निरूप्यते । यद्यप्यतिदेशवाक्यरूपशब्दस्याप्युपमानोपजीव्यत्वं, तथापि मानविभाजकोपाध्यवच्छेदेनोपजीव्यत्वस्यात्र प्रथमनिरूपणे तन्त्रत्वेन विवक्षितत्वात् । न चैवमनुमानत्वावच्छिन्नस्य स्वानुव्यवसायरूपप्रत्यक्षं प्रत्युपजीव्यत्वादनुमाननिरूपणस्य प्रत्यक्षनिरूपणात् प्राथम्यं स्यादिति वाच्यम् । तथाप्यनुमानत्वावच्छिन्नस्य साक्षात् परम्परया वा प्रत्यक्षोपजीवकत्वमप्यस्तीति विनिगमनाविरहे सति बहुवादिसम्मतत्वात् प्रत्यक्षस्य प्रथमनिरूपणम् । नन्वेवमुपमानत्वावच्छिन्नस्योपजीव्यत्वेऽपि तदवच्छिन्नस्यातिदेशवाक्यरूपशब्दोपजीव-

कत्वमप्यस्तीति विनिगमनाविरहे सति बहुवादिसम्मतत्वाच्छब्दस्यैव प्रथमनिरूपणं स्यादिति चेद्, न। कीदृग् गवय इति प्रश्ने चित्रलेख्यादिना गवयसदृशगोपिण्डदर्शनं यत्र, तत्र शब्दं विनापि गोसदृशो गवय इति चित्रकाराभिप्रायमनुमायोपमानप्रवृत्त्युपपत्तेरुपमानत्वावच्छिन्नस्य शब्दोपजीवकत्वाभावात्। न च 'शाब्दी ह्याकाङ्क्षा शब्देनैव पूर्यते' इति न्यायात् तत्राप्याभिप्रायिक[1]शब्दकल्पनमेव युक्तमिति वाच्यम्। एतावता शाब्दानुभवविषयपदार्थानां शब्दोपस्थाप्यत्वनियमेऽपि प्रश्नविषयस्य पदार्थस्य शब्दादेवोपस्थितिरिति नियमासिद्धेः। अत एव वह्निप्रश्ने धूमोऽस्तीति वाक्यस्यानुमानिकवह्निपरस्य प्रयोगः। तस्माच्छब्दस्य बहुवादिसम्मतत्वेऽप्युपमानस्य मानविभाजकोपाध्यवच्छेदेन शब्दोपजीव्यत्वात् तन्निरूपणस्य शब्दनिरूपणात् प्राथम्यमिति दिक्॥

इति सङ्गतिवादः।

अथ शब्दस्वातन्त्र्यवादः।

तत्र 'प्रयोगहेतुभूतार्थतत्त्वज्ञानजन्यः शब्दः प्रमाणमि'ति मणिकृतः। अत्र पदार्थतत्त्वज्ञानजन्ये वह्निना सिञ्चेदित्ययोग्यवाक्येऽतिव्याप्तिवारणाय प्रयोगहेतुभूतेति। वाक्यार्थतत्त्वज्ञानस्यैव प्रयोगरूपवाक्यहेतुत्वाद् वाक्यार्थतत्त्वज्ञानजन्यत्वलाभान्नायोग्येऽतिव्याप्तिः। तत्र वाक्यार्थज्ञानस्य तत्त्वज्ञानत्वा-

---

१. 'यश' ख. पाठः.

भावात् । न चैवमपि पारमेश्वरवाक्यान्तरार्थविषयकतत्त्वज्ञानेनायोग्यवाक्यजननादतिव्याप्तितादवस्थ्यमिति वाच्यम्। मीमांसकमतसाधारण्याय भगवदनङ्गीकारेणैव तल्लक्षणप्रणयनात् । न चैवं शुकादिसंवादिवाक्याव्याप्तिरिति वाच्यम्। निरुक्तशब्दजातीयत्वस्य विवक्षितत्वात्। साजात्यं च योग्यशब्दत्वेनेत्यदोषात्। न चैवं लक्षणशरीरप्रविष्टस्य योग्यशब्दत्वस्यैव लक्षणत्वसम्भवे किं पूर्वप्रतीकेनेति वाच्यम्। घटः कर्मत्वमानयनं कृतिरिति निराकाङ्क्षेऽतिव्याप्तिवारणाय स्वप्रतिपाद्यवाक्यार्थतत्त्वज्ञानजन्यत्वविशेषणस्यावश्यकत्वात् । निराकाङ्क्षे च स्वप्रतिपाद्यवाक्यार्थाभावान्नातिव्याप्तिः। न च तस्यापि पुरुषविशेषं प्रति बोधकतया न तन्निरासम्भव इति वाच्यम्। तादृशस्य सङ्ग्राह्यत्वात्। न चैवमपि शुकादिवाक्यानुरोधेन पदावलिज्ञानमेव वाक्ये हेतुर्न वाक्यार्थज्ञानमित्युत्पत्तिप्रामाण्यवादे व्यवस्थापितत्वात् तज्जन्यत्वगर्भमिदं लक्षणमसम्भवीति वाच्यम्। सम्प्रदायमतेनैतल्लक्षणप्रणयनादिति दिक् ।

भगवदङ्गीकारपक्षे तु तज्जातीयत्वं न विवक्षणीयम् ।न च तथा सति शुकादिसंवादिवाक्येऽव्याप्तिरित्युक्तमिति वाच्यम्। तस्यापि स्वप्रतिपाद्यवाक्यार्थविषयकभगवत्तत्त्वज्ञानजन्यतयाव्याप्त्यभावात । निराकाङ्क्षे च स्वप्रतिपाद्यवाक्यार्थाभावादेव नातिव्याप्तिः। पुरुषविशेषं प्रति बोधकस्य तु तस्य सङ्ग्राह्यत्वमेवे-

---

१. 'तीतिके' क. पाठः. २. 'प्ये व्य' ख. पाठः.

त्युक्तम्। यदि च तस्य प्रमाणत्वेनाव्यवह्रियमाणत्वान्न सङ्ग्राह्यतेति मतं, तदा व्याकरणाद्यभियुक्तैः प्रमाणत्वेन व्यवह्रियमाणपरेण[1] शब्दपदेन तन्निरासः। न चैवं शब्दपदस्य लक्षणप्रवेशे प्रमाणमात्रं लक्ष्यं स्यादिति प्रत्यक्षादावव्याप्तिरिति वाच्यम्। काकाक्षिन्यायेन लक्ष्येऽपि शब्दपदान्वयात्। नन्वेवमपि मौनिश्लोकाव्याप्तिः, तस्यानुच्चारितत्वेन तादृशतत्त्वज्ञानाजन्यत्वादिति चेद्, न। मौनिश्लोकस्य यदि वाक्यत्वं, तदा वाक्यार्थज्ञानजन्यत्वमक्षतं, वाक्यत्वस्यैव लाघवात् तज्जन्यतावच्छेदकत्वेन तदुच्चारितत्वस्य गौरवेण तदनवच्छेदकत्वात्। वाक्यत्वाभावे चालक्ष्यत्वेनाव्याप्त्यभावात्। केचित्तु—मौनिश्लोकस्यानुच्चारितत्वेऽपि तद्घटकपदानां भिन्नभिन्नश्लोकान्तरघटकतया कदाचिदुच्चारणात्, तेषां च मौनिवाक्यार्थज्ञानाजन्यत्वेऽपि भगवत्स्वार्थतत्त्वज्ञानजन्यत्वान्नाव्याप्तिरित्याहुः। नन्वेवं स्वपदान्तर्भावे लक्षणमिदमितरभेदसाधकं न स्याद्, अयोग्यवाक्ये स्वप्रतिपाद्यवाक्यार्थतत्त्वज्ञानजन्यत्वाप्रसिद्ध्या तद्ग्रहासम्भवेन तत्र व्यतिरेकव्याप्तिग्रहासम्भवादिति चेद्, न। स्वप्रतिपाद्यवाक्यार्थतत्त्वज्ञानजन्यत्वस्य योग्यवाक्ये प्रसिद्धस्याभावोऽयोग्यवाक्ये सङ्गृह्यत इति न व्याप्तिग्रहासम्भव इत्येके। न व्यावृत्त्यर्थमिदं लक्षणं, किन्तु व्यवहारार्थमित्यप्याहुः। न चैवमपि स्वपदान्तर्भावे लक्षणमिदमननुगतं स्यादिति वाच्यम्। इदं वाक्यमत्र प्रमाणम्, इदं वाक्यमत्रेत्यननुगतस्यैव लक्ष्यत्वेन लक्ष्यस्याप्यननु-

---

१. 'णत्वप' क. पाठः. २. व्याप्तिप्रवृ' ख. पाठः.

गततया लक्षणाननुगमस्यादोषत्वादिति दिक् ।

अत्र सौगताः — शब्दो न प्रमाणं, तस्मिन् सत्यपि प्रमानियमाभावाद्, अयोगव्यवच्छेदेन प्रमासम्बन्धिन एव प्रमाणत्वादित्याहुः । तन्न। चक्षुषि सत्यपि कदाचित् प्रमाया अजननात् तस्यापि प्रमाणत्वं न स्यात् । सन्निकर्षादिसमवधाने ततः प्रमानियम इति यदि, तदाकाङ्क्षादिसमवधाने शब्दादपि प्रमानियमाच्छब्दस्यापि प्रामाण्यमक्षतामिति दिक् ।

वैशेषिकास्तु —आकाङ्क्षादिसहकारिसमवहितः शब्दगोचरः प्रत्ययः प्रमाजनक इति सत्यम् । परं त्वनुमानविधया, न स्वातन्त्र्येण, कृत्स्नप्रमाणद्वयातिरिक्तप्रमाणकल्पने मानाभावात् । न च 'वाक्यश्रवणानन्तरभाविनी संसर्गप्रमा सकरणिका, प्रमात्वादि'त्यनुमानमेव मानमिति वाच्यम् । इयं ह्यनुमितिः संसर्गप्रमाकरणं विषयीकुर्वती कृत्स्नप्रमाणभावं लिङ्गज्ञानमेव तादृशप्रमाकरणत्वेन विषयीकरोति, न त्वाकाङ्क्षादिमत्पदकदम्बकज्ञानं, गौरवात् । तत्र संसर्गप्रमोपकमनुमानं चेत्थं — गामानय दण्डेनेत्यादिपदानि तात्पर्यविषयस्मारितार्थसंसर्गज्ञानपूर्वकाणि, आकाङ्क्षादिमत्पदकदम्बकत्वाद्, घटमानयेति वाक्यवदिति । अत्र ब्राह्मणे विद्येत्यादौ सम्भवनियमादिरूपस्य संसर्गद्वयस्य सम्भवादनभिमतसंसर्गबोधवारणाय तात्पर्यविषयेति संसर्गविशेषणम् । अत्र यावत्त्वमपि संसर्गे विशेषणं देयम् । तेन यत्र

---

१. 'म्बज्ञा' क. पाठः. २. 'मानुमाप' ख. पाठः. ३. 'र्गस्यार्थान्तरवा' क. पाठः.

नानार्थस्थले युगपदुभयतात्पर्यग्रहः, तत्रान्यतरसंसर्गसिद्ध्यापि साध्यपर्यवसानात् संसर्गान्तरसिद्धये शब्दप्रामाण्यमभ्युपेयमित्यपास्तम्। इदं च तात्पर्यविषयत्वं पदार्थेऽपि विशेषणम्। तेन सैन्धवमानयेत्यत्र सैन्धवपदार्थसंसर्गमात्रस्य तात्पर्यविषयतया लवणसंसर्गपरे नाश्वादिसंसर्गसिद्धिप्रसङ्गः। धूमेनायं वह्निमनुमिनोतीति तात्पर्येण प्रयुक्तं साक्षाद् धूमतात्पर्यकं परम्परया वह्नितात्पर्यकं च धूमोऽस्तीति वाक्यं पक्षीकृत्य प्रकृतसाध्यसाधने परम्परया तात्पर्यविषयवह्निसंसर्गज्ञानपूर्वकत्वसिद्ध्यापि साध्यपर्यवसानाद् धूमसंसर्गसिद्धये शब्दप्रामाण्यं पृथगुपेयं स्यादित्यत उक्तं स्मारितार्थेति। इदं (त्वि?तु) पदं वृत्त्या प्रकृतपदस्मारितार्थपरम्। तेन वह्नेरपि परम्परया प्रकृतपदस्मारितत्वेऽपि न वृत्त्या प्रकृतपदस्मारितत्वमिति न तत्संसर्गज्ञानपूर्वकत्वसिद्ध्या साध्यपर्यवसानम्। न च यावत्त्वस्यापि संसर्गविशेषणतया स्मारितपदाभावेऽपि न वह्निसंसर्गज्ञानपूर्वकत्वमात्रेण साध्यपर्यवसानं, येन स्मारितपदमावश्यकं स्यादिति वाच्यम्। तथापि धूमोऽस्तीति वाक्यपक्षकानुमानादेव धूमसंसर्गवद् वह्निसंसर्गस्यापि वक्तुरभिमतस्य सिद्धिर्मा भूदित्येवमर्थं वृत्त्या प्रकृतपदस्मारितत्वपरस्य स्मारितपदस्यावश्यकत्वात्। अत एव शब्दस्य पृथक् प्रामाण्याभावे शक्तिग्रहापेक्षा न स्यादित्यपास्तम्। वृत्त्या प्रकृतपदस्मारितत्वसिद्धये तदपेक्षणात्। ज्ञानपदं च प्रमापरम्। तेन

---

१. 'तपदार्थेति। प' ख. पाठः. २. 'ध्या' क. पाठः. ३. 'ध्या' क. पाठः, ४. 'कानु' ख. पाठः. ५. 'रामि' क.पाठः. ६. स्यापि सि' क. पाठः.

तादृशभ्रमपूर्वकत्वसिद्ध्या नार्थान्तरम् । अत एव निष्कम्पप्रवृत्तिजनकमेव ज्ञानमिहोद्देश्यं, न तु संसर्गज्ञानमात्रम् । तादृशं च ज्ञानं स्वविषयसंसर्गविषयकसंशयनिवर्तकमेव भवति । तादृशं[2] च ज्ञानं संशयसाधारणज्ञानपूर्वकत्वमात्रेण[3]सिद्ध्या न सम्भवति, असत्यपि संसर्गे तज्ज्ञानपूर्वकत्वसम्भवेन प्रकृतानुमितेः स्वविषयसंसर्गविषयकसंशय[4]निवर्तकत्वा[5]भावात् । तस्मात् प्रवर्तकीभूतार्थसंशयनिवर्तकज्ञानसिद्ध्यर्थं शब्दप्रामाण्यमभ्युपेयमित्यपास्तम् । संसर्गप्रमापूर्वकत्वसिद्धौ प्रमाया अर्थसत्तानियतत्वेन प्रकृतानुमितेः संसर्गविषयकसंशयनिवर्तकत्वसम्भवादिति दिक् ।

हेतौ चाकाङ्क्षादिमदित्यादिपदेन योग्यतासत्त्योः सङ्ग्रहः । तत्र अहो विमलं जलं नद्याः कच्छे महिषश्चरतीति वाक्ये नदीजलसंसर्गपरे नद्याः कच्छ इत्यंशे व्यभिचारः । तत्र योग्यतासत्तिमत्त्वहेतोः सत्त्वात् । नदीकच्छसंसर्गस्य च वक्तृतात्पर्याविषयत्वेन तात्पर्यघटितसाध्याभावात् । अत उक्तमाकाङ्क्षेति । यद्यपि यत्पदस्य यत्पदव्यतिरेकप्रयुक्तं तदर्थान्वितस्वार्थान्वयाननुभावकत्वं, तत् तेन साकाङ्क्षमित्युक्तलक्षणाकाङ्क्षा तत्रा[6]स्ति, तथापि यत्पदस्य यँत्पदव्यतिरेकप्रयुक्तं तात्पर्यविषयान्वयाननुभावकत्वमिति तात्पर्यघटिताकाङ्क्षैव हेतुघटकत्वेन विव-

---

१. 'च' ख. पाठः. २. 'शङ्का' क. पाठः. ३. 'त्रप्रसि' क. पाठः. ४. 'या' ख. पाठः. ५. 'त्वात्' । ख. पाठः. ६. 'त्राप्यस्ति' ख. पाठः. ७. 'यद्यति' क. पाठः.

क्षिता । तत्र[1] नदीपदस्य तात्पर्यविषयजलान्वयाननुभावकत्वं न कच्छपदव्यतिरेकप्रयुक्तं, किन्तु जलपदव्यतिरेकप्रयुक्तमिति विवक्षिताकाङ्क्षाविरहाद् भवति तेन तद्व्युदासः । योग्यतापदं चाकाङ्क्षासत्तिमत्ययोग्यवाक्ये प्रमागर्भ[2]साध्याभावेन व्यभिचारवारणार्थम् । आसत्तिपदं चाजनितपदार्थस्मरणके योग्यसाकाङ्क्षे स्मारितत्वरूपविशेषणाभावेन विशिष्टसाध्याभाववति वाक्ये व्यभिचारवारणाय । तत्र यद्यप्यव्यवहितपदार्थस्मृतिरासत्तिः, तथाप्यव्यवधानांशो न हेतुशरीरप्रविष्टः, पदार्थस्मृतिमात्रेणैवाजनितपदार्थस्मरणके वाक्ये व्यभिचारवारणात् । कदम्बग्रहणं चाकाङ्क्षायाः परस्परपदार्थनिरूपितत्वप्रतिपादनार्थम् । एवञ्च,अहो विमलं जलमिति वाक्ये जलनदीसंसर्गपरे नद्याः कच्छ इत्यंशे व्यभिचारः, न च तत्र तात्पर्यघटिताकाङ्क्षाभावेन हेतोरेवागमनान्न व्यभिचार इति वाच्यं, नदीपदस्य जलेन कच्छपदस्य महिषेण च तात्पर्यघटिताकाङ्क्षाया अपि सत्त्वेन हेतोस्तत्राप्रत्यूहत्वात् प्रकृतपदस्मारितपदार्थसंसर्गस्य तात्पर्याविषयत्वेन तात्पर्यघटितसाध्याभावादिति निरस्तम् । तत्र परस्परपदार्थनिरूपिततात्पर्यघटिताकाङ्क्षाविरहात् । एवं यदर्थे योग्यता, तदर्थविषयकासत्ति[3]मत्त्वद्योतनार्थं च कदम्बग्रहणम् । तेन यस्य नीलघटत्वावच्छेदेन घटपदशक्तिभ्रमः, तस्य जनितनीलघटस्मरणके पीतघटवत्तया च योग्ये पीतघटतात्पर्यके च घटोऽस्तीति वाक्ये व्यभिचारः । तत्र[4] स्मारितार्थसंसर्गस्य तात्पर्यविषयत्वाभावेन सा-

१. 'तश्च न' ख. पाठः. २. 'म्य' क. पाठः. ३. 'त्तियो' क. पाठः. ४. 'तः' क. पाठः.

ध्यैस्यासत्त्वादिति निरस्तम् । (तत्र?) यत्र पीतघटे योग्यता, तत्रासत्तेरभावेन[2] हेतोरेवागमनात् । एवं यदंशे तात्पर्यघटिताकाङ्क्षा, तदंश एवासत्तिमत्त्वद्योतनार्थं च कदम्बग्रहणम् । तेन नानार्थस्थलेऽर्थान्तरतात्पर्यके योग्यताविशिष्टार्थान्तरस्मृतिजनके व्यभिचारः, तत्र स्मारितपदार्थसंसर्गस्य तात्पर्यविषयत्वाभावेनोक्तसाध्याभावादिति निरस्तम् । यदंशे तात्पर्यगर्भाकाङ्क्षा, तदंश आसत्तेरभावेन विवक्षितहेतोरेवाभावादिति दिक् ।

नन्वेवमप्यनुमितेर्व्यापकतावच्छेदकप्रकारकत्वनियमेन[3] तादृशसंसर्गप्रमापूर्वकत्वत्वप्रकारकत्वमेव सिध्यति, न (च?तु) रजतत्वादिप्रकारकत्वम् । प्रवर्तकं च ज्ञानं रजतत्वादीष्टतावच्छेदकप्रकारकमेव ज्ञानमिति तादृशज्ञानसिद्धये शब्दप्रामाण्यमावश्यकमिति चेद्, न । तथापि 'रजतानयनादिपदार्थास्तात्पर्यविषयमिथःसंसर्गवन्तः, आकाङ्क्षादिमत्पदस्मारितत्वादि'ति पदार्थपक्षकानुमाने रजतत्वादेः पक्षतावच्छेदकतया रजतत्वादिप्रकारकानुमितेरपि सम्भवात्[4] । न च यत्र विमलं जलमित्यश्रुत्वैव नद्याः कच्छ इति शृणोति, तत्राकाङ्क्षादिमत्पदस्मारितत्वहेतोस्तात्पर्यगर्भसाध्यव्यभिचारेण नानुमितिसम्भव इति वाच्यम् । तथापि 'जलपदार्थोऽपरपदार्थसंसर्गवान्, तदाकाङ्क्षादिमत्पदस्मारितत्वादि'त्यनुमितौ बाधकाभावात् ।

नन्वेवं, देवदत्तो गच्छतीत्यत्र गच्छतिपदार्थो गमनानुकू-

---

१. 'ध्यास' ख. पाठः. २. 'न तत्र हे' क. पाठः. ३. 'न संसर्गज्ञानपूर्वकत्वप्रकारकज्ञानसिद्धावपि न प्रवृत्तिजनकप्रवृत्तिविषयविशेष्यकेष्टतावच्छेदकप्रकारकज्ञानसिद्धिरिति प्रवृत्तिजनकतादृशज्ञा' क. पाठः. ४. 'नात्र शब्दप्रामाण्यम् । न' ख. पाठः.

लयत्नो देवदत्तविशेषणतया, तत्संसर्गश्च संसर्गमर्यादया भासत इत्यनुभवसिद्धम्। तच्च नानुमानविधया जनकत्वे सम्भवति। अनुमितौ संसर्गस्य व्यापकतया प्रकारत्वेन भाननियमादिति चेद्, एवम्'प्ययं पदार्थ इतरपदार्थवानि'ति तादृशसंसर्गप्रतीतिसम्भवात्। न चैवमपि यत्राकाङ्क्षादिमत्पदज्ञानं जातं, न तु तत्स्मारितत्वज्ञानं, तत्रापि संसर्गानुभवेन तत्रानुमितिसामग्रीविरहाच्छब्द एव प्रमाणमिति वाच्यम्। प्रमाणान्तरकल्पने गौरवेण शब्दस्यानुमानविधयैव बोधकत्वसिद्धौ स्मारितत्वाज्ञाने तादृशसंसर्गानुभवस्यैवासिद्धेः। अस्तु वा तत्रापि तदनुभवः, तथाप्याकाङ्क्षादिमत्पदमेव वाच्यवाचकभावसम्बन्धेनार्थनिष्ठत्वाल्लिङ्गमस्तीति न शब्दः पृथक् प्रमाणमित्याहुः।

अत्रोच्यते—'अयं पदार्थ इतरपदार्थवान्, आकाङ्क्षादिमत्पदवत्त्वादि'त्यनुमितावनभिमतसंसर्गमादायार्थान्तरवारणाय तात्पर्यविषयीपरपदार्थसंसर्गवानित्येवानुमेयमित्यनुमितौ न संसर्गमर्यादया संसर्गस्य विषयत्वसम्भवः। किञ्च, घटोऽस्तीत्यादौ योग्यतासंशयेऽपि संसर्गानुभवदर्शनेन योग्यताया न लिङ्गविशेषणत्वं युक्तं, पक्षे निश्चितस्यैव लिङ्गस्यानुमितिहेतुत्वात्। अपिच, न केवलाकाङ्क्षादिज्ञानादनुमितिसम्भवः, व्यभिचारात्, किन्तु परस्परापेक्षाकाङ्क्षाज्ञानादित्युक्तं प्राक्। ततश्च घटमानयेत्यादौ केवलाकाङ्क्षादिज्ञानेऽप्यर्थबोधाच्छब्दः प्रमाणम्। किं

---

१. 'त्ते' ख. पाठः. २. 'च' ख. पाठः. ३. 'दननु' ख. पाठः. ४. 'मिति' ख. पाठः. ५. 'यपदा' क. पाठः.

बहुना, देवदत्तः पचतीत्यादौ देवदत्तविशेष्यिकैव प्रतीतिः, देवदत्तेन पच्यते तण्डुल इत्यत्र तण्डुलविशेष्यिकैव प्रतीतिरित्यनुभवसिद्धम् । इदं च शब्दस्वातन्त्र्य एव सिध्यति, नान्यथा। देवदत्तः पचतीत्यत्र 'पचतिपदार्थस्तात्पर्यविषयदेवदत्तपदार्थसंसर्गवानि'त्यनुमितिसम्भवात्। तस्माच्छब्दः पृथक् प्रमाणम्। एतेन पदात् पदार्थोपस्थितौ सत्यां मनसैव संसर्गधीरस्तु, उपनीतभानसामग्रीसत्त्वादित्यपास्तम् । तथासति विशेषणविशेष्यभावनियमानुपपत्तेः । किञ्च, मनसो बहिरस्वातन्त्र्येण तादृशज्ञानजनने किञ्चित् सहकारि कल्प्यम् । तच्च शब्द एव नान्यदिति दिक् ।

केचित्तु—अनुमानविधयैव शब्दप्रामाण्ये घटमानयेत्यत्रैव घटः कर्मत्वमित्यत्रापि संसर्गावबोधः स्यात् । विभक्तिविशेषसमभिव्यवहारस्यानुपयोगादित्याहुः ।

नन्वेवमपि, शब्दो न पृथक् प्रमाणम् । तथाहि—सैन्धवमानयेति नानार्थस्थले आनयनपदं लवणान्वितस्वार्थपरमिति तात्पर्यग्रहाभावे तात्पर्यविषयलवणान्वयबोधनियमो न स्यात् । अतस्तत्र तात्पर्यज्ञानस्यान्वयबोधहेतुत्वे कल्प्यमाने लाघवाच्छाब्दबोधत्वावच्छेदेनैव हेतुत्वं कल्प्यते, न तु नानार्थशब्दस्थलीयशाब्दबोधत्वावच्छेदेन, गौरवाद्, इति तात्पर्यावच्छेदकतयैव संसर्गस्य तात्पर्यज्ञाने भानान्न शब्दः प्रमाणम् ।

---

१. 'नुभवा' क. पाठः. २. 'मा' क. पाठः. ३. 'तसा' क. पाठः, ४. 'नं ल' क. पाठः. ५. 'हणाभा' क. पाठः.

न चानयनपदं लवणान्वितस्वार्थपरमिति सामान्यतस्तात्पर्यग्रहैः, शब्देन तु लवणानयनसंसर्गधीरिति न तात्पर्यस्यावच्छेदकतया प्रथमं ससर्गधीरिति वाच्यम् । अक्षैर्दीव्यतीत्युभयपदनानार्थस्थले दुरोदरक्रीडनसंसर्गपरमिदं वाक्यमिति विशेषतस्तात्पर्यग्रहोऽवश्यमङ्गीकार्यः । इतरथा दुरोदरैर्भासत इत्यनभिमतसंसर्गप्रतीत्यापत्तेः । ततश्च शाब्दबोधत्वावच्छेदेनैव विशेषतात्पर्यग्रहो हेतुः, लाघवाद्, इति न शब्दस्वातन्त्र्यमिति चेद्, न । अक्षैर्दीव्यतीत्यत्राप्यक्षपदं क्रीडनान्वितस्वार्थपरं, दीव्यतिपदं च दुरोदरान्वितस्वार्थपरमित्युभयतात्पर्यग्रहोऽपि विनिगमनाविरहेण हेतुः । दुरोदरक्रीडनसंसर्गस्तु वाक्यार्थ इति न शब्दस्वातन्त्र्यविघातः ।

किञ्च, तात्पर्यावच्छेदकतया संसर्गभानेऽपि[२] न तज्ज्ञानं संसर्गग्रहविरोधीति न प्रवृत्तिजननक्षममिति स्वातन्त्र्येण संसर्गभानार्थं शब्दप्रामाण्यमेष्टव्यम् । किं बहुना, तात्पर्यावच्छेदकतया ज्ञातस्यैव संसर्गस्य बोधकत्वेऽपि धारावाहिकप्रत्यक्षकरणस्य चक्षुष इव शब्दस्य प्रामाण्यमविरुद्धमिति दिक् ।

नन्वेवमपि, तात्पर्यावच्छेदकतया संसर्गग्रहे सति कथं शाब्दधीः, सिद्धेः परोक्षज्ञानत्वावच्छेदेन प्रतिबन्धकत्वादिति चेद्, न । प्रत्यक्षतो दर्शनेऽपि भूतले घटो घटवद् भूतलमिति

---

१. 'हः शाब्दबोधहतुः, न तु लवणानयनसंसर्गपरमिति' क. पाठः. २. 'ि त' क. पाठः.

वाक्यादर्थप्रतीतेरानुभविकत्वेन शाब्दसिद्धेरेव प्रतिबन्धकत्वकल्पनात् । तस्माच्छब्दः पृथक् प्रमाणमिति सङ्क्षेपः ॥

इति शब्दस्वातन्त्र्यवादः ।

अथाकाङ्क्षावादः ।

स च शब्द आकाङ्क्षादिमत्तया ज्ञात एवान्वयानुभवजनक इत्याकाङ्क्षादिज्ञानमपि शाब्दबोधे सहकारि । तत्र यस्य पदस्य यत्पदं विना स्वार्थान्वयानुभवजनकत्वाभावः[1], तस्य पदस्य तेन पदेन सह स एवान्वयानुभवजनकत्वाभाव[2] आकाङ्क्षा । न चैवं घटः कर्मत्वमित्यत्रापि घटपदस्यानयनपदं विनान्वयाननुभावकत्वात् तेन सह साकाङ्क्षता स्यादिति वाच्यम् । यस्य पदस्य यत्पदव्यतिरेकप्रयुक्तमन्वयाननुभावकत्वमिति विवक्षितत्वाद् । घटः कर्मत्वमित्यत्र नानयपद[3]प्रयुक्तमननुभावकत्वम् । तस्मिन् सत्यप्यन्वयाननुभवात् । किन्तु स्वरूपायोग्यत्वप्रयुक्तमिति भवति तद्व्युदासः । पदपदं च पदोपस्थितिपरम् । तेन स्वरूपसतः पदस्य स्वत एवाननुभावकत्वान्नेतरपदव्यतिरेकप्रयुक्तमननुभावकत्वमित्यसम्भव इत्यपास्तम् । न चैवमपि पटो भवतीत्यत्र पटपदस्य रक्तपदसाकाङ्क्षता स्यात्, पटपदोपस्थिते रक्तपदोपस्थितिव्यतिरेकप्रयुक्तत्वाद्

---

१. 'स्ववाक्यान्व' क. पाठः. २. 'यानुभव आ' क. पाठः. ३. 'यनप' ख. पाठः.

रक्तपदार्थान्वितपटपदार्थान्वयाननुभावकत्वस्येति वाच्यम्। समभिव्याहृतेति यत्पदविशेषणाद्, रक्तपदस्य च समभिव्याहाराभावान्न तत्पदेन साकाङ्क्षता। न चैवमपि पुरुषान्तरं प्रति जनितान्वयबोधस्य पुरुषान्तरं प्रति साकाङ्क्षता न स्याद्, अन्वयाननुभावकत्वाभावादिति वाच्यम्। यत्पुरुषीयेत्यन्वयानुभवविशेषणात्। न चैवमपि घटः कर्मत्वमित्यभेदान्वयाननुभवस्य कर्मत्वपदोपस्थितिव्यतिरेकप्रयुक्ततया क्रियाकर्मभावान्वयेऽपि साकाङ्क्षता स्यादिति वाच्यम्। यादृशेत्यप्यन्वयानुभवविशेषणात्। न चैवमपि द्विर्[२]जानीयामितीच्छायामेकान्वयबोधे सति निराकाङ्क्षतापत्त्या द्वितीयान्वयबोधो न स्यादिति वाच्यम्। सिद्धीच्छाविरहसहकृतेत्यप्यन्वयानुभवविशेषणात्। एवञ्च यत्पदोपस्थितेर्यत्पदोपस्थितिव्यतिरेकप्रयुक्तो यत्पुरुषीययादृशसिद्धीच्छाविरहसहकृतान्वयानुभवजनकत्वाभावः, तत्पुरुषीयतादृशसिद्धीच्छाविरहसहकृतान्वयानुभवे जनयितव्ये तत्पदोपस्थितेस्तत्पदोपस्थित्या सह तत्पुरुषीयतादृशसिद्धीच्छाविरहसहकृतान्वयानुभवजनकत्वाभावस्तत्पदोपस्थितिविषययोः पदयोराकाङ्क्षेति लक्षणनिष्कर्षः।

नन्वेवमपि, अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यतामित्यत्र राजपदस्य पुरुषपदेन साकाङ्क्षता स्यात्[३]। पुरुषपदार्थान्वितस्वार्थाननुभावकत्वस्य पुरुषपदव्यतिरेकप्रयुक्तत्वादिति चेद्, न।

---

१. 'याननुभावकत्वावि' क. पाठः. २. 'द्विर्वज्ञानी' क. पाठः. ३. 'त्। तत्पुरु' ख. पाठः.

तात्पर्यग्रह इष्टत्वात् । तदग्रहे तु तदभावादेव न तदन्वितस्वार्थबोधकतापत्तिः । नन्वेवं तात्पर्यग्रहस्य हेतुत्वे किमाकाङ्क्षाज्ञानेन । अयमेतीत्यत्र तात्पर्यग्रहाभावादेव पुरुषान्वयाननुभवोपपत्तेः । घटः कर्मत्वमित्यत्रापि स्वरूपायोग्यतयैवान्वयाननुभवसम्भवात् । जनितान्वयबोधे च वाक्ये परोक्षज्ञानत्वावच्छेदेनानुमितौ सिद्धेः प्रतिबन्धकत्वकल्पनादन्वयानुभवस्यैव प्रतिबन्धकत्वादन्वयाननुभवोपपत्तेः । तस्मादुक्तं[1]काङ्क्षाज्ञानं न हेतुरिति चेद्, न । सिद्धेः प्रतिबन्धकत्वं न साक्षाद्, ग्राह्याभावानवगाहित्वात् । ततश्च शाब्दज्ञानजनकीभूतान्वयानुभवाभावरूपाकाङ्क्षाज्ञानविघटकतयैव प्रतिबन्धकत्वं वाच्यमित्याकाङ्क्षाज्ञानस्य हेतुत्वमङ्गीकार्यम् । न च सिद्धौ जातायामपि तदनिश्चयेन सिद्ध्यभावज्ञानसम्भवात् सिद्धेः कथमाकाङ्क्षाज्ञानप्रतिबन्धकत्वमिति वाच्यम् । योग्यानामात्मविशेषगुणानां स्वरूपसतां स्वविषयसंशयविपर्ययविरोधित्वात् । वस्तुतस्तु—यथानुमितौ सिद्ध्यभावरूपा पक्षता स्वरूपसत्येव हेतुः, तथा शाब्दसिद्ध्यभावरूपाकाङ्क्षापि स्वरूपसत्येव हेतुः । न चैवमाकाङ्क्षाभ्रमाच्छाब्दज्ञानानुपपत्तिरिति वाच्यम् । इष्टत्वात् । अत एव घटः कर्मत्वमित्यादेः स्वरूपायोग्यतेति दिक् ।

केचित्तु—विभक्तिविशेषवत्पदसमभिव्याहार एवाकाङ्क्षा । सा च न स्वरूपसती हेतुः । पदान्तरसमभिव्याहारेऽपि तदश्रवणेऽन्वयबोधादर्शनात्, पदान्तरसमभिव्याहारेऽपि विभक्ति-

---

१. 'क्तं तदाका' ख. पाठः.

विशेषाभावेऽन्वयबोधाभावाच्च । (तस्मात्) तादृशाकाङ्क्षाज्ञानं हेतुरित्याहुः ॥

इत्याकाङ्क्षावादः ।

अथ योग्यतावादः ।

योग्यता च वाक्यार्थरूपा । सा च न स्वरूपसती हेतुः । प्रत्यक्षातिरिक्तज्ञानस्य विषयाजन्यत्वाद्, अतीतादिस्थले वाक्यार्थरूपायास्तस्या अभावाच्च । किन्तु संशयसाधारण्येन[1] तज्ज्ञानमेव[2] हेतुः । अत एव योग्यताभ्रमाच्छाब्दभ्रमः । किञ्च, शाब्दप्रमात्वावच्छेदेनानुगतस्य गुणान्तरस्याभावेन योग्यताप्रमाया एव गुणत्वेन हेतुत्वसिद्धौ 'यद्विशेषयोः कार्यकारणभावः, बाधकं विना तत्सामान्ययोरपी'ति न्यायेन योग्यताज्ञानत्वेन शाब्दज्ञानत्वेन (च) हेतुहेतुमद्भावकल्पनात्[3] । न च योग्यतासंशयस्यापि हेतुत्वे तस्य भ्रमतया न शाब्दप्रमायां तस्य गुणत्वसम्भव इति वाच्यम् । संशयस्याप्येककोटौ प्रमात्वेन गुणत्वसम्भवात् । ननु[4] वाक्यकारणीभूतवाक्यार्थप्रमैव गुणः । शुकादिवाक्येऽप्यैश्वरस्य तस्य सत्त्वात् । अतो न गुणानुरोधेन योग्यताज्ञानहेतुत्वसिद्धिरिति चेद्, न । फलोपपादकं हि फलाश्रय एव कल्पयितुं युक्तम् । अत एव स्वर्गोपपादकमदृष्टं स्व-

१. 'न्तु तत्संश' ख. पाठः. २. 'णं त' क. पाठः. ३. 'च ।' ख. पाठः. ४. 'च' ख. पाठः.

र्गाश्रय आत्मन्येव कल्प्यते । ततश्च शाब्दप्रमाश्रयगतस्यैव योग्यताज्ञानस्य[1] गुणत्वकल्पनं युक्तम् । अत एवायोग्यताज्ञानस्य प्रतिबन्धकतया तदभाव एव हेतुः, विशिष्टज्ञानत्वावच्छेदेनासंसर्गाग्रहस्य हेतुत्वकल्पनाद्, न तु योग्यताज्ञानं हेतुरित्यपास्तं, गुणत्वानुरोधेन योग्यताज्ञानस्य हेतुत्वावश्यम्भावात् । किञ्च शाब्दबोधहेतौ पदज्ञाने विषयतया[2] योग्यताया अवच्छेदकत्वमात्रकल्पनं युक्तं, न त्वभावस्य हेतुत्वकल्पनं, गौरवात् । अत एवेष्टपुरोवर्तिज्ञाने प्रवृत्तिहेतौ विषयतया वैशिष्ट्यमवच्छेदकं कल्प्यते, न तु भेदाग्रहरूपहेत्वन्तरमिति दिक् ।

मणिकृतस्तु—एकपदार्थसंसर्गेऽपरपदार्थनिष्ठात्यन्ताभावप्रतियोगित्वप्रमाविशेष्यत्वाभावो योग्यतेत्याहुः । नन्वत्रैकेति किं पदविशेषणमुत पदार्थविशेषणम् । नाद्यः । गच्छतीत्यादौ लडर्थकृतिवर्तमानत्वयोर्भिन्नपदोपस्थाप्यत्वाभावेन योग्यताविरहादन्वयबोधो न स्यात् । न द्वितीयः । प्रमेयत्वे प्रमेयत्वमित्यत्र पदार्थभेदाभावेन योग्यता न स्यादिति चेद्, न । एकपदार्थसंसर्गे तदाश्रयत्वाभिमतनिष्ठत्वस्य विवक्षितत्वात् । अत्र च शब्दवदाकाशमित्यत्राकाशरूपपदार्थस्य शब्दरूपपदार्थनिष्ठात्यन्ताभावप्रतियोगित्वप्रमाविशेष्यत्वाद् योग्यता न स्यादित्यत उक्तमेकपदार्थसंसर्ग इति । ततश्चाकाशसंसर्गः शब्दे ने-

१. 'स्यैव गु' क. पाठः. २. 'या अ' ख. पाठः.

त्यप्रतीतेर्[1]गकाशसंसर्गे शब्दनिष्ठात्यन्ताभावप्रतियोगित्वप्रमावि-शेष्यत्वाभावसत्त्वान्न तत्र योग्यताविरहः। ननु वृक्षः संयोगी-त्यत्र संयोगसंसर्गस्य वृक्षनिष्ठात्यन्ताभावप्रतियोगित्वादव्याप्तिः। न च संयोगसंसर्गरूपस्य समवायस्य वृक्षे सत्त्वान्न तन्निष्ठाभा-वप्रतियोगित्वमिति वाच्यम्। एवं सति वायू रूपवानित्यपि योग्यं स्यात्। यदि च समवायस्यैकत्वेन वायौ रूपसमवायस-त्त्वेऽपि रूपनिरूपितसमवायो नास्त्येवेति रूपसंसर्[2]गस्य वायुनि-ष्ठात्यन्ताभावप्रतियोगित्वमेवेति नातिव्याप्तिः। तर्हि वृक्षेऽप्य-ग्रावच्छेदेन संयोगनिरूपितसंसर्गाभावात् संयोगसंसर्गस्यापि वृक्षनिष्ठात्यन्ताभावप्रतियोगित्वादव्याप्तिरिति चेद्, न। अत्य-न्ताभाव[3]पदस्य विरोधिपरत्वात्। विरोधित्वं च प्रतियोग्यसमाना-धिकरणत्वम्। संयोगसंसर्[4]गात्यन्ताभावश्च प्रतियोगिसमानाधि-करण एवेति तादृशात्यन्ताभावप्रतियोगित्वेऽपि[5] संयोगसंसर्गस्य नाव्याप्तिः। न चैवमपि गन्धप्रागभावविशिष्टो[6] घटो गन्धवानि-त्यत्राव्याप्तिः, गन्धप्रागभावस्यापि प्रतियोगिसमानाधिकर-णत्वेनाविरोधितया गन्धसंसर्गस्य घटनिष्ठप्रागभावप्रतियोगित्वे-ऽपि विरोध्यप्रतियोगित्वादिति वाच्यम्। एककालावच्छेदेन प्र-तियोग्यसमानाधिकरण[7]त्वस्यैवात्र विरोधित्वेन विवक्षितत्वात्। गन्धप्रागभावश्च तादृश इति तत्प्रतियोगित्वाद् गन्धसंसर्गस्य,

१. 'त्याका' ग. पाठः. २. 'र्गे वा' ख. पाठः. ३. 'वप्रतियोगित्वे प' क. पाठः. ४. 'र्गस्यात्य' ग. पाठः. ५. 'पि संस' क. पाठः. ६. 'ष्ट' क. पाठः. ७. 'णस्यै' ख. पाठः.

नातिव्याप्तिः । संयोगसंसर्गात्यन्ताभावस्त्वेककालावच्छेदेन प्रतियोगिसमानाधिकरणत्वान्न विरोधीति तत्प्रतियोगित्वेऽपि संयोगसंसर्गस्य, नाव्याप्तिः । न चोक्ताभावप्रतियोगित्वाभाव इत्येवास्त्विति वाच्यम् । यन्मते प्रमात्वग्रहः प्रतिबन्धकतन्मतेनास्य लक्षणस्योक्तत्वात् । न चैवमपि सेकसंसर्गे आकाशश्च जलनिष्ठात्यन्ताभावप्रतियोगिनावित्यत्राकाशांशे प्रमारूपबुद्धिविशेष्यतया सेकसंसर्गस्य, जलेन सिञ्चतीत्यत्राव्याप्तिरिति वाच्यम् । यत्पदार्थसंसर्गे तादृशप्रमाविशेष्यत्वाभावः, तदंशे योग्यतेति विवक्षितत्वात् । एवञ्चांशभेदप्रान्तये एव विशेष्यपदमुपात्तमिति न तद्वैयर्थ्यमिति दिक् ।

इयं च योग्यता स्वरूपसत्येव हेतुः । न ह्यतीतादौ वाक्यार्थरूपयोग्यतावदुक्ताभावरूपयोग्यतापि नास्ति, येन तज्ज्ञानपर्यन्तापेक्षा स्यात् । एतेनैतद्योग्यताज्ञानाभावेऽप्येकपदार्थसंसर्गेऽपरपदार्थनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वप्रकारविशेष्यत्वाभावरूपाया अन्योन्याभावगर्भयोग्यताया ज्ञानेऽपि शाब्दबोधो न स्याद्, विनिगमनाविरहाद् द्वयोरपि प्रत्येकं हेतुत्वे चाननुगम इत्यपास्तम् । अत्यन्ताभावान्योन्याभावगर्भयोग्यतादीनां स्वरूपसतीनामेव हेतुत्वाद् गुणत्वाच्चेति दिक् । केचित्तु घनगर्जितस्थलेऽनुमितिवदाकस्मिकपदश्रवणमात्रादन्वयानुभवाद् वाक्यार्थरूपयोग्यताज्ञानमपि न हेतुः, किन्तु गुरुरप्ययोग्य-

---

१. 'मात्र' क. पाठः. २. 'श्चेत्य' क. पाठः. ३. 'यत्सं' क. पाठः. ४. 'र्थनि' खं. पाठः. ५. 'वादिग' क. पाठः. ६. 'पादियो' ख. पाठः.

तानिर्णयाभाव[1] एव हेतुरित्याहुः ॥

इति योग्यतावादः ।

अथासत्तिवादः ।

'आसत्तिश्चाव्यवधानेनान्वयप्रतियोग्युपस्थितिरि'ति मणिकृतः । गिरिर्भुक्तमग्निमान् देवदत्तेनेत्यनासन्नवाक्येऽ[2]प्यव्यवधानेनास्ति पदार्थोपस्थितिरित्यतिव्याप्तिनिरासायान्वयप्रतियोगीति । तत्र च परस्परान्वययोग्ययोः पदार्थयोर्नाव्यवधानेनोपस्थितिरिति भवति तद्व्युदासः । तावन्मात्रं च तत्रैवातिव्याप्तमित्यव्यवधानेनेति । अव्यवधानं च परस्परान्वयधीविरोधि[3]पदार्थोपस्थितिव्यवधानाभावः । तेन

"वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥"

इत्यादौ परस्परान्वययोग्ययोः वागर्थाविव सम्पृक्तौ पार्वतीपरमेश्वराविति पदार्थयोरव्यवधानेनोपस्थित्यभावेऽपि नाव्याप्तिः । नन्वेवमासत्तिज्ञानं हेतुरिति सिद्धान्तविरोधः, पदार्थोपस्थितिज्ञानस्यान्वयबोधाहेतुत्वादिति चेद्, अत्राहुः—अन्वयप्रतियोगिनोरुपस्थितिरनेनेति व्युत्पत्त्याव्यवधानेनान्वयप्रतियोग्युपस्थित्यनुकूलतात्पर्यस्यैवासत्तित्वेनाभिमतत्वात् । शुकादिवाक्येऽपि

---

१. 'श्च' ख. पाठः. २. 'क्येऽव्य' क. पाठः. ३. 'धी प' क. पाठः.

भगवत्तात्पर्यसत्त्वान्नाव्याप्तिः । न चैवमासत्तिभ्रमस्थलेऽपि भगवत्तात्पर्यसत्त्वादतिव्याप्तिरिति वाच्यम् । तत्रानासन्नत्वव्यवधानेण तदिच्छाया अव्यवहितत्वप्रकारकत्वानवधारणादिति दिक् । वस्तुतस्तु एतादृशतात्पर्यज्ञानस्य प्रकरणादिवद् वाक्यार्थतात्पर्यग्रह एवोपयोगो नान्वयबोधे, वाक्यार्थतात्पर्यग्रहे सत्येतद्विलम्बेनान्वयबोधविलम्बाभावात् । तस्मादव्यवहितान्वयप्रतियोग्युपस्थितिरेवासत्तिः । सा च स्वरूपसत्येव हेतुरिति दिक् ।

ननु प्रत्येकवर्णानुभवजनितसंस्कारैः प्रत्येकवर्णस्मृतिरेव भवति, न वर्णसमुदायात्मक(पद)ज्ञानम् । तदभावाच्च न पदार्थस्मृतिरिति कथमासत्तेरन्वयबोधाङ्गत्वमिति चेद्, न । तत्तद्वर्णानुभवजनितसंस्कारसचिवेनान्तिमवर्णश्रवणेन तावद्वर्णात्मकपदानुभवस्य ततोऽर्थस्मृतेश्चाविरोधात्[1] । नन्वेवमप्युत्तरोत्तरपदार्थस्मृत्या[2] पूर्वपूर्वपदार्थस्मृतिनाशादेकदा तावत्पदार्थस्मृत्यभावेन तावत्पदार्थसंसर्गबुद्ध्यसंभवेन कथमासत्तेरन्वयबोधाङ्गत्वमिति चेद्, न । तत्तत्पदानुभवजनितसंस्कारैरेकदा तावत्पदस्मृत्या युगपत् तावत्पदार्थोपस्थितावन्वयबोधाविरोधात् । नन्वेवमपि त्रिचतुरपदार्थस्मृत्यावान्तरवाक्यार्थबोधे[3] पुनरप्येवमवान्तरवाक्यान्तरार्थबोधे च जाते तदुभयवाक्यार्थस्मृत्यो[4] महावाक्यार्थबोधसम्भवात् तावत्पदस्मृतिपूर्वकतावत्पदार्थस्मृतिकल्पनं कि-

---

१. 'तेरप्यवि' ख. पाठः. २. 'मुत्त' ख. पाठः. ३. 'त्या वाक्या' क. पाठः. ४. 'त्यां' ख. पाठः.

र्णमिति चेद्, न । पदविशेषजन्यपदार्थोपस्थितेरेवान्वयबोधाङ्गत्वात् तथाकल्पनावश्यम्भावात् । यत्र तु श्रीः स्तादित्येकैकवर्णात्मकमेव पदद्वयं, तत्र प्रथमपदप्रत्यक्षानन्तरं द्वितीयपदप्रत्यक्षम् । ततो विनश्यदविनश्यदवस्थाभ्यां पदानुभवाभ्यां युगपत् पदार्थस्मृतिः । तथा च स्मृत्यान्वयधीसम्भवान्न समूहालम्बनस्मृत्यपेक्षेति दिक् ॥

इत्यासत्तिवादः ।

अथ शब्दाध्याहारवादः ।

ननु यदुक्तं पदविशेषजन्यपदार्थोपस्थितेरेवान्वयबोधाङ्गत्वात् नावत्पदस्मृतिरावश्यकीति, तदयुक्तम् । पदार्थोपस्थितिमात्रस्य लाघवेनान्वयबोधाङ्गत्वात् । अत एव द्वारमित्यादौ न पिधेहीति पदाध्याहारः, किन्तु तदर्थस्यैवाध्याहारः । न चैवं घटः कर्मत्वमानयनं कृतिरित्यत्रापि पदार्थोपस्थितिसत्त्वेनान्वयबोधः स्यादिति वाच्यम् । तावता विभक्तिविशेषासमभिव्याहृतपदजन्यपदार्थोपस्थितिरन्वयबोधाङ्गमस्तु । तादृशोपस्थितिश्चार्थाध्याहारेऽप्यविकला । न चैतदपेक्षया विभक्तिविशेषसमभिव्याहृतपदजन्यपदार्थोपस्थितेरेव लाघवादन्वयबोधाङ्गत्वं युक्तमिति नार्थाध्याहार इति वाच्यम् । एवमपि विभक्तिविशेषस-

---

१. 'स्या' ख. पाठः. २. 'मप्र' ख. पाठः. ३. 'ताज' क. पाठः. ४. 'ते' क. पाठः. ५. 'ङ्गत्वम' क. पाठः.

मभिव्याहृतपदत्वेनान्वयानुभावकत्वमङ्गीक्रियताम् । तत एव घटः कर्मत्वमित्यत्रान्वयबोधापत्तिवारणात् । न तु पदविशेषजन्यपदार्थोपस्थितेरप्यन्वयबोधाङ्गत्वं, गौरवात् । पिधेहीत्यत्रापि विभक्तिविशेषसमभिव्याहृतं पिधेहिपदमेवाध्याहृतद्वारपदार्थान्वितस्वार्थानुभावकं, पदानामुपस्थितपदार्थान्तरान्वितस्वार्थानुभावकत्वव्युत्पत्तेः । अत एव गङ्गायां घोष इत्यत्र लाक्षणिकमनुभावकमिति मते घोषपदस्यैव तीरान्वितस्वार्थानुभावकत्वमिति सिद्धान्तः । न चैवं गङ्गापदे[1] लक्षणा न स्यात्, परम्परयोपस्थितस्यापि तीरस्यान्वयबोधोपपत्तेरिति[2] वाच्यम् । विभक्तेः प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेः सप्तम्यर्थाधारत्वान्वयार्थं तत्र लक्षणावश्यकत्वात् । अत एवाकाशे शब्द इत्यत्राकाशपदात् समवायसम्बन्धेनोपस्थितस्यापि[3] आकाशस्यान्वयानुभवविषयत्वसम्भवादाकाशपदे शक्तिर्न स्यादित्यपास्तम् । तत्रापि विभक्त्यर्थान्वयार्थं शक्तेरावश्यकत्वात् । न चैवमपि पुष्पेभ्य इत्यत्र स्पृहयतिपदाध्याहार आवश्यकः, स्पृहयतिपदयोग एव चतुर्थ्या अनुशासनेन साधुत्वात् । तदर्थयोगेऽपि साधुत्वे पुष्पेभ्य इच्छतीत्यपि स्यादिति वाच्यम् । तावता क्वचित् साधुत्वार्थं पदाध्याहारेऽप्यन्वयानुभवार्थं[4] न तदपेक्षेत्यन्यत्रार्थाध्याहार एव युक्त इति चेद्, अत्रोच्यते — यदि विभक्त्यादिसमभिव्याहृतं पदमेव

१. 'देन ल' ख. पाठः. २. 'त्ति' क. पाठः. ३. 'स्या का' क. पाठः.
४. 'र्थं तदनपे' ख. पाठः.

तन्त्रं, तदा घटमानयनं कृतिरित्यत्राप्यन्वयानुभवः स्यात्। तत्रापि घटमिति विभक्तिविशेषसमभिव्याहृतपदस्य सत्त्वात्। अतो विभक्तिविशेषसमभिव्याहृतपदविशेषजन्यपदार्थोपस्थितेरप्यन्वयबोधाङ्गत्वमेष्टव्यमिति नार्थाध्याहारः। न चैवं मीमांसकेन पिधेहीत्युक्ते नैयायिकस्य द्वारमिति पदाध्याहारो न स्याद्, वक्तृतात्पर्यविषयीभूतं पदं नेति निश्चयेन तत्कल्पनासम्भवादिति वाच्यम्। तत्रापि पिधेहिपदं द्वारान्वयबोधानुकूलोपस्थितिमदभिहितमिति सामान्यतः पदजन्योपस्थितेरनुमानसम्भवात्। समानप्रकारकबाधस्यैव प्रतिबन्धकतया पदजन्योपस्थितित्वप्रकारे (?) सत्यपि सामान्यतस्तदनुमित्यविरोधात्। न चैवमपि द्वारादिपदार्थवाचकपदानामनेकत्वेन पदविशेषाध्याहारे मानाभाव इति वाच्यम्। संस्कारोद्बोधवशेन कदाचित् कस्यचिदध्याहारेण ततोऽर्थोपस्थित्यविरोधादिति दिक्॥

इति शब्दाध्याहारवादः।

अथ तात्पर्यवादः।

एवं तात्पर्यज्ञानमपि शाब्दबोधे हेतुः। अन्यथा नानार्थस्थले विनिगमनाभावापाताद्, गङ्गायां घोष इत्यत्र तात्पर्यग्रहे गङ्गापदमेव लक्षकं न घोषपदमिति लक्षकपदनियमानुपपत्तेश्च। तथा घोषाधारतायोग्यैतीरव्यतिरिक्तनिबिडद्रव्यान्तरल-

---

१. 'क्तिम' ख. पाठः. २. 'नं शा' ख. पाठः. ३. 'र्यग्रहणे ग' क. पाठः. ४. 'ग्यनि' क. पाठः.

क्षणयाप्यन्वयानुपपत्तिशान्तेर्लक्ष्यनियमानुपपत्तेश्च । न च तदर्थप्रतीतीच्छयोच्चरितत्वरूपं तात्पर्यं मौनिश्लोकादौ ग्रहीतुमशक्यमिति वाच्यम् । तदर्थप्रतीतीच्छया प्रतिसन्धीयमानत्वस्यैव तात्पर्यत्वात् । तच्च भगवत्तादृशेच्छाजन्यशुकादिप्रतिसन्धानविषयत्वेन शुकादिवाक्येऽप्यक्षतमिति. न तद्ग्रहदौर्भिक्ष्यमिति दिक् ।

नन्वेवं यत्र नानार्थस्थले वक्तुरुभयान्वयबोधे तात्पर्यं श्रोतुश्चोभयत्र तात्पर्यग्रहः, तत्रोभयान्वयबोधापत्तिः । न चेष्टापत्तिरिति वाच्यम् । सकृदुच्चरितस्य शब्दस्य सकृदर्थमात्रायकत्वव्युत्पत्तेः, एकं पदमेकदैकमर्थमेवानुभावयतीति व्याप्तेश्च । न च पुष्पवन्तादिपदे[2] व्युत्पत्तिव्याप्त्योर्व्यभिचार इति वाच्यम् । एकशक्त्यानेकोपस्थापकपदातिरिक्तस्थले तथापि व्यभिचाराभावाद्, इति चेद्, अत्र प्राञ्चः — उक्तव्युत्पत्तिव्याप्तिरूपविशेषदर्शनान्न वक्तुस्तथा तात्पर्यं, न वा श्रोतुस्तथा तात्पर्यज्ञानमित्याहुः । तदयुक्तम् । विशेषदर्शनशून्यस्थलेऽस्य वक्तुः श्रोतुश्च तथा तात्पर्यस्य तज्ज्ञानस्य च सम्भवाद्[3] उक्तोभयान्वयबोधस्यानिवार्यत्वाद्, गङ्गायां मत्स्यबोधावित्यत्र क्रमेणान्वयबोधे विनिगमनाविरहेणोभयान्वयबोधस्य युगपदङ्गीकार्यतया व्युत्पत्तिव्याप्त्योरसिद्धेश्च । तस्मादुभयतात्पर्यग्रह उभयान्वयबोधो नानिष्ट इति नव्याः ॥

इति तात्पर्यवादः ।

१. 'वदादि' क. पाठः. २. 'दे उभयत्र' ख. पाठः. ३. 'दुभ' क. पाठः.

अथ शब्दानित्यत्ववादः ।

नन्वेवमपि[1] न वक्तृतात्पर्याधीनं सर्वत्र शब्दप्रामाण्यम् । वेदस्य नित्यत्वेन तत्र वक्तुरभावात् । न च तस्य नित्यत्वमसिद्धं, वर्णानामनित्यत्वेन तत्समुदायात्मकवेदस्याप्यनित्यत्वादिति वाच्यम् । स एवायं गकार इति प्रत्यभिज्ञया गकारादेस्तावत्कालावस्थानसिद्धौ तन्नाशकाभावेन नित्यत्वसिद्धेः । तदुक्तं—'तावत्कालं[2] स्थितं चैनं कः पश्चान्नाशयिष्यती'[3]ति । न चेयं प्रत्यभिज्ञा तज्जातीयत्व[4]विषयिणीति वाच्यम्[5] । व्यक्त्यभेदविषयत्वे बाधकाभावात् । न च गकार उत्पन्न इत्याद्युत्पत्तिविनाशप्रत्यय एव बाधक इति वाच्यम् । उत्पादादिप्रतीतेर्व्यञ्जकध्वन्याद्युत्पादाद्यारोपरूपत्वात् । न च प्रत्यभिज्ञायास्तज्जातीयाभेदविषयत्वमुत्पादादिप्रतीतेरप्युत्पादादि[6]विषयत्वमित्युभयोरनारोपरूपत्वे सम्भवत्युत्पादादिप्रतीतेरारोपरूपत्वकल्पनमयुक्तमिति वाच्यम् । तर्ह्युत्पादादिप्रत्ययस्य परम्परया व्यञ्जकोत्पादादि[7]विषयत्वमस्तु, तावताप्युभयप्रमात्वसिद्धेः । तस्माद् वर्णा नित्या इति वेदे वक्तुरभावान्न वक्तृतात्पर्याधीनं सर्वत्र शब्दप्रामाण्यमिति चेद्, न । एवमपि विनिगमनाविरहान्न वर्णानां नित्यत्वसिद्धिः । प्रत्युतोत्पादादिप्रत्ययस्य परम्परया ध्वन्याद्युत्पादादिविषयकत्वे

---

१. 'पि व' क. पाठः. २. 'लं' क. पाठः. ३. 'चैवं प्र' क. पाठः. ४. 'यवि' ख. पाठः. ५. 'म् । वर्णाभे' क. पाठः. ६. 'ते ह्युत्पा' ख. पाठः. ७. 'द' क. पाठः.

परम्पराघटकतया ध्वन्यादेरपि तत्प्रतीतिविषयत्वं कल्प्यम् । प्रत्यभिज्ञायास्तु तज्जातीयाभेदविषयत्वे च गत्वं गकारोऽभेदश्च विषय इति नातिरिक्तविषयकल्पनम् । नचैवं विषयभेदाभावे क्वचित् सोऽयमिति, क्वचिच्च तज्जातीयोऽयमिति धीरित्यत्र किं नियामकमिति वाच्यम् । यत्र जातेः स्वरूपेण प्रतीतिस्तत्र सोऽयमिति धीः, यत्र तु जातित्वप्रकारकतत्प्रतीतिस्तत्र तज्जातीयोऽयमिति धीरिति गृहाण । किञ्च, सैवेयं गुर्जरीति प्रत्यभिज्ञया ध्वनिरपि नित्यः स्यात् । यदि च तदुत्पादादिप्रत्ययस्य तद्व्यञ्जकत्वाद्युत्पादादिविषयकत्वकल्पने गौरवात् सा प्रत्यभिज्ञा तज्जातीयत्वविषया, तदा प्रकृतेऽपि दीयतां दृष्टिः । अपि च तारत्वमन्दत्वरूपविरुद्धजातिमत्त्वमेकस्य गकारस्य न सम्भवतीति प्रत्यभिज्ञायास्तज्जातीयत्वविषयकत्वकल्पनमेव युक्तम् ।

ननु तारत्वमन्दत्वे न जाती, गत्वादिना सांकर्यप्रसङ्गात् । किन्तूपाधी । उपाध्योश्च परस्परपरिहारेण वर्तमानयोरपि भूतत्वमूर्तत्वयोरिवैकत्र समावेशो न विरुद्ध इति चेद्, न । उत्कर्षापकर्षरूपतया तारत्वमन्दत्वयोर्जातित्वसिद्धौ सांकर्यपरिहाराय गत्वादिव्याप्यर्ययोस्तयोर्नानात्वकल्पनात् । न चैवमननुगम इति वाच्यम् । सजातीयसाक्षात्कारप्रतिबन्धकतावच्छेदकत्वेन तारत्वस्य, सजातीयसाक्षात्कारप्रतिबन्ध्यतावच्छेदकत्वेन

---

१. 'त्वेऽपि ग' ख. पाठः. २. 'क्तं' क. पाठः. ३. 'यत्वक' क. पाठः. ४. 'कौ' ख. पाठः. ५. 'तत्तदु' ख. पाठः. ६. 'काद्यु' क. पाठः. ७. 'नागौ' ख.पाठः. ८. 'म' क. पाठः.

मन्दत्वस्य चानुगमात्। एतेन तारत्वादेर्जातित्वेऽस्मादयं तार इति सावधिकत्वं न स्यादित्यपास्तं, तादृशोपाधेरेव सावधिकत्वात्। किं बहुना, मध्यमगकारे पूर्वगकारापेक्षया तारत्वमुत्तरगकारापेक्षया च मन्दत्वमनुभूयते। तथाच पूर्वापरगकारयोर्मध्यमगकारस्य चैक्ये स्वस्मिन् स्वप्रतियोगिकयोस्तारत्वमन्दत्वयोर्विरोधाद् गकारभेदोऽवश्यं वाच्यः। तथा प्रतिपुरुषं गकारादिवैलक्षण्यमनुभवसिद्धम्। अन्यथा देवदत्तादनुमानं शब्दविशेषान्न स्यात्। अतः प्रतिपुरुषं गकारभेदोऽङ्गीकार्यः। न चैवं प्रतिपुरुषं गकारभेदे देवदत्तप्रभवत्वानुमापकजातिं विना गत्वस्य पुरुषान्तरगकारे वृत्तेः, गत्वं च विना तादृशजातेर्देवदत्तैकगकारे वृत्तेर्द्वयोश्च देवदत्तगकारे समावेशाज्जातिसाङ्कर्यं स्यादिति वाच्यम्। प्रतिपुरुषं गत्वादिजातेरपि नानात्वकल्पनादिति दिक्। तस्माद् वर्णानामनित्यतया वेदस्याप्यनित्यत्वात् तत्रापि वक्तृतात्पर्याधीनमेव प्रामाण्यमिति वेदतात्पर्याश्रयतयापि भगवत्सिद्धिरिति दिक्॥

इति शब्दानित्यत्ववादः।

अथ वेदपौरुषेयत्ववादः।

नन्वेवमस्तु वक्तृतात्पर्याधीनं वेदप्रामाण्यम्। तथापि नेश्वरसिद्धिः। तात्पर्यं हि तत्प्रतीतीच्छयोच्चरितत्वम्। ततश्च

---

१. 'धित्वा' क. पाठः. २. 'क' ख. पाठः.

पूर्वपूर्वाध्यापकोच्चारणादेवोत्तरोत्तरवेदप्रामाण्यसिद्धेः किमीश्वरेण । न चैवमर्थानभिज्ञाध्यापकोच्चारिताद् वेदादर्थप्रत्ययो न स्यादिति वाच्यम् । अर्थज्ञानवद्व्यासाद्युच्चारितजातीयत्वेन तत्राप्यर्थप्रतीत्युपपत्तेः । अन्यथा तवाप्यगतेः । इदानीन्तनवेदस्येश्वरानुच्चारितत्वादिति चेद्, न । तदर्थप्रतीतीच्छाजन्यमुच्चारणमेव तात्पर्यं, लाघवात् । मूर्खाध्यापकवेदोच्चारणमपि तदर्थप्रतीतिविषयकभगवदिच्छाजन्यमेवेति नास्मन्मते तत्रार्थज्ञानानुपपत्तिः । भवन्मते तु तदनुपपत्तिरपरिहार्येत्यनिच्छतापि भगवानङ्गीकार्यः । किञ्च, 'वेदाः पौरुषेयाः, वाक्यत्वाद्, भारतादिवाक्यवदि'त्यनुमानादपि भगवत्सिद्धिः । न चाप्रयोजकत्वम् । पौरुषेयत्वे तत्तद्वाक्यत्वस्याननुगततया प्रयोजकत्वासम्भवेन सामान्यतयानुगतत्वाच्च वाक्यत्वस्यैव प्रयोजकत्वात् । अतः सर्वज्ञमीश्वरं विनास्मदादिभिरत्रार्थान्तरासम्भवाद् भगवत्सिद्धिः ।

ननु किमत्र पक्षतावच्छेदकम् । वेदत्वमेवेति चेद्, न तावद् वेदत्वं जातिः । देवदत्तप्रभवत्वानुमापकजात्यादिना सङ्कगपत्तेः । नाप्यदृष्टार्थकशब्दत्वम् । स्मृत्यादावतिव्याप्तेः । किञ्च, किमत्र साध्यम् । पुरुषोच्चारितत्वं चेद्, वेदाध्यापकेनार्थान्तरम् । स्वतन्त्रपुरुषोच्चारितत्वं यदि, तदा पठ्यमा-

१. 'च' ख. पाठः. २. 'दार्थ' क. पाठः. ३. 'च' क. पाठः. ४. 'च' क. पाठः. ५. 'णं त' ख. पाठः. ६. 'स्मि' क. पाठः. ७. 'या' ख. पाठः. ८. 'यकत्वे' क. पाठः. ९. 'च' ख. पाठः. १०. 'त्वं वे' ख. पाठः. ११. 'द्, अध्यापना' क. पाठः.

नभारते व्यभिचारोऽशतो बाधश्च । नापि स्वतन्त्रपुरुषोच्चा[1]रितजातीयत्वम् । (तदा) वाक्यत्वेन लौकिकशब्दसाजात्यमादाय सिद्धसाधनमर्थान्तरं वा । स्वातन्त्र्या[2]निरुक्तेश्च नैतदनुमानादीश्वरसिद्धिरिति चेद्, अत्र मणिकृतः — शब्द[3]स्तदुपजीविप्रमाणातिरिक्तप्रमाणजन्यप्रमित्यविषयार्थकत्वे सति शब्दजन्यवाक्यार्थज्ञानाजन्यप्रमाणशब्दत्वं वेदत्वम् । तदेव पक्षतावच्छेदकम् । सजातीयोच्चारणानपेक्षोच्चा[4]रितजातीयत्वं साध्यम् । तच्च पठ्यमानभारतादावप्यस्तीति न व्यभिचारः । साजात्यं च समानानुपूर्वीकत्वेन विवक्षितम् । अतो न सिद्धसाधनादिकमित्याहुः । अत्र शब्दः साक्षात् परम्परया वा शब्दोपजीवि र्चं यत् प्रमाणं तदतिरिक्तं यत् प्रमाणं तज्जन्या या प्रमितिः तदविषयार्थकत्वे सतीति सत्यन्तार्थः । तत्र वेदरूपप्रमाणजन्यप्रमितिविषयार्थकतया 'यागः स्वर्गसाधनमि'त्यनुमानजन्यानुमितिविषयार्थकतया चासम्भवः स्यात् । अत उक्तं शब्दतदुपजीविप्रमाणातिरिक्तेति । उक्तानुमानस्य पक्षादिज्ञानार्थं शब्दोपजीवित्वेन शब्दोपजीविप्रमाणजन्यप्रमितिविषयार्थकत्वेऽपि तदनुपजीविप्रत्यक्षादिप्रमाणजन्यप्रमित्यविषयार्थकतया[5] वेदस्य नासम्भवः । तथा वेदरूपशब्दप्रमाणजन्यप्रमितिविषयार्थकत्वेऽपि शब्दा[6]तिरिक्तप्रमाणजन्यप्रमित्यविषयार्थकतया च नासम्भवः ।

ननु प्रमितिपदं स्वजन्यज्ञानानतिरिक्तविषयकज्ञानपरमिति वक्ष्यते । ततश्च 'ज्योतिष्टोमेन स्वर्गकामो यजेते'ति वाक्य-

---

१. 'च' ख. पाठः. २. 'न्त्र्य' क. पाठः. ३. 'व' क. पाठः. ४. 'च प्र' क. पाठः. ५. 'या ना' क. पाठः. ६. 'ब्दादति' क. पाठः.

जन्यज्ञाने स्वर्गसाधनत्वमात्रं प्रकारः । उक्तानुमानजन्यानुमितौ तु[1] स्वर्गसाधनत्वस्य साध्यतयानुमितेर्व्यापकतावच्छेदकप्रकारकत्वनियमेन स्वर्गसाधनत्वत्वमपि प्रकार इति तादृशानुमितेः स्वजन्यज्ञानातिरिक्तविषयकत्वेन स्वजन्यज्ञानातिरिक्तविषयकतादृशानुमितिविषयार्थकत्वेऽपि स्वजन्यज्ञानानतिरिक्त[2]विषयकज्ञानाविषयार्थकत्वमस्तीत्यसम्भवाभावात् तदुपजीव्यतिरिक्तत्वविशेषणमयुक्तमिति चेद्, न । तथापि साध्यसाधनभावसम्बन्धेन यागस्यापि स्वर्गसम्बन्धित्वाद् 'यागः स्वर्गवानि'ति यत्र साध्यते, तत्रानुमितेः स्वजन्यज्ञानानतिरिक्तविषयतया तादृशानुमितिविषयार्थकत्वेनासम्भववारणाय तद्विशेषणावश्यंभावात् ।

नन्वेवमपि चैत्रशब्दं श्रुत्वा प्रयुक्ते 'चैत्रे[4]ः शब्दायत' इति वाक्येऽतिव्याप्तिः । तत्र[5] वाक्ये चैत्रशब्दस्य स्वसाक्षात्कारद्वारोपजीव्यत्वेन शब्दोपजीवितादृशवाक्यरूपप्रमाणजन्यप्रमितिविषयार्थ[6]कत्वेऽपि शब्दानुपजीविप्रमाणजन्यप्रमित्यविषयार्थकत्वसत्त्वाच्छब्द[7]जन्यज्ञानजन्यत्वेऽपि शब्दजन्यवाक्यार्थज्ञानाजन्यप्रमाणशब्दत्वरूपोत्तरदलस्यापि सत्त्वादिति चेद्, न। शब्दजन्यवाक्यार्थज्ञानोपजीवित्वस्यैव शब्दोपजीविपदेन विवक्षितत्वात् । तादृशवाक्यस्य शब्दोपजीवित्वेऽपि शब्दजन्यवाक्यार्थ-

१. 'तु स्वर्गसाधनत्वम' क. पाठः. २. 'नाति' क. पाठः. ३. 'न' क. पाठः. ४. 'त्रश' क. पाठः. ५. 'त्र चै' ख. पाठः. ६. 'र्थत्वे' क. पाठः. ७. 'व्दज्ञा' क. पाठः.

ज्ञानानुपजीवित्वेन[1] शब्दोपजीव्यतिरिक्तं प्रमाणं तदेव[2] वाक्यं, तज्जन्यप्रमितिविषयार्थकत्वेन सत्यन्ताभावान्न तत्रातिव्याप्तिः ।

नन्वेवमपि चैत्रवाक्यादर्थं[3] प्रतीत्य 'चैत्रवाक्यादमुमर्थं प्रत्येमी'ति[4] प्रयुक्ते तस्मिन् वाक्येऽतिव्याप्तिः । तस्य वाक्यस्य शब्दजन्यवाक्यार्थज्ञानसापेक्षत्वेन शब्दोपजीवितया शब्दोपजीवितादृशवाक्यैरूपप्रमाणजन्यप्रमितिविषयार्थकत्वेऽपि शब्दानुपजीविप्रमाणजन्यप्रमितिविषयार्थकत्वात् । न चैवमपि शब्दजन्यवाक्यार्थज्ञानाजन्यत्वरूपोत्तरदलाभावान्नातिव्याप्तिरिति वाच्यम्[5] । तत्र चं[6] शब्दजन्यवाक्यार्थज्ञानस्य स्वानुव्यवसायद्वारा जनकत्वेऽपि साक्षाज्जनकत्वाभावेन तादृशवाक्यार्थज्ञानाजन्यत्वस्यापि सत्त्वादिति चेद्, न । स्वजन्यज्ञानान्यूनविषयकशब्दजन्यवाक्यार्थज्ञानसापेक्षत्वं[7] शब्दोपजीवित्वमिहं[8] विवक्षितम् । चैत्रवाक्यादमुमर्थं जानामीति वाक्यस्य चैत्रवाक्यजन्यवाक्यार्थज्ञानसापेक्षत्वेऽपि चैत्रवाक्यार्थज्ञानस्य स्वजन्यज्ञानविषयीभूतवाक्यार्थज्ञानाविषयकतया स्वजन्यज्ञानान्यूनविषयकशब्दजन्यज्ञानसापेक्षत्वाभावेन विवक्षितशब्दोपजीव्यतिरिक्तं प्रमाणं तदेव वाक्यं, तज्जन्यप्रमितिविषयार्थकत्वेन सत्यन्ताभावान्न तत्रातिव्याप्तिः ।

---

१. 'जीवनाच्छब्दो' क. पाठः. २. 'वं वाक्यजन्य' क. पाठः. ३. 'दमुमर्थ' क. पाठः. ४. 'क्ते वा' क. पाठः. ५. 'क्यज' ख. पाठः. ६. 'चैत्रश' क. पाठः. ७. 'स्वान्यू' क. पाठः. ८. 'त्वमिह श' ख. पाठः. ९. 'ति' ख. पाठः. १०. 'जवा' ख. पाठः.

नन्वेवं यागेतराजन्यस्वर्गो यागजन्यः तदितराजन्यत्वे सति जन्यत्वादित्यनुमानजन्यानुमितिविषयार्थकत्वाद् वेदस्यासम्भवः । तत्रानुमितौ वेदवाक्यजन्यज्ञानाविषयस्यापि पक्षतावच्छेदकस्य विषयतया स्वजन्यज्ञानन्यूनविषयकशब्दजन्यज्ञानसापेक्षत्वेऽपि लिङ्गपरामर्शस्य, स्वजन्यज्ञानान्यूनविषयकशब्दजन्यज्ञानसापेक्षत्वाभावेन विवक्षितशब्दोपजीव्यतिरिक्तं प्रमाणं स एव लिङ्गपरामर्श इति तज्जन्यप्रमितिविषयार्थकत्वेन वेदस्यासम्भव इति चेद्, न । प्रमितिपदस्य स्वजन्यज्ञानानतिरिक्तविषयकज्ञानपरतया वक्ष्यमाणत्वेनोक्तानुमितेः शब्दानुपजीविप्रमाणजन्यत्वेऽपि वेदजन्यप्रमित्यनतिरिक्तविष(यार्थ?य)कत्वाभावेन विवक्षितप्रमित्यविषयार्थकत्वसत्त्वान्नासम्भवः ।

केचित्तु—शब्दपदं* यथाश्रुतमेव । न चैवं चैत्रः शब्दायत इत्यत्रातिव्याप्तिः । उत्तरदले वाक्यार्थपदमविवक्षितमिति वक्ष्यमाणतया शब्दजन्यज्ञानजन्ये तस्मिन् वाक्य उत्तरदलाभावादेवातिव्याप्त्यभावात् । चैत्रवाक्यादनुमर्थं जानामीति वाक्यस्यापि परम्परया शब्दजन्यज्ञानजन्यतया तत्राप्युत्तरदलाभावादेवातिव्याप्त्यनवकाशादित्याहुः ।

प्रथमप्रमाणपदं च शब्दोपजीविपदस्य यथाश्रुतपरत्वे वेदवाक्यार्थज्ञानजन्यहविराद्युपादानगोचरप्रवृत्तिसाध्यादृष्टविशे-

---

१. 'क्तार्थत्वप' क. पाठः. २. 'वेनैवा' ख. पाठः. ३. 'प्रमा' क. पाठः. ४. 'र्थरूपशब्दज' क. पाठः.

---

* शब्दोपजीविपदमिति पाठ्यं भाति ।

षजन्यतया चक्षुरादेरपि परम्परया शब्दोपजीवकतया शब्दोपजीविचक्षुरादिजन्यप्रमितिविषयार्थकत्वेऽपि लौकिकवाक्यस्य तदुपजीव्यतिरिक्तप्रमितिविषयार्थकत्वाभावादतिव्याप्तिः स्यादित्यत उक्तम्। ततश्च यस्य प्रमाणस्य शब्दमूलकत्वं प्रामाण्यव्यवस्थापकं, तदेव शब्दोपजीवीति लभ्यते। यागः स्वर्गसाधनमित्यनुमानस्य वेदमूलकत्वेनैव प्रामाण्यावधारणम्। अन्यथा चैत्यवन्दनं स्वर्गसाधनमित्यनुमानतुल्यतापत्तेः। चक्षुरादेस्त्वन्वयव्यतिरेकादिनैव प्रमाजनकत्वमवधार्यत इति न शब्दप्रामाण्याधीनं प्रामाण्यमिति शब्दोपजीव्यतिरिक्ततया तज्जन्यप्रमितिविषयार्थकतया लौकिकवाक्यस्य न तत्रातिव्याप्तिः। एतेन 'स्वजन्यज्ञानान्यूनविषयशब्दजन्यवाक्यार्थज्ञानसापेक्षत्वरूपशब्दोपजीवित्वस्य चक्षुरादावभावेन चक्षुरादिजन्यप्रमितिविषयार्थके लौकिकवाक्येऽतिव्याप्त्यभावेन प्रमाणपदस्य तथा विवक्षा न युक्ता। न च प्रमाणपदस्योक्तविवक्षापक्षे शब्दोपजीविपदं यथाश्रुतमेव, चैत्रवाक्याप्रामाण्येऽपि चैत्रवाक्यादमुमर्थं जानामीति वाक्यस्य भ्रमप्रमासाधारणचैत्रवाक्यार्थज्ञानबोधकस्य प्रामाण्यसम्भवेन प्रामाण्यार्थं तदनुपजीवनेनातिव्याप्त्यभावादिति वाच्यम्। तथापि चैत्रवाक्यादयमर्थः प्रमीयत[2] इति वाक्येऽतिव्याप्तेरपरिहारेण तादृशविवक्षाया आवश्यकत्वादि'ति नव्योक्तं[3]मपास्तम्। तादृशवाक्ये सत्यन्तसत्त्वेऽपि शब्दजन्यवाक्यार्थज्ञानाजन्यत्वरूपोत्तरदलाभावेन तत्रातिव्याप्त्यभावादित्याहुः।

---

१. 'त्वाद' क. पाठः. २. 'मित' ख. पाठः. ३. 'क्तमिदम' क. पाठः.

शब्दोपजीविपदस्य स्वजन्यज्ञानान्यूनविषयकेत्यादिविवक्षायां तु प्रथमप्रमाणपदं स्वरूपकीर्तनपरमिति दिक् ।

अदृष्टादिभिरपि तादृशैर्वेदार्थप्रमाजननादसम्भव इत्यत उक्तं द्वितीयप्रमाणपदम् । न चैवमपि मनसा वेदार्थप्रमाजननादसम्भव इति वाच्यम् । प्रमाणपदस्यासाधारणप्रमाणपरत्वाद्, वेदजन्यवाक्यार्थज्ञानजनने मनसः सहकारित्वेऽप्यसाधारणप्रमाणत्वाभावान्नासम्भवः । न चैवमहं वेदार्थं जानामीत्यनुव्यवसाये मनस इन्द्रियत्वेनापि जनकतया साधारण्याभावाद् वेदस्य तादृशानुव्यवसायविषयार्थकत्वेनासम्भव इति वाच्यम् । तादृशानुव्यवसायजनने शब्दजन्यवाक्यार्थज्ञानसापेक्षत्वेन मनसः शब्दोपजीव्यतिरिक्तत्वाभावात्, तादृशानुव्यवसाये वेदार्थज्ञानस्यापि विषयतया वेदजन्यवाक्यार्थज्ञानातिरिक्तार्थविषयकत्वेन विवक्षणीयप्रमितित्वाभावाच्च, तादृशानुव्यवसायविषयार्थकत्वेऽपि वेदस्य नासम्भवः । प्रमितिपदं च स्वजन्यज्ञानानतिरिक्तविषयकज्ञानपरम् । तेन प्रमेयत्वसामान्यप्रत्यासत्तिजन्यप्रमितिविषयतया योगजधर्मसहकृतमनोजन्यप्रमितिविषयतया च वेदार्थस्य नासम्भवः । तादृशप्रमित्योर्वेदजन्यज्ञानातिरिक्तविषयैकतया तादृशप्रमितिविषयार्थकत्वेऽपि विवक्षितप्रमित्यविषयार्थकत्वसत्त्वात् । न चैवमप्यप्रसिद्धिः, वेदजन्यज्ञानानतिरिक्तविषयैकज्ञानस्य शब्दतदुपजीविप्रमाणातिरिक्तप्रमाणाजन्यत्वादि-

---

१. 'नस' ख. पाठः. २. 'पि' ख. पाठः. ३. 'यत' ख. पाठः. ४. 'त्वात्' ख. पाठः. ५. 'यज्ञा' क. पाठः.

ति वाच्यम्। तादृशप्रमाणजन्यस्वजन्यज्ञानानतिरिक्तार्थविषयकज्ञानविषयार्थकं लौकिकवाक्यजातं प्रसिद्धं, तदन्यत्वे सतीत्यर्थात्। यदि च देवताप्रसादादिना कस्यचिद् वेदार्थमात्रविषयकं ज्ञानं मनसा जन्यते, तदा तद्विषयार्थकत्वमादायासम्भववारणाय द्वितीयप्रमाणपदं मनोव्यतिरिक्तप्रमाणपरं बोध्यम्। अर्थपदं च तात्पर्यविषयीभूतार्थपरम्। तेन दृष्टार्थवेदभागे नाव्याप्तिः, सहस्रशाखस्यापि वेदस्यापूर्व एव तात्पर्यात्। सत्यन्तमदृष्टार्थकस्मृतावतिव्याप्तम्। अत उक्तं शब्दजन्येत्यादि।

ननु जन्यज्ञानाजन्यप्रमाणशब्दत्वमित्येतावतैव स्मृत्यतिव्यातिनिरासेन शब्दपदं व्यर्थम्। न चैवमजन्यज्ञानाप्रसिद्ध्या परमते जन्यपदव्यावर्त्याप्रसिद्ध्यापत्तिरिति वाच्यम्। अस्य पौरुषेयत्वानुमाने पक्षतावच्छेदकनिर्वचनत्वेन तत्रोपरञ्जकस्यापि जन्यपदस्य दानाविरोधात्। अतः शब्दपदमनर्थकमिति चेद्, न। नञ्व्यत्यासेन शब्दाजन्यवाक्यार्थज्ञानजन्यत्वमुत्तरखण्डार्थ इति वक्ष्यते। तत्र शब्दपदाभावे परस्याजन्यज्ञानाप्रसिद्धेः शब्दपदवैयर्थ्यात्। वाक्यार्थपदं तूपरञ्जकमात्रम्। अयोग्यशब्दे तादृशप्रमाणजन्यप्रमित्यविषयार्थकत्वेन सत्यन्तस्यापि सत्त्वादतिव्यातिवारणाय चरमप्रमाणपदम्। वेदार्थानुमापकलिङ्गपरामर्शेऽतिव्याप्तिवारणाय चरमशब्दपदम्। न च स्वर्गो यागजन्य इत्यनुमानस्य शब्दजन्यवाक्यार्थज्ञानजन्यत्वेन तत्र

---

१. 'र्थवि' क. पाठः.

नातिव्याप्तिरिति वाच्यम् । तथापि सुखदुःखादिकं विचित्रकारणजन्यं विचित्रकार्यत्वादित्यनुमाने परिशेषाद् धर्माधर्मसाधकेऽतिव्याप्तिवारणाय शब्दपदावश्यम्भावात् । नन्वेवमप्यर्थज्ञानवदध्यापकोच्चारितवेदेऽव्याप्तिः, तस्य शब्दजन्यवाक्यार्थज्ञानजन्यत्वात् । न च तादृशशब्दजातीयत्वं विवक्षितं, साजात्यं चानुपूर्व्येति नातिप्रसङ्ग इति वाच्यम् । तथापि व्युत्क्रमेण शुकोच्चारिते वेदवाक्येऽतिव्याप्तिः । न च नञ्व्यत्यासेन शब्दाजन्यवाक्यार्थज्ञानजन्यत्वं विवक्षितमिति वाच्यम् । शुकवाक्यस्यापि परमेश्वरतादृशवाक्यार्थज्ञानजन्यतयातिव्याप्तितादवस्थ्यादिति चेद्, न । शब्दाजन्यवाक्यार्थज्ञानवत्कण्ठताल्वाद्युच्चारितप्रमाणजातीयत्वस्य विवक्षितत्वात् । एवञ्च शब्दाजन्यवाक्यार्थज्ञानं यद्यपि भगवतोऽस्ति, तथापि शुकेन व्युत्क्रमोच्चारितं वेदवाक्यं न तादृशवाक्यार्थज्ञानवद्भगवत्कण्ठताल्वाद्युच्चारितम् । यद्यपि शुकस्य कण्ठताल्वादिनोच्चारितं, तथापि न शुकस्य वाक्यार्थज्ञानवत्त्वमिति न तत्रातिव्याप्तिः । वेदसमानानुपूर्वीकं तु वेदवाक्यं सङ्ग्राह्यमेव । लीलापरिगृहीतविग्रहतादृशवाक्यार्थज्ञानवद्भगवत्कण्ठताल्वाद्युच्चारितसमानानुपूर्वीकत्वात् । अत एव पठ्यमानवेदेऽपि नाव्याप्तिः । स्मृतावतिव्याप्तिवारणाय शब्दाजन्येति । यदि चैवमपि देवताप्रसादलब्धवेदार्थज्ञानवत्प्रणीतस्मृ-

---

१. 'च' ख. पाठः. २. 'च' ख. पाठः. ३. 'त' क. पाठः. ४. 'क्यं ता' क. पाठः. ५. 'च' ख. पाठः. ६. 'द्युच्च' क. पाठः. ७. 'वत्क' क. पाठः.

तावतिव्याप्तिः, तदा देवताप्रसादाजन्यत्वेनापि वाक्यार्थज्ञानं विशेषणीयम्। यदि च वेदातिरिक्तमपि भगवत्कृतं सङ्केतग्राहकमङ्गीक्रियते, तदा तदन्यत्वेनापि विशेषणीयम्।

वस्तुतस्तु पक्षतावच्छेदकातिप्रसक्तिर्न दोषाय, सङ्केतग्राहकवाक्यस्यापि पक्षत्वेंऽशतः सिद्धसाधनाद्यनवकाशात्। न च वाक्यमात्रं पक्षीक्रियताम्। मणिकृन्मतेंऽशतः सिद्धसाधनत्वस्यादोषत्वादिति वाच्यम्। सम्प्रदायमतेनैतदनुमानस्योक्तत्वादिति दिक्।

नन्वेवमपि वाक्यत्वहेतोर्लाघवादुच्चारितत्वमात्रं व्यापकं, न तु स्वतन्त्रपुरुषोच्चारितत्वम्। ततश्चाध्यापकोच्चारणमूलकत्वमेव सिध्यति। न तु भगवदुच्चारितत्वमिति कथं भगवत्सिद्धिरिति चेद्, न। लौकिकवाक्यजन्यज्ञाने कदाचिदैनाश्वासः, वेदवाक्यजन्यज्ञाने तु न कदाप्यनाश्वास इत्युभयसिद्धम्। तच्च लौकिकवाक्याद् वेदवाक्यस्य किञ्चिद्वैलक्षण्यं विना न संभवति। तच्च वैलक्षण्यं नित्यत्वेन, दोषाजन्यतया, नित्यज्ञानवत्प्रणीततया वा वाच्यम्। तत्राद्यः पक्षो न सम्भवति, वर्णानामनित्यत्वप्रतिपादनात्। अतः सजातीयोच्चारणानपेक्षनित्यज्ञानवदुच्चारितत्वेनैव वेदानां तज्जन्यज्ञाने न कदाप्यनाश्वास इत्युपेयमिति सर्वज्ञभगवत्सिद्धिरप्रत्यूहा। न च मन्वादिस्मृतिष्विव नित्यज्ञानवदजन्यत्वेऽपि वेदेष्वाश्वासः किं न स्यादिति वाच्यम्। मन्वादिष्वपि सर्वज्ञभगवत्प्रणीतवेदमूलकत्वनिश्चयादेव। अत

१. 'दाद्यज' ख. पाठः. २. 'तादिग्रा' ख. पाठः. ३. 'ग्रहवा' क. पाठः. ४. 'न्नाश्वा' ख. पाठः. ५. 'वक्तव्यम्' ख. पाठः. ६. 'त्वापा' क. पाठः.

एवाधुनिकसङ्ग्रहलिखितेषु केषुचिद् वाक्येषु श्रुतिमूलकत्वानिश्चयात् कदाचिदनाश्वासः । तस्माद् भगवत्प्रणीतश्रुतिमूलकतयैव स्मृतिष्वाश्वास इति नित्यज्ञानाश्रयो भगवानङ्गीकार्य इति दिक् ॥

इति वेदपौरुषेयत्ववादः ।

अथोच्छिन्नशाखावादः ।

एवं स्मृतेर्वेदमूलतयैव प्रामाण्यमित्युक्तम् । तत्र कासाञ्चित् स्मृतीनां मूलभूता श्रुतिः प्रत्यक्षतो नोपलभ्यते । सा किं श्रुतिर्नित्यानुमेया, किं वा स्मृतिप्रणयनकाले प्रत्यक्षा सतीदानीमुच्छिन्नेति विवादे प्राभाकराः—काण्वमाध्यन्दिनतैत्तिरीयादिभेदेनानेकासु शाखासु तत्तदध्यापकपरम्परया स्वरमात्रेणापि भ्रेषरहिततया प्रतायमानासु कासाञ्चिच्छाखानां स्वरूपत एवोच्छेदोक्तिरयुक्ता । ततश्च प्रत्यक्षवेदमूलकत्वेन वेदमूलकत्वेन चोभयसिद्धस्मृतिभिन्ना स्मृतिर्वेदमूला, अदृष्टार्थकस्मृतित्वात्, प्रत्यक्षवेदमूलकस्मृतिवदित्यनुमानेन वेदमूलकत्वं सिध्यद् विद्यमानस्यैव वेदस्य स्वार्थानुभवजननद्वारा मूलत्वं स(म्भ?म्भा)व(य)ति, न तूच्छिन्नस्येति परिशेषान्नित्यानुमेयवेदमूलकत्वमादायैव सिध्यति । अत्र च 'वैसर्जनीयं वासोऽध्वर्यवे (द)-

---

१. 'द' क. पाठः.

दातीत्यादिलोभमूलकस्मृतौ बाधवारणाय वेदामूलकत्वेनेत्यादि। अंशतः सिद्धसाधनवारणाय प्रत्यक्षवेदमूलकभिन्नत्वविशेषणम्। एवं नित्यानुमेयवेदसिद्धौ तस्य त्वदभिमतेश्वरकर्तृकत्वासम्भवाद् वेदान्तरस्यापि तद्वन्न तत्कर्तृकत्वमिति वेदकर्तृतया नेश्वरसिद्धिः। नन्वानुपूर्वीविशेषविशिष्टतया ज्ञातस्यैव पदस्य स्वार्थोपस्थितिद्वारानुभावकत्वम्। अन्यथा नदी दीनेत्यादावर्थविशेषप्रतीतिर्न स्यात्। अतो नित्यानुमेयत्वे वेदस्य कथं ततोऽर्थविशेषप्रतीतिः, आनुपूर्व्या ज्ञातुमशक्यत्वादिति चेद्, न। घटकलशादिपदानां घटान्वयानुभावकत्वं न घटकलशादिपदत्वेन। अननुगतत्वात्। किन्तु तदर्थज्ञापकत्वेन ज्ञाततया, अनुगतत्वात् सामान्यत्वाच्च। अत एव किमृषभपदं वृषभपदं वानेनोच्चारितमिति सन्देहेऽपि पुंगवरूपार्थज्ञापकं पदमनेनोच्चारितमिति निश्चयादन्वयधीः। न चैवमानुपूर्वीज्ञानस्यानुपयोग इति वाच्यम्। तस्यापि तदर्थज्ञापकत्वज्ञान एवोपयोगात्। न केवलं शाब्दस्थले तदर्थज्ञापकत्वज्ञानादर्थधीः, अपि तु ज्ञायमानकरणमात्रे। अत एवालोकत्वधूमत्वसंशयेऽपि वह्निव्याप्यत्वज्ञानादनुमितिः। न चैवं कदाप्यनुच्चारितस्य कथं वाक्यत्वमिति वाच्यम्। मौनिश्लोकवदनुच्चारणेऽपि वाक्यत्वोपपत्तेरित्याहुः।

अत्रोच्यते—तदर्थज्ञापकत्वज्ञानादन्वयानुभवे घटमानयेत्यत्रैव घटः कर्मत्वमित्यत्राप्यन्वयधीः स्यात्। अतो विभक्त्यादिसमभिव्याहृतपदत्वेनैवानुभावकत्वमिति न नित्यानुमेयादर्थधीरिति न तस्य स्मृतिमूलत्वसंभव इति स्मृतिप्रणयनकाले

१. 'स्यार्थो' क. पाठः. २. 'स्य त' ख. पाठः. ३. 'का' ख. पाठः.

पठ्यमानादेव वेदादर्थं प्रतीत्य स्मृतिप्रणयनमिति वाच्यम् । स चेदानीमनुपलम्भादुच्छिन्न इत्यवसीयते । ननु विभक्त्यादिसमभिव्याहृततत्तत्पदत्वस्याननुगततया विशेषतया च नानुभवजनकतावच्छेदकत्वं, किन्त्वन्वयधीविरोधिपदान्यपदत्वमेवानुगतत्वात् सामान्यत्वाच्चानुभवजनकतावच्छेदकम् । तच्च नित्यानुमेयवेदेऽप्यक्षतमिति चेद् , न । घटः कर्मत्वमित्यादावप्यभेदान्वयबोधसंभवेन तत्तदन्वयधीविरोधिपदान्यपदत्वमेव तथेति त्वयापि वाच्यमित्यननुगमस्तुल्यः । पदानां तत्तदन्वयधीविरोधित्वं च विभक्तिविशेषाद्यसमभिव्याहारादेवावसेयमिति लाघवाद् विभक्त्यादिसमभिव्याहृतपदत्वेनैवानुभावकत्वम् । यदि च विभक्त्यादिसमभिव्याहारो नानुभवजनकतावच्छेदकः, सहकारिणोऽवच्छेदकत्वे दण्डादिसहकृतचक्रत्वादिनैव कारणत्वमित्येककारणपरिशेषापत्तिरिति मतं , तर्हि घटः कर्मत्वमित्यत्रैव विभक्त्यादिसमभिव्याहाररूपसहकार्यभावान्न नित्यानुमेयवेदादर्थधीरिति न तस्य स्मृतिमूलत्वम् । प्रयोगश्च — विवादाध्यासितस्मृत्यनुमितो वेदोऽध्ययनविषयो वेदत्वात् प्रत्यक्षवेदवदिति दिक् !

यत्तु सहस्रशाखाध्यायिषु व्यासादिषु जाग्रत्सूच्छेदकथनमयुक्तम् , अतो विप्रकीर्णतैव तस्य वेदस्य युक्तेति भट्टमतं[3], तत् तथैव । भरतखण्डेऽध्ययनाभावनिश्चयादुच्छिन्नत्ववाचोयुक्तिरिति दिक् ।

---

१. 'यसं' क. पाठः. २. 'यवि' क. पाठः. ३. 'तम् । तथै' क. पाठः.

नन्वेवमपि मन्वादिभिरेव तपोविशेषलब्धसार्वज्ञ्यैः स्मृतिः प्रणीतेति तत्र समाश्वाससम्भवात् कृतं स्मृतिमूलभूतवेदवक्तृतया भगवत्कल्पनयेति चेद्, न। प्रतिप्रलयमनेकसर्वज्ञकल्पनादेकस्यैव सर्वज्ञस्य सर्वकालानुयायिनः कल्पना ज्यायसीति दिक् ॥

इत्युच्छिन्नशाखावादः।

अथ प्रलयवादः।

ननु प्रलये मानाभावान्नानेकसर्वज्ञकल्पनमिति चेद्, न। यद्येक एव सर्वज्ञः कश्चित् कल्प्यते, तर्हि स एवास्मदभिमत ईश्वर इत्यवेहि। वस्तुतस्तु[2] प्रलये मानाभावोऽसिद्धः[3]। घटप्रागभावः कार्यद्रव्यानाधारवृत्तिः अभावत्वात् सुखादिप्रागभाववद् इत्यनुमानस्यैव तत्र मानत्वात्। अत्र प्रागभावमात्रस्य पक्षत्वे शब्दादिप्रागभावेऽशतः सिद्धसाधनं स्यात्। अतो घटेति। घटाभावमात्रस्य पक्षत्वे घटात्यन्ताभावस्याकाशादिवृत्तित्वादंशतः सिद्धसाधनम्। अतः प्रागिति। न चैवमप्याकाशवृत्तितयार्थान्तरमिति वाच्यम्। घटप्रागभावस्य कालकपालान्यतरवृत्तेर्बाधादेवार्थान्तरत्वाभावात्[4]। साध्ये च प्रलयकालस्यापि नित्यद्रव्याधिकरणतयोद्देश्यासिद्धिवारणाय कार्यपदम्। दृष्टान्ते साध्यसिद्धये द्रव्यपदम्। न चैवमपि कपालेऽपि कदाचित् कार्य-

---

१. 'क' क. पाठः. २. 'स्तु न प्र' क. पाठः. ३. 'वः। घ' क. पाठः. ४. 'रबाधात्' क. पाठः.

द्रव्याधिकरणत्वाभावसत्त्वात् कपालवृत्तितयार्थान्तरमिति वाच्यम् । कार्यद्रव्याधिकरणभिन्नवृत्तित्वस्यैव साध्यत्वात् । अन्योन्याभावस्य चाव्याप्यवृत्तित्वाभावेन कपालस्य कार्यद्रव्याधिकरणप्रतियोगिकान्योन्याभाववत्त्वाभावात् । न चैवमप्यन्यब्रह्माण्डवर्तिकार्यद्रव्याधिकरणतया सिषाधयिषितकालस्यापि बाध इति वाच्यम् । कार्यपदस्यैतद्ब्रह्माण्डवर्तिकार्यपरत्वात् । न च कालस्यापि कार्यद्रव्याधिकरणतया तद्भिन्नत्वाभावाद् बाध इति वाच्यम् । सिषाधयिषितखण्डप्रलयात्मककालोपाधेः कार्यद्रव्यानधिकरणतया तद्भिन्नत्वेन बाधाभावात् । नन्वभावत्वहेतोः कार्यद्रव्यानधिकरणप्रलयकालादिप्रतियोगिकान्योन्याभावे व्यभिचारः, अन्योन्याभावस्य प्रतियोगितावच्छेदकेन विरोधात् कार्यद्रव्यानधिकरणत्ववति प्रलयादाववृत्तेरिति चेद्, न । प्रलयकालः कार्यद्रव्यानधिकरणभिन्न इति प्रतीत्यभावेन देशतया तस्य तादृशान्योन्याभावानधिकरणत्वेऽपि प्रलयेऽपि कार्यद्रव्यानधिकरणान्योन्याभाव इति प्रतीतेः कालतया तदधिकरणत्वाविरोधात् । अन्यथा प्रलये तादृशान्योन्याभावाभावे तस्य नित्यत्वानापत्तेरिति दिक् ।

एवं श्रुत्यादिकमपि प्रलयसद्भावे प्रमाणमुदाहर्तव्यम् । तस्मात् प्रतिप्रलयमनन्तसर्वज्ञकल्पनाद् वरमेक एव नित्यः सर्वज्ञो वेदवक्तेति कल्पनमिति स एव वक्तास्माकमीश्वर इत्य-

---

१. 'प्येतद्ब्रह्माण्डव्यतिरिक्तब्र' ख. पाठः. २. 'र्यान' ख. पाठः. ३. 'कर्तेति' ख. पाठः. ४. 'नं युक्तमि' ख. पाठः. ५. 'व वेदव' ख. पाठः.

नवद्यमिति ॥

इति प्रलयवादः ।

अथ विधिवादः ।

अयं च वेदः प्रवर्तकज्ञानजननद्वारा यागादिषु प्रवर्तक इति प्रवर्तकं ज्ञानं निरूप्यते । तत्र भौट्टाः—'यजेत स्वर्गकाम' इत्यादौ लिङादेर्यद्यप्याख्यातत्वेन स्वर्गादिभाव्यका यागादिकरणिका प्रयाजादीतिकर्तव्यताकार्थभावना वाच्या । तथापि शब्दभावनाभिधादिपदाभिधेया प्रवर्तनापि वाच्या । तदाहुः—

"अभिधां भावनामाहुरन्यामेव लिङादयः ।
अर्थात्मभावना त्वन्या सर्वाख्यातेषु गम्यते॥"

इति । लिङादय एवाभिधाख्यां भावनां प्रवर्तनामभिदधते । अर्थात्मा अर्थः प्रयोजनं तदाप्नोतीत्यर्थात्मा । स्वर्गादिभाव्यकेति यावत् । तादृशी भावना तु सर्वाख्यातवाच्येत्यर्थः । तस्याश्च शब्दभावनायाः पुरुषप्रवृत्तिर्भाव्या । शक्तिग्रहः करणम् । तदभावे प्रवर्तनाज्ञानस्यैवानुदयेन प्रवृत्त्यसिद्धेः । अर्थवादस्त्वितिकर्तव्यता, प्ररोचनां विनालसानां प्रवृत्त्यसम्भवात् । तदाहुः—

"लिङोऽभिधा सैव च शब्दभावना भाव्या च तस्याः पुरुषप्रवृत्तिः ।
सम्बन्धबोधः करणं तदीयं प्ररोचना चाङ्गतयोपयुज्यते ॥"

---

१. 'भ' क. पाठः.

इति । प्ररोचना स्तुत्यर्थवादः । तादृशप्रवर्तना विध्यर्थः । तज्ज्ञानं च प्रवृत्तिहेतुः । न च तस्यां प्रमाणाभाव इति वाच्यम् । लिङादयः स्वनिष्ठव्यापारद्वारकाः, व्यापारभिन्नत्वे सति परनिष्ठव्यापारजनकत्वात्, चक्रादिभ्रमिजनकदण्डादिवदित्यनुमानस्यैव तत्र प्रमाणत्वात् । अत्र चक्रनिष्ठभ्रमिजनकदण्डभ्रमौ व्यभिचारवारणाय व्यापारभिन्नत्व इति । स्वनिष्ठभ्रमिजनके दण्डे तद्वारणाय परनिष्ठेति । तस्माल्लिङादौ पुरुषप्रवृत्त्यनुकूलः प्रवर्तनाख्यो व्यापारोऽङ्गीकार्यः, तज्ज्ञानं च प्रवर्तकमित्याहुः । तदयुक्तम् । एवं सति चैत्यं वन्देतेत्यत्रापि तादृशप्रवर्तनाज्ञानसम्भवात् प्रवृत्त्यापत्तिः । न च तत्र यजेतेत्यत्रेव स्वभाव्यपुरुषप्रवृत्तेरिष्टसाधनत्वाभावेन[1] परम्परयापीष्टसाधनत्वज्ञानाभावान्न प्रवृत्तिरिति वाच्यम् । तस्यावश्यकत्वादिष्टसाधनताज्ञानमेव प्रवर्तकमस्तु । किञ्चोक्तानुमाने[2] स्वनिष्ठपदं व्यर्थम् । न च व्यापके न व्यर्थतेति वाच्यम् । हेताविव व्याप्तिग्रहानुपयोगरूपबीजसाम्यात् । तस्मादिष्टसाधनताज्ञानद्वारतयैव लिङादेः प्रवर्तकत्वमिति प्रवर्तनायामेव न प्रमाणमिति दिक् ।

नन्वस्तु तर्ह्यार्थभावनारूपकृतिगतेष्टसाधनताज्ञानमेव प्रवर्तकम्[3] । अस्तु तादृशेष्टसाधनत्वं च विध्यर्थः । न च विभक्तेः प्रकृत्यर्थगतस्वार्थबोधकत्वव्युत्पत्तेः प्रत्ययार्थभूतमिष्टसाधनत्वं प्रकृत्यर्थयागान्वितमेव प्रतीयेत, न तु प्रत्ययार्थकृ-

---

१. 'चेरपीष्ट' ख. पाठः. २. 'ने नि' क. पाठः. ३. 'म् । ता' ख. पाठः.

त्यन्वितमिति वाच्यम्। तै(स्या?र्ह्या)ख्यातार्थस्य वर्तमानत्वादे-
र्देवदत्तो गच्छतीत्यादावपि कृत्यन्वयो न स्यात्। यदि च बाध-
काभावे सति विभक्तेः प्रकृत्यर्थगतस्वार्थबोधकता, तर्ह्येकपदो-
पात्तेत्वप्रत्यासत्त्यपेक्षयैकप्रत्ययोपात्तत्वप्रत्यासत्तेर्बलीयस्त्वेनेष्टसा-
धनत्वस्य कृत्यन्वयस्यैवौचित्यात्। न च लोके पाकादिगतक्रि-
येष्टसाधनताज्ञानं विना पाकादिकृतिगतेष्टसाधनताज्ञानं नेति
तत्र प्राथमिकक्रियेष्टसाधनताज्ञानादेव प्रवृत्तिसिद्धेर्न कृतीष्टसा-
धनताज्ञानस्य प्रवर्तकत्वकल्पनमिति वेदेऽपि न कृतीष्टसाधन-
ताज्ञानं प्रवर्तकमिति वाच्यम्। तथापि विधिनानन्तरङ्गप्रत्यास-
त्त्या कृतीष्टसाधनत्वे बोधिते तावता प्रवृत्तिसिद्धेः पश्चात् कृ-
तीष्टसाधनत्वोपपादकतया कल्पितमपि क्रियेष्टसाधनत्वं न प्रवृ-
त्तिहेतुरिति लोके क्रियेष्टसाधनताज्ञानस्य प्रवर्तकत्वेऽपि वेदे
कृतीष्टसाधनताज्ञानमेव प्रवर्तकमिति चेद्, न। लोकवेदयोर-
नुगतसम्भवेनाननुगतकल्पनमयुक्तम्। ततश्च कृतीष्टसाधनता-
ज्ञानस्यैव प्रवर्तकत्वे भावियौवराज्यादावपि प्रवृत्तिः स्यात्। त-
द्विषयकृतेरिष्टसाधनत्वज्ञानात्। न चेदानीन्तनकृतिसाध्यताज्ञा-
नमपि प्रवर्तकमिति कल्प्यत इति वाच्यम्। कारणद्वयकल्पना-
गौरवादिष्टसाधनत्वविषयककृतिसाध्यताज्ञानमेव सर्वत्र प्रवर्तक-
मिति कल्पनीयमिति कृतौ कृतिसाध्यताज्ञानासम्भवात् क्रि-
याविषयकेष्टसाधनत्वविषयककृतिसाध्यताज्ञानमेव प्रवर्तकमिति
दिक्।

---

१. 'तथाचाख्या' क. पाठः. २. 'त्तप्र' क. पाठः. ३. 'ति वा' क. पाठः. ४. 'नाभा' क. पाठः.

प्राभाकरास्तु — पाकं कृत्या साधयानीतीच्छया प्रवर्तत इत्यविवादम् । सा चेच्छा कृतिसाध्यत्वप्रकारिका क्रियाविषयिणीति कृतिसाध्यत्वप्रकारकक्रियाविषयकज्ञानसाध्या वाच्या, इच्छायाः स्वसमानप्रकारकज्ञानसाध्यत्वनियमात् । ततश्च कृतिसाध्यतांप्रकारकं ज्ञानं कृतिसाध्यत्वप्रकारकचिकीर्षाद्वारा कृतौ प्रवृत्तौ हेतुः । ननु कृतिसाध्यत्वप्रकारकेच्छापेक्षया कृतीच्छैव लाघवात् प्रवृत्तिहेतुः, कृतीच्छा च कृतीष्टसाधनताज्ञानादिति कृतीष्टसाधनताज्ञानमेव प्रवर्तकम् । न चैवं भिन्नविषयिण्याः कृतीच्छायाः पाके प्रवर्तकत्वे ततः पाक इवान्यत्रापि प्रवृत्त्यापत्तिः । अतः समानविषयिण्याः कृतिसाध्यत्वप्रकारिकायाः पाकचिकीर्षाया एव पाके प्रवर्तकत्वं वाच्यमिति कृतिसाध्यताज्ञानस्य हेतुत्वसिद्धिरिति वाच्यम् । पाकगोचरकृतीच्छाया अपि पाकविषयैकत्वेन समानविषयकत्वाविरोधात् समानविशेष्यकत्वस्य गौरवेणातन्त्रत्वात् । अतो लाघवात् कृतीच्छैव प्रवर्तिकेति तद्धेतुभूतं कृतीष्टसाधनताज्ञानमेव प्रवर्तकमिति चेद्, न । पाकजनककृतीच्छाया इव कृतिविषयत्वप्रकारकपाकेच्छाया अपि हेतुत्वमस्तु । विनिगमनाविरहात् तावतापि कृतिसाध्यताज्ञानस्य हेतुत्वमक्षतमेव । किञ्च, कृत्यसाध्यताज्ञानं प्रतिबन्धकमित्यविवादम् । तदभावस्य हेतुत्वकल्पने गौरवात् कृतिसाध्यताज्ञानमेव हेतुः ।

---

१. 'च्छा' क. पाठः. २. 'ताज्ञा' क. पाठः. ३. 'नहे' ख. पाठः. ४ 'यत्वे' क. पाठः.

नन्वेवं कृतिसाध्यताज्ञानस्य प्रवर्तकत्वे जीवनादृष्टज-न्यकृतिसाध्यताज्ञानात् प्राणादिसञ्चाराय प्राणादौ प्रवृत्त्यापत्तिः। न च जीवनादृष्टादेव प्राणसञ्चारोपपत्तेः जीवनयोनिकृतावेव न मानमिति वाच्यम्। धावतः पुरुषस्य यत्नोत्कर्षेण श्वासोत्कर्षद-र्शनेन प्राणसञ्चारमात्रे यत्नस्य हेतुत्वसिद्धौ सुषुप्तिकालीनप्राण-सञ्चारे यत्नान्तरासम्भवाज्जीवनयोनियत्नसिद्धेः। न चैवमपि प्रा-णादेरयोग्यत्वान्न कृतिविषयत्वमिति वाच्यम्। रेचकादिना[1] श्वाससञ्चारानुकूलकृतेः प्राणादावनुभवसिद्धतया तस्य कृत्यवि षयत्वाभावात्। तस्मात् कृतिसाध्यताज्ञानस्य प्रवर्तकत्वे प्राणा-दौ प्रवृत्त्यापत्तिरिति चेद्, न। चिकीर्षाधीनकृतिसाध्यताज्ञान-स्यैव प्रवर्तकत्वाङ्गीकारात्। जीवनयोनिकृतेश्च चिकीर्षाधीन-त्वाभावान्न प्राणादौ प्रवृत्त्यापत्तिः। न चैवमपि कृतिसाध्यता-ज्ञानं गमनादिनान्तरीयके श्रमेऽस्तीति तत्रापि प्रवृत्त्यापत्तिरिति वाच्यम्। तथापि श्रमस्य दुःखतया तत्र चिकीर्षानुदयाद् द्वा-राभावेन कृत्यसम्भवात्। यत्र तु मल्लादीनां श्रमेऽपीष्टसाधनता-ज्ञानं तत्र चिकीर्षायां बाधकाभावात् प्रवृत्त्यापादनमिष्टमेव।

नन्वेवमपि कृतिसाध्यताज्ञानादनिष्टसाधनतया ज्ञातेऽपि प्रवृत्त्यापत्तिरिति चेद्, न। इष्टसाधनतालिङ्गककार्यताज्ञानस्य[2] प्रवर्तकत्वाङ्गीकारात्। न चैवं निष्फले सन्ध्यावन्दनादौ प्रवृ-त्तिर्न स्यात्, तत्रेष्टसाधनतालिङ्गककार्यताज्ञानस्याभावादिति वा-च्यम्[3]। नित्यस्थले वेदाधीनकार्यताज्ञानस्यैव प्रवर्तकत्वस्वीका-

---

१. 'योग्यत्वा' ख. पाठः. २. 'ङ्गका' क. पाठः. ३. 'नाभा' ख. पाठः.

रात् । न चैवमननुगम इति वाच्यम् । प्रवृत्तिमात्रे कार्यताज्ञानं सामान्यसामग्री । काम्यस्थले काम्यसाधनतालिङ्गककार्यताज्ञानं[1] नित्यस्थले[2] च वेदाधीनकार्यताज्ञानं[3] च विशेषसामग्री । न चैवमप्यन्यकृतिसाध्यताज्ञानात् प्रवृत्त्यापत्तिः[4] । यदि च स्वकृतिसाध्यताज्ञानमेव, तथापि भावियौवराज्यादौ प्रवृत्तिः स्यादिति वाच्यम् । इदानीन्तनमत्कृतिसाध्यताज्ञानस्यैव प्रवर्तकत्वात् ।

नन्वेवमपि मधुविषसम्पृक्तान्नभोजने सञ्जातबाधस्यापि प्रवृत्त्यापत्तिः, तस्यापि तृप्तिरूपसुखसाधनत्वेनेष्टसाधनतालिङ्गककार्यताज्ञानविषयत्वात् । न च तत्रानिष्टसाधनताज्ञानेन कृत्यनुत्पादात् कृतिसाध्यताज्ञानमेव नेति वाच्यम् । कृतिसाध्यताज्ञानं हि यदीदानीं मया क्रियेत, तदोत्पद्येतेत्येवमाकारकम् । तादृशस्य च कृत्यनुत्पादेऽपि सम्भवात् । अतः सञ्जातबाधस्यापि तत्र प्रवृत्तिप्रसङ्ग इति चेद्, न । बलवदनिष्टाननुबन्धीष्टसाधनतालिङ्गककार्यताज्ञानस्यैव विशेषसामग्रीत्वात् ।

नन्वेवमिष्टसाधनताज्ञानमेव प्रवर्तकमङ्गीक्रियताम् । कृतं सामग्रीद्वयकल्पनेनेति चेद्, नित्यस्थले फलाभावेनोक्तस्यैवादर्तव्यत्वात् । नन्वेवमपि कृत्यनन्तरभविष्यत्तारूपकृतिसा-

---

१. 'ङ्गका' क. पाठः. २. 'ले वे' क. पाठः. ३. 'नं वि' ख. पाठः. ४. 'त्तिरिति वाच्यम् । य' क. पाठः ५. 'त्पा' क. पाठः.

ध्यता पाकस्यासिद्धतादशायां दुर्ज्ञेया । सिद्धतादशायां तु सिद्धे कृत्यनुत्पादाद् उत्पन्नमपि कृतिसाध्यताज्ञानमकिञ्चित्करमिति चेद्, न । पाको मत्कृतिसाध्यः मत्कृतिमन्तरेणासत्त्वे सति मदिष्टसाधनत्वादित्यनुमानादसिद्ध एव पाके कृतिसाध्यताज्ञानसंभवात् ।

नन्वेवं प्राणपञ्चकसञ्चारस्थलसाधारणं श्रमसाधारणं च कृतिसाध्यताज्ञानमात्रं न प्रवर्तकमिति स्वेच्छाधीनकृतिसाध्यत्वं साध्यम् । तावन्मात्रमपि भावियौवराज्यादौ न प्रवर्तकमिति स्वेच्छाधीनेदानीन्तनमत्कृतिसाध्यत्वं साध्यम् । ततश्च प्राणपञ्चकसञ्चारे भावियौवराज्यादौ च हेतोर्व्यभिचारः । तत्र मत्कृतिमन्तरेणासत्त्वे सति मदिष्टसाधनत्वरूपहेतोः सत्त्वात् स्वेच्छाधीनेदानीन्तनमत्कृतिसाध्यत्वरूपसाध्याभावाच्चेति चेद्, न। हेतावपि चिकीर्षाधीनेदानीन्तनमत्कृतिमन्तरेणेति विवक्षितत्वात् ।

नन्वेवमप्यानुषङ्गिक ओदनादिमध्यगतमत्स्यादिभोजने विवक्षितहेतुमति स्वेच्छाधीनकृतिसाध्यताविरहाद् व्यभिचारः। न च हेतावपि स्वचिकीर्षाधीनमत्कृतिमन्तरेणेति विवक्षया तद्वारणमिति वाच्यम् । तथा सतीष्टसाधनत्वांशवैयर्थ्यापातात्, श्रमादौ स्वेच्छाधीनकृतिमन्तरेणासत्त्वे सतीति हेतोरभावेन व्यभिचाराभावात् । न च मास्तु तर्हीष्टसाधनत्वांश इति वा-

---

१. 'णं च कृतिश्च' क. पाठः.

च्यम् । तथा सतीष्टसाधनतालिङ्गककार्यताज्ञानासम्भवेन काम्ये प्रवृत्तिर्न स्यादिति चेद्, न । अन्येच्छाधीनमत्कृतिसाध्यत्वे सति यन्मदिष्टसाधनं तदन्यत्वे सतीत्यपि विशेषणात् । एवञ्च श्रमस्याप्यन्येच्छाधीनमत्कृतिमन्तरेणासत्त्वे[1] सति यन्मदिष्टसाधनं तदन्यत्वमस्तीति तत्र व्यभिचारवारणायेष्टसाधनत्वादिकम् । नन्वेवमपि यत्रोक्तहेतुमत्येव तदभाववत्त्वभ्रमस्तत्र स्वेच्छाधीनकृतिसाध्यत्वाभावाद् व्यभिचार इति चेद्, न । तादृशेष्टसाधनत्वेन ज्ञातत्वस्यैव लिङ्गत्वात् । वस्तुतस्तु व्यभिचारिणोऽप्यस्माल्लिङ्गाद् व्यभिचारास्फूर्तिदशायां कार्यतानुमित्या सर्वत्र प्रवृत्तिरिति पराभिमतत्वात् । नन्वेवमपि कालविशेषान्तर्भावेन व्याप्तिग्रहासम्भवात् कथमनुमानप्रवृत्तिरिति चेद्, न । सामान्यव्याप्तिज्ञानात् पूर्वानवगतोऽपि[2] विशेषः सिध्यतीति मतेनैतदनुमानात् । नन्वेवं स्वर्गकामस्य मम यागविषयकं कार्यमिति कार्यताज्ञानात् प्राक् कथं याग इष्टसाधनताज्ञानम् । इष्टसाधनताज्ञानस्य तन्मते विध्यर्थत्वाभावाद् इति चेद्, न । यागस्य स्वर्गसाधनत्वाभावे स्वर्गकामकृतिविषयत्वान्वययोग्यतया स्वर्गकामकृतिविषयत्वान्वयितावच्छेदकतया विध्यर्थत्वाभावेऽपीष्टसाधनत्वस्य घटेन जलमाहरेत्यत्र जलाहरणान्वयितावच्छेदकतया घटे छिद्रेतरत्वस्येव प्रतीतौ पश्चाद् यागो मत्कृतिसाध्यः मत्कृतिमन्तरेणासति मदिष्टसाधनत्वादित्यनुमानसम्भ-

---

१. 'त्वे य' क. पाठः. २. 'ते' क. पाठः.

वादिति पराभिमतत्वात्। नन्वेवमपि कृतः क्रियमाणो वा पाको न पक्षः। तत्रेदानीन्तनमत्कृतिसाध्यतासाधने बाधात्। नापि भावी पाकः, तस्याज्ञानादिति चेद्, अत्र मणिकृतः—सिद्धपाके पाकत्वं गृहीत्वा पाकत्वाश्रय इदानीन्तनमत्कृतिसाध्य इति साध्यमाने सिद्धे बाधादसिद्ध एव साध्यं सिध्यति। पक्षतावच्छेदकसामानाधिकरण्येन हेतुज्ञानस्यैवानुमित्यङ्गत्वादित्याहुः। नन्विदानीन्तनेच्छाविषयसाधनत्वघटितहेतोः सिद्धे बाधादसिद्धस्य चाज्ञानात् कथं पक्षधर्मताधीः, तदभावाच्च कथमनुमितिरिति चेद्, न। सिद्धपाकत्वेन बाधेऽपि पाकत्वेन सिद्धपाक एव हेतुज्ञानं नानुपपन्नम्। समानप्रकारकबाधज्ञानस्यैव तन्मते प्रतिबन्धकत्वे तन्त्रत्वात्। न चैवं साध्यमपि सिद्ध एव पाके पाकत्वेन सिध्येदिति वाच्यम्। उत्सर्गतः प्रमाणानामबाधितज्ञानजननस्वाभाव्यादसिद्ध एव पाके साध्यं सिध्येदित्याहुः। वस्तुतस्तु अयं पाकः पाकपूर्ववर्ती पाकत्वात् प्राक्तनपाकवदित्यनुमानादनागतपाकसिद्धौ तत्पक्षीकारेणोक्तसाध्यसाधने बाधकाभावादिति दिक्। बालस्य स्तन्यपानादाविष्टसाधनतालिङ्गककार्यतानुमानं च त्वन्मत इष्टसाधनतानुमितिवत् कार्यबलात् कल्पनीयम्। अतः कृतिसाध्यत्वमेव विध्यर्थः, तज्ज्ञानं च प्रवर्तकमित्याहुः।

अत्र तार्किकाः—यदुक्तं कृतिसाध्यताज्ञानं प्रवृत्तौ सामान्यसामग्री, काम्यप्रवृत्तौ बलवदनिष्टाननुबन्धीष्टसाधनतालिङ्गककार्यताज्ञानं नित्यप्रवृत्तौ वेदाधीनकार्यताज्ञानं च विशे-

षसामग्रीति । तदयुक्तम् । बलवदनिष्टाननुबन्धीष्टसाधनत्वविषयककार्यताज्ञानत्वेनैव सर्वत्र प्रवर्तकत्वोपपत्तौ प्रवृत्तिकारणताश्रयद्वयकल्पने गौरवात् । नित्यस्थलेऽपि यथेष्टसाधनताज्ञानस्य कारणत्वं तथा वक्ष्यते । किञ्च, वृष्टीच्छायां लाघवादुपायेच्छात्वावच्छेदेन साक्षादिष्टसाधनताज्ञानस्य हेतुत्वकल्पनादुपायचिकीर्षायामपीष्टसाधनताज्ञानं साक्षादेव हेतुः, न तु कृतिसाध्यतानुमित्युपक्षीणम् । अतः कृतिसाध्यताविषयकमिष्टसाधनताज्ञानमेव चिकीर्षाद्वारा प्रवर्तकम् । नन्वेवमुपायचिकीर्षायामुपायेच्छात्वेनेष्टसाधनाताज्ञानस्य हेतुत्वेऽप्युपायचिकीर्षात्वेनेष्टसाधनतालिङ्गकं कार्यताज्ञानमपि हेतुरिति तदप्युपायचिकीर्षाद्वारा प्रवर्तकमस्त्विति चेद्, न । उपायचिकीर्षात्वस्य कार्यतानवच्छेदकत्वात् । तथाहि — चिकीर्षात्वावच्छेदेन कृतिसाध्यताज्ञानमात्रमेव कारणं, न त्विष्टसाधनतालिङ्गककार्यताज्ञानं, भोगचिकीर्षायां तदभावात् । उपायेच्छायामिष्टसाधनताज्ञानं कारणम् । ततश्च सामान्यविशेषसामग्रीभ्यामेवोपायचिकीर्षोपपत्तावुपायचिकीर्षात्वेनेष्टसाधनतालिङ्गककार्यताज्ञानस्य[1] साध्यसाधनताभावाकल्पनात् । अतो नेष्टसाधनतालिङ्गककार्यताज्ञानस्याप्युपायचिकीर्षाद्वारा प्रवृत्तिहेतुत्वम् । किन्तु बलवदनिष्टाननुबन्धीष्टसाधनताविषयककृतिसाध्यताज्ञानमेव[2] सर्वत्र प्रवर्तकमिति दिक् ।

---

१. 'नसा' ख. पाठः. २. 'कार्यता' क. पाठः.

ननु कथमिष्टसाधनत्वं कृतिसाध्यत्वं चैकस्मिन्नेकदा ज्ञातुं शक्यम्। साधनत्वस्य सिद्धधर्मत्वात् साध्यत्वस्य चासिद्धधर्मत्वादुभयोर्विरोधादिति चेद्, नै। नह्येकस्मिन् क्षण एवात्र साधनत्वसाध्यत्वे अवगन्तव्ये[2], येन विरोधः स्यात्। किन्तु सिद्ध्यनन्तरं साधनतायोग्यस्येदानीन्तनकृतिसाध्यत्वमेव ज्ञेयमित्यविरोधात्। न चेदानीमिष्टसाधनत्वज्ञानस्यैव प्रवर्तकत्वे कथमविरोध इति वाच्यम्। सत्यम्। इदानीन्तनत्वमिच्छान्वयि, न साधनान्वयि। इदानीन्तनेच्छाविषयं प्रति क्षणान्तरे साधनस्येदानीन्तनकृतिसाध्यत्वज्ञानाविरोधात्। कथमन्यथा तवापीदानीमिष्टसाधनतालिङ्गादिदानीं कृतिसाध्यताज्ञानमिति दिक्।

नन्वेवमपीष्टविषयककृतिसाध्यताज्ञानमेव प्रवर्तकमस्तु। बलवदनिष्टाननुबन्धीष्टसाधनताविषयककृतिसाध्यताज्ञानापेक्षया लघुत्वात्। तावताप्यनिष्टजनके इष्टाजनके चेच्छानुदयेन प्रवृत्त्यनापत्तेः। न चेष्टोपायेष्विष्टसाधनताज्ञानं विना नेच्छेतीष्टसाधनताविषयककृतिसाध्यताज्ञानादेव तत्र चिकीर्षाद्वारा प्रवृत्तिसम्भवादन्तरोपायविषयकेच्छाकल्पने मानाभावान्नेष्टविषयककृतिसाध्यताज्ञानं प्रवर्तकं, किन्त्विष्टसाधनताविषयककृतिसाध्यताज्ञानमेव तथेति सर्वत्र तज्ज्ञानमेव प्रवर्तकमिति वाच्यम्। सुखचिकीर्षायां लाघवाच्चिकीर्षात्वावच्छेदेनेष्टविषयककृतिसाध्यताज्ञानस्यैव हेतुत्वकल्पनात्। उपायचिकीर्षायामपि तद्धेतुत्वसिद्धयेऽन्तरोपायेच्छाकल्पनायाः प्रामाणिकत्वात्। न चेष्टसाध-

---

१. 'नहे' ख. पाठः। २. 'व्ये। न ये' ख. पाठः।

नताज्ञानं विनोपायेषु नेच्छाविषयत्वं सम्भवतीति वाच्यम् । सत्यम् । इष्टसम्पत्त्यर्थमस्तु तत्रेष्टसाधनताज्ञानम् । प्रवृत्तिरित्वष्टविषयककृतिसाध्यताज्ञानादेवेति चेद्, न । वृष्टीच्छायां लाघवादुपायेच्छात्वावच्छेदेनेष्टसाधनताज्ञानस्य हेतुत्वसिद्धावुपायचिकीर्षायामपीष्टसाधनताज्ञानं हेतुरिति चिकीर्षाद्वारेष्टसाधनताज्ञानं प्रवृत्तिहेतुरिति दिक् ।

नन्वेवमपि शाब्दबलवदनिष्टाजनकत्वज्ञानं न प्रवर्तकम् । तथा सति बहुवित्तव्ययायाससाध्यतया बहुतरदुःखजनके यागादौ प्रवृत्तिर्न स्यादिति चेद्, न । इष्टोत्पत्तिनान्तरीयकदुःखाधिकदुःखाजनकत्वस्यैव बलवदनिष्टेत्यादिना विवक्षितत्वात् । न चैवं यदृच्छागतकामिनीदर्शने सुखमात्रजनक इष्टोत्पत्तिनान्तरीयकदुःखाप्रसिद्धेस्तादृशदुःखाधिकदुःखाजनकत्वाभावान्न प्रवृत्तिः स्यादिति वाच्यम् । स्वजन्येष्टोत्पत्तिनान्तरीयकदुःखाधिकदुःखजनकं यत्[1] तदन्यत्वज्ञानं प्रवर्तकम् । तच्च तत्राप्यक्षतम् । नन्विष्टोत्पत्तिनान्तरीयकदुःखत्वं नाम न तावदिष्टोत्पत्तिर्यावता दुःखेन विना न सिध्यति तादृशदुःखत्वम् । तथा सत्यगम्यागमनादाविष्टोत्पत्तेर्नरकं विनाप्यसिद्धेस्ततोऽधिकदुःखजनकत्वाभावात् तत्र प्रवृत्तिः स्यात् । नापीष्टोत्पत्तिर्यावतैहिकेन दुःखेन विना न भवति, तादृशदुःखत्वमेव नान्तरीयकदुःखत्वम् । ततश्चागम्यागमनादौ[2] ततोऽधिकनरकदुःखजनकत्वज्ञानान्न प्रवृत्तिरिति वाच्यम् । तर्हि बहुलतर-

---

१. 'तत्तद' ख. पाठः. २. 'दौ न' क. पाठः.

दुःखजनके स्वल्पसुखसाधने कर्मणि प्रेक्षावतां प्रवृत्त्यापत्तिरिति चेद्, न। स्वजन्यसुखानुभवकालान्यूनकालानुभाव्यदुःखाजनकत्वमेव बलवदनिष्टाननुबन्धित्वम्। तदेव च विध्यर्थः। न चैवमलसानां सन्ध्यावन्दनादौ तादृशदुःखाजनकत्वज्ञानंसत्त्वात् कथं विहितकालेष्वप्रवृत्तिरिति वाच्यम्। तादृशदुःखे तदीयबलवद्द्वेषस्यापि सहकारित्वात्। अलसानां च तदभावात्। न चैवं विध्यर्थज्ञानमेव प्रवर्तकमिति न स्यादिति वाच्यम्। इष्टत्वात्। विधिवाक्यजन्यज्ञानस्य प्रवर्तकज्ञानोपयोगित्वमात्रमिति सर्वाभ्युपेयत्वात्। अन्यथा विधिना कृताविदानीन्तनत्वमदीयत्वाद्यबोधेऽप्यैप्रवृत्त्यापत्तेः। 'न कलञ्जं भक्षयेदि'ति निषेधवाक्यस्यापि स्वजन्यसुखानुभवकालान्यूनकालानुभाव्यदुःखाजनकत्वरूपस्य विध्यर्थस्याभाव एवार्थः। न चैवं कलञ्जभक्षणादौ तादृशदुःखजनकत्वज्ञानवतो रागौत्कट्येऽपि निवृत्तिः स्यादिति वाच्यम्। तादृशदुःख उत्कटद्वेषस्य निवृत्तावपि सहकारित्वात्। रागान्धस्य च तदभावान्न निवृत्तिः। उत्कटत्वं च जातिविशेषः। क्वचिदुत्कटः क्वचिदनुत्कटश्चैको द्वेषोऽसिद्ध एव, येन जातिसाङ्कर्यं स्यादिति दिक्।

ननु बलवदनिष्टाजनकत्वं न विध्यर्थः। न वा तज्ज्ञानं प्रवर्तकम्। किन्तु बलवदनिष्टजनकत्वज्ञानस्य प्रतिबन्धकतया तादृशज्ञानाभाव एव हेतुः। न चैवं कृत्यसाध्यताज्ञानस्य प्रतिबन्धकतया तदभाव एव हेतुः स्यात्, न कृतिसाध्यताज्ञा-

---

१. 'नात्' क. पाठः. २. 'पि प्र' क. पाठः. ३. 'वृत्तिहेतुः। कि' ख. पाठः.

नमिति वाच्यम्। लाघवेन कृतिसाध्यताज्ञानस्यैव हेतुत्वकल्पनात्। प्रकृते च बलवदनिष्टाजनकत्वज्ञानस्य प्रवर्तकत्वे बलवदनिष्टाजनकत्वस्यापि विध्यर्थता स्यात्। प्रवर्तकज्ञानविषयस्यैव विध्यर्थत्वात्। तथात्वे च 'श्येनेनाभिचरन् यजेते'[1]त्यादौ विध्यनुपपत्तिः। श्येनस्य वैरिवैधार्थत्वेन[2] बलवद्[3]निष्टजनकत्वात्। न च श्येनेन[4] नानिष्टं, किन्तु तज्जन्यहिंसयैवेति वाच्यम्। श्येनस्याप्युपपातकेषु परिगणनाच्छिष्टविगर्हणाच्चानिष्टजनकत्वावश्यम्भावात्। साक्षाद्धिंसाया एवानिष्टजनकत्वे प्रेरकादेरपि दोषकीर्तनानुपपत्तेः[6]। तस्माच्छ्येनविध्यनुपपत्तेर्न बलवदनिष्टाजनकत्वं विध्यर्थ इति चेद्, न। एवं सत्यग्नीषोमीयं पशुमालभेतेति विधिः पशुहिंसायाः कृतिसाध्यत्वे सतीष्टसाधनतामेव ब्रूयाद्, न हिंस्यादिति निषेधश्च हिंसाया बलवदनिष्टजनकत्वम्। ततो द्वयोर्विरोधाभावात् सामान्यविशेषभावेनाविरोध इति सिद्धान्तो व्याहन्येत। बलवदनिष्टाजनकत्वस्यापि विध्यर्थत्वे त्वग्नीषोमीयवाक्येन[7] हिंसाया बलवदनिष्टाजनकत्वस्य न हिंस्यादिति निषेधेन हिंसाया बलवदनिष्टजनकत्वस्य च बोधनाद् विरोधे सति सामान्यशास्त्रस्य विशेषशास्त्र[8]विषयातिरिक्तविषयत्वकल्पनेनाविरोध इति सिद्धान्तो घटेत। तस्माद् बलवदनिष्टाजनकत्वमपि विध्यर्थः। तज्ज्ञानं च प्रवर्तकम्। न चैवं श्येनविध्यनुपपत्तिरित्युक्तमिति वाच्यम्। तत्र बलवदनिष्टाजन-

---

१. 'नाभिचारे य' क. पाठः. २. 'यातनात्वे' क. पाठः. ३. 'दिष्ट' क. पाठः. ४. 'नानि' क. पाठः. ५. 'नाद्विग' क. पाठः. ६. 'तेश्च।' क. पाठः. ७. 'न ब' क. पाठः. ८. 'वशादति' ख. पाठः.

कत्वांशस्यायोग्यतयानन्वयोपपत्तेः । ननु कृतिसाध्यत्वबलवद-निष्टाजनकत्वविशिष्टेष्टसाधनत्वस्य[1] विध्यर्थतया तत्र कृतिसाध्य-त्वविशिष्टेष्टसाधनत्वजात्रस्यापरपदार्थान्वयार्थं स्वतन्त्रोपस्थितये लक्षणा स्यात् । सा चायुक्ता 'न विधौ परः शब्दार्थ' इति न्या-यात् । न च गौरनित्येत्यादाविव विशेष्यस्येष्टसाधनत्वस्यापरप-दार्थान्वये न लक्षणेति वाच्यम् । विनिगमनाविरहेणेष्टसाधन-त्वस्यैव विशेष्यत्वे मानाभावादिति चेत् । सत्यम् । त्रयाणामपि कृतिसाध्यत्वादीनामन्वयव्यतिरेकतौल्येन विनिगमनाविरहात् त्रयमपि पृथगेव शक्यम् । न चैवं शक्तित्रयाङ्गीकारे नानार्थता-पत्तिरिति वाच्यम् । पुष्पवत्पदे दिवाकरनिशाकरयोरिव विधौ कृतिसाध्यत्वादिष्वेकस्या एव शक्तेः कल्पनात् । ततश्च कृति-साध्यत्वादिषु त्रिष्वपि स्वातन्त्र्येण श्येनविधिनोपस्थितेषु कृति-साध्यत्वेष्टसाधनत्वयोरेव तत्र यागान्वयः, न बलवदनिष्टाजन-कत्वस्य[3]यापि, अयोग्यत्वादिति न विधौ लक्षणापत्तिरिति दिक् ।

ननु तथापि कृतिसाध्यत्वे न विधेः शक्तिः, आख्यात-त्वेन ततः कृत्युपस्थितौ धात्वर्थे तत्साध्यत्वस्य संसर्गमर्यादयैव भानोपपत्तेः । न चैवमपि कृतिसाध्यत्वप्रकारकज्ञानाभावे कृतिसाध्यत्वप्रकारकचिकीर्षासम्भवेन प्रवृत्त्यनुपपत्तेः कृतिसा-ध्यत्वप्रकारकज्ञानाय कृतिसाध्यत्वेऽपि विधेः शक्तिरावश्यकेति वाच्यम् । विधिना संसर्गमर्यादया कृतिसाध्यत्वज्ञाने सति पश्चान्मनसा तत्प्रकारकज्ञानसंभवादिति चेद्, न । कृतेर्धात्व-

---

१. 'त्वा' क. पाठः. २. 'स्या' क. पाठः. ३. 'स्यायो' क. पाठः.

र्थस्य च विषयिविषयभाव एव संसर्गः, न तु साध्यसाधनभाव इति न कृतिसाध्यत्वस्य संसर्गमर्यादया भानसंभवः । न च विषयतैव साध्यतेति वाच्यम् । ज्ञानस्वरूपातिरिक्तविषयतायाः प्रत्यक्षस्थल एव निरासेन तस्याः कृत्यनन्तरभविष्यत्तारूपसाध्यत्वाभेदासंभवात् । तर्हि विषयतया साध्यत्वानुमानमस्त्विति वाच्यम् । अनुमानस्य व्याप्तिग्रहादिविलम्बेनानावश्यकतया विधिस्थले नियमतः कृतिसाध्यत्वप्रतीत्यभावप्रसङ्गाद्, असाध्यस्यापि विषयत्वसंभवेन व्याप्त्यभावाद् विषयतया साध्यत्वानुमानासम्भवाच्चेति दिक् ।

नन्वेवमपीष्टसाधनताज्ञानं न प्रवर्तकम् । नित्ये फलाभावात् । नित्यस्यापि फलवत्त्वे कामनोपाधिकर्तव्यतया कामनाभावे तदनुष्ठानभङ्गप्रसङ्गात् । तस्मान्नित्ये वेदाधीनकार्यताज्ञानमेव प्रवर्तकमिति काम्येऽपीष्टसाधनतालिङ्गककार्यताज्ञानमेव तथा, न त्विष्टसाधनताज्ञानमपीति चेद्, न। निष्फले प्रवृत्त्यसम्भवेन

"सन्ध्यामुपासते ये तु सततं संशितव्रताः ।
विधूतपापास्ते यान्ति ब्रह्मलोकं सनातनम् ॥"

इति श्रुतायाः पापनिवृत्तेर्ब्रह्मलोकावाप्तेश्च नित्येऽपि[1] फलत्वकल्पनात् । न चैवमुक्तफलकामनावत एवाधिकारात् कदाचित् कामनाविरहे नित्यानुष्ठानेऽपि प्रत्यवायो न स्याद्, अधिकारिण एव नित्यकर्माकरणस्य प्रत्यवायहेतुत्वादिति वा-

---

१. 'त्यत्वेऽपि' ख. पाठः.

च्यम्। जीवतः शुचेरकरणे प्रत्यवायस्मरणेन शुचित्वे सति[1] विहितकालजीवित्वस्यैवाधिकारिविशेषणत्वकल्पनान्न कामनाविरहे नित्याननुष्ठाने प्रत्यवायाप्रसक्तिः। न चैवं तदानीमिष्टसाधनताज्ञानविरहात् कथं प्रवृत्तिरिति वाच्यम्। तदानीमपि प्रत्यवायानुत्पत्तिरूपेष्टसाधनताज्ञानस्यैव नित्येऽपि सम्भवान्न प्रवृत्त्यनुपपत्तिरिति दिक्।

नन्विष्टसाधनताप्रकारकज्ञानवत् साध्येष्टकत्वप्रकारकज्ञानमपि हेतुः। विनिगमनाविरहात्। तथा चाननुगम इति चेद्, न। साध्येष्टकत्वज्ञानेऽपि समानसंवित्संवेद्यतया इष्टसाधनत्वस्यापि विषयतयेष्टसाधनत्वावगाहिज्ञानत्वेनोभयोरनुगमसम्भवादुभयोर्हेतुत्वेऽपि न किञ्चिद् बाधकम्। नन्विष्टसाधनताज्ञानस्य हेतुत्वे इच्छाज्ञानस्यापि हेतुत्वापत्तिरिति चेद्, न। वस्तुतो यः स्वरूपसदिच्छाविषयस्तत्साधनताज्ञानस्यैव हेतुत्वात्। न चैवमपि विधितः सामान्येष्टसाधनताज्ञानेऽपि स्वर्गादिरूपेष्टविशेषसाधनताज्ञानाभावात् कथं प्रवृत्तिरिति वाच्यम्। विधिना सामान्यत इष्टसाधनत्वे बोधिते किं तदिष्टमित्याकाङ्क्षायां स्वर्गादिपदसमभिव्याहारात् स्वर्गादिरूपेष्टसाधनतावगमसम्भवात्। नन्वेवं साधनत्वमात्रं विध्यर्थोऽस्तु। कस्य साधनत्वमित्याकाङ्क्षायां समभिव्याहारादिना स्वर्गादिसाधनताधीसम्भवात्। न चैवं विश्वजिता यजेतेत्यत्र समभिव्याहाराभावात् स्वर्गसाधनताधीर्न स्यादिति वाच्यम्। तत्रापि साध्याकाङ्क्षायां सर्वाभ्य-

---

१. 'ति जी' क. पाठः.　२. 'नमि' ख. पाठः.

र्हितत्वेन स्वर्गस्यैव साध्यतया कल्पनादिति चेद्, न। साधनत्व-मात्रस्य विध्यर्थत्वे साधनत्वस्यानुगतस्याभावाद् विधेर्नानार्थ-तापातः। न चैवमिष्टसाधनत्वपक्षेऽपि सैं दोषस्तदवस्थ इति वाच्यम् । तत्रेच्छात्वजात्येच्छायास्तया स्वविषयस्य तेन साध-नत्वस्यानुगतिसम्भवात् । अत एव गन्धत्वादिजात्या परम्परा-सम्बन्धेन गन्धवत्त्वाद्युपाधेरनुगमादनुगतव्यवहारः । तस्मादि-ष्टसाधनत्वमेव विध्यर्थ इति दिक् ।

अयं च विधिरपूर्वविधिर्नियमविधिः परिसंख्याविधिश्चे-ति सामान्यतस्त्रिविधः। तत्र कालत्रयेऽप्यप्राप्तस्य विधिरपूर्व-विधिः । यथा — व्रीहीन् प्रोक्षतीत्यत्र व्रीहीणां प्रोक्षणस्य विधिं विना मानान्तरेणाप्राप्तेरपूर्वविधिः । पक्षे प्राप्तस्याप्राप्तांशपरिपू-रणफलको विधिर्नियमविधिः । यथा — व्रीहीनवहन्तीत्यत्रैत-द्विध्यभावेऽपि पुरोडाशप्रकृतिद्रव्याणां व्रीहीणां तण्डुलनिष्पत्त्य-र्थमाक्षेपादेवावहननप्राप्तिर्भविष्यतीति न तत्प्राप्त्यर्थो विधिः, किन्त्ववहननवदाक्षेपान्नखविदलनमपि प्राप्नुयादित्यवहननाप्रा-प्त्यंशसम्भवात् तदंशेऽप्यवहननप्रापणार्थोऽयं विधिरित्यप्राप्तांश-परिपूरणफलकैः । द्वयोरेकस्य प्राप्तावेकत्र तन्निवृत्तिफलको विधिः परिसंख्याविधिः। यथा—"इमामगृभ्णन् रशनामृतस्येत्य-श्वाभिधानीमाधत्ते" इत्यत्रैतद्विध्यभावेऽपि अयं मन्त्रोऽग्निचयने पठितः । तत्रानुष्ठेयाश्वरशनाग्रहणे गर्दभरशनाग्रहणे च रशना-ग्रहणप्रकाशनसामर्थ्यरूपेण लिङ्गेन नित्यं प्राप्नोतीति न तत्प्रा-

---

१. 'तद्दोषतादवस्थ्यमिति' ख. पाठः. २. 'को विधिः । द्व' क. पाठः.

प्त्यर्थः, नाप्याप्राप्तांशपरिपूरणार्थो वा, किन्तु, लिङ्गाविशेषाद् गर्दभरशनाग्रहणेऽपि प्राप्नुयादिति तन्निवृत्त्यर्थोऽयं विधिः ।

ननु परिसङ्ख्यायां मन्त्रस्य गर्दभरशनातो निवृत्तिरिव नियमविधावपि व्रीहिषु नखविदलननिवृत्तिरपीष्टेति कथं नियम-परिसङ्ख्ययोः फलभेद इति चेद्, न । नियमविधावव्रघाताप्राप्यव्रीह्यंशेऽप्यवघातप्रापणं विनाक्षेपलभ्यस्य[1] नखविदलनस्य[2] निवृत्तिर्न सम्भवतीति प्रथमोपस्थितत्वाद् विधेयावहननगतत्वेन प्रत्यासन्नत्वाच्चाप्राप्तांशपरिपूरणरूपो नियम एव फलं, न तूपायान्तरनिवृत्तिः । तस्याश्चरमोपस्थितत्वादविधेयगतत्वेन विप्रकृष्टत्वाच्च । परिसङ्ख्यायां तु द्वयोर्मन्त्रस्य नित्यप्राप्तत्वेनापूर्वविधिवत् स्वरूपप्राप्तेर्नियमविधिवदप्राप्तांशपरिपूरणस्य वा फलत्वासम्भवाद् गर्दभरशनानिवृत्तिरेव फलमङ्गीक्रियते । अत एव परिसङ्ख्याविधेर्न स्वार्थे तात्पर्यम्। 'अप्राप्ते शास्त्रमर्थवदि'ति न्यायेन मन्त्रलिङ्गप्राप्तेऽनेन मन्त्रेणाश्वरशनादातव्येति स्वार्थे तात्पर्यायोगादिति स्वार्थस्त्यक्तव्यः, तथा गर्दभरशना नादातव्येति परार्थे लक्षणा वाच्येति परार्थग्रहणं, सामर्थ्याद् गर्दभरशनाग्रहणेऽपि प्राप्तस्य मन्त्रस्य बाधश्च स्वीकार्य इति प्राप्तबाधश्चेति त्रैदोष्यात् परिसंख्याविधेर्नियमविधितो जघन्यता । तस्मादत्यन्ताप्राप्ते विधिरपूर्वविधिः । पाक्षिकप्राप्तौ विधिर्नियमविधिः । उभयत्र प्राप्तौ विधिः परिसंख्याविधिः । तदुक्तं—

१, 'नाप्रा' क. पाठः. २. 'भ्यन' क. पाठः. ३. 'ननि' क. पाठः.

"विधिरत्यन्तमप्राप्ते नियमः पाक्षिके सति ।
तत्र चान्यत्र च प्राप्ते[3] परिसंख्येति गीयते ॥"

इति । एवमन्येऽपि विधिभेदा विस्तरभयान्न लिख्यन्त इति संक्षेपः ॥

इति विधिवादः ॥

अथापूर्ववादः ।

अत्र प्राभाकराः — 'पुष्टिकामो घृतं पिबेदि'त्यादिलौकिकलिङां प्रथमत एव क्रियागतेष्टसाधनत्वकृतिसाध्यत्वबोधकत्वेऽपि स्वर्गकामो यजेतेत्यादिवैदिकलिङां न प्रथमत एव क्रियागतेष्टसाधनत्वकृतिसाध्यत्वबोधकता सम्भवति । तथाहि — वैदिकलिङां[2] हि नियोगो वाच्यः । ततश्च स्वर्गादिसाधनत्वे[3]नावगते तस्मिन् यागविषयकं कार्यमिति प्रथमं कृतिसाध्यताबोधो जायते । तस्य च बोधस्य मदंशीयविषयतया प्रवर्तकत्वासंभवादनन्तरं स्वर्गकामस्य मम यागविषयकं कार्यमिति पुनस्तस्मिन्नेव नियोगेऽनुपपत्तिसहायेन शब्देनैव द्वितीयः कार्यताबोधो जायते । ततश्च नियोगस्य फलत्वेन साक्षात् कृत्यसाध्यतया नियोगविषयककार्यताज्ञानस्य भिन्नविषयतया यागे प्रवर्तकत्वासंभवाच्च यागविषयकं कार्यताज्ञानं प्रथमावगतनियोगकार्यतानिर्वाहकतयावश्यं वाच्यम् । तच्च कामी हि का-

---

१. 'सौ' ख. पाठः. २. 'ङा' क. पाठः. ३. 'त्वेऽव' ख. पाठः. ४. 'शावि' क. पाठः. ५. 'लतुल्यत्वे' क. पाठः.

म्यादन्यत् काम्यसाधनतयावगतमेव कर्तव्यतयावैतीति न्यायाद् यागे काम्यसाधनताज्ञानं विना न भवतीति प्रथमप्रतीत-नियोगद्वारा स्वर्गसाधनतया प्रतीतस्य यागस्य कार्यत्वं ज्ञात-व्यमिति स्वर्गसाधनतया ज्ञाते यागे काम्यस्वर्गसाधनं यागः स्वर्गकामकृतिसाध्य इति तृतीयोऽपि बोध औपादानिकः[1] शब्दा-देव जायते । अयमेवाधिकारित्वबोध इत्युच्यते । ततो याग-कृतिः कर्तारं विनानुपपन्नेति ज्ञानसहायेन शब्देनैव स्वर्गकामो यागकर्तेति चतुर्थ औपादानिकः कर्तृत्वबोधो जन्यते । एवमपि मदंशाद्यज्ञाने प्रवृत्तिर्नेति स्वर्गकामस्य यागः कार्यः, अहमपि स्वर्गकामः, तस्मान्ममापि यागः कार्य इति ज्ञानसहायेनेष्ट-वत्फलपर्यन्तदीर्घव्यापारवता शब्देनैव पञ्चमो बोध उत्पद्यत इत्यस्माकं सिद्धान्तसरणिः । ततश्च प्रथमं साक्षात् स्वर्गसाधन-तयावगते नियोगे कृतिसाध्यताज्ञाने सति नियोगकृतिसाध्य-तानिर्वाहाय पश्चादेवेष्टसाधनताज्ञानपूर्वकं यागे कृतिसाध्य-ताज्ञानं शब्दात् । न तु प्रथमम् । वस्तुतस्तु स्वर्गकामस्य मम यागविषयकमपूर्वं[2] कार्यमिति नियोगविषयकद्वितीयकार्यताबो-धादेव प्रवृत्तिसिद्धेर्न यागे पश्चादपि कृतिसाध्यताज्ञानम् । न च भिन्नविषयकस्य नियोगविषयककार्यताज्ञानस्य कथं याग-विषयकप्रवृत्तौ हेतुत्वम् । अन्यथातिप्रसङ्गादिति वाच्यम् । या-गविषयकं[2] कार्यमिति नियोगगतकार्यताज्ञानस्य यागविषयक-तया समानविषयकत्वेन यागे प्रवर्तकत्वेऽप्यतिप्रसङ्गाभावेन गौ-रवेण समानविशेष्यकत्वस्यातन्त्रत्वात् । अतः क्रियायां न

---

१. 'शा' क. पाठः. २. 'कमपूर्वं का' क. पाठः.

कृतिसाध्यताज्ञानं प्रवृत्तिहेतुः । स्यादेतदेवम्, यद्यपूर्वस्य वाच्यता स्यात् । तस्यामेव न प्रमाणमिति चेद्, न । आशुतरविनाशिनो यागस्य कालान्तरभाविस्वर्गं प्रति साक्षात्साधनत्वबाधात् परम्परासाधनत्वमेव ग्राह्यम् । तच्च परम्पराघटकापूर्वज्ञानं[1] विना नेत्यपूर्वे लिङादिशक्तिरावश्यिका । न च त्वन्मते[2] जलाहरणान्वययोग्यतावच्छेदकस्यच्छिद्रेतरत्वस्य पदादनुपस्थितस्यापि[3] अन्वयप्रकारतया शाब्दबोधविषयत्वाभ्युपगमादिहापि यागे स्वर्गसाधनत्वान्वययोग्यतावच्छेदकस्यापूर्वस्य पदादनुपस्थितस्यापि[4] यागस्वर्गान्वयप्रकारतया शाब्दबोधविषयतोपपत्तेर्न तत्र लिङादेः शक्तिकल्पनेति वाच्यम् । योग्यतावच्छेदकत्वेन पूर्वं ज्ञातस्यैवान्यत्रान्वयप्रकारतया शाब्दधीविषयत्वमिति परेषाम[5]प्यभिमतम् । अन्यथा घटमात्रं जलाहरण[6]योग्यमिति ज्ञानतोऽपि घटेन जलमाहरेत्यत्रच्छिद्रेतरत्वभानापत्तेः । तथाचापूर्वस्य पूर्वानुपस्थितस्य योग्यतावच्छेदकत्वज्ञानासम्भवात् तज्ज्ञानार्थमपूर्वे लिङादिशक्तिरावश्यिका ।

नन्वेवं 'सोमेन यजेते'त्युत्पत्तिवाक्येऽपि नियोगे कार्यताधीः स्यात् । न चेष्टापत्तिः । उत्पत्तिविधौ यागः कर्तव्य इति क्रियाकार्यताज्ञानमेवोत्पद्यत इति भवत्सिद्धान्तहानेरिति चेद्[7], न । कालान्तरभाविफलसमभिव्याहृतलिङामेव प्रथमत एवापू-

---

१. 'वं विज्ञा' क. पाठः. २. 'त' क. पाठः. ३. 'दानु' क. पाठः. ४. 'दानु' क. पाठः. ५. 'षां मतम्' क. पाठः. ६. 'णे' क. पाठः. ७. 'चेत् का' क. पाठः.

र्ववाचकत्वमित्यभ्युपगमात्। न चैवं वैदिकलिङ्त्वावच्छेदेना-पूर्वशक्तिरिति भवत्सिद्धान्तहानिरिति वाच्यम्। उत्पत्तिवाक्येऽपि क्षणिकानां सोमयागानां[1] कालान्तरभाविपरमापूर्वसाधनत्वाय कल्प्यमानानामुत्पत्त्यपूर्वाणामपि लिङ्[2]वाच्यतयैव कल्पनात्। नन्वपूर्वस्य वैदिकलिङ्वाच्यत्वे 'यो ब्राह्मणायापगुरेत्, तं शतेन यातयादि'त्यत्रापगोरणस्य कालान्तरभाविनरकयातनाजनकत्वानुपपत्त्या दुरितापूर्वमपि लिङ्वाच्यं स्यादिति चेद्, न। सिद्धार्थे व्युत्पत्तिविरहेणापगोरणं[3] शतयातनाफलकमिति सिद्धार्थबोधकत्वासम्भवात्[4]। तस्माद् ब्राह्मणाय नापगुरेतेति प्रतिषेधविधिशेषोऽयमर्थवाद इति तत्रापूर्वस्यावाच्यत्वेऽपि न हानिः। विधिलिङामेव[5] तद्वाचकत्वाभ्युपगमात्। नन्वेवं तत्र दुरितापूर्वप्रतीतिः कथमिति चेदित्थम्। नापगुरेतेति प्रतिषेधविधावपगोरणनिवृत्तिविषयककार्यता प्रतीयते। तत्रापगोरणस्य दुरितादृष्टाहेतुत्वे तन्निवृत्तेः कार्यताप्रतीतिर्न स्यात्, तस्याः स्वतः पुरुषार्थत्वाभावात्। अपगोरणस्य तद्धेतुत्वे तु भवत्यपगोरण[6]निवृत्तिर्दुरितकारणनिवृत्तित्वेन सफलेति तत्र कार्यताबोध इत्यपगोरणनिवृत्तौ कार्यताबोधानुपपत्त्यापगोरणस्य दुरितापूर्वसाधनत्वकल्पनमिति दिक्।

ननु तन्मते नित्यस्थले कालान्तरभाविफलाभावेन क्रि-

---

१. 'गाभ्यासानां' ख. पाठः. २. 'ङा वाच्य' क. पाठः. ३. 'णं या' ख. पाठः. ४. 'र्थे' ख. पाठः. ५. 'त्व' क. पाठः. ६. 'व तु त' ख. पाठः. ७. 'णे' क. पाठः.

यायामेव कार्यतान्वयसम्भवान्न नित्यापूर्वसिद्धिरिति चेद्[1] न। काम्यस्थले क्रियायाः स्वर्गकामैकृतिसाध्यतान्वयानुपपत्त्या लिङः कार्यत्वविशिष्टे शक्तौ कल्प्यायां[2] लाघवेन वैदिकलिङ्त्वावच्छेदेन क्रियाभिन्नकार्यत्वविशिष्टे[3] शक्तिकल्पनान्नित्यापूर्वसिद्धिः। ननु शाब्दानुभवात्[4] पूर्वम्[5] अपूर्वत्वेनापूर्वोपस्थितावपूर्वत्वव्याघातः। तत्त्वेनानुपस्थितौ कथं तत्र शक्तिग्रह इति चेद्, न। कार्यत्वेन घटाद्युपस्थितौ कार्यत्वेन तत्र शक्तिधीः। शाब्दधीस्तु घटादेः स्वर्गकामकार्यतान्वयायोग्यत्वात् कार्यत्वेनापूर्वमेव विषयीकरोति। न चान्यस्य शक्तिग्रहविषयत्वम् अन्यस्य शाब्दबोधविषयत्वमित्ययुक्तम्, अतिप्रसङ्गादिति वाच्यम्। समानप्रकारकत्वस्य नियामकत्वात्। ननु कार्येऽपि[6] स्थायित्वानिश्चयात् कथं स्वर्गकामस्य[7] कार्यताधीरिति वाच्यम्। स्थायित्वविशिष्टे कार्ये[8] शक्तिरित्येके। अन्वयितावच्छेदकतया स्थायित्वधीरित्यपरे।

ननु लोके पाकादेः[9] कार्यस्य धातुत एवोपस्थितेः[10] कार्यत्वमात्रे लिङः शक्तिः। न तु कार्यत्वविशिष्टे। वेदे तु कार्यत्वविशिष्टे शक्तिरिति नानार्थतापात इति चेद्, न। कार्यत्वविशिष्टशक्तादेव पदाद् गौर्नित्येत्यत्रेव विशेषणमात्रोपस्थितेर्लक्षणयाप्युपपत्तौ लोके

---

१. 'म्य' क. पाठः. २. 'ल्प्यमानायां' क. पाठः. ३. 'र्यवि' क. पाठः. ४. 'श' क. पाठः. ५. 'वं कार्यत्वेनोप' क. पाठः. ६. 'र्यं स्था' क. पाठः. ७. 'मकाम्यता' ख. पाठः. ८. 'र्यत्वे श' ख. पाठः. ९. 'देर्धा' क. पाठः. १०. 'ते' क. पाठः.

कार्यत्वेऽपि शक्तेरकल्पनात्। न च विनिगमनाविरहाद् वेद एव लक्षणा किं न स्यादिति वाच्यम्। 'न विधौ परः शब्दार्थः' इति न्यायात् पौरुषेय एव लक्षणाकल्पनौचित्यात्। ननु लोके वेदे च कार्यतायामेव शक्तिः। लोके समभिव्याहृताद् धातोस्तदाश्रयोपस्थितिः, वेदे त्वाक्षेपादिति न क्वापि लक्षणेति चेद्, एवं सति नित्यस्थलेऽनुपपत्त्यभावात् कार्योपस्थितिर्न स्यात्। तस्माद् वैदिकलिङ्त्वावच्छेदेन कार्ये शक्तिकल्पनायामेव नित्यस्थले कार्यसिद्धिरिति कार्ये शक्तिरेष्टव्या। तस्माद् वेदे न प्रथमतः क्रियान्वयिकार्यताधीरिति पूर्वपक्षसङ्क्षेपः।

अत्रोच्यते — यदुक्तं शाब्दबोधस्यान्वयितावच्छेदकप्रकारकत्वनियमात् साक्षादसाधनस्य[2] यागस्य स्वर्गसाधनताबोधेऽन्वयितावच्छेदकस्यापूर्वस्य प्रकारता वाच्या। सा च न पूर्वाज्ञातस्य सम्भवतीत्यपूर्वे लिङ्[1]वाच्यता कल्पनीयेति। तन्न। तादृशनियमे मानाभावात्। न च घटेन जलमाहरेत्यत्रच्छिद्रेतरत्वभानमेव मानमित्युक्तमिति वाच्यम्। तत्र वस्तुतश्छिद्रेतरघटस्य घटत्वेन भानेऽपिच्छिद्रेतरघटत्वेनाभानात्। अन्यथा घटपदस्यच्छिद्रेतरघटे लक्षणापत्तेः। शब्दानुपस्थितस्य शाब्दबोधाविषयत्वात्। न च क्षणिकस्य यागस्य कालान्तरफलं प्रत्ययोग्यत्वनिश्चयात् कथं तत्र साधनताधीरिति वाच्यम्। अनुभवस्य स्मृतौ जनयितव्यायां संस्कारस्येवात्रापि कस्यचित स्थायिनो व्यापारस्य सम्भवेनायोग्यतानिश्चयविरहाद् योग्य-

---

१. 'याका' क. पाठः. २. 'स्य स्व' क. पाठः.

तासंशयस्य चानुकूलत्वात् । नन्वेवमपि साधनत्वसामान्यबोधकस्यापि साक्षात्साधनत्वबाधे परम्परासाधनत्वप्रकारकज्ञानजनकत्वनियमात् परम्पराघटकत्वेनापूर्वस्य शाब्दबोधविषयत्वमङ्गीकार्यमिति चेद्, न । सामान्यबोधजनकस्य मानस्यैकविशेषबोधे विशेषान्तरविषयकज्ञानजनकत्वमेव, न तु विशेषान्तरप्रकारकज्ञानजनकत्वम् । अन्यथा गृहवर्तिनं घटमानयेत्यत्रापि पीतघटबाधे नीलघटत्वादिप्रकारकज्ञानजननापत्तेः । तस्मात् साधनत्वसामान्यशक्तेन लिङ्पदेनायोग्यतानिश्चयविरहादपूर्वोपस्थितिं विनापि साधनत्वमात्रप्रकारकबोधे जाते पश्चात्प्रतीतसाधनत्वानुपपत्त्यापूर्वकल्पनमित्येव वाच्यम् । अन्यथा 'पुष्टिकामो घृतं पिबेदि'त्यादावपि घृतपानस्य साक्षात्कालान्तरभावि-पुष्टिसाधनत्वबाधात् तद्व्यापारस्य धातुसाम्यादेरपि वाच्यताकल्पनापत्तेरिति दिक् ।

नन्वपूर्वकल्पनायामपि किं प्रमाणं, चिरध्वस्तादेव यागात् फलसम्भवात् । व्यापारकल्पनेऽपि तस्य व्यापारस्य यागगतानन्यथासिद्धत्वनियतपूर्ववृत्तित्वांशेषु क्वाप्युपयोगाभावेनाप्रयोजकत्वादिति चेद्, न । एवं सति चिरध्वस्ताद् दण्डादपि घटोत्पादापत्तिः । न च भ्रम्यभावान्न तदुत्पत्तिरिति वाच्यम् । तर्हि भ्रमिरेव चिरध्वस्तदण्डात् किं न जायेत । तस्माद-

---

१. 'बो' क. पाठः. २. 'बो' क. पाठः. ३. 'षणान्त' क. पाठः. ४. 'कम्' ख. पाठः. ५. 'मान्यमा' क. पाठः. ६. 'म् । ध्व' ख. पाठः.

न्वयव्यतिरेकाभ्यां नष्टस्य व्यापारवत एव हेतुत्वमित्यत्रापि नष्टस्य यागस्य स्वर्गसाधनतानिर्वाहाय व्यापारकल्पनावश्यंभावात्। न च कल्पितस्यापि तस्यानन्यथासिद्धत्वाद्यंशेषु न क्वाप्युपयोग इत्युक्तमिति वाच्यम्। पूर्ववर्तित्वघटकतयोपयोगात्। पूर्ववर्तित्वं हि कार्योत्पत्तिपूर्वक्षणवर्तित्वरूपं कार्योत्पत्तिपूर्वक्षणे स्वस्वव्यापारान्यतरसत्तया निर्वाह्यम्। तच्च चिरध्वस्तस्य स्वसत्तया बाधितमिति स्वव्यापारसत्तया निर्वाह्यम्। नन्वेवमिष्टसाधनत्वशक्तेन विधिना कारणत्वघटकतया व्यापारभूतस्यापूर्वस्योपपादनादपूर्ववाच्यता दुर्वारा स्यादिति चेद्, न। एतादृशवाच्यताया अनन्यथासिद्धत्वादिसाधारणाया अस्माभिरप्यङ्गीकारात्। कार्यत्वविशिष्टतया लिङ्[2]पदवाच्यतायाः परमनङ्गीकारात्।

नन्वेवमपि यागादेः स्वध्वंस एव व्यापारोऽस्तु। कृतमपूर्वकल्पनया। न च प्रतियोगितदभावयोरेकत्राजनकत्वमिति वाच्यम्। घटतदभावसमूहालम्बन इव तदविरोधात्। न च यागध्वंसस्य व्यापारतया कारणत्वे कारणीभूताभावप्रतियोगित्वेन यागस्य स्वर्गे प्रतिबन्धकत्वापत्तिरिति वाच्यम्। संसर्गाभावत्वेन कारणीभूतो योऽभावस्तत्प्रतियोगिन एव प्रतिबन्धकत्वात्। अन्यथा कारणीभूतप्रागभावप्रतियोगितया ज्ञानोत्पत्तौ ज्ञानस्य प्रतिबन्धकत्वापत्तेः। न चेष्टापत्तिः। यज्ज्ञानं यत्र प्रतिबन्धकं, तत्सामग्र्यपि तत्र प्रतिबन्धिकेति ज्ञानसामग्र्या ज्ञाने

---

१. 'वृत्तित्वं तु का' क. पाठः. २. 'ङ्पद' ख. पाठः.

प्रतिबन्धकतापत्तेः । न च यागः सव्यापारकः कालान्तरभावि-फलजनकत्वादिति व्यापारसाधकं प्रमाणं लाघवाद् भावरूप-मेव व्यापारं कल्पयतीत्यपूर्वसिद्धिरिति वाच्यम् । अपूर्वस्य व्या-पारत्वकल्पने हि धर्मिणस्तस्य तज्जन्यत्वस्य[1] च कल्पने गौर-वात् स्वरूपतस्तज्जन्यत्वेन च कल्पितस्य[2] ध्वंसस्य तज्जन्यजनकत्व-मात्रकल्पनायामेव लाघवात् । अत एव 'ध्वंसस्य व्यापारत्वे मुक्ते पितरि पुत्रकृतश्राद्धादिना सुखोत्पत्तिः स्यात् । व्यापारस्य ध्वं-सस्य सत्त्वात् । अपूर्वकल्पने तु मुक्ते पितरि अपूर्वानुत्पत्तेर्नायं दोष' इत्यपास्तम् । ध्वंससत्त्वेऽपि तत्र सुखप्रागभावाभावेन सुखानुत्पत्त्युपपत्तेः । 'धर्मः क्षरति कीर्तनादि'ति[3] च[4] वाक्यं लक्ष-णया[5] फलाजनकत्वपरम् । न तु नाशपरम् । येन ध्वंसस्य ना-शासम्भवाद् व्यापारता न स्यात् । तस्माद् ध्वंस एव व्यापारो-ऽस्त्विति नापूर्वकल्पनायां प्रमाणमिति चेद्, न । 'ज्योतिष्टोमेन स्वर्गकामो यजेते'त्यादौ तत्तत्सोमयागाभ्यासध्वंसानामनेकेषां व्यापारत्वकल्पने गौरवं, तथा स्नानसन्ध्यावन्दनादीनामप्यनेक-क्रियारूपतया तत्तद्ध्वंसानां व्यापारत्वकल्पने गौरवमिति ला-घवादेकापूर्वसिद्धिरिति दिक् ।

तच्चापूर्वं स्वजनककृतिसमानाधिकरणमेव कल्पयितुमु-चितमिति कर्तृगतमेव कल्प्यते । न चैवं जातेष्ट्यादिना पुत्रग-तपूतत्वादि फलं न स्यात् । अपूर्वस्य समानाधिकरणफलजनक-

---

१. 'न्यजनकत्व' क. पाठः. २. 'स्य त' क. पाठः. ३. 'ति वा' क. पाठः. ४. 'च ल' ख. पाठः. ५. 'णावश्यकत्वात् फ' ख. पाठः.

त्वनियमादिति वाच्यम्। वचनवशेन तत्र कर्तृगतस्याप्यदृष्टस्य परम्परासम्बन्धेन पुत्रादिगतत्वकल्पनात्। न चैवं गयाश्राद्धैकर्तरि पुत्रे मुक्ते तद्गतादृष्टस्यापि नाशात् पितरि स्वर्गो न स्यादिति वाच्यम्। स्वभोजकादृष्टस्यैव स्वमुक्तिविरोधितया मुक्तौ नाशेन श्राद्धजन्यादृष्टनाशानभ्युपगमात्[2]। तस्मात् कर्तृसमवेतमेवापूर्वमिति प्राञ्चः।

नव्यास्तु — सर्वापेक्षया फलमेव प्रधानं, कृतेरपि तदर्थत्वात्। ततश्च फलोपपादकमपूर्वं फलसमानाधिकरणकमेव कल्प्यम्। ततश्च जातेष्ट्यादौ पुत्रादिगतमेवादृष्टम्। न चैवं सपत्नीकपितृपितामहादिगतफलजनकस्यैकस्य श्राद्धस्य पित्रादिगतानेकादृष्टकल्पनागौरवमिति वाच्यम्। अनेकपुत्रकृतस्य श्राद्धस्यैकफलार्थमनेकादृष्टकल्पनादोषस्य त्वन्मतेऽपि तुल्यत्वात्। न च शास्त्रादेशितं[3] फलं कर्तरीति नियमान्न जातेष्ट्यादिना पुत्रादिगतं फलम्। येन कृतिव्याधिकरणमपूर्वं कल्प्येतेति वाच्यम्। 'पूत एव तेजस्व्यन्नाद इन्द्रियावी भवती'त्यर्थवादानुरोधेन पूतत्वादेः पुत्रादिगतत्वेनैव कल्पनीयतया शास्त्रादेशित[4]मित्यस्यौत्सर्गिकत्वात्[5]। तस्मात् फलसमानाधिकरणमेवापूर्वं कल्प्यत[6] इत्याहुः॥

इत्यपूर्ववादः।

---

१. 'द्धा' ख. पाठः. २. 'शाभ्यु' ख. पाठः. ३. 'दर्शितं' क. पाठः. ४. 'दर्शित' क. पाठः. ५. 'त् फ' क. पाठः. ६. 'ल्पितमित्या' क. पाठः.

अथ सिद्धार्थवादः ।

नन्वेवं वैदिकलिङादिमपूर्वे शक्त्यभावेऽपि सर्वेषां पदानां कार्यान्वितस्वार्थे शक्तिरभ्युपेया । तथाहि — गामानयेत्यादिप्रयोजकवृद्धवाक्यश्रवणानन्तरं प्रयोज्यवृद्धस्य प्रवृत्तिमुपलभमानो बालः प्रयोज्यवृद्धप्रवृत्तौ प्रयोजकवृद्धवाक्यमेव हेतुतया कल्पयति । प्रवृत्तिश्च न साक्षाच्छब्दप्रयोज्या । किन्तु प्रवृत्तिजनकज्ञानजननद्वारेति प्रवृत्तिजनकज्ञाने शब्दस्य प्रयोजकत्वं कल्पयति । कार्यताज्ञानं च प्रवृत्तिजनकमिति स्वप्रवृत्तावव[1]धारणादिदं मया कार्यमिति कार्यताज्ञानजनकत्वं शब्दे गृह्णाति । जन्यजनकभावश्च जन्यतावच्छेदकजनकतावच्छेदकयो[2]रग्रहे न सम्भवतीति कार्यान्वितज्ञानत्वं कार्यतावच्छेदकं पदज्ञानत्वं च कारणतावच्छेदकं कल्पयतीति सामान्यतः पदमात्रस्य कार्यान्विते शक्तिं कल्पयति । पश्चादावापोद्वापाभ्यां क्रियाकारकपदानां कार्यान्वि[3]तस्वार्थज्ञानजनकतां गृह्णातीति प्रथमकल्पितकार्यकारणभावबलादुत्तरकाले गौरवप्रतिसन्धा[4]नेऽपि न कार्यान्वितत्वांशत्यागः, उपजीव्यविरोधात् । तस्मात् कार्यान्वितज्ञानमेव पदजन्यमिति सिद्धार्थस्थले कार्यवाचिपदसमभिव्याहाराभावान्न कार्यान्वितस्वार्थानुभावकत्वं, किन्तु पदादुपस्थितानां पदार्थानामसंसर्गाग्रहमात्रम् । तत एव तत्र व्यवहारश्च । न च त्वन्मते पदानां कार्यान्वित एव शक्तौ पदात् पदार्थोपस्थितिर्वा कथ-

---

१. 'च्छा' क. पाठः. २. 'कर्तव्यमि' ख. पाठः. ३. 'न्यज' क. पाठः. ४. 'तस्वस्वा' क. पाठः. ५. 'नेनापि' क. पाठः.

मिति वाच्यम् । पदानां जातावेव शक्तिः । पदज्ञानज(न्यानुभव?न्य)तावच्छेदकं तु कार्यान्वितानुभवत्वमित्यनुभवानुकूला शक्तिः कार्यान्वित इत्यस्माभिरभ्युपगमात् पदात् पदार्थस्मृतौ न विरोध इति प्राभाकराः ।

अत्र तार्किकाः — प्रवृत्तिलक्षणकार्यानुमितं कार्यताज्ञानं प्रति शब्दस्य हेतुताग्रह इत्यत्र न विवादः । किन्तु पदज्ञानज(न्यानुभाव?न्य)तावच्छेदकं कार्यान्वितपदार्थानुभवत्वमेवेति यदुक्तं, तन्न मृष्यामहे । कार्यवाचिलिङादिपदादेव कार्यांशोपस्थितिसम्भवेन कार्यांशत्यागस्यैवौचित्यात् । न चैवमुपजीव्यप्राथमिककल्पनाभङ्गप्रसङ्ग एव बाधक इति वाच्यम् । प्राथमिकत्वमात्रेणानुपजीव्यत्वात् । अन्यथेदं रजतमिति भ्रमोत्तरभाविनो नेदं रजतमिति ज्ञानस्य तदुपजीवकतया तदबाधकत्वप्रसङ्गात् ।

किञ्च, त्वया कार्यान्वितज्ञानत्वेन पदज्ञानत्वेन च कार्यकारणभावो वाच्यः । तथा च सिद्धार्थस्थलेऽपि पदज्ञानरूपहेतोः सत्त्वात् कार्यान्वितज्ञानं किं न स्यात् । यदि च कार्यवाचि पदमपि सहकारीत्युच्यते , तर्हि कार्योपस्थापकस्य कार्यवाचिपदस्य घटाद्युपस्थापकस्य[1] घटादिपदस्य च समाजात् कार्यान्वितज्ञानमित्यर्थवशसम्पन्नतया न कार्यान्वितज्ञानत्वं कार्यतावच्छेदकम् । किं बहुना , कार्यार्थस्थल एव व्युत्पत्तिग्रह इति न नियमः । सिद्धार्थस्थलेऽपि प्रथमं तद्ग्रहसम्भवात् ।

---

१. 'स्य च' क. पाठः.

तथाहि — उपलब्धचैत्रपुत्रजन्मा बालस्ताद्दग्वार्ताहारेण सह चैत्रसमीपं गतः । चैत्र ! पुत्रस्ते जात इति वार्ताहारवाक्यश्रवणसमनन्तरं चैत्रस्य मुखप्रसादं पश्यंश्चैत्रस्य हर्षमनुमाय हर्षं प्रति च पुत्रजन्मज्ञानस्य हेतुत्वं कल्पयति, पुत्रजन्मज्ञाने च वाक्यस्य हेतुत्वं कल्पयतीति सिद्धः सिद्धार्थे शक्तिग्रह इति दिक् ॥

इति सिद्धार्थवादः ।

अथान्वितशक्तिवादः ।

नन्वेवं यद्यपि कार्यवाचिपदादेव कार्यांशोपस्थितेर्न कार्यान्विते शक्तिः, तथाप्यन्वयांशवाचकपदाभावेनान्वयांशस्यान्यतोऽनुपस्थितेः पदानामितरान्वितस्वार्थे शक्तिरङ्गीकार्या । किञ्च, वृत्त्या पदोपस्थापितस्यैव शाब्दानुभवविषयत्वनियमादन्वयांशे वृत्तिरवश्यमेष्टव्या । सा च न लक्षणा । अन्वयानुपपत्तिप्रतिसन्धानाद्यनपेक्षणादित्यन्वयांशे शक्तिसिद्धिरिति चेद्, न । प्रकारान्तरलभ्यत्वमेव शक्त्यभावं गमयति, न तु पदान्तरलभ्यत्वमेवं तथा । ततश्च प्रत्येकपदार्थशक्त्या तत्तत्पदार्थोपस्थितेषु वृत्तिं विनाप्याकाङ्क्षादिसहकारिवशात् तत्तदर्थान्वितस्वार्थबोधोपपत्तेः । अन्यथैकस्यैव घटपदस्यानयनाद्यनेकक्रियान्वितस्वार्थबोधकतया तत्तदन्वयांशेऽनन्तशक्तिकल्पनापत्तेः ।

---

१. 'राद् वा' क. पाठः. २. 'श' क. पाठः. ३. 'नान' क. पाठः. ४. 'व । तत' क. पाठः. ५. 'ते' ख. पाठः.

नन्वन्वयसामान्येऽवश्यं शक्तिरभ्युपेया। अन्यथा घट इत्युक्ते किमानेयः प्रेक्षणीयो वेति संशयजिज्ञासे न स्याताम्। एवमानयेत्युक्ते घटं पटं वेति जिज्ञासादिकं न स्यात्। सामान्यतो ज्ञाते विशेषतश्चाज्ञात एव जिज्ञासाद्युदयात्। तस्मादन्वयसामान्यं पदशक्यमिति चेद्, न। कारकसामान्येन क्रियासामान्यस्य तेन च क्रियासामान्येन कारकसामान्यस्य चाक्षेपेणोपस्थितौ तत्र जिज्ञासादिसम्भवान्न तदर्थमन्वयसामान्ये शक्तिः। अन्यथा चैत्रः समागत इत्युक्ते किं श्यामो गौरो वेति जिज्ञासोदयाद् रूपसामान्येऽपि चैत्रादिपदस्य शक्तिकल्पनापत्तेः। तस्माद् घटादिपदानां तत्तत्पदार्थ एव शक्तिः। आकाङ्क्षादिसहकारिवशादितरान्वयबोध इति दिक्॥

इत्यन्वितशक्तिवादः।

अथ शक्तिवादः।

नन्वेवमन्वयांश इव व्यक्त्यंशेऽपि न शक्तिः। व्यक्तिशक्तिवादिनामपि घटादिपदानां न घटादिव्यक्तिमात्रे शक्तिः, घटादिव्यक्तीनामानन्त्येन शक्तिग्रहणासम्भवात्। किन्तु घटत्वादिविशिष्टे तदवच्छिन्ने[1] वा। ततश्चावश्यकत्वाल्लाघवाच्च घटत्वादावेव शक्तिः। न चैवं धानकर्मत्वस्य माहिष्यादिसाधारण्येन धेनुपदस्य गोत्वावच्छिन्ने धानकर्माणि शक्तिरिति भवत्सिद्धान्तविरोधः स्यात्, तत्राप्युक्तरीत्या गोत्व एव शक्त्यापत्तेरिति

---

१. 'न्ने। त' क. पाठः.

वाच्यम् । गोत्वस्य वृषभसाधारण्येन न तत्र गोत्वे शक्तिः, किन्तु, धानकर्मण्येव । गोत्वं त्वतिप्रसङ्गभङ्गायानुगमाय चावच्छेदकमात्रं कल्प्यते । प्रकृते[2] च बाधकाभावाल्लाघवादावश्यकत्वाच्च घटत्वादावेव शक्तिः, न व्यक्तौ । न चैवमन्यशक्तात् पदात् कथं व्यक्तिभानम्, अन्यथातिप्रसङ्गादिति वाच्यम् । ज्ञेयस्य ज्ञानविषयत्ववद् व्यक्तेरपि जातिविशिष्टबोध्यतायामनतिप्रसङ्गात् । प्रयोगश्च — घटपदं न घटशक्तं घटत्वशक्तत्वाद् घटत्वपदवदिति प्राभाकराः ।

अत्र तार्किकाः — अत्र रजतत्वमिति भ्रमे जातिभानेऽपि व्यक्तेरभानान्न जातिविशिष्टबोध्यता व्यक्तेः । न च शाब्दबोधे तथा नियम इति वाच्यम् । जातिशब्दाद् व्यक्तेरभानेन तथा नियमाभावात् । न च जातिशब्दोऽपि जातित्व एव शक्तो न तु जाताविति वाच्यम् । जातित्वं हि जातीतरावृत्तित्वे सति जातिवृत्तित्वम् । ततश्च जातेरपि जातित्वघटकतया जातिशब्दशक्यतावश्यंभावात् । न च गोत्वादिजातिविशेषमात्रशक्तपदत्वेन व्यक्त्युपस्थापकतानियमः, जातिशब्दश्च न तादृश इति वाच्यम् । गोत्वादिभिन्नाशक्तत्वे सति गोत्वादिशक्तपदत्वस्य तदर्थतया तदपेक्षया गोत्वादिविशिष्टशक्तपदत्वस्यैव व्यक्त्युपस्थापकतावच्छेदकत्वात् ।

वस्तुतस्तु विभक्तेः प्रकृत्यर्थगतस्वार्थबोधकत्वव्युत्पत्ते-

---

१. 'याव' क. पाठः. २. 'ते बा' क. पाठः. ३. 'वाच्च' क. पाठः.
४. 'तयान' ख. पाठः. ५. 'जकश्च' ख. पाठः, ६. 'घटकता' क. पाठः.

र्गामानयेत्यादौ विभक्त्यर्थकर्मत्वादेर्व्यक्त्यन्वयो न स्यात्। त्वन्मते व्यक्तेः प्रकृत्यर्थत्वाभावात्। न चास्मन्मते विभक्तेः प्रकृत्यर्थाश्रयगतस्वार्थबोधकत्वमेव व्युत्पत्तिसिद्धमिति वाच्यम्। त्वन्मते धेनुमानयेत्यत्र विभक्त्यर्थस्य न प्रकृत्यर्थाश्रयेऽन्वयः, गोत्वस्य केवलं तत्र प्रकृत्य(र्था?र्थता)वच्छेदकतया प्रकृत्यर्थत्वाभावात्, किन्तु प्रकृत्यर्थे धानकर्मणीति सर्वत्र लाघवात् प्रकृत्यर्थ एव विभक्त्यर्थान्वयकल्पना। न च सामान्यतया प्रकृतितात्पर्यविषयत्वमेव तदन्वयितावच्छेदकमिति व्यक्तावपि तदन्वयो न विरुद्ध इति वाच्यम्। व्यक्तेः प्रकृतितात्पर्यविषयत्वे तत्र तात्पर्यनिर्वाहकतया वृत्तेरवश्यकल्प्यत्वात्। कल्पनीया च वृत्तिः शक्तिरेव, न लक्षणेति वक्ष्यते। एतेन व्यक्तेरर्थापत्त्यानुमानाद् वोपस्थितिरिति भाट्टमतमपास्तम्। व्यक्तेः प्रकृत्यर्थत्वाभावेन विभक्त्यर्थान्वयानुपपत्तेः। अनुपपत्तिव्याप्त्याद्यप्रतिसन्धानेऽपि व्यक्त्युपस्थितेश्च। तस्माद् व्यक्तौ शक्तिरेष्टव्या[1]।

यत्तु — व्यक्तौ लक्षणैव। अतो न तस्याः प्रकृत्यर्थत्वाभावः। न चैवं शक्यस्यैव गोत्वादेर्लक्ष्यतावच्छेदकत्वापत्तिरिति वाच्यम्। नीलपदे गुणिलाक्षणिके शक्यस्यैव गुणस्य लक्ष्यतावच्छेदकत्ववदिहाप्यविरोधात्। अतो व्यक्तेर्न प्रकृत्यर्थत्वाभाव इति मण्डनमिश्रैरुक्तम्। तदप्यभव्यम्। अन्वयाद्यनुपपत्त्यप्रतिसन्धानेऽपि गोपदाद् गोत्वविशिष्टप्रतीतेः। उत्सर्गतः

---

१. 'रेवैष्ट' क. पाठः.

पदज्ञानजन्यस्मृतिविषयत्वरूपं शक्यत्वं व्यक्तावप्यवर्जनीयमिति दिक् ।

एवं गोत्वादिवैशिष्ट्यांशेऽपि शक्तिः स्वीकार्या । विशिष्टस्यैव पदादुत्सर्गतः प्रतीतेः । एवं द्रव्यादिपदादाकृतिविशेषस्याप्रतीतावपि घटादिपदेभ्योऽवयवसंयोगविशेषरूपाया आकृतेर्नियमतः प्रतीतेर्घटादिपदानामाकृतिरपि शक्या । न चैवं व्यक्त्याकृतिजातीनां शक्यत्वे[२] शक्त्यनेकत्वेन नानार्थत्वापत्तिरिति वाच्यम् । जात्याकृतिविशिष्टव्यक्तावेकस्या एव शक्तेः कल्पनात् । न च व्यक्तीनामानन्त्याद् व्यक्तौ कथं शक्तिग्रह इति वाच्यम् । अस्माभिः सामान्यलक्षणाभ्युपगमेन सामान्यलक्षणया सर्वव्यक्त्युपस्थितौ तासु शक्तिग्रहसम्भवात् । तदनभ्युपगमेऽपि गोत्वविशिष्टे शक्तिरिति गोत्वप्रकारेण क्वचिद् व्यक्तौ[३] शक्तिग्रहः । शक्तिग्रहप्रकारेण शाब्दबोधनियमाद् गोत्वप्रकारको व्यक्त्यन्तर[४]विषयकः शाब्दबोध इति न किञ्चिदनुपपन्नम् ।

नन्वेवमपि यथा तीरत्वेनोपस्थिते तीरे शक्यसम्बन्धरूपलक्षणाग्रहणादलक्ष्यमपि तीरत्वं लक्षणाग्रहप्रकारतया पदजन्यस्मृतिविषयः, तथा गोत्वेनोपस्थितायां गवि शक्तिग्रहाच्छक्तिग्रहप्रकारतया गोत्वस्यापि पदात् स्मृत्युपपत्तेर्न गोत्वेऽपि[५]

---

१. 'यरूपश' क. पाठः. २. 'त्वे ना' क. पाठः. ३. 'क्तेः' क. पाठः. ४. 'न्यतर' क. पाठः. ५. 'वि ग्र' क. पाठः.

शक्तिः, किन्तु व्यक्तावेवेति चेद्, न । लक्षणास्थले[1] हि लक्ष्यलक्ष्यतावच्छेदकयोर्नैका लक्षणा सम्भवति[2] । तीरे संयोगस्य तीरत्वे संयुक्तसमवायस्य लक्षणात्वात् । अतस्तत्रागत्या तीरे[3]स्मृतौ लक्षणा, तीरत्वस्मृतौ लक्षणाग्रहप्रकारत्वमिति नियामकद्वयं कल्प्यते । प्रकृते तु पदार्थान्तररूपाया ईश्वरेच्छारूपाया वा शक्तेरेकस्या एव विशिष्टस्मृतौ नियामकत्वसम्भवान्न नियामकद्वयकल्पना युक्ता । यथा च तीरत्वेऽपि न लक्षणा, तथा वक्ष्यते । तस्माज्जात्याकृतिविशिष्टायां व्यक्तौ शक्तिरिति दिक् । प्रयोगश्च — घटपदं घटत्वविशिष्टशक्तिम[4]त्, उत्सर्गतो घटत्वविशिष्टस्मृतिजनकत्वात्, यन्नैवं तन्नैवम्, यथा पटपदम् ॥

इति[5] शक्तिवादः ।

अथ योगरूढिवादः ।

एवं पङ्कजपदमुत्सर्गतः पद्मत्वविशिष्टस्मृतिजनकत्वात् पद्मत्वविशिष्टे शक्तमिति न्यायविदः । अत्र मीमांसकाः — किं पद्मत्वविशिष्टस्य स्मृत्यर्थं तत्र शक्तिः कल्प्यते, उतानुभवार्थम् । नाद्यः, उद्बुद्धसंस्कारादेव स्मृत्युपपत्तेः । न च नियमतः संस्कारोद्बोधकस्यान्यस्याभावादन्वयव्यतिरेकिणः पङ्कजपदस्यैव तदु-

---

१. 'ले ल' क. पाठः. २. 'तीति ती' ख. पाठः. ३. 'रती' क. पाठः. ४. 'क्तम् । उ' ख. पाठः. ५. 'ति पदश' ख. पाठः.

द्बोधकता वाच्या । पदं च वृत्तिविषयादन्यत्र न संस्कारोद्बोधकमिति पङ्कजपदस्य पद्मत्वविशिष्टे शक्तिरुपेयेति वाच्यम् । शक्तिस्मृतिहेतुसंस्कारोद्बोध एव व्यभिचारेणोक्तनियमाभावात् । न चैवं घटादिपदेऽपि[1] शक्तिर्न स्यात्, तत्रापि संस्कारादेव पदार्थस्मृत्युपपत्तेरिति वाच्यम् । अव्युत्पन्नस्य शाब्दानुभवाभावेन शक्ततया गृहीतस्यैवानुभावकत्वमित्यनुभवार्थं तत्र शक्त्यवश्यंभावात् । नन्वस्तु तर्ह्यत्राप्यनुभवार्थं शक्तिरिति द्वितीयः पक्ष इति चेद्, न । पद्मत्वविशिष्टस्मृतिसहकृतावयवशक्त्यैव पङ्कजनिकर्तृ पद्ममित्यन्वयानुभवोपपत्तेः । नन्वेवं स्मृत्युपस्थितं तीरमादाय घोषादिपदैरेवान्वयानुभवे[2]सम्भवात् तीरे वृत्तिकल्पना न स्यात् । तस्माद् वृत्तिविषयस्यैवान्वयानुभवविषयतेति तीरे यथा वृत्तिकल्पना, तथा पद्मत्वविशिष्टेऽप्यनुभवार्था शक्तिरेष्टव्येति चेद्, न । लाक्षणिकस्थले ह्यनुभवार्था न वृत्तिः । किन्तु तीरस्य प्रकृत्यर्थत्वाभावे विभक्त्यर्थस्याधारत्वस्य तीरेऽन्वयबोधो न स्यात् । विभक्तेः प्रकृत्यर्थगतस्वार्थबोधकत्वव्युत्पत्तेः । अतस्तत्र विभक्त्यर्थान्वयार्थमेव वृत्तिकल्पना, नानुभवार्थम् । नन्वस्तु तर्ह्यत्रापि द्वितीयाविभक्त्यर्थस्य कर्मत्वस्य पद्मान्वयार्थं तत्र शक्तिरिति चेद्, न । पद्मस्यापि पङ्कजनिकर्तृतया प्रकृतिभूतडप्रत्ययार्थतया (च) तदर्थं शक्तेरकल्पनीयत्वात्[3] । तस्मान्न पद्मत्वविशिष्टे शक्तिरित्याहुः ।

---

१. 'पु' क. पाठः. २. 'वात्' ख. पाठः. ३. 'क्तेः क' क. पाठः. ४ 'त् । न तु तस्मात् प' क. पाठः.

अत्रोच्यते — पदविशेषजन्यपदार्थोपस्थितिरेवान्वयबोधाङ्गम् । अन्यथा घटः कर्मत्वमित्यादावप्यन्वयबोधापत्तेः । किञ्च, वृत्त्या पदादनुपस्थितस्याप्यन्वयबोधविषयत्वे आकाशपदे शक्तिर्न स्यात् । समवायसम्बन्धेनाकाशशब्दादुपस्थितस्याप्याकाशस्यान्वयबोधविषयत्वसम्भवात् । ततश्चान्वयबोधविषयपदार्थस्मृतेः वृत्त्या पदजन्यत्वनियमात् पङ्कजमानयेत्यादौ नियमतोऽन्वयबोधविषयपद्मत्वविशिष्टस्मृतिरपि वृत्त्या पङ्कजपदजन्या वाच्येति पङ्कजपदस्य पद्मत्वविशिष्टे शक्तिरवर्जनीया । न चानादिप्रयोगरूपसम्बन्धादुपस्थितस्यैवान्वयबोधविषयत्वमस्त्विति न तत्र शक्तिकल्पनमिति वाच्यम् । एवं सति घटादिपदेऽपि शक्तिर्न स्यात् । वस्तुतस्तु सादिदेवदत्तादिपदे सङ्केतस्यैव पदसम्बन्धत्वकल्पनात् प्रकृतेऽपीश्वरसङ्केत एव सम्बन्ध इति पद्मत्वविशिष्टे शक्तिसिद्धिरिति दिक् ।

केचित्तु पद्मत्वविशिष्टे लक्षणास्तु । पङ्कजनिकर्तृत्वरूपशक्यसम्बन्धसत्त्वात् । वृत्तिद्वयविरोधस्य मणिकृन्मते दोषत्वाभावात् । न च वादिवाक्यात् पद्मत्वविशिष्टप्रतीतिर्न स्यादिति वाच्यम् । तर्हि निरूढलक्षणास्तु । अत एवान्वयानुपपत्त्याद्यप्रतिसन्धानेऽपि तत्प्रतीतिर्न विरुद्धा । न चैवं कुमुदे लाक्षणिकः प्रयोगो न स्यादिति वाच्यम् । निरूढलाक्षणिकस्यापि द्विरेफादिपदस्य 'तस्याः कुन्तलो द्विरेफ' इत्यन्यत्र लाक्षणिकप्रयोगदर्शनादित्याहुः ।

---

१. 'दानु' क. पाठः. २. 'त्वेनाका' ख. पाठः. ३. 'स्थिते त' क. पाठः,

अन्ये तु पङ्कजमानयेत्यत्र न कुमुदादिसाधारणयोगार्थान्वयधीरिति न विवादः । तत्र यदि पद्मत्वविशिष्टे शक्तिर्नस्यात्, तदा कुमुदादिसाधारणी योगार्थप्रतीतिरनिवार्येति तन्निवृत्त्यर्थं पद्मत्वविशिष्टे समुदायशक्तिरङ्गीकार्या । तथात्वे त्वेकपदोपात्तत्वप्रत्यासत्त्या योगार्थावच्छिन्न एव रूढ्यर्थो भासत इति न कुमुदादिसाधारणप्रतीतिः ।

नन्वेवमपि यत्र कुमुदतात्पर्येणैव[1] पङ्कजपदं प्रयुक्तं, तत्र कुमुदत्वप्रकारकप्रतीतेर्वृत्तिं विनानुपपन्नत्वेन समुदायस्य कुमुदे लक्षणायामपि योगार्थस्य लक्षणोपस्थितेन कुमुदेनावयवशक्त्यैवान्वयप्रतीतिसम्भवान्नावयवार्थे[2] लक्षणा कल्प्येत[3] । न चेष्टापत्तिः, अपसिद्धान्तादिति चेद्, न । यथा गङ्गायां घोष इत्यत्र गङ्गापदस्य तीरपरत्वज्ञानेऽपि गङ्गापदात् प्रथमं प्रवाहस्मृतिः, ततः शक्यसम्बन्धज्ञानात् तीरस्मृतिः । तथात्रापि कुमुदपरत्वज्ञानेऽपि प्रथमं पङ्कजपदाद् रूढ्या पद्मत्वविशिष्टस्मृतिः, ततः शक्यसम्बन्धज्ञानात् कुमुदधीः । अतः प्रथममुपस्थितेन पद्मत्वविशिष्टेन योगार्थान्वयात् पश्चात् कुमुदान्वयार्थं स्वतन्त्रोपस्थितये योगार्थेऽपि लक्षणावश्यकी । न च वाक्यलक्षणानङ्गीकारात् कावयवार्थे लक्षणेति वाच्यम् । डप्रत्यय एव लक्षणास्वीकारात् । पङ्कजपदस्य तात्पर्यग्राहकत्वेनावैयर्थ्यात् । न च शक्यस्यैव लक्ष्यत्वं विरुद्धमिति वाच्यम् । गौर्नित्येत्यत्रेव शक्यस्यापि लक्ष्यत्वाविरोधात् । पङ्कजकुमुदमानयेत्यत्रापि समुदायशक्त्या झटि-

---

१. 'चै' ख. पाठः. २. 'र्थं' क. पाठः. ३. 'ल्प्यते । न' ख. पाठः.

ति स्मृतेन पद्मत्वविशिष्टेनैवैकपदोपात्तत्वप्रत्यासत्त्या योगार्थान्वयात् कुमुदान्वयार्थं लक्षणावश्यकी। न च कुमुदसमभिव्याहारेण प्रतिबन्धान्न तत्र पद्मत्वविशिष्टस्मृतिरिति वाच्यम्। समभिव्याहारादेः पद्माद्यन्वयानुभवप्रतिबन्धकत्वेऽपि स्मृतावप्रतिबन्धकत्वस्य वक्ष्यमाणत्वात्। स्थलकमलतात्पर्यके तु पङ्कजपदे योगार्थस्यायोग्यतयानन्वयात् समुदायशक्त्यैव पद्मत्वविशिष्टप्रतीतिरिति दिगित्याहुः।

वस्तुतस्तु ग्राह्याभावानवगाहिनोऽपि जनकज्ञानाविघटकस्यापि[२] रूढिज्ञानस्य, सिद्धेरनुमितावविवासाधुत्वज्ञानस्य शाब्दज्ञान इव च योगार्थज्ञाने प्रतिबन्धकत्वमेष्टव्यम्। अत एव 'वर्षासु रथकार आदधीते'त्यत्र रथकारपदरूढ्यर्थजातिविशेषमात्रस्याधानेऽधिकारो, न तु योगार्थरथकर्तृत्वविशिष्टस्य, रूढ्या प्रतिबन्धेन[३] योगार्थस्याभानात्। तस्मात् पद्मपरत्वेऽपि न योगार्थभानमित्याहुः।

ननु सिद्धेरनुमितिजनकीभूतपक्षताघटकसंशयरूपज्ञानविघटकतयैव प्रतिबन्धकत्वम्। असाधुत्वज्ञानस्यापि शाब्दधीजनकसाधुत्वज्ञानविघटकतयैव प्रतिबन्धकत्वम्। अतो रूढिज्ञानस्य साक्षादविरोधिनो जनकज्ञानाविघटकस्य न योगार्थप्रतिबन्धकतेति चेद्, न। अनुमितौ घनगर्जितस्थलादावभावेन सन्दिग्धसाध्यकत्वरूपपक्षताहेतुत्वनिरासात्। व्याकरणमजान-

---

१. 'त्वस्मृ' ख. पाठः. २. 'पि ज्ञा' क. पाठः. ३. 'पि यो' क. पाठः.

तामपि पामराणामपभ्रंशतोऽप्यर्थप्रत्ययस्य सकलानुभवसिद्धत्वेन व्याकरणस्मृत्युपगृहीतत्वरूपसाधुत्वज्ञानस्य शाब्दबोधहेतुत्वाभावाच्च सिद्धेरसाधुत्वनिश्चयस्य च[1] न जनकज्ञानविघटकतया[2] प्रतिबन्धकत्वं, किन्तु साक्षादेवेति दिक् ॥

इति योगरूढिवादः ।

अथापभ्रंशवादः ।

नन्वपभ्रंशतो व्याकरणस्मृत्यनुपगृहीतत्वरूपासाधुत्वनिश्चयेऽपि व्युत्पन्नानामर्थप्रतीतेरसाधुत्वज्ञानं प्रतिबन्धकमेव नेति चेद्, न । तत्र साधुशब्दस्मरणादेवान्वयबोध इत्येके । व्याकरणस्मृतिनिषिद्धत्वमेवासाधुत्वम् । तच्च नापभ्रंशेषु । न चैवं साधुभिर्भाषितव्यं नासाधुभिरिति विभागानुपपत्तिरिति वाच्यम् । व्याकरणस्मृत्युपगृहीतानुपगृहीतपरत्वात् तस्येत्यन्ये । इदं तु ध्येयम् — अपभ्रंशेषूत्सर्गतस्तत्तदर्थप्रतीतिजनकत्वेऽपि न शक्तिः, एकस्यार्थस्यानेकशब्दत्वस्यान्याय्यत्वात् । न चैवं घटकलशादिषु पर्यायपदेष्वेकत्रैव शक्तिः स्यादिति वाच्यम् । तत्र विनिगमनाविरहेण सर्वत्र शक्त्यभ्युपगमात् । प्रकृते च सर्वदेशावच्छेदेन संस्कृतशब्दानामैक्यस्य विनिगमकत्वात् । न चैवं प्राकृतादिभाषाशब्दानां सर्वदेशावच्छेदेनैक्यात् तत्रापि

---

१. 'च ज' ख. पाठः. २. 'ना' ख. पाठः. ३. 'या न म' ख. पाठः.
४. 'त्युप' ख. पाठः. ५. 'दन्व' क. पाठः.

शक्तिः स्यादिति वाच्यम् । तेषां संस्कृतशब्दज्ञापकतयैवार्थ-प्रत्यायकत्वस्यानुभवसिद्धत्वेन तेषु शक्त्यकल्पनात् । न चैव-मपभ्रंशादर्थप्रतीत्यनुपपत्तिरिति वाच्यम् । शक्तिभ्रमात् तदुप-पत्तेः । तथाहि — व्युत्पन्नं प्रति केनचिद् गोशब्दे प्रयोक्तव्ये करणापाटवाद् गावीशब्द उच्चारिते तेन गोशब्दमनुमायार्थ प्रतीत्य व्यवहृते तद्व्यवहारदर्शिना बालेन * गावीशब्दे शक्ति-भ्रमात् तदुत्तरोत्तरभ्रमपरम्परोपपत्तेरिति दिक् ।

अत्र केचित् — अनन्तासु भाषास्वनन्तेषु शब्देष्वेवं शक्तिभ्रमपरम्पराकल्पनमयुक्तम् । तथा सति विदुषां ततोऽर्थप्र-त्ययो न स्यात् । प्रत्यपशब्दं संस्कृतशब्दस्मरणकल्पनं चाननु-भवपराहतम् । किञ्च, अस्माच्छब्दादयमर्थ उत्सर्गतो बोद्धव्य इतीश्वरेच्छाविषयत्वं शक्तित्वम् । तच्चापभ्रंशेष्वप्यक्षतम् । तस्याः सर्वविषयत्वात् । न च वायौ रूपसमवायसत्त्वेऽपि यथा तत्र तस्य सम्बन्धत्वं न कल्प्यते, तथापभ्रंशेष्वीश्वरेच्छासत्त्वेऽपि तस्यास्तत्र न सम्बन्धत्वकल्पनमिति वाच्यम् । ततोऽर्थप्रतीते-रबाधितत्वेन तत्र तस्याः सम्बन्धत्वकल्पनस्यायुक्तत्वात् । अतः केषाञ्चिच्छक्तिभ्रममूलकत्वसम्भवेऽपि न सर्वेषां तन्मूलकत्वमि-त्याहुः ॥

इत्यपभ्रंशवादः ।

---

१. 'क्ति' क. पाठः. २. 'मादु' ख. पाठः. ३. 'नमन' क. पाठः. ४. 'यमुत्स' क. पाठः. ५. 'क्य' ख. पाठः. ६. 'प्वक्ष' क. पाठः. ७. 'थात्र स' क. पाठः. ८. 'त्व' क. पाठः. ९. 'स्य' क. पाठः.

---

* 'बालस्य' इति पाठ्यं भाति, तद्विशेषणमपि षष्ठ्यन्तम् ।

अथेश्वरेच्छावादः ।

ननु पदपदार्थयोः स्वरूपमेव सम्बन्धोऽस्तु, किमीश्वरेच्छापर्यन्तधावनेनेति चेद्, न । गुणगुणिसम्बन्धवत् पदपदार्थसम्बन्धस्यापि लाघवादेकत्वसिद्धौ लोके डित्थादिपदसङ्केतस्येच्छानुविधायित्वदर्शनाद् घटादिपदसङ्केतस्यापीश्वरेच्छानुविधायित्वकल्पनात् । नन्वेवं नैयायिकस्येश्वरेच्छारूपशक्तिज्ञानमर्थप्रत्यायकम् । मीमांसकस्य तु पदार्थान्तररूपशक्तिज्ञानमिति परस्परव्यभिचारान्न तयोरर्थप्रत्यायकत्वं, किन्तु तज्ज्ञानजनकत्वज्ञानस्यैव । न च सम्बन्धं विना तज्ज्ञानजनकत्वज्ञानमेव न सम्भवतीति वाच्यम् । तज्ज्ञानजनकत्वेन ज्ञातत्वस्यैव सम्बन्धत्वात् । पूर्वपूर्वतद्धीजनकत्वज्ञानादुत्तरोत्तरतद्धीजनकत्वज्ञानसम्भवात् । न च सादिदेवदत्तादिपदे पूर्वपूर्वतद्धीजनकत्वज्ञानासम्भवादस्मादयमर्थो ज्ञातव्य इति सङ्केतज्ञानस्यैव हेतुतया लाघवात् पदमात्रे तस्यैव हेतुत्वमिति वाच्यम् । अस्मात् पदादयमर्थो ज्ञातव्य इति ज्ञानकाले अर्थे पदजन्यज्ञानविषयत्वसमानवित्तिवेद्यतया पदेऽप्यर्थज्ञानजनकत्वस्यापि भानेन सादिपदेऽपि तज्ज्ञानजनकत्वज्ञानसम्भवादिति चेद्, न । तज्ज्ञानजनकत्वेन ज्ञातत्वस्यैव पदसम्बन्धत्वे शक्तिभ्रमादर्थप्रत्ययः क्वापि न स्यात् । अर्थप्रत्यये तद्धीजनकत्वेन ज्ञातत्वरूपपदसम्बन्धावश्यम्भावात् । किञ्च, लिङ्गमपि तद्धीजनकत्वेन

---

१. 'पदा' ख. पाठः. २. 'कसि' ख. पाठः. ३. 'कत्वम्यै' ख. पाठः. ४. 'ना पूर्वपूर्वत' क. पाठः.

ज्ञातमनुमापकमिति किं व्याप्त्या। यदि च सम्बन्धं विना तद्धीजनकत्वमेव[1] न सम्भवतीति व्याप्तिकल्पना, तदा शक्तावपि दीयतां दृष्टिः। यदपि परस्परं[2] व्यभिचार इति, तन्न। नहीश्वरेच्छात्वेन पदार्थान्तरत्वेन[3] वा तज्ज्ञानं हेतुरिति ब्रूमः। किन्तु शाब्दानुभवजनकतावच्छेदकधर्मवदिदं पदमिति सम्बन्धभानमेव हेतुरित्यङ्गीकुर्म इति न कस्यापि मते व्यभिचार इति दिक्॥

इति ईश्वरेच्छावादः।

अथ लक्षणासमर्थनम्।

एवं शक्तिवच्छक्यसम्बन्धरूपा लक्षणाख्या वृत्तिरप्येष्टव्या[4]। अन्यथा गङ्गायां घोष इत्यादौ गङ्गादिपदात् तीराद्युपस्थित्यनुपपत्तेः। न च गङ्गापदात् शक्त्या प्रवाहोपस्थितौ तेन तत्सम्बन्धितीरस्मृतिः सम्भवतीति वाच्यम्। घटः कर्मत्वमानयनं कृतिरित्यत्रान्वयबोधाभावेन पदविशेषजन्यपदार्थोपस्थितेरेवान्वयबोधाङ्गत्वात् तीरस्मृतेरपि गङ्गापदजन्यत्वाय तत्र वृत्तेरभ्युपेयत्वात्। किञ्च, तीरस्य गङ्गापदार्थत्वाभावे तीरे गङ्गायामिति सप्तम्यर्थाधारत्वान्वयो न स्यात्। विभक्तेः प्रकृत्यर्थगतस्वार्थबोधकत्वव्युत्पत्तेः। न च प्रकृतितात्पर्यविषयेऽर्थे विभक्त्यर्थान्वय इति वाच्यम्। परम्परया वह्नितात्पर्यके धूमोऽस्तीति वाक्ये विभक्त्यर्थस्य[5] वह्न्यन्वयबोधापत्तेः, गङ्गापदस्य तीरतात्प-

---

१. 'व स' क. पाठः. २. 'रस्य व्य' क. पाठः. ३. 'र्थत्वे' ख. पाठः. ४. 'रेष्ट' ख. पाठः. ५. 'क्य' क. पाठः. ६. 'स्यान्व' ख. पाठः.

र्यैकत्वे तात्पर्यनिर्वाहकतया तीरे वृत्तिकल्पनावश्यम्भावाच्च । तस्माद् गङ्गापदस्य तीरे शक्यसम्बन्धरूपा वृत्तिरवश्यमेष्टव्या । नन्वेवं गङ्गापदस्य तीरे शक्तिरेवास्तु, ईश्वरेच्छारूपायास्तस्या एकत्वात्, पदपदार्थसम्बन्धत्वेनान्यत्र क्लृप्तत्वात्। जगत्कारणतया तीरस्मृतिहेतुत्वस्यापि सिद्धतया पदपदार्थसम्बन्धत्वेनापि तस्या एव पदार्थस्मृतिहेतुत्वकल्पनौचित्याच्च । न तु शक्यसम्बन्धरूपा लक्षणा कल्प्या । सम्बन्धस्य संयोगसंयुक्तसमवायादिभेदेन स्वरूपतोऽप्यनेकत्वात्, पदसम्बन्धत्वेनान्यत्राक्लृप्तत्वाच्चेति चेद्, न । एवं सति गङ्गापदस्य कदाचिद्[1] घटादिपरतयापि प्रयोगसम्भवेन विश्वमात्रशक्तता स्यादिति गतं शक्याशक्यविवेकेन, समागतं च तीरादावपि शक्तिग्राहकवृद्धव्यवहाराद्यपेक्षया । किञ्च लक्षणास्थलेऽन्वयाद्यनुपपत्तिप्रतिसन्धानमपि न स्यात्। तस्माच्छक्यसम्बन्धस्याक्लृप्तमपि पदसम्बन्धत्वमवश्यं[2] कल्पनीयम् । ननु प्रवाहसम्बन्धस्य पुरुषादिसाधारण्यान्न शक्य[3]सम्बन्धो लक्षणा । न च शक्याविनाभावसम्बन्धो लक्षणा, यष्टीः प्रवेशयेत्यादावपि प्रवेशसमये यष्टि[4]धारिणां यष्ट्यविनाभावसम्भवादिति वाच्यम् । अविनाभावस्यापि मत्स्यादिसाधारण्येनातिप्रसङ्गादिति चेद्, न । प्रकरणादेस्तात्पर्यनियामकत्वेनातिप्रसङ्गाभावात् ।

नन्वेवमक्षादिपदेष्वपि एकत्रैव शक्तिरन्यत्र लक्षणेति

---

१. 'ति श' क. पाठः. २. 'श्यक' क. पाठः. ३. 'क्ति' क. पाठः. ४. 'रा' ख. पाठः.

स्यादिति चेद्, न। तत्र तुल्यवदुभयत्र प्रयोगाद् विनिगमनाविरहेणोभयत्रापि शक्तिरिति नानार्थता। नानाशक्त्या नानाप्रकारकोपस्थितिजनकत्वस्यैव नानार्थत्वात्। न चैवं सर्वनाम्नामपि नानाशक्त्या बुद्धिस्थघटत्वादिनानाप्रकारकज्ञानजनकतया नानार्थतापत्तिरिति वाच्यम्। इष्टत्वादित्येके। बुद्धिस्थत्वाद्युपाधिं विनेत्यपि विशेषणान्न सर्वनामस्वतिव्याप्तिरित्यपरे। सर्वनाम्नां सर्वत्रैकैव शक्तिः। न चैवं पुष्पवन्तादिपदस्य युगपद्दिवाकरत्वनिशाकरत्वोभयप्रकारकप्रतीतिजनकत्ववद् युगपद् घटत्वपटत्वादिसर्वप्रकारकप्रतीतिजनकत्वापत्तिरिति वाच्यम्। व्युत्पत्तिवैचित्र्याद् बुद्धिस्थमात्रप्रकारकप्रतीतिजननोपपत्तेः। अत एवानेकेषां बुद्धिस्थत्वे युगपदनेकप्रकारकप्रतीतिजनकत्वमिति नानाशक्त्यभावान्न नानार्थतेत्यन्ये। एवं सत्यक्षादिपदानामपि दुरोदरादिष्वेकैव शक्तिः। व्युत्पत्तिवैचित्र्यात् तात्पर्यविषयमात्रप्रकारकज्ञानजनकत्वम्। अत एवानेकेषां तात्पर्यविषयत्वे युगपदनेकप्रकारकज्ञानजनकत्वमित्यक्षादिपदानामपि नानार्थता न स्यादित्यपरे। एवं सिंहो माणवक इत्यत्रापि शक्यसादृश्यरूपसम्बन्धात् सिंहशब्दस्य माणवके लक्षणा। न चैवं गौणलाक्षणिकविभागो न स्यादिति वाच्यम्। सादृश्यान्यशक्यसम्बन्धो लक्षणा। सादृश्यात्मकशक्यसम्बन्धो गौणीति तयोर्भेदात्। एवं गामुच्चारयेत्यादौ गवादिपदानां स्वपरत्वे लक्षणा। स्वशक्येन स्वस्य वाच्यवाचकभावलक्षणसम्बन्धसत्त्वात्। न च

---

१. 'दा' क. पाठः. २. 'त्वादि' क. पाठः. ३. 'कप्रती' क. पाठः. ४. 'ननमि' क. पाठः. ५. 'न्धत्वा' क. पाठः.

शक्तिरूपसम्बन्धस्यार्थ इव स्वस्मिन्नप्यविशेषाच्छक्त्यैव स्वोपस्थितिः किं न स्यादिति वाच्यम् । शक्तेः स्वविषयमात्रोपस्थापकत्वस्वाभाव्येन स्वाश्रयीभूतपदोपस्थापकत्वाभावात् । अन्यथा शक्त्याश्रयतया पदमात्रादीश्वरोपस्थितिप्रसङ्गात् । कथञ्चित् स्वनिष्ठशक्त्या स्वोपस्थितावपि[1] तस्य शक्तिविषयत्वरूपप्रकृत्यर्थत्वाभावाद् विभक्त्युपस्थाप्यकर्मत्वादेर्गोपदान्वयो न स्यात् । स्वैविभक्तेः प्रकृत्यर्थगतस्वार्थबोधकत्वव्युत्पत्तेः । अतः प्रकृत्यर्थतासिद्धये तत्र लक्षणावृत्तिरुपेया ।

ननु गङ्गापदलक्षणया किं तीरत्वेनोपस्थितिः, किं वा गङ्गातीरत्वेनोपस्थितिः । नाद्यः, यमुनातीरस्याप्यन्वयबोधापत्तेः । द्वितीये वृत्तिद्वयविरोधः, तीरांशे लक्षणाया गङ्गांशे शक्तेश्चाङ्गीकारादिति चेद्, न । वस्तुतो गङ्गातीरमेव तीरत्वेन प्रतीयत इत्येके । गङ्गातीरत्वेनैव प्रतीतिः, गङ्गायां मत्स्यघोषावित्यत्रेव वृत्तिद्वयसमावेशस्यादोषत्वादित्यपरे ॥

इति लक्षणासमर्थनम् ।

अथ लक्ष्यतावच्छेदके लक्षणानिरासः ।

इदं तु ध्येयम्—लक्ष्यतावच्छेदकतीरत्वादौ न लक्षणा, तीर इव तीरत्वे शक्यसंयोगरूपसम्बन्धाभावात् । न च तथापि तत्र संयुक्तसमवायात्मकशक्यसम्बन्धसत्त्वाद् भिन्नैव

---

१. 'पि श' ख. पाठः. २. 'पविभक्त्यर्थान्वयितावच्छेदकाभा' क. पाठः. ३. 'सुब्विभ' ख. पाठः.

लक्षणास्त्विति वाच्यम् । तथा सति तत्र तीरत्वस्य[1] लक्ष्यतावच्छेदकत्वेन तत्प्रकारकप्रतीत्यापत्तेः, तत्राप्युक्तरीत्या लक्षणापत्त्यानवस्थानात्। न च तीरे तीरत्वं, तीरत्वे च तीरमेव लक्ष्यतावच्छेदकमिति वाच्यम् । तथा सत्युभयप्रकारकोभयविशेष्यकप्रतीत्यापत्तेः । न चैवं लक्ष्यतावच्छेदकस्य पदादुपस्थितिर्न स्यादिति वाच्यम्। तीरत्वेनोपस्थिते शक्यसम्बन्धग्रहाद् 'यद्धीर्येन विना न भासते, तद्भासकस्य तद्भासकत्वनियमादि'ति न्यायेन तीरलक्षणयैव तदुपस्थित्युपपत्तेः । स्ववृत्त्युपस्थापितत्वस्य गौरवेणान्वयबोधातन्त्रत्वात्। शक्यतावच्छेदके च विशिष्टगोचरैकशक्त्या विशिष्टोपस्थितिसम्भवान्न यद्धीरित्यादिन्यायकल्पनमिति दिक् ॥

इति लक्ष्यतावच्छेदके लक्षणानिरासः ।

अथ लक्षणाद्वैविध्यसमर्थनम् ।

इयं तु लक्षणा द्विविधा — जहल्लक्षणाजहल्लक्षणा चेति। यत्र शक्यार्थस्य न वाक्यार्थान्वयः, तत्र जहल्लक्षणा । यथा गङ्गायां घोष इत्यादौ । यत्र तु शक्यस्यापि वाक्यार्थान्वयः, तत्राजहल्लक्षणा । यथा छत्रिणो गच्छन्तीति । न चात्र[2] छत्रीति न प्रकृतिप्रत्ययसमुदाये लक्षणा, वाक्यलक्षणानङ्गीकारात्। नापिच्छत्रपदे छत्र्यच्छत्रिसमुदाये लक्षणा । तथा सतिच्छत्रस्य

---

१. 'त्वस्य' ख. पाठः. २. 'च न' क. पाठः.

वाक्यार्थानन्वयेन जहत्स्वार्थतापत्तेरिति वाच्यम् । छत्रपद एव-च्छत्रच्छत्र्यच्छत्रित्रितयसमुदाये लक्षणाङ्गीकारेण जहत्स्वार्थ-त्वाभावादित्याहुः ॥

इति लक्षणाद्वैविध्यसमर्थनम् ।

अथ लाक्षणिकानुभावकत्ववादः ।

लाक्षणिकं पदमप्यन्वयप्रतियोग्युपस्थापकतयान्वयानु-भावकम् । न च शक्तिमत्पदत्वमेवानुभवजनकतावच्छेदकम् । अशक्यान्वयबोधस्तु पदानामितरान्वितस्वार्थानुभावकत्वव्युत्पत्तेः पदान्तरेणैवोपपन्न इति वाच्यम् । तदपेक्षया वृत्तिमत्पदत्व-स्यैव सामान्यतया लघुत्वादिति केचित् । वृत्तिमत्त्वं हि शक्ति-लक्षणान्यतरवत्त्वम् । तदपेक्षया शक्तिमत्त्वमेव लघु । सामान्य-विशेषयोस्तुल्यशरीरत्व एव सामान्ये प्रमाणपक्षपातादितरत्र शरीरलाघवस्यैव बलीयस्त्वात् । अत एवाख्यातवाच्यतावच्छे-दकं यत्नत्वं, न तु सामान्यमपि व्यापारत्वमिति सिद्धान्तः । न च वृत्तित्वं न शक्तिघटितं, किन्तु अन्वयप्रतियोग्युपस्थित्य-नुकूलपदपदार्थसम्बन्धत्वमेवेति वाच्यम् । तदपेक्षयापि पदप-दार्थसम्बन्धतापन्नेश्वरेच्छात्वरूपशक्तित्वस्य लघुत्वात् । न च शक्तिमत्त्वेनानुभावकत्वेऽपभ्रंशतोऽनुभवो न स्यादिति वाच्यम् । तावता शक्तिमत्त्वेन ज्ञातत्वस्यैवानुभवजनकतावच्छेदकतास्तु,

---

१. 'मन्व' क. पाठः.

तस्माल्लाक्षणिकं[2] नानुभावकम्। न चैवं नीलो द्विरेफ इत्यादौ यत्र पदद्वयमपि लाक्षणिकं, तत्र कथमन्वयानुभव इति वाच्यम्। तत्रापि विभक्तेरेवेतरपदार्थान्वितस्वार्थान्वयानुभावकत्वसम्भवादित्यन्ये। वस्तुतस्तु शक्तं पदमनुभावकमिति सत्यम्। न तु तत् स्वशक्तिविषयमात्रानुभावकं, गौरवात्। न चातिप्रसङ्गः। यत्पदशक्तिः साक्षात्परम्परौदासीन्येन यत्पदार्थोपस्थित्यनुकूला, तत्पदं तदर्थानुभावकमित्यङ्गीकारात्। न चैवं शक्त्युपस्थितेन प्रवाहेण स्मृतस्यापि तीरस्य गङ्गापदादन्वयबोधविषयतापत्तिरिति गतं लक्षणयेति वाच्यम्। पदविशेषजन्यपदार्थोपस्थितेरेवान्वयबोधाङ्गत्वेन लक्षणावश्यकीत्युक्तत्वात्। अतो लाक्षणिकमप्यनुभावकमिति दिक्॥

इति लाक्षणिकानुभावकत्ववादः।

अथ तात्पर्यज्ञानस्य लक्षणाबीजत्ववादः।

तात्पर्यज्ञानं[3] च लक्ष्यान्वयबोधहेतुः। तस्य नानार्थस्थले विनिगमनान्यथानुपपत्त्या हेतुत्वे कल्प्यमाने लाघवेन शाब्दबोधमात्रहेतुत्वकल्पनात्। न च लक्षणास्थले लक्ष्यतात्पर्यधीहेतुत्वेनावश्यकत्वादन्वयानुपपत्तिज्ञानमेव लक्ष्यान्वयबोधहेतुरिति वाच्यम्। शब्दादिनापि लक्ष्यतात्पर्यधीसम्भवेन तदुपजीव्यत्वमिति[4] नियमाभावात्। यष्टीः प्रवेशयेत्यत्रान्वयानुपप-

---

१. 'न ला' ख. पाठः. २. 'कमनु' ख. पाठः. ३. 'र्थानुभावकं च' ख. पाठः. ४. 'वि' ख. पाठः.

त्त्यभावाच्च। न च तत्रापि प्रवेशयेत्यस्य प्रकरणादिना भोक्तृ-प्रवेशपरत्वावसायादस्यान्वयानुपपत्तिज्ञानमिति वाच्यम्। तर्हि तत्रान्वयानुपपत्तिधीहेतुत्वेनावश्यकत्वात् तात्पर्यज्ञानमेव हेतुः। किञ्च यत्र यष्टिपद एव यष्टिधरपरत्वमवसितं, न प्रवेशयेत्यस्य प्रवेशविशेषपरत्वं, तत्रैव व्यभिचारान्नान्वयानुपपत्तिज्ञानं तत्र हेतुः, किन्तु क्वचित् तात्पर्यज्ञानहेतुतया प्रयोजकमात्रम्। किञ्च घोषपदस्य मत्स्यादिलक्षणायामप्यनुपपत्तिशान्तेर्गङ्गापदमेव लक्षकमिति न स्यात्। अतो लक्षकपदनियमार्थमपि तात्पर्यज्ञानं हेतुः। तथा घोषाधारतायोग्यगङ्गासम्बन्धिनिबिडद्रव्यान्तरलक्षणयाप्यनुपपत्तिशान्तेस्तीररूपलक्ष्यनियमार्थमपि तात्पर्यज्ञानं लक्षणास्थलीयान्वयबोधहेतुरिति दिक्॥

इति तात्पर्यज्ञानस्य लक्षणाबीजत्ववादः।

अथ रूढिपूर्वलक्षणावादः।

अत्र मीमांसकाः — सर्वत्र तात्पर्यज्ञानमेव लक्ष्यार्थानुभवहेतुरित्ययुक्तं, क्वचिदन्वयानुपपत्तेरपि तद्धेतुत्वात्। तथाहि — यद्यपि मण्डपं भोजयेत्यादौ मण्डपानकर्तृरूपयोगार्थ एव प्रकरणादिसाहित्यं, तत्र योगार्थस्यैव शीघ्रमुपस्थित्या भोजना-

---

१. 'त्र प्र' क. पाठः. २. 'स्त्व' क. पाठः. ३. 'तुः, क्व' ख. पाठः. ४. 'कं न' क. पाठः. ५. 'न्धिद्र' क. पाठः. ६. 'येदित्या' क. पाठः. ७. 'ग्या' क. पाठः. ८. 'त्यान्वयबोधान्न' क. पाठः.

न्वयान्न लक्षणावकाशः, तथापि मण्डपं पश्येत्यादौ[1] यत्र रूढ्यर्थयोगार्थयोरुभयोरपि प्रकरणादितौल्यं, यत्र वानेकत्रापि प्रकरणादिकं, तत्र सर्वत्रापि पदार्थतया रूढ्यर्थस्यैव शीघ्रमुपस्थितिः, योगार्थस्य वाक्यार्थतयाकाङ्क्षादिसापेक्षतया विलम्बितोपस्थितिरित्यविवादम्। तथा च मण्डपं भोजयेत्यत्रोभयत्रापि प्रकरणाद्यभावे[2][3] रूढ्यर्थस्य गृहविशेषस्यैव शीघ्रमुपस्थित्या तस्य भोजनान्वयानुपपत्तिज्ञानमात्रादेव गृहविशेषसम्बन्धिनि लक्षणेति सर्वत्र न तात्पर्यज्ञानं लक्षणाबीजमित्याहुः।

अत्र तार्किकाः — रूढ्यर्थस्यान्वयानुपपत्तिज्ञाने सत्यवयवशक्त्योपस्थितस्य योगार्थस्य लक्षणां विनैवान्वयबोधः स्यादिति कुतस्तत्रान्वयानुपपत्तिज्ञानमात्राल्लक्षणा। न च तत्र रूढ्यर्थस्मृतेरवयवशक्त्या योगार्थस्मृतिप्रतिबन्धकतया लक्षणयैव[4] तत्र योगार्थभानमाश्रयणीयमिति वाच्यम्। रूढ्यर्थान्वयानुभवस्यैव[5] योगार्थभानप्रतिबन्धकत्वात्, तस्य तत्राभावात्। न च लाघवाद् रूढ्यर्थज्ञानत्वेनैव योगार्थज्ञानप्रतिबन्धकत्वमिति वाच्यम्। रूढ्यर्थान्वयानुभवस्य साक्षादविरोधिनो जनकीभूताकाङ्क्षाज्ञानविघटनद्वारा प्रतिबन्धकत्वे सम्भवति ग्राह्याभावानवगाहिनो जनकज्ञानाविघटकस्य च रूढ्यर्थस्मरणस्य मण्यादिवत् प्रतिबन्धकत्वकल्पनानौचित्यात्। तस्माद् यत्र योगार्थ एव प्रकरणादिकं, तत्र योगार्थस्यैवान्वयधीः। यत्र

---

१. 'दौ रू' ख. पाठः. २. 'येदित्य' क. पाठः. ३. 'णाभा' क. पाठः. ४. 'णैव तत्र न योगार्थभानमि' क. पाठः. ५. 'स्य यो' ख. पाठः.

तु नोभयत्र प्रकरणादिकं, तत्र रूढ्यर्थान्वयानुपपत्तौ तात्पर्यज्ञानाभावे गृहविशेषसम्बन्धिनि न लक्षणा । किन्त्वन्वयवशक्त्युपस्थितस्य योगार्थस्यान्वयधीर्भवति । तात्पर्यज्ञानसत्त्वे तु गृहविशेषसम्बन्धिनि लक्षणेति सिद्धं तात्पर्यज्ञानस्य लक्ष्यान्वयबोधहेतुत्वम् । एवञ्च यत्र रूढ्यर्थस्य नान्वयानुपपत्तिः पङ्कजमानयेत्यादौ, तत्र योगार्थाभानात् तद्विषय एव रूढेर्योगोपहारित्वप्रवाद इति ध्येयम् । अत एव 'वर्षासु रथकार आदधीते'त्यत्र योगार्थे प्रकरणाद्यभावेन रूढ्यर्थस्यैवोपस्थितेर्जातिविशेषस्यैवाधानेऽधिकारः । ननु 'न शूद्राय मतिं दद्यादि'ति शूद्रस्य वेदपाठनिषेधेन कथं तस्याधानेऽधिकार इति चेद्, न । तस्य सामान्यशास्त्रतया विशेषशास्त्रेण सङ्कोचात् । ननु न शूद्रायेत्यत्र यदि शूद्रपदस्य रथकारातिरिक्तशूद्रपरत्वं, तदा रथकारस्य वेदनिषेधाभावात् सकलवेदाध्ययनाधिकारः स्यात् । यदि च मतिपदमाधानानुकूलवेदातिरिक्तवेदपरं, तदा शूद्रान्तरस्याप्याधानानुकूलवेदाध्ययने दोषो न स्याद् निषेधाभावादिति चेद्, न । यस्य शूद्रस्य यत्कालावच्छेदेन यद्वेदाध्ययनं विशेषविधिविहितं, तदतिरिक्तकाले तद्वेदाध्ययनं सर्वदा तद्भिन्नवेदाध्ययनं च शूद्रेण न कर्तव्यमिति निषेधशास्त्रार्थत्वात् । नन्वेवं 'स्वर्गकामो यजेते'ति विशेषविधिबलात् स्वर्गकामातिरिक्तशूद्रविषयकं निषेधशास्त्रमिति किं न स्यादिति चेद्, न ।

---

१. 'क्षणान्व' क. पाठः. २. 'गपरिहारत्व' क. पाठः. ३. 'णाभा' ख. पाठः. ४. त्र शू' ख. पाठः. ५. 'क्त्प' क. पाठः. ६. 'क्त' क. पाठः.

स्वर्गकामपदस्य रथकारपदवच्छूद्रे रूढ्यभावेन त्रैवर्णिकपरतयाप्युपपत्तेर्विशेषशास्त्रत्वाभावेन तद्वशान्निषेधशास्त्रस्य स्वर्गकामेतरशूद्रविषयकत्वकल्पनायोगात् । तस्मान्मण्डपं भोजयेत्यत्र गृहविशेषसम्बन्धिनि तात्पर्यज्ञानं विना न लक्षणेति दिक् ॥

इति रूढिपूर्वलक्षणावादः ।

अथ वाक्यलक्षणानिरासः ।

सा च लक्षणा पदवृत्तिः, वृत्तित्वात् शक्तिवत् । न चाप्रयोजकत्वम्, शक्यसम्बन्धस्यैव लक्षणात्वेन वाक्ये च शक्त्यभावेन शक्यसम्बन्धाभावात् । नन्वेवं गभीरायां[1] नद्यां घोष इत्यत्र गभीरपदे[2][3] न तीरलक्षणा, तीरे नद्यभेदाभावेन नदीपदानन्वयात्। नापि नदीपदे, तीरे गभीरपदानन्वयात्। अतो गभीरपदनदीपदयोः प्रथमं[4]मन्वयबोधे पश्चाद् घोषान्वयानुपपत्तिज्ञाने सति गभीरायां नद्यामिति वाक्ये गभीरनदीतीरे लक्षणावश्यकी। न च तत्र शक्त्यभावाच्छक्यसम्बन्धात्मिका न लक्षणेति वाच्यम् । शक्यसम्बन्धापेक्षया सामान्यत्वेन लघुतया स्वज्ञाप्यसम्बन्धस्यैव लक्षणात्वौचित्यात् । न चैवं गभीरायां नद्यामिति सविभक्तिकस्य वाक्यस्य लक्षकत्वे विभक्त्यर्थाधारत्वस्य तीरे[5]ऽन्वयो न स्यात् । लक्षकपदशक्यस्य लक्ष्येऽनन्वयादिति

१., २. 'म्भी' ख. पाठः. ३. 'दे ती' ख. पाठः. ४. 'मान्व' ख. पाठः. ५. 'रान्व' ख. पाठः.

वाच्यम् । नीलो घट इत्यत्र गुणिलक्षकर्नीलपदशक्यस्य गुणस्य[1] लक्ष्ये गुणिन्यन्वयाद्, वृत्तिद्वयसमावेशस्यादोषत्वे शक्त्यैवाधारत्वोपस्थितिसम्भवाच्च । न च ज्ञाप्यसम्बन्धस्य लक्षणात्वे लिङ्गतया स्वज्ञाप्यसम्बन्धस्यापि लक्षणात्वं स्यादिति वाच्यम् । तात्पर्ये सतीष्टत्वात् । यद्वा शक्त्या स्वज्ञाप्यसम्बन्धो लक्षणा । वाक्ये च शक्त्यभावेऽपि पदशक्त्या स्वज्ञाप्यसम्भवात् । तस्माद् वाक्ये लक्षणावश्यकीति चेद्, न । शक्त्या स्वज्ञाप्यसम्बन्धत्वापेक्षया शक्यसम्बन्धत्वस्य लघुत्वात्, पदलक्षणयैवोपपत्तौ पदद्वयात्मकवाक्यलक्षणाया अन्याय्यत्वात् । न च पदलक्षणापक्षेऽपि विनिगमनाविरहेण पदद्वयेऽपि लक्षणा स्यात् । ततो वाक्य एवैका लक्षणेति वाच्यम् । विशेषणविभक्तेः[2] शब्दसाधुत्वार्थकतया विशेषणपदे लक्षणायां विभक्त्यर्थस्य लक्ष्यानन्वयेन तीर आधारत्वप्रतीत्यनापत्तेः विशेष्यपद एव लक्षणाङ्गीकारात् । न च विशेष्यगतविभक्तेरेवार्थ[3]वत्त्वे किं विनिगमकमिति वाच्यम् । निर्विशेषणविशेष्यस्थले विशेष्यगतविभक्तेरर्थ[4]वत्त्वावधारणात् । न चैवं नदीपदस्यैव गभीरनदीतीरलक्षकत्वे गभीरपदवैयर्थ्यमिति वाच्यम् । तात्पर्यग्राहकतया तदवैयर्थ्यात् । तस्माद् वाक्ये न लक्षणा, किन्तु पद एव, तत्रापि विशेष्यपद इति दिक् ॥

इति वाक्यलक्षणानिरासः ।

---

१. 'स्य गु' क. पाठः. २. 'क्तेः सा' क. पाठः. ३. 'र्थ' क. पाठः. ४. 'साधुत्वे किं' ख. पाठः. ५. 'साधुत्वाव' ख. पाठः.

अथ बहुव्रीहिलक्षणावादः ।

एवं चित्रगुमानयेति बहुव्रीहौ गोपदस्य चित्रगोस्वामिनि लक्षणा। चित्रपदं तु तात्पर्यग्राहकमिति न्याय्यः[1] पन्थाः। 'अनेकमन्यपदार्थे'(२.२.२४) इति व्याकरणस्मृत्यानेकस्य[2] पदस्यान्यपदार्थे वर्तमानस्य समासानुशासनात् पदद्वयेऽपि लक्षणेति स्थितिः। ननु दधि पश्येत्यत्र लुप्तया द्वितीयया कर्मत्वस्येव चित्रा गौर्यस्येति विग्रहवाक्यस्थलुप्तयत्पदादेवान्यपदार्थस्योपस्थितिसंभवे किं लक्षणया। न च विग्रहवाक्यस्थस्य[3] यस्येतिपदस्य स्मृतावपि कर्मत्वेनानुपस्थितेर्नानयनान्वयसंभव इति वाच्यम्। तमिति पदमप्यध्याहृत्यान्वयबोधोपपत्तेरिति चेद्, न। पदान्ताध्याहारतो लक्षणाया एव ज्यायस्त्वात्। अन्यथा गङ्गायामित्यादावप्यध्याहारापत्तेः[4]। दधि पश्येत्यत्र तु क्रियाकर्मभावान्वये घटः कर्मत्वमित्यादावन्वयाननुभवेन द्वितीयोपस्थाप्यकर्मत्वस्यैवाङ्गतया लुप्ताया द्वितीयाया एव कर्मत्वोपस्थापकत्वकल्पनात्। किञ्च, बहुव्रीहेर्नित्यसमासतया विग्रहाभावात्, समस्यमानैरेव पदैरर्थकथनस्य विग्रहत्वाद्, इह त्वसमस्यमानेन यत्पदेनार्थकथनात्। चित्रा गौर्यस्येति[5] च बहुव्रीहिवाक्यस्यार्थकथनमात्रमिति बहुव्रीहावपि न वाक्ये लक्षणा। बहुव्रीहिश्चातद्गुणसंविज्ञानस्तद्गुणसंविज्ञानश्चेति[6] द्विविधः। तत्र यत्र शक्यस्य न क्रियान्वयः तत्राद्यः। यथा चित्रगुमानयेत्यादौ। तत्र शक्यस्य गोः क्रिया-

---

१. 'य्यम्। अ' क. पाठः. २. 'कस्या' क. पाठः. ३. 'स्य स्मृ' क. पाठः. ४. 'वध्या' क. पाठः. ५. 'न क' क. पाठः. ६. 'ति ब' क. पाठः.

नन्वयात्। यत्र शक्यस्यापि क्रियान्वयस्तत्र तद्गुणसंविज्ञानबहुव्रीहिः। यथा चैत्रादीन् भोजय, लम्बकर्णमानयेत्यादौ। तत्र शक्यस्य चैत्रस्य कर्णस्य च क्रियान्वयात्। तत्र चैत्रादीनित्यत्र निमन्त्रितत्वमेव शक्यसम्बन्धो लक्ष्यतावच्छेदकं च। चैत्रस्य शक्यस्य मैत्रादेर्लक्ष्यस्य च तेन रूपेणोपस्थितेः। लम्बकर्णमित्यत्र तु कर्णकर्णवतोर्यः सम्बन्धस्तन्निरूपकत्वमेव कर्णकर्णवदुभयसाधारणं लक्ष्यतावच्छेदकं शक्यसम्बन्धश्च[1]। न च लम्बकर्णमानयेत्यस्यापि[2] तद्गुणसंविज्ञानत्वे चैत्रादीन् भोजयेत्यत्र चैत्रमैत्रयोरिव कर्णकर्णवतोस्तुल्यवत्क्रियान्वयः स्यात्। न त्वेवम्। कर्णस्य विशेषणत्वेन कर्णवतः प्राधान्येन क्रियान्वयादिति वाच्यम्। कर्णकर्णवतोरपि प्राधान्येनैव क्रियान्वय इत्येके। प्राधान्येन क्रियान्वयाभावेऽपि क्रियान्वयिस्वार्थकत्वरूपं तद्गुणसंविज्ञानत्वमक्षतमेवेत्यन्ये। न च क्रियान्वयिस्वार्थकत्वमात्रस्य तद्गुणसंविज्ञानत्वे काकेभ्यो दधि रक्ष्यतामित्यत्रापि त(था?दा)पत्तिरिति वाच्यम्। बहुव्रीहित्वे सतीत्यपि विशेषणात्। तस्माद् बहुव्रीहौ सर्वत्रोत्तरपद एव लक्षणा, न तु वाक्य इति दिक्।

वैयाकरणास्तु—बहुव्रीहौ नियमतोऽन्यपदार्थे[3] तात्पर्यान्नियमतोऽन्यपदार्थोपस्थापकत्वाच्चान्यपदार्थे[4] शक्तिरेव। नहि लक्षकपदस्यान्यपदार्थे तात्पर्यनियमस्तदुपस्थापकतानियमश्च संभवति। ननु बहुव्रीहौ न वाक्ये (न?) लक्षणा, किन्तु उत्तरपदे। तस्यार्थविशेषे न तात्पर्यनियमादिकमिति (चेद्, न)। तथापि

१. 'श्च । ल' क. पाठः. २. 'स्य त' क. पाठः. ३. 'र्थोपस्था' ख. पाठः. ४. 'यतान्य' क. पाठः. ५. 'र्थबोधक' क. पाठः.

बहुव्रीहिस्थपदद्वयेऽर्थविशेषे तात्पर्यादिनियमेन शक्तेरावश्यकत्वात्। न च तथापि निरूढलक्षणैवास्त्विति[1] वाच्यम्। शक्तेरेव निरूढलक्षणातो ज्यायस्त्वादित्याहुः।

अत्रोच्यते — तात्पर्यनिर्वाहिका वृत्तिः। तात्पर्यं च त्रिविधम्। औत्सर्गिकमापवादिकं नियतं चेति। तत्र यत्रौत्सर्गिकं तात्पर्यं, यथा गङ्गादिपदानां प्रवाहादौ, तत्र शक्तिः। यत्र त्वापवादिकं, यथा गङ्गादिपदस्य तीरादौ, तत्र लक्षणा। यत्र तु नियतं, यथा धूमादित्यादिहेत्ववयवत्वावच्छेदेन[2] ज्ञाने घटं करोतीत्यादौ च घटावयवादौ, तत्र निरूढलक्षणा। ततश्च बहुव्रीहौ पदान्तरसमभिव्याहृतोत्तरपदत्वावच्छेदेनान्यपदार्थे तात्पर्यनियमान्निरूढलक्षणैव युक्ता। न चैवं घोषपदसमभिव्याहृतगङ्गापदत्वावच्छेदेन तीरे तात्पर्यनियमात् तत्रापि निरूढलक्षणा स्यादिति वच्यम्। तत्र घोषाधारतायोग्यनिबिडद्रव्यान्तरेऽपि कदाचित् तात्पर्यसम्भवेन तीरे तन्नियमाभावात्। ननु द्विरेफ इत्यत्र[3] बहुव्रीहौ द्वौ रेफौ यस्येत्यन्यपदार्थे रेफद्वयवति भ्रमरशब्दे न तात्पर्यं, किन्तु भ्रमरशब्दवाच्य एवेति बहुव्रीहावन्यपदार्थे(न) तात्पर्यनियम इति चेद्, न। बहुव्रीहित्वावच्छेदेनान्यपदार्थे तात्पर्यनियमकल्पनाद् द्विरेफपदेऽपि भ्रमरपदवाच्यस्यैवान्यपदार्थत्वकल्पनात्। न च तस्य न रेफद्वयवत्त्वमिति वाच्यम्। भ्रमरशब्दगतस्य रेफद्वयस्य तदर्थेऽपि परम्परासम्बन्धेन

---

१. 'णास्त्वि' क. पाठः. २. 'वाव' क. पाठः. ३. 'त्र द्वौ' क. पाठः.

सत्त्वात् । तादृशसम्बन्धस्यैव तत्र विवक्षितत्वात् । अतो बहुव्रीहावन्यपदार्थे निरूढलक्षणैव, न शक्तिः ।

नन्वेवं बहुव्रीहावुत्तरपदस्य लक्षकत्वे लक्ष्यवाचकपदान्तरसमानलिङ्गता न स्यात्, गङ्गायामित्यादावदर्शनादिति चेद्, न । विशेषणपदस्य विशेष्यपदलिङ्गग्राहितया चित्रगुर्देवदत्त इति विशेष्यपदलिङ्गग्राहितोपपत्तेः । अत एव नीलः पटो नीलं वस्त्रमिति लक्षकस्यापि नीलपदस्य विशेषणपदत्वेन विशेष्यपदलिङ्गग्राहिता । अन्यथा विशेष्यपदलिङ्गग्राहित्वमात्रेण शक्तिकल्पने नीलादिपदेऽपि शक्तिः स्यात् । न च देवदत्तस्य पदमित्यत्र विशेषणपदस्य देवदत्तस्येत्यस्य न विशेष्यभूतपदलिङ्गग्राहिता । देवदत्तः पचतीत्यत्र सुप्तिङोर्विशेषणविशेष्यपदयोः समानलिङ्गताभा(वाच्च?वश्च) इति वाच्यम् । विशेष्यपदेन सहैकार्थवृत्तेर्विशेषणपदस्य विशेष्यपदलिङ्गग्राहितानियमात् । देवदत्तस्य पदमित्यत्र न विशेषणपदस्य विशेष्यपदेन सहैकार्थवृत्तित्वम् । तथा सुप्तिङोरपीति न तत्र व्यभिचारः । न च तिङोऽपि कर्तुर्वाच्यतया सुप्तिङोः कथं नैकार्थत्वमिति वाच्यम् । तिङः कर्तृगतसंख्यावाचित्वेऽपि कर्तुराक्षेपलभ्यतया तद्वाचकत्वाभावात् । न च कर्तुराक्षेपलभ्यत्वे कथं शाब्दानुभवविषयत्वमिति वाच्यम् । प्रथमान्तपदोपस्थाप्यत्वस्यैवाक्षेपलभ्यशब्दार्थत्वात् । अतः सुप्तिङोर्नैकार्थवृत्तित्वमिति न तत्र व्यभिचारः । लिङ्गविशेषानुशासनाभावे सतीत्यपि विशेषणीयम् । अतो देवदत्तो

---

१. 'ष्यलि' ख. पाठः. २. 'ङो' क. पाठः. ३. 'तृसं' क. पाठः.

मित्रमित्यादौ मित्रादिपदस्य देवदत्तादिपदलिङ्गग्राहित्वाभावेऽपि न व्यभिचार इति दिक् ॥

इति बहुव्रीहिलक्षणावादः ।

अथ तत्पुरुषलक्षणावादः ।

एवं राजपुरुष इत्यादिषष्ठीतत्पुरुषसमासेऽपि नियमतः षष्ठ्यर्थसम्बन्धप्रतीतेर्निरूढलक्षणयैवोपपत्तेर्न षष्ठ्यर्थे शक्तिकल्पना । अत एव तद्धनमित्यादौ सर्वनाम्नः सर्वशक्तत्वेनानुपपत्त्यभावेऽपि तत्पदे सम्बन्धलक्षणा, निरूढलाक्षणिकत्वात् । ननु राज्ञः पुरुष इति विग्रहे समासविधानाल्लुप्तषष्ठ्येव स्मृता सम्बन्धबोधिकास्त्विति तत्पुरुषे लक्षणापि न कल्प्येति चेद्, न। समासोपस्थितिसमये नियमतो विग्रहस्मरणे मानाभावात्। विग्रहाभिधानस्य च तत्र समासार्थकथनमात्रत्वात् । दधि पश्येत्यादौ तु लुप्तद्वितीयास्मरणस्य विभक्तिविशेषाभावे घटः कर्मत्वमित्यत्रेव क्रियाकर्मभावान्वयानुपपत्त्या प्रागेव साधितत्वात् । समासे त्वनुशासनबलेन साधुत्वाद् विभक्त्यभावेऽपि नैराकाङ्क्ष्यविरहेण व्युत्पत्तिभेदात् । नन्वेवमपि राजपदाद् राज्ञः पुरुषपदात् पुरुषस्य संसर्गमर्यादया सम्बन्धस्य[1] च भानोपपत्तेर्न सम्बन्धलक्षणा कल्प्येति चेद्, न । समासस्य राज्ञः पुरुष इति विग्रहसमानप्रकारकज्ञानजनकत्वानुरोधेन विग्रहे प्रकारीभूतस्य

---

१. 'स्य भा' क. पाठः.

सम्बन्धस्य समासेऽपि प्रकारत्वार्थं तत्र लक्षणावश्यम्भावात् । ननु 'विभाषे'(२.१.११)ति सूत्रेण विग्रहसमासयोरनुशासनात् समासे शक्तिसिद्धिरिति चेद्, न । व्याकरणस्य साधुत्वमात्रज्ञापकत्वेन तद्बलात् साधुत्वमात्रसिद्धावपि शक्त्यसिद्धेः । न च साधुत्वेन शक्तिरनुमीयत इति वाच्यम् । सुवन्ततिङन्तपदयोर्व्याकरणसाधुत्वेऽपि क्वाप्यशक्तेः, प्रत्येकमेव प्रकृतिप्रत्यययोः शक्तत्वात् । अतो नानुशासनबलादपि शक्तिः । अत एव 'द्व्येकयोर्द्विवचनैकवचने' (१.४.२२) इति सूत्रमेकत्वादावेकवचनादेर्न शक्तित्वज्ञापनार्थम् । 'तान्येकवचनद्विवचनबहुवचनान्येकशः'(१.४.१०२) इति सूत्रेणैकस्य वचनस्यैकवचनमित्यौपचारिकसंज्ञाबलादेवैकवचनादेरेकत्वादौ शक्तिसिद्धेः । अत इदं सूत्रं व्यर्थमित्याशङ्क्य शक्तत्वज्ञापकत्वाभावेऽप्येकत्व एवैकवचनं द्वित्व एव द्विवचनं च साधु, न तु लक्षणयाप्यन्यत्रेति ज्ञापनार्थतया नेदं सूत्रं व्यर्थमित्युक्तम् । न चैवमन्यविभक्तेरन्यविभक्त्यर्थे लक्षणयाप्यसाधुत्वे मातुः स्मरतीत्यादौ षष्ठ्यादेर्द्वितीयार्थे लक्षणयापि प्रयोगो न साधुः स्यादिति वाच्यम् । व्यत्ययानुशासनबलेन यत्र विशेषानुशासनं, तत्र विभक्तेर्विभक्त्यन्तरार्थे लक्षणया साधुत्वेऽप्यन्यत्रासाधुत्वावगमात् । न चैवमेकस्यां भार्यायां दारा इति बहुवचनानुपपत्तिरिति वाच्यम् । तत्र बहुवचनप्रयोगस्य शब्दसाधुत्वमात्रार्थत्वेन बहुत्वस्य प्रकृत्यर्थानन्वयात् । एवं च

---

१. 'क्य' ख. पाठः. २. 'क्तिसिद्धिर' क. पाठः. ३. 'क्तिज्ञा' क. पाठः. ४. 'नमि' क. पाठः. ५. 'त्यन्व' पाठः.

विशेषानुशासनाभावे सुब्विभक्तेर्न विभक्त्यन्तरार्थे लक्षणयापि साधुत्वम् ।

नन्वेवं तुल्यन्यायतया तिङ्विभक्तेरपि विशेषानुशासनं विनान्यत्र लक्षणयाप्यसाधुत्वाद् रथो गच्छतीत्यादौ व्यापारे लक्षणा न स्यादिति चेद्, न । आख्याते व्यत्ययानुशासनबलेन विभक्त्यन्तरार्थे लक्षणाविरहेऽपि व्यापारलक्षणायामदोषादिति दिक् ।

ननु राजपुरुषमानयेत्यत्र राजसम्बन्धिपुरुषे द्वितीयोपस्थापितकर्मत्वावगतिरित्यविवादम् । विभक्तिश्च प्रकृत्यर्थगतस्वार्थबोधिकेति विशिष्टपुरुषस्य प्रकृत्यर्थतासिद्धये समासस्य विशिष्टपुरुषे शक्तिरभ्युपेयेति चेद्, न । द्वितीयया पुरुषे कर्मत्वमुपस्थाप्यते, तत्र राजसम्बन्धित्वं च भासत इति राजसम्बन्धिपुरुषे कर्मत्वान्वयोऽर्थात् सिध्यतीति न तदर्थमपि समासे शक्तिकल्पनमिति दिक् । इदं त्ववधेयं — राजपुरुष इत्यत्र षष्ठ्यर्थसम्बन्ध एव लक्ष्योऽनन्यलभ्यत्वाद्, न तु सम्बन्धी, तस्य पुरुषपदादेवोपस्थितेरिति प्राञ्चः ।

नव्यास्तु राजपुरुष इत्यत्र राजसम्बन्धिपुरुषप्रतीतेः सम्बन्धिन्येव लक्षणा। न च यथा देवदत्तः पचतीत्यत्र पाकानुकूलयत्नवानिति यत्नवतः प्रतीतावप्यन्यलभ्यत्वान्न यत्नवतः शक्यत्वं, तथात्रापि न सम्बन्धिनो लक्ष्यत्वम्, अन्यलभ्यत्वादिति वाच्यम्। प्रातिपदिकार्थयोरभेदान्वयस्य व्युत्पत्तिसिद्धतया राजपदार्थपुरु-

---

१. 'प इति' क. पाठः. २. 'ष्टे' क. पाठः. ३. 'नुभवस्य' ख. पाठः,

षपदार्थयोरभेदानुभवार्थमत्र सम्बन्धिलक्षणावश्यंभावात् । अत एव नीलघटमानयेत्यत्र नीलपदार्थघटपदार्थयोरभेदान्वयानुभवबलादेव नीलपदस्य धर्मिणि लक्षणा । अन्यथा गुणपरत्वे समवायस्य संसर्गमर्यादयोपस्थितौ लक्षणानर्थक्यात्[1] । अत एव समानविभक्तिकप्रातिपदिकार्थयोरेवाभेदान्वयानुभवनियमः । समासे च समानविभक्तिकत्वाभावेन[2] नाभेदानुभव इत्यपास्तम् । समानविभक्तिकत्वाभावेऽपि[3] नीलघटमित्यत्राभेदानुभवात् । न च प्रातिपदिकार्थयोः[4] सर्वत्राभेदानुभवव्युत्पत्तौ दण्डेन गामानयेत्यत्रापि[5] भेदानुभवव्युत्पत्त्यापत्तिरिति वाच्यम् । तावता विरुद्धविभक्त्यनवरुद्धप्रातिपदिकार्थयोरभेदानुभवव्युत्पत्तौ बाधकाभावात् । यदि च देवदत्तस्य पुत्रस्य भार्येत्यादौ देवदत्तपुत्रयोस्तथाविधयोरपि नाभेदानुभवः, तदा एकार्थवृत्तित्वयोग्येत्यपि प्रातिपदिकविशेषणं देयम् । न चैवमपि भूतले घटो नेत्यत्र घटतदभावयोः प्रातिपदिकार्थयोरभेदान्वयाभावाद् व्यभिचार इति वाच्यम् । उक्तयुक्तिबलेन तत्रापि घटपदेन घटप्रतियोगिको लक्ष्यत इति घटप्रतियोगिकाभावयोरभेदानुभव एव । न च विरुद्धविभक्त्यनवरुद्धत्वापेक्षया समानविभक्त्यवरुद्धत्वमेव लघ्विति समासे तदभावान्नाभेदानुभव इति वाच्यम् । तथा सति नीलघटमित्यत्राभेदानुभवबलान्नी(लपदे) लक्षणेति सिद्धान्तविरोधापत्तेः । तस्मात् षष्ठीतत्पुरुषे सम्बन्धिन्येव लक्षणेत्याहुः ॥

इति तत्पुरुषलक्षणावादः ।

---

१. 'त्वा' क. पाठः. २. 'कत्वभा' क. पाठः. ३. 'क्तित्वा' क. पाठः. ४. 'योरभे' क. पाठः. ५. 'त्राभे' क. पाठः.

अथ कर्मधारयलक्षणानिरासः ।

नन्वेवं नीलोत्पलमिति कर्मधारयेऽपि नीलपदेऽपि नीलाभेदे शक्तिर्लक्षणा वावश्यमङ्गीकार्या । अन्यथा नीलाभेदप्रतीत्यनापत्तेरिति चेद्, न । किमभेदे शक्त्यादिकं विना स्मृत्यभाव आपाद्यते किं वा स्वस्वानुभवाभावः । आद्य इष्टत्वात् । नहि नीलोत्पलमित्यत्र नीलत्वविशिष्टोत्पलाभ्यामन्यत् स्मर्यते । नान्त्यः । संसर्गमर्यादया नीलोत्पलपदार्थयोरभेदानुभवे बाधकाभावेन तदर्थं शक्त्याद्य(र्थ?)कल्पनात् । ननु यथा राज्ञः पुरुष इति विग्रहसमानार्थकथनार्थं राजपुरुष इति समासे सम्बन्धलक्षणा, तथा नीलमुत्पलमिति व्यासे विशेषणविभक्तेरभेदार्थत्वेन नीलाभिन्नत्वप्रकारकज्ञानजननात् तदैकरूप्याय समासेऽप्यभेदशक्त्यादिकमावश्यकमिति चेद्, न । विशेषणविभक्तेः कर्मत्वादिशक्तायाः अभेदार्थकत्वंस्यापि कल्पने गौरवापत्त्या साधुत्वमात्रार्थत्वेन व्यासेऽपि नीलाभेदस्य संसर्गमर्यादयैव प्रतीतेः । अन्यथा नीलपदस्य नीलाभेदपरत्वे नीलाभिन्नमुत्पलमिति नीलाभिन्नाभेदस्यापि संसर्गमर्यादया प्रतीत्यङ्गीकारापत्तेः । न चेष्टापत्तिः । तथा सति तत्पुरुषादाविव कर्मधारयेऽपि लक्षणाद्यविशेषे "बहुव्रीहितत्पुरुषाभ्यां कर्मधारयस्य बलीयस्त्वात् 'एतया निषादस्थपतिं याजयेदि'त्यत्र न निषादानां स्थपतिरिति तत्पुरुषः, निषादपदे सम्बन्धे लक्षणापत्तेः । नापि निषादः स्थपतिः स्वामी यस्येति बहुव्रीहिः । अन्यपदार्थे लक्षणापत्तेः । किन्तु निषादश्चासौ स्थपतिश्चेति कर्मधारयः" इति मीमांसासिद्धान्तविरोधात् । न च कर्मधारयेऽपि निषादस्य या-

गानुकूलविद्याप्रयुक्तिकल्पनागौरवं स्यादिति वाच्यम् । शब्द-शक्त्यनुरोधेनार्थे निश्चिते तदुपपाद(क)कल्पनस्य प्रामाणिकत्वा-दिति दिक् । अर्धपिप्पलीति तत्पुरुषे तूत्तरपदे षष्ठ्यर्थे लक्षणा। अतश्च पिप्पल्या अर्धमित्यर्थो लभ्यते । तथोपकुम्भमित्यव्ययी-भावेऽप्युत्तरपदे षष्ठ्यर्थे लक्षणा । ततः कुम्भस्य समीप इत्यर्थो लभ्यत इति दिक् ॥

इति कर्मधारयलक्षणानिरासः ।

अथ नञर्थलक्षणावादः ।

एवं न घटः पट इति पर्युदासे भूतले घटो नेति प्रस-ज्यप्रतिषेधे च नञोऽन्योन्याभावे संसर्गाभावे च लक्षणैव । नेति केवलेन नञा सामान्यतोऽभावत्वविशिष्टमात्रप्रतीतेर्लाघवाच्चाभा-वत्वविशिष्टमात्रशक्तेन तेनान्योन्याभावत्वात्यन्ताभावत्वप्रकार-कप्रतीत्योः घटपदेन नीलघटत्वप्रकारकप्रतीतिवल्लक्षणां विनानु-पपत्तेः । एवमुभयत्रापि लक्षणातौल्येऽपि पर्युदासापेक्षया प्रति-षेधो बलीयान् । पर्युदासेऽपि (न)घटः पट इति सामानाधिकर-ण्यप्रतीत्या नञो घटप्रतियोगिकान्योन्याभाववति लक्षणावश्यक-त्वात् । प्रतिषेधे तु घटप्रतियोगिकाभाव एव लक्षणाकल्पनात् । नन्वेवं 'यजतिषु येयजामहं करोति नानूयाजेष्वि'त्यत्र नानू-याजेषु अनूयाजव्यतिरिक्तेषु यजतिषु येयजामह इति मन्त्रं करो(ती)ति पर्युदास एव, न प्रसज्यप्रतिषेध इति सिद्धान्तो

भज्येत। प्रसज्यप्रतिषेधस्यैव बलीयस्त्वादिति चेत्। सत्यम्। प्रसज्यप्रतिषेधे हि यजतिषु येयजामहं कुर्यात्, अनूयाजेषु तु न कुर्यादिति येयजमाह इति विधिपरं वाक्यं स्यादिति वाक्यभेदः स्यात्। स(म्भवति) चैकवाक्यत्वे वाक्यभेदो न युक्तः। किञ्चानूयाजेषु यजतिषु येयजामहं न कुर्यादिति यजतिषु येयजामहं करोतीति सामान्यशास्त्रप्राप्तस्य येयजामहस्य निषेधेऽष्टदोषकदुष्टविकल्पापत्तिः। अत एव पशावतिदेशशास्त्रप्राप्तयोराज्यभागयो(र्नाज्यावका?र्न तौ प)शौ करोतीति निषेधाद् विकल्प इति मीमांसकाः। तस्माद् वाक्यभेदविकल्पपरिजिहीर्षया तत्र जघन्यस्यापि पर्युदासस्याश्रयणम्। न च नानूयाजेष्वित्यत्र न पर्युदासः सम्भवति, अननूयाजेष्विति नञ्समासाभावादिति वच्यम्। व्यासेऽपि पर्युदासाविरोधादित्येके। नात्र नञ्समासः। किन्तु 'गमिकर्मीकृतनैकनीवृते'त्यत्रेव नसमास एवेत्यपरे।

ननु नञः संसर्गाभावपरत्वे क्वचिदनुयोगिपदे सप्तम्यपेक्षा दृश्यते भूतले घटो नेति। क्वचित्तु तदनपेक्षा। यथा मैत्रो न गच्छतीत्यत्र गमनानुकूलयत्नाभाववान् मैत्र इति। किमत्र नियामकमिति चेद्, उच्यते। यत्रानुयोग्यभावयोराधाराधेयभावोऽन्वयबोधे प्रकारतया भासते। यथा भूतले घटो नेत्यत्राधारत्वस्य प्रकार(क?)त्वसिद्धये पूर्वोपस्थित्यर्थं तद्वाचकसप्तम्यपेक्षा। मैत्रो न गच्छतीत्यत्र त्वाधाराधेयभावस्य संसर्गमर्यादया भानात् पूर्वोपस्थित्यनपेक्षणेन (न) सप्तम्यपेक्षेत्याहुः।

इदं तु ध्येयं — भूतले घटो नेत्यत्र भूतलाधारको घटप्रति-

योगिकोऽभाव इति नञर्थविशेष्यकोऽभावप्रत्यय इति केचित् । एवं सति पटे पटत्वं न घट इत्यत्र पटत्वं पटवृत्ति घटवृत्त्यभावप्रतियोगि चेति पटत्वविशेष्यकान्वयबोधोऽनुभवसिद्धो न स्यात् । तत्र त्वदुक्तरीत्या पटत्वं पटवृत्ति पटत्वाभावो घटवृत्तिरित्युभयविशेष्य(क)प्रतीत्यापत्तेः । अतो नाभावविशेष्यकः प्रत्ययः । किन्तु भूतले घटो नेत्यादौ घटो भूतलनिष्ठाभावप्रतियोगीति प्रतियोगिविशेष्यक एव । अत एव पटे पटत्वं न घट इत्यत्र पटत्वं पटवृत्ति घटनिष्ठात्यन्ताभावप्रतियोगि चेति पटत्वविशेष्यकप्रतीतिरपि सङ्गच्छत इत्यन्ये। भूतले घटो नेत्य(त्रा)भावविशेष्यकत्वपक्षे प्रातिपदिकार्थयोरभेदान्वयव्युत्पत्त्यनुरोधाय घटपदे घटप्रतियोगिके लक्षणा । ततश्च भूतले घटप्रतियोगिकोऽभाव इति प्रतीतिर्भवति । प्रतियोगिविशेष्यकत्वपक्षे तु सप्तम्यर्थे नञर्थान्वयः, नञ(र्थाभाव ?)श्चाभावप्रतियोगि(नि) लक्षणा । ततश्च भूतलाधाराभावप्रतियोगी घट इति प्रतीतिर्भवति । घटो नास्तीति क्रियापदयोगे आख्यातोपात्तसंख्या पक्षद्वयेऽपि प्रतियोगिन्यन्वेति । वर्तमानत्वं त्वभाव इति दिक् ।

ननु नञा क्वचिदन्योन्याभावधीः क्वचित् संसर्गाभावधीरित्यत्र किं विनिगमकमिति चेद्, उच्यते । यत्र समानविभक्ति(क)प्रतियोग्यनुयोगिवाचकपदसमभिव्याहृतत्वं नञः, तत्रान्योन्याभावबोधकत्वम् । यथा न घटः पट इति । अन्यत्र तु संसर्गाभावबोधकत्वमित्येके । एवं सत्यग्रे वृक्षो न कपि-

संयोगीत्यत्राकुड्यं भूतलमित्यत्राप्यन्योन्याभावधीप्रसङ्गात्। तस्माद् यत्र यथा व्युत्पत्तिः, तत्र तथा धीरिति दिक् ॥

इति नञर्थलक्षणावादः ।

अथेतरेतरयोगद्वन्द्वलक्षणानिरासः ।

धवखदिरौ छिन्धीतीतरेतरद्वन्द्वे तु न लक्षणा। शक्त्यैवोपस्थितयोर्धवखदिरयोश्छिदिक्रियान्वये बाधकाभावात् ।

अत्र मीमांसकाः — इतरपदार्थान्वययोग्यतावच्छेदकावच्छिन्नत्वेनोपस्थित एव धर्मिणीतरपदार्थान्वयः । अत एव घटेन जलमाहरेत्यत्रच्छिद्रेतरत्वेनोपस्थित एव घटे जलाहरणान्वयः । ततश्च प्रकृते विभक्त्युपस्थितद्वित्वान्वयितावच्छेदकावच्छिन्नत्वेन धवखदिरयोरुपस्थितिर्वाच्या । तदन्वयितावच्छेदकत्वं च न शक्त्युपस्थितयोर्धवत्वखदिरत्वयोः, द्वित्वपर्याप्त्यधिकरणतावच्छेदकधर्मस्यैव तदन्वयितावच्छेदकत्वात् । किन्तु खदिरसहितावस्थधवत्वस्यैव तथात्वमिति तादृशरूपेण धवोपस्थि(ते ? तये) प्रथमश्रुते धवपदे तुल्यवदेकक्रियान्वयित्वरूपसाहित्याश्रये धवेऽवश्यं लक्षणाङ्गीकार्या । किञ्च घट इत्यादौ विभक्त्युपस्थाप्यायाः सङ्ख्यायाः प्रकृत्यर्थतावच्छेदकघटत्वादिव्याप्यत्वस्य दर्शनाद् विभ(क्त्यु?क्तित्वा)वच्छेदेन प्रकृत्यर्थतावच्छेदकव्याप्यसंख्याभिधायित्वनियमकल्पनादिहापि द्वित्वचनविभक्त्युपस्थाप्यद्वित्वव्यापकं प्रकृत्यर्थतावच्छेकमभ्युपेयम् । तादृश(बन्धंच ? ञ्च) न धवत्वादि, (किन्तु) तुल्यवत्क्रियान्वयित्वरूपसाहित्याश्रयत्वमेव पदार्थतावच्छेदकमवश्यं वाच्यमिति

तद्रूपोपस्थितये धवपदे साहित्याश्रये लक्षणा। न चैवं धवपदादेव खदिरसहितधवोपस्थितौ खदिरपदानर्थक्यमिति वाच्यम्। खदिरपदाभावे साहित्याश्रयतया खदिरादन्यस्यापि प्रतीतिप्रसङ्ग (इति) खदिरस्यैव साहित्याश्रयत्वलाभाय तात्पर्यग्राहकतया खदिरपदसार्थक्यात्। तस्माद् इतरेतरद्वन्द्वे साहित्याश्रये लक्षणेत्याहुः।

अत्रोच्यते — यद्यपि साहित्यमन्वयितावच्छेदकं, तथापि परमते घटेन जलमाहरेत्यत्रच्छिद्रेतरत्वस्येव पदादनुपस्थितस्यापि साहित्याश्रयत्वस्य शाब्दबोधविषयत्वसम्भवेन साहित्याश्रये लक्षणानावश्यकत्वात्। अन्यथा घटेन जलमाहरेत्यत्रापि घटपदस्यच्छिद्रेतरघटे लक्षणापातात्। ततश्च यथा प्रत्यक्षेण प्रत्येकमुपस्थिते पदार्थद्वयेऽपि द्वित्वप्रतीतिः, तथा शब्दद्वयेन पृथगुपस्थिते पदार्थद्वये द्वित्वबोधे बाधकाभावेन कृतं तुल्यवदेकक्रियान्वयित्वलक्षणसाहित्यलक्षणया। यदपि प्रकृत्यर्थतावच्छेदकव्याप्यसंख्याभिधायकत्वं विभक्तेरित्युक्तं, तदपि लाघवेन प्रकृत्यर्थतावच्छेदकसमानाधिकरणसंख्याभिधायित्वमेव विभक्तेरि(त्यु?ति यु)क्तं, नियमांशवैयर्थ्यात्। कि(ञ्चित्?ञ्च) यद्रूपावच्छिन्ने विभक्त्यर्थान्वयस्तद्रूपावच्छिन्न एव धात्वर्थान्वय इति नियमात् साहित्यावच्छिन्ने द्वित्वान्वये तद्रूपावच्छिन्ने छिदिक्रियान्वयः स्यात्। न च तद् भवति, छेदनस्य प्रत्येकमात्रविश्रान्तेः। तस्मात् प्रत्यक्ष इव शब्दद्वयात् प्रत्येकमुपस्थितयोरेव पदार्थयोर्विभक्त्यर्थद्वित्वान्वय इति न तदर्थं साहित्याश्रयलक्षणा। अत एव —

"चन्द्रे कलङ्कः सुजने दरिद्रता
विलासलक्ष्मीः कमलेषु चञ्चला ।
मुखाप्रसादः सधनेषु सर्वदा
यशो विधातुः कथयन्ति खण्डितम् ॥"

इत्यत्र साहित्याश्रयोपस्थापकद्वन्द्वाभावेऽपि प्रत्येकमुपस्थितेषु कलङ्कादिषु कथयन्तीत्याख्यातोपात्तबहुत्वान्वयधीः । ननु तत्रापि घटस्तिष्ठतीत्यादौ सुप्तिङोरेकसंख्याभिधायकत्वरूपसामानाधिकरण्यव्युत्पत्तेरेतानीत्येकशेषस्य साहित्याश्रयोपस्थापकस्य कल्पनावश्यकीति चेद्, न । प्रयोगानुसारेण व्युत्पत्तिकल्पनम् । प्रयोगश्च घटपटौ स्त इतिवद् घटश्च पटश्च स्त इत्यप्यविशिष्टः । ततश्च समभिव्याहृतसुव्विभक्त्युपस्थापिता सङ्ख्या यत्र स्वान्वयाविरोधिनी, तत्र तदुपस्थाप्यसङ्ख्यान्वयव्युत्पत्तिः कल्प्यते । भवति च घटपटौ स्त इत्यत्र तदुपस्थाप्याया द्वित्वसंख्याया अविरोधिनी सुव्विभक्त्युपस्थाप्या द्वित्वसङ्ख्या । भवति च घटः पटश्च स्त इत्यत्रापि समभिव्याहृतसुव्विभक्त्युपस्थाप्यमेकत्वद्वयं तदुपस्थाप्यद्वित्वसंख्याया अविरोधि, द्वाभ्यामेकत्वाभ्यां द्वित्वारम्भात् । अत एव चन्द्रे कलङ्क इत्यादावपि नैतानीति पदाध्याहारः । कलङ्कदरिद्रतादिपदोपस्थाप्यानामनेकेषामेकत्वानां तदुपस्थाप्यबहुत्वान्वयविरोधित्वाभावात् । घटः सन्तीति न प्रयोगः, सुव्विभक्त्युपस्थाप्यैकत्वसंख्यायास्तदुपस्थाप्यबहुत्वसंख्याविरोधित्वात् । तस्मादितरेतरद्वन्द्वे न लक्षणा॥

इतोनरेतरयोगद्वन्द्वलक्षणानिरासः ।

अथ विरूपैकशेषलक्षणावादः ।

एवं घटौ स्त इति सरूपैकशेषेऽपि न लक्षणा । घटपदेन शक्त्यैव युगपदुपस्थिते घटद्वये द्वित्वान्वयसम्भवात् । माता च पिता च पितरावित्यादि(धी?)विरूपैकशेषे तु लक्षणैव । जनकपुरुषशक्तेन (पितृपदेन) जनकस्त्रीत्वपुरुषत्वोभयप्रकारकप्रतीतेर्लक्षणासाध्यत्वात् । ननु पितरावित्यत्र लक्षणायामपि ब्राह्मणी च ब्राह्मणश्च ब्राह्मणावित्यत्र न लक्षणा । ब्राह्मणपदस्य शक्त्यैव ब्राह्मणत्वविशिष्टोपस्थापकत्वात् । ब्राह्मणत्ववैशिष्ट्यस्य च पुरुष इव स्त्रियामपि सत्त्वात् । न च ब्राह्मणत्वजातेः स्त्रीवृत्तित्वे स्त्रीत्वादिजात्या सङ्कर इति पुम्मात्रनिष्ठतैवेति स्त्रीपरत्वे लक्षणावश्यिकेति वाच्यम् । स्त्रीत्वस्य जातित्वाभावात् । अन्यथा गोत्वजातेर्वृषभसाधारण्यं न स्यात्, स्त्रीत्वादिना साङ्कर्यापातात् । अस्तु वा गत्वादिव्याप्यतारत्वादिवद् ब्राह्मणत्वव्याप्यस्त्रीत्वादेर्नानात्वम् । (इति चेत् । न,) अ (तो? थापि) ब्राह्मणत्वविशिष्टशक्तमात्रस्य ब्राह्मणपदस्य ब्राह्मणस्त्रीत्वपुरुषत्वप्रकारकप्रतीतिजननार्थं लक्षणावश्यम्भावादिति दिक् ॥

इति विरूपैकशेषलक्षणावादः ।

अथ समाहारद्वन्द्वलक्षणानिरासः ।

एवं पाणिपादमिति समाहारद्वन्द्वे चैकत्वान्वयानुरोधेन पाणिपादोभयवृत्तिसाहित्ये लक्षणा । न चैवं पाणिपादस्यान्वयधीविषयता न स्यात्, लक्षणायां मुख्यार्थस्यान्वयबोधाविषय-

त्वादिति वाच्यम् । अजहल्लक्षणायां तदन्वयबोधाविरोधात् । न चैवं पाणिपादं चलतीति न स्यात्, चलनस्य साहित्यरूपधर्मान्वयादिति वाच्यम् । पाकान्नीलो घट इत्यत्र पाकस्य लक्ष्यतावच्छेदक इव चलनस्य पदार्थीभूतसाहित्यान्वयबोधे तदवच्छेदकपाणिपादान्वयाविरोधात् । अत एव चोत्कृष्टोऽयं शूर इत्यत्रोत्कर्षरूपपदार्थस्य पदार्थतावच्छेदके शौर्य एवान्वयानुभवः। केचित्तु पाण्यादि(घटि)तपरम्परासम्बन्धेन साहित्य एव चलनान्वयः। एवं पाकादेरपि नैल्यादिघटितपरम्परासम्बन्धेन धर्मिण्येवान्वय इत्याहुः। वस्तुतस्तु पाणिपादमित्यादौ 'दारान् नौमि हरेर्लक्ष्मीमि'त्यादौ बहुवचनवदेकवचनं साधुत्वमात्रार्थम् । पदविशेषजन्यपदार्थोपस्थितेरेवान्वयबोधाङ्गतया विभक्त्युपस्थाप्यं कर्मत्वादिकमेव विवक्षितम् । अतः समाहारद्वन्द्वे नैकवचनान्वयार्थं साहित्यलक्षणेति दिक् ॥

इति समाहारद्वन्द्वलक्षणानिरासः ।

अथाख्यातस्य यत्नवाचकत्ववादः ।

एवं रथो गच्छतीत्यादौ यत्नवाचकस्याख्यातस्य गमनानुकूलव्यापारे लक्षणा । न चाख्यातस्य व्यापारे शक्तिरेव किं न स्यादिति वाच्यम् । तथा सति पचतीत्यत्र पाकं करोतीति यत्नवाचककरोतिना विवरणानुपपत्तेः । न च करोतिरपि व्यापारवाचक एव किं न स्यादिति वाच्यम् । कृत्यन्वयाद्यनुविधायिनि घटादावेव कृत इति व्यवहारः । न तु तदन्वयाद्य-

ननुविधायिनि पर्वतादाविति कृञो यत्नार्थकत्वस्य व्यवस्थितेः । किञ्च, कृञो व्यापारवाचित्वे कर्तृपदस्य व्यापाराश्रयोऽर्थः स्यादिति कारकान्तरेऽपि कर्तृपदप्रयोगापत्तेः । ननु कृत्यभावेऽपि चन्दनादिना सुखं कृतं, रथो गमनं करोतीति प्रयोगाद् न(तु ?)कृञो यत्नवाचित्वम् । कर्तृपदे च क्रियावाचकस्य कृञो यत्ने निरूढलक्षणा । तृच्प्रत्ययस्य त्वाश्रयत्वे शक्तिरिति योगादेव कृत्याश्रयत्वलाभः । न चैवं विनिगमनाविरह इति वाच्यम् । व्यापारत्वस्य सामान्यत्वेन तत्रैव प्रमाणपक्षपातौचित्यात् । न चैवं पचतीत्यत्र पाकजनकयत्नवानिति कथं प्रतीतिरिति वाच्यम् । पाकानुकूलव्यापारवानित्येव शब्दानुभवः । ततो व्यापारेण यत्नानुमाने तथानुभव इति गृहाण । न च व्यापारस्य यत्नेन व्याप्त्यभावात् कथं व्यापारेण यत्नानुमानमिति वाच्यम् । चेतनव्यापारस्य तद्व्याप्यत्वात् । न चैवं पचतीत्यस्य पाकानुकूलयत्नवानिति विवरणानुपपत्तिरिति वाच्यम् । तात्पर्यार्थमादाय तथा विवरणात् । एवञ्चाख्यातार्थस्य वर्तमानत्वादेरपि व्यापार एवान्वयो न तु यत्न इत्याख्यातार्थस्य वर्तमानत्वस्य यत्नान्वयानुरोधादपि न यत्ने शक्तिः । किं बहुना, आख्यातस्य करोतेर्वा न यत्नवाचित्वम् । घटं करोतीत्यत्र यत्नद्वयस्य यत्नविषयकयत्नस्य चाप्रतीतेः । न च त्वयापि लिङः कृतिशक्त्यङ्गीकाराद् यतेतेत्यत्र (प्र ?) कृतिद्वयोपस्थितावप्येकस्याः कृतेरन्वयबोधाविषय(त्वा?त्वव)त् करोतीत्यत्रापि कृतिद्वयोपस्थितावप्येकस्याः कृतेरन्वयबोधाविषयत्वं स्यादिति वाच्यम् । पचेतेत्यादौ लिङः कृतिशक्त्यवधारणेन यतेतेत्यादौ कृतिद्वयो-

पस्थितावपि एकस्या (अ)न्वयबोधाविषयत्वं न दोषावहम्। इह त्वचेतनेऽपि प्रयोगाद् यत्नस्य लडाख्यातवाच्यत्वानिर्धारणेन तदनन्वयस्य दोषत्वात्। तस्माद् व्यापार एवाख्यातवाच्य इति चेद्, उच्यते। आख्यातवाच्यतावच्छेदकं सामान्यमपि न व्यापारत्वं, तस्योपाधितया गुरुत्वात्। किन्तु जातितया लघुत्वेन यत्नत्वमेव तथा। न चैवं कर्तृजन्यतावच्छेदकं कार्य(त्वं) न स्यात्। किन्तु घटत्वादिकमेव स्यादिति गतमीश्वरेणेति वाच्यम्। तत्र लघुत्वेऽप्यान(न्य?न्त्या)द् घटत्वादेस्त्याग इतीश्वरवादे प्रतिप्रादितत्वात्। रथो गच्छतीत्यादिप्रयोगस्तु लाक्षणिक एव।

नन्वेवमपि पाकजनकयत्नत्वापेक्षया पाकजनकत्वस्य लघुत्वात् तदेवाख्यातशक्यतावच्छेदकमस्तु। ततश्च कथमचेतने (नेणं? गौण)प्रयोगः। यत्नवद् व्यापारस्यापि पाकजनकत्वेन शक्यत्वादिति चेद्, न। यदि पाकजनकमात्रे शक्तिः, तर्ह्यपचत्यपि पचतीति प्रयोगापत्तिः। तस्मिन्नपि पाकजनकादृष्टसत्त्वात्। न च तवाप्यदृष्टजनककृतिकाले पचतीति प्रयोगापत्तिरिति वाच्यम्। अदृष्टजनककृतेः पाकजनकत्वे मानाभावात्। तस्माद् यत्न एवाख्यातवाच्य इत्येके। यत्नत्वमात्रमेवाख्यातवाच्यतावच्छेदकं, न जनकयत्नत्वं, येन जनकत्वमात्रं लाघवात् तदवच्छेदकं स्यात्। न चैवं धात्वर्थजनकत्वं यत्ने न प्रतीयेतेति वाच्यम्। धातोर्धात्वर्थजनकलाक्षणिकतया समभिव्याहारबलाद्वा धात्वर्थजनकत्वप्रतीतिसंभवादित्यपरे। तस्माद्

रथो गच्छतीत्यादौ व्यापारे लक्षणैव । जानातीच्छति यतत इत्यादौ ज्ञानाद्यनुकूलमनस्संयोगे लक्षणा । न चैवं ग(म्?ग)नस्यापि जानातीति प्रयोगापत्तिरिति वाच्यम् । तर्हि करोतीत्यत्रैव ज्ञानाद्याश्रये लक्षणास्तु । घटो नश्यतीत्यादौ तु नाशप्रतियोगिनि लक्षणेत्याद्यूह्यम् । एवं कृञ्धातोरपि लाघवाद् यत्न एव वाच्य इति यतते करोतीत्यत्र यत्नद्वयप्रतीतावप्येकस्यानन्वयो न दोषायेति दिक् । ननु किं पाकाद्यनुकूलकृतिप्रचय आख्यातार्थः, कृतिमात्रं वा । नाद्यः, पचतीति न स्याद्, एकदा तावत्कृत्यभावात् । अन्त्ये पाकाद्यनुकूलद्वितीयादिकृतिकालेऽपि पक्ष्यत्यपाक्षीदिति प्रतियोगापत्तिरिति चेद्, न । कृतिमात्रमाख्यातार्थः । ततश्च कृतिमात्रसत्तया वर्तमानप्रयोगः । यावत्कृतिप्रागभावसत्तया पक्ष्यतीति यावत्कृतिध्वंससत्तया चापाक्षीदिति प्रयोग इति व्यवहारबलात् कल्प्यत इति दिक् ॥

इति आख्यातस्य यत्नवाचकत्ववादः ।

अथ कर्तृकर्मलकारविचारः ।

ननु कृताविवाख्यातस्य कर्तरि कर्मणि च शक्तिरुपेया । अन्यथा पचति देवदत्त इत्यत्र कर्तुः पच्यते तण्डुलश्चैत्रेणेत्यत्र कर्मणश्चाख्यातात् प्रतीत्यनापत्तेः । अत एवाख्यातवाच्यायाः संख्याया एकपदोपात्तत्वप्रत्यासत्त्या कर्तृकर्मणोरन्वयनियमो दृश्यते । किञ्च, कर्तृकर्मणोराख्यातानभिधेयत्वे ह्यनभिहिते कर्तरि तृतीयाविधानात् चैत्रेण पच्यत इत्यत्रैव पचतीत्यत्रापि चैत्रेणे

तृतीया स्यात्। आख्यातेन तत्र कर्तुर(न)भिधानात्। तथानभिहिते कर्मणि द्वितीयाविधानात् पचति तण्डुलमित्यत्रैव पच्यते तण्डुल इत्यत्रापि कर्मणि द्वितीया स्यात्, तत्राख्यातेन कर्मणोऽनभिधानादिति चेद् न। समभिव्याहृतचैत्रतण्डुलादिपदादेव कर्तृकर्मोपस्थितिसंभवेन तत्रापि शक्तिकल्पनायां गौरवात्। अनभिहिते कर्तरीत्यादेरनभिहितायां कर्त्रादिसंख्यायामित्यत्रैव तात्पर्यादिति दिक्।

इदं तु ध्येयम्—आख्यातवाच्यसंख्या प्रथमान्तपदोपस्थाप्य एवान्वेति। ततश्च चैत्रः पचति तण्डुलमित्यत्र चैत्रे तदन्वयः। चैत्रेण पच्यते तण्डुल इत्यादौ तण्डुले तदन्वयः। तथैव व्युत्पत्तेः। चैत्रेण (सूच्य?सुप्य)त इत्यत्र तु न कुत्रापि संख्यान्वयः, प्रथमान्तपदाभावात्। एकवचनं तु प्रयोगसाधुतामात्रम्। न चैवं केवलं पचतीति प्रयोगे संख्यान्वयः क्वापि न स्यादिति वाच्यम्। तत्र प्रथमान्तपदाध्याहारात्। आकाशेन स्थी(य)त इत्यत्र तु आख्यातार्थस्य यत्नादेरपि नान्वय इति तत्राख्यातस्य प्रयोगसाधुत्वमा(त्रा?त्रार्थ)त्वमिति दिक्।

इदं त्ववधेयं—चैत्रस्तण्डुलान् पचतीति कर्तृलकार आश्रितफलं द्वितीयार्थः, तस्यानन्यलभ्यत्वात्। तस्य च तण्डुलेऽन्वयः। तदन्वितेन फलेनानुकूलव्यापाररूपस्य धात्वर्थस्य चान्वयः। तेन च धात्वर्थेनाख्यातार्थस्य जनकयत्नस्यान्वयः। तस्य च यत्नस्य चैत्रेऽन्वयः। ततश्च तण्डुलाश्रितफलानुकूलव्यापारजनकयत्नवांश्चैत्र इत्यन्वयधीरित्येके। वस्तुतस्तु फलानु-

कूलो व्यापार एव धात्वर्थः, नानुकूलव्यापारमात्रम् । आश्रितत्वं च संसर्गो न द्वितीयार्थः, अन्यलभ्यत्वात् । द्वितीया च साधुत्वमात्रार्था । आख्यातार्थश्च यत्न एव, न तु जनकयत्नः । जनक(त्व)स्य संसर्गत्वादित्यन्ये । चैत्रेण पच्यते तण्डुल इत्यत्र तु कर्मलकारे तृतीयाया आश्रितकृतिरर्थः । चैत्रान्वितया च तया कृत्या विषयतया फलानुकूलव्यापारस्वरूपस्य धात्वर्थस्यान्वयः । तेन चाख्यातार्थस्य फलस्यान्वयः । तेन च फलेन तण्डुलस्यान्वय इति चैत्राश्रितकृतिविषयफलानुकूलव्यापारजन्यविक्लित्तिरूपफलवांस्तण्डुल इत्यन्वयबोधो भवतीत्येके । वस्तुतस्तु आश्रि (तार्थ ? तत्वं) संसर्गः । कृतिश्चाख्यातलभ्या । ततश्च तृतीया साधुत्वमात्रार्था । विषयत्वं च संसर्गः । जन्यत्वमपि फलसम्बन्धवत् संसर्ग एव । फलं तु यद्यपि फलानुकूलव्यापारात्मकधात्वर्थविशेषणतया धातुनोपस्थितं, तथापि व्यापारजन्यफलवांस्तण्डुल इति तण्डुलस्य फलान्वितनया प्रतीतिः फलस्याख्यातशक्यत्वं विनानुपपन्नेति फलस्याप्याख्यातशक्यत्वं तत्राङ्गीकार्यमिति दिक् ॥

इति कर्तृकर्मलकारविचारः ।

अथ कृदन्तविचारः ।

एवं कर्तृकृतामपि कर्तरि शक्तिरेव । न च तत्राप्याख्यातवत् कृतावेव शक्तिः, संसर्गमर्यादया त्वाश्रय(त्व)भानामिति न कर्तरि शक्तिरिति वाच्यम् । तथा सति चैत्रो भोक्तेत्यादाव-

नुपपत्त्यभावेऽपि यत्र कृत्याश्रयवाचकपदानुपादानं, यथा भोक्ता समागत इति, तत्र कृतेर्धर्म्युपस्थापकपदाभावेन संसर्गतोऽप्याश्रयत्वभानासम्भवेऽनन्वयापातात् । न चैवं धात्वर्थस्य भोजनस्य कथं तदर्थैकदेशकृत्या सहान्वय इति वाच्यम् । चैत्रस्य नक्षेत्यादाविव साकाङ्क्षेणैकदेशेनाप्यन्वयाविरोधात् । आख्याते कर्तुर्न वाच्यता । आख्यातेन कृत्युपस्थितौ प्रथमान्तपदोपस्थितेन कर्त्रा संसर्गविधयाश्रयत्वभानोपपत्तेः । न चैवं चैत्रः पचतीति सुबन्ततिङन्तयोः कथं सामानाधिकरण्यम्, एकार्थवृत्तित्वाभावादिति वाच्यम् । एकार्थाधिकरणकसंख्याभिधायित्वमेव सामानाधिकरण्यमित्यभ्युपगमात् । अत एव 'चन्द्रे कलङ्क' इत्यादावपि न व्यभिचारः । तस्मान्नाख्यातवाच्यत्वम् । अन्यलभ्यत्वादेव कर्मणोऽपि नाख्यातवाच्यत्वं, किन्तु कर्मत्वमेव तद्वाच्य(त्व?)मित्याहुः ।

वस्तुतस्तु पचतीत्यादावध्याहृतदेवदत्तादिप्रथमान्तपदोपस्थाप्येनाख्यातार्थकृतेरिव भोक्ता समागत इत्यादावप्यध्याहृतपदार्थेन कृदन्ताभिहितकृतेरप्यन्वयसंभवात् कृदन्तपदानामपि कृतावेव शक्तिरित्याहुः ॥

इति कृदन्तविचारः ।

अथ कर्मत्वलक्षणम् ।

तत्र कर्तृत्वं नाम कृतिरेव । कर्मत्वं च धात्वर्थतावच्छेदकपरसमवेतक्रिया (जन्यफलवत्त्वम्) । फलवत्त्वं च फलमेवात्र ।

वृक्षात् पर्ण पततीत्यत्र पर्णसमवेतपतनजन्यविभागरूपफलशालित्वाद् वृक्षस्य कर्मता स्यात्। अत उक्तं धात्वर्थतावच्छेदकेति फलविशेषणम्। तत्र न विभागः पतिधात्वर्थतावच्छेदकः। किन्त्वधःसंयोग एवेति न वृक्षेऽतिव्याप्तिः। तथापि पर्णस्य कर्मता स्यात्। अत उक्तं परसमवेतेति क्रियाविशेषणम्। न चैवमपि तादृशसंयोगरूपफलशालित्वाद् भूतलस्य कर्मत्वं स्यादिति वाच्यम्। यद्वाचंकपदसमभिव्याहारं विनापि धात्वर्थतावच्छेदकफलप्रतीतिः, न तस्य कर्मत्वम्। अतो भूतलपदसमभिव्याहाराभावेऽप्यधस्संयोगरूपफलप्रतीतेर्न भूतलस्य कर्मत्वम्। एवमन्यस्य कस्यापि (न) तत्र कर्मत्वम्। ग्रामं गच्छतीत्यादौ तु ग्रामादिपदसमभिव्याहारं विना ग्रामादिसंयोगरूपफलाप्रतीतेर्ग्रामादेः कर्मत्वम्। आत्मानं जानातीत्यत्र तु धात्वर्थरूपक्रियायाः परसमवेतत्वाभावाज्ज्ञाततायां निरस्तत्वेन तादृशक्रियाजन्यफलाभावाच्च नात्मनः कर्मत्वं, किन्तु तत्र द्वितीयया विषयत्वमेव लक्ष्यते। एवं घटं जानामीत्यादावपीति ध्येयम्। न चैवं विशेषानुशासनाभावे सुब्विभक्तेरन्यत्र न लक्षणेति गतमिति वाच्यम्। विशेषानुशासनं विना सुब्विभक्तेर्विभक्त्यन्तरार्थे लक्षणाविरहेऽपि विषयत्वे लक्षणायां बाधका(नु?)भावात्। अत एव तिङ्विभक्तेरपि विशेषानुशासनबलाद् विभक्त्यन्तरार्थे लक्षणाविरहेऽपि रथो गच्छतीत्यादौ व्यापारे लक्षणेति दिक्।

मण्डनमिश्रास्तु — धात्वर्थः फलं न तदनुकूलो व्यापारः,

तस्याख्यातार्थत्वात्। न चैवं फलानुत्पत्तिदशायां फलानुकूल-व्यापारकाले पाको वर्तत इति प्रयोगो न स्यादिति वाच्यम्। तत्र पाकपदस्य लाक्षणिकत्वाद्, लाघवेन धातोः फल एव शक्तिग्रहात्। नन्वेवमोदनकामः पचेदित्यत्र धात्वर्थे प्रवृत्त्यर्थं तस्यौदनसाधनत्वं (अतयिति? कृति)साध्यत्वं च विधिना बोधनीयम्। फलस्य च धात्वर्थत्वे तन्न संभवति। ओदनस्यौदनसाधनत्वासम्भवात्, फलस्योपायगोचरकृतित एव सिद्धेः साक्षात्कृतिसाध्यत्वासम्भवाच्च। तस्मात् फलानुकूलव्यापार एव धात्वर्थः, न फलम्। आख्यातार्थश्च तादृशव्यापारानुकूलो यत्न एव न तादृशव्यापार एवेति चेद्, न। अस्मन्मते न धात्वर्थे विध्यर्थान्वयः। किन्त्वाख्यातार्थे तदनुकूलव्यापार एव, एकप्रत्ययोपात्तत्वप्रत्यासत्तेः। ततः पचेदित्यादौ नानुपपत्तिः। न चैवमपि लाघवादाख्यातस्य फलरूपधात्वर्थानुकूलयत्न एवार्थः किं न स्यादिति वाच्यम्। तथा सति विध्यर्थीभूतस्य कृतिसाध्यत्वस्यानन्वयापत्तेः। कृतौ कृतिसाध्यत्वायोगात्। तस्माद् धात्वर्थः फलम्। आख्यातार्थस्तु तदनुकूलो व्यापारः। एवञ्च रथो गच्छतीत्यादावपि न लक्षणेत्याहुः। तन्न। एवं सत्योदनं पचतीति न स्यात्। ओदनफलस्यैव धात्वर्थत्वेन तत्र पच्यर्थानन्वयप्रसङ्गात्। तस्मात् फलानुकूलो व्यापार एव धात्वर्थः। तदनुकूलयत्नश्चाख्यातार्थः। विध्यर्थेष्टसाधनत्वाद्यन्वयश्च धात्वर्थ एवेति दिक्।

इति कर्मत्वलक्षणम्।

अथोपसर्गवादः ।

नन्वेवं धातोः फलानुकूलव्यापारे शक्तिरस्तु । तथापि विहरत्याहरति संहरति प्रहरतीत्याद्युपसर्गभेदेनार्थविशेषप्रतीतेरुपसर्गाणामेव तत्तदर्थे शक्तिर्न तु धातोरेव, अनेकशक्तिकल्पनायां गौरवात् । न चैवं धातुविनाकृतादुपसर्गादपि तत्तदर्थधीप्रसङ्ग इति वाच्यम् । तात्पर्यग्रहणार्थं धात्वपेक्षणात् । न च प्रजयतीत्यत्र प्रकृष्टजयः प्रतीयते । प्रतिष्ठत इत्यत्र गमनं प्रहरतीत्यत्र ताडनमित्युपसर्गस्यानेकशक्तिकल्पनं तुल्यमिति वाच्यम् । तथाप्यनन्तानां धातूनामनेकार्थत्वकल्पनाद् वरं कतिपयोपसर्गाणां तत्कल्पनामिति चेद्, न । प्रतिष्ठत इत्यत्र धातोस्तात्पर्यग्रहार्थत्वे यत्नस्याख्यातार्थस्य प्रशब्दार्थे गमनेऽन्वयो न स्यात्, तस्य प्रकृत्यर्थादन्यत्रान्वयादर्शनात् । तस्माद् धातोरेव तत्र शक्तिरित्य(न्य)त्रापि तथा । प्रादयस्तु तात्पर्यग्राहकाः । न च तत्र धातोर्गमनविरोधिव्यापार एवार्थः । तत्र चाख्यातार्थस्य यत्नस्यान्वयः । प्रशब्दस्य च तदभावोऽर्थ इति नाख्यातार्थस्य प्रकृत्यर्थान्वयानुपपत्तिरिति वाच्यम् । एवं सति प्रतिष्ठत इत्यत्र गमनविरोधिव्यापारविषयकयत्नाभाववानित्येव प्रतीतिः स्याद्, न तु गच्छतीत्यत्रेव गमनत्वप्रकारकधीः । न चेष्टापत्तिः, अनुभवविरोधादिति दिक् ।

केचित्तु — प्रतिष्ठत इत्यत्र धातुना विरोधिलक्षणया गमनोपस्थितिः । प्रशब्दस्तु तात्पर्यग्राहक इत्याहुः । तन्न । एवं सति घटो नेत्यादावपि घटशब्द एवाभावे लाक्षणिकः, नञस्तु ता-

त्पर्यग्राहकत्वमित्यपि (किं) न स्यात्। तस्मान्नानन्तोपसर्गाणामपि शक्तिरङ्गीकार्येति दिक् ॥

इत्युपसर्गवादः।

अथोपसंहारप्रकरणम्।

एवं चत्वार्यपि प्रमाणानि निरूपितानि। चेष्टादीनि चैषामन्तर्भवन्तीति तानि न पृथक् प्रमाणानि। तथाहि — यद्यपि शब्दवदर्थविशेषे सङ्केतग्रहे सति चेष्टयाप्यर्थप्रतीतेः सापि प्रमाणान्तरं भवितुं युक्तं, शब्दवदमुं प्रत्येमीत्यनुव्यवसायस्याप्यविशेषात्। तथापि चेष्टया स्मृतादेव शब्दादर्थप्रतीत्युपपत्तेर्न प्रमाणान्तरकल्पनं युक्तं, गौरवात्। न च मूकस्य न चेष्टया शब्दस्मृतिसम्भव इति वाच्यम्। अङ्कुशाभिघातविशेषेण व्याप्तिग्रहे सति हस्तिपकाभिप्रायमनुमाय गजस्येव मूकस्यापि चेष्टाविशेषेण प्रवर्तकाद्यभिप्रायमनुमाय प्रवृत्त्याद्युपपत्तेः। यथा चैवं शिष्टस्याप्यनुमानविधया प्रामाण्यं, तथोक्तं प्राक्। तस्माच्चेष्टा न प्रमाणान्तरमिति दिक्।

एवं सहस्रे शतं सम्भवतीति सम्भवस्यानुमान एवान्तर्भाव इति। इह वटे यक्षस्तिष्ठतीत्यैतिह्यस्य तु शब्देऽन्तर्भावः। अर्थापत्तेस्तु व्यतिरेक्यनुमान एवान्तर्भाव इत्युक्तम्। अनुपलब्धेस्तु प्रत्यक्षसहकारित्वमात्रं, न प्रमाणान्तरत्वमित्युक्तं प्रत्य-

क्षपरिच्छेदे । तस्माद् युक्तं चत्वार्येव प्रमाणानीत्यनवद्यम् ॥

इत्युपसंहारप्रकरणम् ।

इति श्रीदन्तिद्योतिदिवाप्रदीपाङ्कविश्वजिदतिरात्रयाजिसर्वतन्त्रस्व-
तन्त्राद्वैतविद्याचार्यविश्वामित्रवंशमुक्ताफलसत्यमङ्गलरत्नखेट-
श्रीनिवासदीक्षिततनयस्य कामाक्षीगर्भसम्भवस्य
श्रीमदर्धनारीश्वरदीक्षितगुरुचरणसहजता-
लब्धविद्यावैशद्यस्य विश्वजिद्याजिनः
श्रीराजचूडामणिदीक्षितस्य
कृतिषु मणिदर्पणे
शब्दपरिच्छेदः ।

— o —

शुभं भूयात् ।

शुद्धिपत्रम् ।

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
९	२	(तत्र?)	तत्र
४६	१०	नानन्त	नान्त
९१	७	स्व	सुव्
९६	३	वाने	वा नै
१०२	१४	वच्यम्	वाच्यम्
११०	४	जमाह	जामह
,,	७	दोषक	दोष

Ready for sale.

भक्तिमञ्जरी (Stuti) by H. H. Svâti Srî Râma Varma Mahârâjah. 1 0 0

Trivandrum Sanskrit Series.

No. 1 — दैवम् (Vyâkarana) by Deva with Purushakâra of Krishnalîlâsukamuni. 1 0 0

No. 2 — अभिनवकौस्तुभमाला - दक्षिणामूर्तिस्तवौ by Krishnalîlâsukamuni. 0 2 0

No. 3 — नलाभ्युदयः (Kâvya) by Vâmana Bhaṭṭa Bâṇa. 0 4 0

No. 4 — शिवलीलार्णवः (Kâvya) by Nîlakaṇṭha Dîkshita. 2 0 0

No. 5 — व्यक्तिविवेकः (Alankâra) by Mahima Bhaṭṭa with commentary. 2 12 0

No. 6 — दुर्घटवृत्तिः (Vyâkaraṇa) by Saraṇadeva. 2 0 0

No. 7 — ब्रह्मतत्त्वप्रकाशिका (Vedânta) by Sadâsivendra Sarasvatî. 2 4 0

No. 8 — प्रद्युम्नाभ्युदयम् (Nâtaka) by Ravi Varma Bhûpa. 1 0 0

No. 9 — विरूपाक्षपञ्चाशिका (Vedânta) by Virûpâkshanâtha with the commentary of Vidyâchakravartin. 0 8 0

No. 10 — मातङ्गलीला (Gajalakshaṇa) by Nîlakaṇṭha. 0 8 0

No. 11 — तपतीसंवरणम् (Nâtaka) by Kulasekhara Varma with the commentary of Sivarâma. 2 4 0

No. 12 — परमार्थसारम् (Vedânta) by Bhagavad Âdisesha with the commentary of Râghavânanda. 0 8 0

No. 13 — सुभद्राधनञ्जयम् (Nâtaka) by Kulasekhara Varma with the commentary of Sivarâma. 2 0 0

No. 14 — नीतिसारः (Nîti) by Kâmandaka, with the commentary of Sankarârya. 3 8 0

No. 15 — स्वप्नवासवदत्तम् (Nâtaka) by Bhâsa. 2 8 0

No. 16 — प्रतिज्ञायौगन्धरायणम् (Do.) Do. 1 8 0

No. 17—पञ्चरात्रम् (Do.) Do.	1	0	0
No. 18—नारायणीयम् (Stuti) by Nârâyaṇa Bhaṭṭa with the commentary of Desamangala Vârya.	4	0	0
No. 19—मानमेयोदयः (Mîmâmsâ) by Nârâyaṇa Bhaṭṭa and Nârâyaṇa Paṇḍita.	1	4	0
No. 20—अविमारकम् (Nâtaka) by Bhâsa.	1	8	0
No. 21—बालचरितम् (Do.) Do.	1	0	0
No. 22—मध्यमव्यायोग-दूतवाक्य-दूतघटोत्कच-कर्णभारोरुभङ्गानि (Nâtaka) by Bhâsa	1	8	0
No. 23—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (1 & 2 Kâṇḍas)	1	12	0
No. 24—जानकीपरिणयः (Kâvya) by Chakrakavi.	1	0	0
No. 25—काणादसिद्धान्तचन्द्रिका (Nyâya) by Gangâdharasûri	0	12	0
No. 26—अभिषेकनाटकम् (Nâtaka) by Bhâsa	0	12	0
No. 27—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinatha and Vivarana of Nârayana Pandita (1 & 2 Sargas)	1	12	0
No. 28—वैखानसधर्मप्रश्नः (Dharmasûtra) by Vikhanas	0	8	0
No. 29—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswamin (3rd Kanda)	2	4	0
No. 30—वास्तुविद्या (Silpa)	0	12	0
No. 31—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswamin (4th, 5th, & 6th Kandas)	1	0	0
No. 32—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (3rd, 4th & 5th Sargas)	2	8	0
No. 33—वाररुचसंग्रहः (Vyâkarana) with the commentary Dîpaprabhâ of Nârâyana	0	8	0
No. 34.—मणिदर्पणः (शब्दपरिच्छेदः) (Nyaya) by Râjachûdâmanimakhi	1	4	0

Apply to :—

The Agent for the sale of

Government Sanskrit Publications,

Trivandrum.

TRIVANDRUM SANSKRIT SERIES.

NO. XXXIII.

THE

VÂRARUCHASANGRAHA

OF

VARARUCHI

With the commentary DÎPAPRABHÂ

OF

NÂRÂYAṆA

EDITED

BY

T. GAṆAPATI SÂSTRÎ,

Curator of the Department for the publication of Sanskrit Manuscripts,

TRIVANDRUM.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJAH OF TRAVANCORE.

TRIVANDRUM:

PRINTED AT THE TRAVANCORE GOVERNMENT PRESS

1913.

(All Rights Reserved.)

अनन्तशयनसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ३३.

वाररुचसंग्रहः

श्रीवररुचिप्रणीतः

श्रीनारायणकृतया दीपप्रभाख्यया व्याख्ययोपेतः

संस्कृतग्रन्थप्रकाशनकार्याध्यक्षेण

त. गणपतिशास्त्रिणा

संशोधितः ।

स च

अनन्तशयने

महामहिमश्रीमूलकरामवर्मकुलशेखरमहाराजशासनेन

राजकीयमुद्रणयन्त्रालये

मुद्रयित्वा प्रकाशितः ।

कोळम्बाब्दाः १०८९, क्रैस्ताब्दाः १९१३.

PREFACE.

The edition of the Vâraruchasangraha with the commentary of Dipaprabhâ is based on a correct palm leaf manuscript, written in Malayalam character, which is about two centuries old and obtained from Mr. Krishna Tantri of Thazhaman Maṭham, Chengannur. The Sangraha consisting of 25 Slokas treats briefly of *Kâraka*, *Samâsa*, *Taddhita*, *Ting* and *Krit*, which the commentary explains beautifully, in concise and vigorous language.

The commentator by suggesting ("न कात्स्न्येंन भासन्ते तादृशां गिरः" p. 54) his inability to grasp fully the meaning of the author of the Sangraha raises him to a position of a very great eminence. Again the commentator, in another place, observes "सूत्रकारकल्पः संग्रहकारस्तद्वच्छान्दसं प्रयोगं कृतवान् ....."(p. 35) thus giving to the author a position equal to that of the Sûtrakâra (पाणिनि) himself, in respect of freedom of language, and would appear to identify him with Vararuchi, otherwise known as Kâtyâyana, the author of the Vârtikas or supplementary notes on the Sûtras of Pânini.

Probably, the present Vararuchi might be one of the "Nine Gems" that adorned the Court of Vikramâditya. There is a work named Âsauchâshṭaka, (आशौचाष्टक) ascribed to Vararuchi which comprises all the injunctions relating to Âsaucha (pollution). This Âsauchâshṭaka is likely to be the work of the present Vararuchi who writes short treatises on great subjects.

Three more works are also found ascribed to Vararuchi :— (1) Vâraruchа (Jyotisha), (2) Vâraruchа (Lexicon), and (3) Prâkritaprakâsa by Vararuchi. As all these works treat of Sastraic (Scientific) subjects, we are led to think that they are written by one and the same Vararuchi, desirous of displaying his mastery of various branches of knowledge.

The commentary, Dîpaprabhâ quotes Bhartrihari, Kaiyata, Jinendra and Haradatta, but no author posterior to them. From this and also from the style and manner of the commentary, we may take it to have been written by an ancient grammarian of a higher order. In fact, it rivals, in force and dignity of language, the Purushakâra, the commentary on Daiva. The closing verse of Dîpaprabhâ,

"वेदो नाम महत्पदं जनपदो यत्र द्विजानां ततिः
साङ्गं वेदमधीत्य वाच्यमखिलं मीमांसतेऽस्य स्फुटम् ।
तत्र ग्रामवरे कचिन्निवसता नाम्ना च नारायणे-
नैषा वाररुचार्थदीपनपरा दीपप्रभा निर्मिता ॥"

discloses that the author Nârâyana lived in a village within the country called Veda. It is not known definitely where this country is situated. The tract of country between Kottayam and Alwaye, in North Travancore is traditionally known among the Nambudiri Brahmins, as "Veda Nâdu". If this tradition can be relied on, the Veda Janapada of the commentator may be identified with the above tract, as Nâdu means a country.

The colophon at the end of the Kavikalpadruma of Bopadeva has the following verse :—

"विद्वद्धनेशशिष्येण भिषक्केशवसूनुना ।
तेने वेदपदस्थेन वोपदेवद्विजेन यः ॥" (कविकल्पद्रुमः)

Here the meaning of the word पद, to be in harmony with the natural significance of the root स्था, in वेदपदस्थेन should mean a spot (स्थान) which can be either a village or a town or a country. But the author Bopadeva cannot have meant the first two, for he would have then, to avoid ambiguity mentioned वेदग्रामजुषा and वेदपुरस्थेन respectively, wherefore the word पद should be taken here to mean a जनपद *i. e.*, a country, as we know from the present commentary that there is a country called Veda. It follows from this that Bopadeva was also a native of the country, called Veda. If the native countries of Nârâyana and

Bopadeva be identical, that of Nârâyana, the commentator should then be in Central India, for Bopadeva, the protegee of Hemadri is known to be a native of Berar. If their native countries be different, the Veda of Nârâyana may be the same as the Veda Nâdu in North Travancore. If so, the commentator may be the same as Nârâyana, the author of Tantrasamuchchaya,* who is known to be an ancient author born in Jayantamangala (Chennassumanakkal) existing in Veda Nâdu. It is evident from the colophon, "कल्यब्देष्वतियत्सु नन्दनयनेष्वम्भोधिसङ्ख्येषु" at the end of the Tantrasamuchchaya, that it was written in 4529 of the Kali year, and that its author lived in the first half of the 15th century A. D.

TRIVANDRUM. T. GANAPATI SÂSTRÎ.

* This work treats of religious formularies for the wroship of the Deities

निवेदना ।

वाररुचसङ्ग्रहो नामायं **दीपप्रभा**ख्यया व्याख्ययोपेतः (चेङ्ङन्नूर्) **कृष्णतन्त्रि**महाशयसकाशादुपलब्धं केरलीयग्रन्थलिपिमुपद्विशतवर्षवृद्धं शुद्धमादर्शमाश्रित्य संशोधितः । कारकाणि, समासाः, तद्धिताः, तिङः, कृतश्चेत्येतावदत्र वस्तुजातं पञ्चविंशत्या कारिकाभिः संगृहीतम् । तच्चोदारगम्भीराभिरनतिपरिमिताभिर्भणितिभिर्**दीपप्रभ**योपपादितम् ।

संग्रहकारो **वररुचि**स्तत्रभवता **दीपप्रभा**कारेण "न कात्स्न्र्येन भासन्ते तादृशां गिरः" (पृ. ५४) इत्यात्मनस्तदुक्तिगतकृत्स्नार्थप्रतिपत्त्यपाटवं शंसता गौरवस्य परां काष्ठां नीतः । क्वचिच्च "सूत्रकारकल्पः संग्रहकारस्तद्वच्छान्दसं प्रयोगं कृतवान्" (पृ.३९) इति संग्रहकारस्य सूत्रकारतुल्यं शब्दप्रयोगे स्वातन्त्र्यं वदन्नसौ तं **वररुचिं कात्यायना**परनामानं वार्तिककार**वररुचि**मेव मन्यत इव ।

विक्रमार्कसभानवरत्नान्तर्गतो वा **वररुचि**रस्य संग्रहस्य कर्ता कामं स्यात् । अस्त्याशौचाष्टकमिति कश्चिद् ग्रन्थो **वररुचि**प्रणीत उपलब्धः, यत्राशौचविधयः सर्वे निपुणं संगृहीताः । इद**माशौचाष्टक**मपि विपुलविप्रकीर्णार्थसंग्रहणस्वभावस्य प्रकृतस्यैव **वररुचे**ः कृतिः सम्भाव्यते ।

त्रयोऽन्ये **वररुचि**सम्बन्धवन्तो ग्रन्था वर्तन्ते —

१. वाररुचम् (ज्योतिश्शास्त्रम्)
२. वाररुचम् (अभिधानम्)
३. वाररुचः (प्राकृतप्रकाशः)

इति । सर्वेषामेषां शास्त्रविषयतायां नियमेन दर्शनादिदमूहितुं शक्यं, यद् नानाशास्त्रविशारद एक एव **वररुचि**रुच्चावचशास्त्रग्रन्थप्रणयनकौतुकादेनान् ग्रन्थान् विरचितवानिति ।

दीपप्रभायां **भर्तृहरिः कैयटो जिनेन्द्रो हरदत्तश्च** स्मर्यन्ते, न तु तदर्वाचीनः कश्चित् । तेन तद्वाक्यशैलीगुणविशेषेण च तस्याः कर्ता प्राचीनः कश्चिन्मानर्नीयो महावैयाकरण इति प्रत्येतुं शक्यते । सा हि प्रौढ्या **दैवव्याख्यानेन पुरुषकारेण** तुलयितुं शक्यते । **दीपप्रभा**कारो नाम्ना **नारायण** इति, **वेदा**भिधानजनपदान्तर्गतः कश्चिद् ग्रामस्तस्य निवासस्थानमिति च —

"वेदो नाम महत्पदं जनपदो यत्र द्विजानां ततिः
साङ्गं वेदमधीत्य वाच्यमखिलं मीमांसतेऽस्य स्फुटम् ।
तत्र ग्रामवरे क्वचिन्निवसता नाम्ना च **नारायणे-**
नैषा **वाररुचार्थ**दीपनपरा **दीपप्रभा** निर्मिता ॥"

इत्यस्माद् ग्रन्थान्तिमपद्यादवगम्यते । स चासौ जनपदः क्व सन्निविष्ट इति न निश्चयः । **उत्तरवञ्चिमण्डले कोट्टय**पुरादुत्तरत **आलुवा**नगराद् दक्षिणतश्च सन्निविष्टस्य भूभागस्य 'वेदनाडु' इति व्यपदेशोऽस्तीति केरलीयब्राह्मणाः कथयन्ति । तस्य प्रामाण्ये स **वेद**जनपदो मन्तुं शक्यः । नाडुशब्दस्य केरलभाषायां जनपदवाचित्वात् ।

"विद्वद्धनेशाशिष्येण भिषक्केशवसूनुना ।
तेने वेदपदस्थेन **बोपदेव**द्विजेन यः ॥"

इति **कविकल्पद्रुम**स्यान्ते श्लोकः पठ्यते । अत्र 'वेदपदस्थेन' इत्यत्र स्थाधात्वर्थान्वयानुगुण्यात् पदशब्दः स्थानवाची युक्तः । स्थानं च ग्रामरूपं पुररूपं जनपदरूपं वा वक्तव्यम् । तत्र ग्रामे विवक्षिते 'वेदग्रामजुषा' इत्यसन्देहायावक्ष्यद् **बोपदेवः** । पुरविवक्षायां 'वेदपुरस्थेन' इत्यवक्ष्यत् । अतो **वेदा**ख्यजनपदस्य प्रकृतग्रन्थाधीतत्वाच्च जनपदरूपमेव स्थानं पदशब्देन ग्रहीतुमुचितम् । एवञ्च नारायणवद् **बोपदेवो**ऽपि **वेदा**ख्यजनपदवासीति फलति । यदि **नारायणबोपदेव**योर्वेदजनपदावभिन्नौ, तर्हि **हेमाद्रि**शिष्यस्य **बोपदेव**स्योत्तरदेशीयत्वादुत्तरदेशेष्वेव **वेदा**ख्यो जनपदो **नारायणो**क्तो मृग्यः । यदि तु तौ भिन्नौ, तर्हि **वञ्चिमण्डलान्तर्गत** एव **नारायण**स्य जनपदः प्रत्येतव्यः । एवं तु प्रकृतो **नारायणस्तन्त्रसमुच्चया**ख्यग्रन्थकारान्नारायणादभिन्न इत्यपि कामं सम्भाव्यतां, यतः स **वेद**जनपदान्तर्गत-**जयन्तमङ्गला**(चेन्नस्मनक्कल्)भिजनः प्राचीनश्च । स हि **तन्त्रसमुच्चय**स्यान्ते 'कल्यब्देष्वतियत्सु नन्दनयनेष्वम्भोधि(४५२९)सङ्ख्येषु' इति तन्निर्माणकालं वदन् १४२६तमे क्रैस्ताब्दे स्वस्य सत्तामावेदयति ।

अनन्तशयनम् । **त. गणपतिशास्त्री.**

॥ श्रीः ॥

वाररुचसंग्रहः ।

दीपप्रभाख्यव्याख्योपेतः ।

यस्य प्रसादजलबिन्दुनिपातलब्ध-
शास्त्रोपशाखकुसुमाः फलिताश्च भान्ति ।
प्रारम्भरूपतरवोऽखिलदेहभाजां
स्तान्मे स वाररुचसङ्ग्रहविग्रहाय ॥

तत्र तावच्चिकीर्षितग्रन्थस्य 'मङ्गलाचारे'त्यादिस्मृतिसिद्धाविघ्नपरिसमाप्त्यादिप्रयोजनसिद्ध्यर्थं शिष्टाचारानुसरणार्थं च प्रबन्धारम्भेऽवश्यकर्तव्यं मङ्गलाचरणं ग्रन्थगौरवभयात् तस्मिन्ननिवेशितं विधाय सुप्तिङ्कृतां कारके विधानात् समासताद्धितयोः कारकहेतुकसुबन्तनिमित्तत्वाच्च सकलनिदानभूतकारकावधारणस्य प्रथमप्राप्ततां दर्शयति —

प्रयोगमिच्छता ज्ञातुं ज्ञेयं कारकमादितः ।

इति । प्रयुज्यत इति प्रयोगः । 'अकर्तरि च कारके संज्ञायाम्' (३. ३. १९) इत्यत्र संज्ञाग्रहणस्य प्रत्याख्यातत्वात् कर्मणि घञ् । लोकेनाभिप्रयुक्ताः साक्षाद्वाचका ये शब्दाः साधवो गवादयः, तेषां स्वरूपं गवाद्युच्चारणेच्छुभिः बालादिभिरशक्त्यादिनान्यथोच्चारितेभ्यः साधुशब्दस्मारणद्वारेणार्थप्रत्यायनसमर्थेभ्यो गाव्याद्यादिमदपशब्देभ्यो विवेकेन परिज्ञातुमिच्छता तदुपायजिज्ञासुना प्रथमं कारकस्वरूपमवधार्यमित्यर्थः । तत्र प्रयोगं ज्ञातुमिच्छतेत्यनेन 'व्याकरणस्य यत् प्रयोजनं साधुशब्दपरिज्ञानं नाम, तदेवास्य प्रकरण-

स्यापि । विषयश्च स एव, ये साधुशब्दाः । अधिकारी च स एव, यः शब्दसाधुत्वं जिज्ञासुः' इत्यप्युक्तं भवति ॥

कर्मादिभेदप्रदर्शनपूर्वकं तत्स्वरूपमाह —

संज्ञया षड्विधम्

इत्यादिना । तत् कारकं संज्ञया कर्तृकर्मकरणसंप्रदानापादानाधिकरणरूपया षट्प्रकारयुक्तं भवतीत्यर्थः । ननु हेतोरपि स्वव्यापारे प्रेषणादौ कर्तृत्वात् 'कारके' (१.४.२३) इति तत्राधिकाराच्च कारकत्वात् सप्तविधं वाच्यम् । नैतदस्ति । 'तत्प्रयोजको हेतुश्च' (१.४.५५) इत्यत्र चकारेणैकसंज्ञाधिकारहेतुकबाधप्रसङ्गपरिहाराय कर्तुः समुच्चितत्वात् कर्तैव सन् हेतुसंज्ञो भवतीत्यर्थाश्रयणात् कर्तर्यन्तर्भूतत्वात् । तथा चोक्तं— 'कर्तैव विहितां शास्त्रे हेतुसंज्ञां प्रपद्यत' इति ॥

अवान्तरभेदमाह —

भेदास्त्रयोविंशतिधा पुनः ॥ १ ॥

इति । तेषां कर्मादीनां भेदास्त्रयोविंशतिप्रकारा द्रष्टव्याः ॥ १ ॥

एवमुक्ते कथमित्याकाङ्क्षायां तत्पूर्त्यर्थं कर्त्रधीनत्वात् करणादीनां प्रवृत्तिनिवृत्त्योस्तस्य प्राधान्यात् प्रथमं तद्भेदं दर्शयन्नाह—

तत्र पञ्चविधः कर्ता

इति । तत्र तेषु कर्मादिकारकेषु मध्ये पञ्चप्रकारः कर्ता

भवति । कथम् । स्वतन्त्रकर्ता त्रिविधः अभिहितानभिहित-कर्मकर्तृभेदेन । तत्राभिहितानभिहितभेदः सुब्विषय एव क्वचित् प्रदर्शितोऽन्यत्राप्यूहनीय इति सार्वत्रिकोऽप्ययमत्रैवोक्तः । हेतुकर्ता द्विविधः चेतनविषयोऽचेतनविषयश्चेति । अभिहिते 'देवदत्तः पचति, यज्ञदत्तस्तिष्ठती'ति । अत्र तिङा कर्तुरभिहित-त्वादनभिहिताधिकारविहिततृतीयाविभक्तेरभावात् प्रथमैव भवति । तथा चोच्यते — 'अभिहिते प्रथमाभाव' इति । अनभिहिते 'पच्यते देवदत्तेन, स्थीयते यज्ञदत्तेने'ति । अत्र 'स्वतन्त्रः कर्ता'(१.४.५४) इति कर्तृसंज्ञायां 'कर्तृकरणयोस्तृतीया'(२.३.१८) इति तृतीया । कर्मकर्तरि 'भिद्यते कुसूलः स्वयमेव, पच्यते ओदनः स्वयमेवे'ति । भिनत्ति कुसूलं देवदत्त इत्यस्मिन्नर्थे कुसूलस्य कर्मणः सौकर्यातिशयात् कर्तृत्वविवक्षायामयं प्रयोगः । 'कर्मवत् कर्मणा तुल्यक्रियः'(३.१.८७) इति कर्मवद्भावादात्मनेपदम् । चेतनविषये 'पाचयत्योदनं देवदत्तेने'ति । अत्र प्रयोजकव्यापारेण व्याप्यमानत्वात् प्रयोज्यस्य कर्मसंज्ञा प्राप्ता 'गतिबुद्धि—'(१.४.५२)इत्यादिना नियम्यते । तेन स्वव्यापारे स्वातन्त्र्यमाश्रित्य कर्तृसंज्ञायां तृतीया भवति । तदुक्तं —

"गुणक्रियायां स्वातन्त्र्यात् प्रेषणे कर्मतां गतः ।
नियमात् कर्मसंज्ञायाः स्वधर्मेणाभिधीयते ॥"

इति । अचेतनविषये 'भिक्षा वासयति, कारीषोऽग्निरध्यापयती'ति । अचेतनानां प्रेषणाध्येषणव्यापारासंभवात् कथं हेतुसंज्ञाप्राप्तिरिति चेत् । न । तत्समर्थाचरणसद्भावात् । तथाचोक्तं भगवता

भाष्यकारेण—'नावश्यं स एव वासं प्रयुङ्क्ते य आह उष्यतामिति[२]। तूष्णीमप्यासीनो यस्तत्समर्थान्याचरति सोऽपि वासं प्रयोजयति । भिक्षाश्चापि प्रचुरा व्यञ्जनवत्यो लभ्यमाना वासं प्रयोजयन्ति । तथा कारीषोऽग्निर्निर्वात एकान्ते सुप्रज्वलितोऽध्ययनं प्रयोजयती'ति । एवं वा कर्तुः पञ्चविधत्वम् । स्वतन्त्रकर्ता द्विविधः चेतनकर्ता अचेतनकर्तेति । हेतुकर्ता प्रेषणाध्येषणतत्समर्थाचरणलक्षणव्यापारभेदात् त्रिविधः । चेतने 'देवदत्तः पचती'त्यादि । अचेतने 'नदी वहति, कूलं पतति, एधाः पचन्ति, स्थाली पचती'ति । प्रवर्तयितृत्वादीनां धर्माणां शब्दविषयतया समाश्रयणादत्र कर्तृत्वं मुख्यमेव । तथाचोक्तं —

"धर्मैरभ्युदितैः शब्दे नियमो न तु वस्तुनि ।
कर्तुर्धर्मविवक्षायां शब्दात् कर्ता प्रतीयते ॥"

इति । व्याकरणान्तरे त्वर्थी कर्ता । 'तथायुक्तं च—'(१.४.५०)इति लक्षणं चेतनाचेतनविषयं प्रणीतम् । प्रेषणे 'देवदत्तः कटं कारयति, यज्ञदत्त ओदनं पाचयती'ति । अध्येषणे 'छन्दोऽध्यापयति माणवकं, व्याकरणमध्यापयती'ति । निकृष्टविषयो नियोगः प्रेषणम्, अभ्यर्हितविषयोऽध्येषणमित्यनयोर्भेदः । (तत्समर्थाचरणे) 'भिक्षा वासयति, कारीषोऽग्निरध्यापयती'ति । उक्तं च—'प्रेषणाध्येषणे कुर्वंस्तत्समर्थानि चाचरन्नि'ति ॥

---

१. 'योजयति य', २. 'ति ब्रवीति किं तर्हि तू' इति मुद्रितपुस्तकपाठः.

एवं कर्तृभेदमुक्त्वा विभक्त्यनुक्रमानुसारेण कर्मादिभेदमाह —

कर्म सप्तविधं भवेत् ।

इति । कथं सप्तविधत्वम् । उच्यते । 'कर्तुरीप्सिततमं कर्म'(१. ४. ४९) इति त्रिविधं निर्वर्त्यं विकार्यं प्राप्यं चेति । यस्योपादानं मृदादि नास्ति, तन्निर्वर्त्यम् । यथा संयोगं करोतीति। यस्यापि सदपि तन्न विवक्ष्यते, तन्निर्वर्त्यम् । यथा घटं करोतीति। यस्यापि सतोऽप्यभेदो न विवक्ष्यते, किं तर्हि, भेद एव, तदपि निर्वर्त्यमेव । यथा मृदा घटं करोतीति । उक्तं च हरिणा —

"सती वाविद्यमाना वा प्रकृतिः परिणामिनी ।
यस्य नाश्रीयते तस्य निर्वर्त्यत्वं प्रचक्षते ॥"

इति। किमिदं निर्वर्त्यत्वं नाम । असतः स्वरूपलाभ इति चेत्। न। सत्कार्यवादिमते तस्यानित्यत्वात् । सर्वपार्षदं हीदं शास्त्रम् । तस्माज्जन्मना प्रकाश्यमानत्वं निर्वर्त्यत्वम् । एतच्चोक्तं—

"यदसज्जायते सद्वा जन्मना यत् प्रकाश्यते ।
तन्निर्वर्त्यम्"

इति । प्रकृतिविकारभेदविवक्षायां तु विकार्यं कर्म। अत्रावान्तरभेदो द्रष्टव्यः मूलोच्छिन्नप्रकृतिकमुत्पन्नगुणान्तरप्रकृतिकं चेति। आद्यस्य काष्ठानि भस्म करोतीत्याद्युदाहरणं, द्वितीयस्य सुवर्णं कुण्डलं करोतीति । विकार्यं तु कर्म द्वेधा व्यवस्थितम् । उक्तं च —

"प्रकृत्युच्छेदसम्भूतं किञ्चित् काष्ठादिभस्मवत् ।
किञ्चिद् गुणान्तरोत्पत्त्या सुवर्णादिविकारवद् ॥"

इति। यत्र क्रियाकृतो विशेषः प्रत्यक्षानुमानागमैर्न ज्ञायते, केवलं क्रियया प्राप्यते, तत् प्राप्यम्। यथा आदित्यं पश्यति, नगरमुपसर्पति, ग्रामं गच्छतीति। निर्वर्त्ये तु कर्मण्यात्मलाभ एव विशेषः प्रत्यक्षादवधार्यते । विकार्येऽपि भस्मकुण्डलादौ प्रत्यक्षेण । क्वचिदनुमानात् । यथा वृक्षमवसिञ्चतीत्यत्र । तदानीं सूक्ष्मत्वाद् दुरवधारत्वेऽपि पश्चात् प्रचिततरविशेषदर्शनादनुमीयते नूनमवसेचनक्रियाकृतो विशेष एष इति । क्वचिदागमात्। 'व्रीहीन् प्रोक्षती'त्यत्र प्रोक्षणेन व्रीहिषु कश्चिदतिशयो गम्यत इत्यागमादवगम्यते । कर्ममीमांसकास्त्वेभ्योऽतिरिक्तं संस्कार्यमेतत् कर्मेत्यङ्गीकुर्वन्ति । उक्तं च —

"क्रियाकृता विशेषाणां सिद्धिर्यत्र न गम्यते ।
दर्शनादनुमानाद्वा तत् प्राप्यं कर्म कथ्यते ॥"

इति। अत्र केचिच्चोदयन्ति । ननु नास्त्येव प्राप्यं कर्म, सर्वत्र क्रियाकृतविशेषावधारणात्। तथाहि—दृष्टिविषेण विषधरेण निरीक्षितो विषयो ज्वलनज्वालावलीढो लक्ष्यत इति तावत् संप्रतिपन्नम् । तत्साधर्म्यादन्यत्रापि क्रियाहितो विशेषः समुन्नेयः । तैजसं हि चक्षुः प्राप्यकारीति तेन युक्तो विषयोऽवश्यं विक्रियते। यथा चायस्कान्तसन्निधौ लोहस्य भ्रमणं, कतकसन्निधौ च जलस्य प्रसादः। एवं सर्वत्र । अत्रोच्यते। क्वचिद् विशेषदर्शनेऽपि सर्वत्र तथाभावे प्रमाणाभावः । किञ्च क्रियाफलेऽत्र विका-

रोऽभिमतः। आदित्यादीनां तु दर्शनादिक्रियाहेतुत्वं, न फलता, कर्तृत्वात् फलस्य (?) यत्र पुनरत्रभवतो विकारबुद्धिः, तत्रापि न क्रियावशाद् विकारः। (अपितु) तेजःसंपर्कादेव। अयस्कान्तादावपि वस्तुस्वभावादेव, न क्रियातः। न चेद् विकारयोगः, कां तर्हि क्रियामिद्धावद्भूतेति चेद्, योग्यदेशापत्त्यादयो विशेषाः साधनतां संपादयन्ति प्राप्यकर्मण इत्यदोषः। यथोक्तम् —

"आभासोपगमो व्यक्तिः सोढत्वमिति कर्मणः।
विशेषाः प्राप्यमाणस्य क्रियासिद्धौ व्यवस्थिताः॥"

इति। सूत्रान्तरनिर्दिष्टं चतुर्विधं तटस्थमनीप्सितमकथितमन्यपूर्वकं चेति। तटस्थे 'ग्रामं गच्छन् वृक्षमूलान्युपसर्पती'त्यादि। अनीप्सिते 'विषं भुङ्क्ते, व्याघ्रान् पश्यती'ति। उभयत्रापि 'तथायुक्तं चानीप्सितम्' (१. ४. ५०) इति कर्मसंज्ञा। ईप्सितादन्यदित्यर्थाश्रयणात्। अकथिते 'गां दोग्धि पयः, धनिनं याचते धनमि'ति। अत्र संज्ञान्तरैरपादानादिभिरकथिते गवादिके 'अकथितम्–'(१. ४. ५१)इति कर्मसंज्ञा। अन्यपूर्वके 'देवदत्तमभिक्रुध्यति, देवदत्तमभिद्रुह्यती'ति। अत्र 'क्रुधद्रुह–'(१.४.३७)इत्यादिना संप्रदानसंज्ञायां प्राप्तायां 'क्रुधद्रुहोरुपसृष्टयोः कर्म' (१. ४. ३८) इति कर्मसंज्ञैव भवति, विशेषविहितत्वात्। तथा अक्षान् दीव्यतीत्यत्र पूर्वसूत्रेण करणसंज्ञमेव कर्मसंज्ञं भवति 'दिवः कर्म च'(१.४.४३) इत्यनेन। एतच्चोक्तं हरिणा —

"निर्वर्त्यं च विकार्यं च प्राप्यं चेति त्रिधा मतम्।
तत्रेप्सिततमं कर्म चतुर्धान्यत् तु कल्पितम्॥

औदासीन्येन यत् प्राप्यं यच्च कर्तुरनीप्सितम् ।
संज्ञान्तरैरनाख्यातं यद्यच्चाप्यन्यपूर्वकम् ॥"

इति ॥

करणभेदमाह —

करणं द्विविधं चैव

इति । अत्र केचिद् बाह्याभ्यन्तरभेदेन द्विविधत्वमाचक्षते । यत् शरीरावयवादन्यत्, तद् बाह्यं, दात्रेण लुनाति परशुना छिनत्तीति । आभ्यन्तरं मनःप्रभृति, मनसा पाटलिपुत्रं गच्छति, शिरसा देवं नमस्कुरुत इति । वयं तु स्वकरणान्यकरणभेदेनैतदुक्तमिति मन्यामहे । तत्र कर्तुरन्यद् दात्राद्यन्यकरणमित्युच्यते। यदा पुनः करणान्तराभावप्रतिपादनाय कर्तुरेव विवक्षाप्रापितरूपभेदायत्तः करणभावः, तदा तत् स्वकरणमित्युच्यते, तैक्ष्ण्यमात्मना छिनत्तीत्यादि ॥

संप्रदानं त्रिधा मतम् ॥ २ ॥

इति। अत्र स्वव्यापारभेदाद् भेदो द्रष्टव्यः । अनिराकरणं प्रेरणमनुमतिश्च स्वव्यापरः । अनिराकरणे 'उपाध्यायाय गां ददाती'त्यादि । स ह्युपाध्यायस्तद् गवाद्यभिसंबध्यमानं न निराकरोति । यदि क्रुद्धो निराकुर्याद्, दानमेव न संपद्येत । परस्वत्वापादनपर्यन्तं हि तत् । प्रेरणे 'माणवकाय भिक्षां ददाति धार्मिक' इत्यादि । स हि माणवको धार्मिकं संप्राप्य तं प्रेरयति भिक्षां ददातु भवानिति । अनुमत्यां 'राज्ञे श्लोकं ददाति कविरि'त्यादि । स हि राजा, श्लोकार्थपर्यालोचनेन कविं श्लाघ-

मानस्तद्दानमनुमन्यते । अत्रानिराकरणस्या(न?)ङ्गत्वं संभावनया, अनुमतेस्तु सर्वत्र भावात् । गोबलीवर्दन्यायेनात्र भेदः ॥ २ ॥

अपादानं द्विधा चैव

इति । चलाचलभेदेन द्वैविध्यम् । चले 'धावतोऽश्वात् पतितः, सार्थाद् गच्छतो हीन' इत्यादि । अचले 'ग्रामादागच्छति, पर्वतादवरोहती'त्यादि । ननु ध्रुवस्य स्थिरात्मकस्य चलत्वानुपपत्तेः सपरिस्पन्दानामश्वादीनामियं संज्ञा न प्राप्नोति । **मैवम्** । अत्र ध्रुवशब्द एकरूपवाची, न तु कूटस्थादिपर्यायः । ऐकरूप्यं चापायविषयमाश्रीयते । तदयमर्थः — अपाये साध्ये यद् ध्रुवं यदेकरूपं, तेनापायेनाविष्टमिति यावत् । ततश्च धावतोऽश्वात् पतित इत्यत्र पतनक्रियावेशाद् देवदत्तस्यैवापाययुक्तत्वादध्रुवत्वम् । अश्वस्य तु तदभावाद् ध्रुवत्वमेव । उक्तं च हरिणा —

"द्रव्यस्वभावो न ध्रौव्यमिति सूत्रे प्रतीयते ।
अपायविषयध्रौव्यं यत् तु तावद्विवक्षितम् ॥

सरणे देवदत्तस्य ध्रौव्यं पाते तु वाजिनः ।
आविष्टं यदपायेन तस्याध्रौव्यं प्रचक्षते ॥"

इति । केचित् तु पठन्ति 'संप्रदानं द्विधा मतम् । अपादानं त्रिधा चैव' इति । तस्मिन् पाठे शास्त्रीयलौकिकभेदेन संप्रदानस्य द्वैविध्यं, निर्दिष्टविषयमुपात्तविषयमपेक्षितविषयं चेत्यपादानस्य

त्रैविध्यं च द्रष्टव्यम् । तत्र 'रुच्यर्थानां प्रीयमाणः'(१. ४. ३३) इत्यादिभिः सूत्रैर्विधीयमाना शास्त्रीयेत्युच्यते । 'कर्मणा–'(१.४. ३२) इति सूत्रेण विधीयमाना लौकिकी । यद्यपि सर्वा संप्रदान-संज्ञा शास्त्रेणैवोच्यते । तथापि हरिप्रभृतिभिः संप्रदीयते यस्मै स संप्रदानसंज्ञ इत्यन्वर्थसंज्ञाङ्गीकरणाल्लौकिक एव संप्रदानार्थः 'कर्मणा———' इति सूत्रेणोक्तः । 'रुच्यर्था'दिभिस्तु यस्यां-कस्याञ्चित् संज्ञायां शेषषष्ठ्यां वा प्राप्तायां विधानाल्लौकिकार्था-भावाच्छास्त्रेणैव संप्रदानसंज्ञा कथ्यत इत्येवं शास्त्रीयलौकिक-भेदः । तत्र 'रुच्यर्था'दिसूत्रेण कर्मसंज्ञायां प्राप्तायां विधीयते दे-वदत्ताय रोचते मोदक इति । अत्र हि रुचिधातुः प्रीणयत्यर्थे वर्तते, अनेकार्थत्वाद् धातूनाम् । देवदत्तं मोदकः प्रीणयतीत्यर्थः । तथा च प्रीयमाण इति विशेषणमुपपन्नं भवतीति देवदत्तो रुचेः कर्म । अपरे हेतुसंज्ञायां प्राप्तायामित्याहुः । शेषषष्ठ्यां प्राप्तायामि-त्यन्ये । एवं 'श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः' (१. ४. ३४) इति । अत्र ह्याख्यानकर्म संप्रदानं, ज्ञीप्स्यमानशब्दवाच्यत्वात् तस्येति दर्शने कर्मसंज्ञायां प्राप्तायां विधानम् । देवदत्ताय श्लाघत इत्यस्य ह्ययमर्थः — देवदत्तं प्रति श्लाघमानस्तामेव श्लाघां तमेव ज्ञापयितुमिच्छतीति । अपरे यस्मा आख्यायते स संप्र-दानमिति वदन्तः शेषषष्ठ्यां प्राप्तायामित्याहुः । एष मतभेदः कैयटमिश्रैर्वर्णितः — 'ज्ञीप्स्यमाने विवदन्ते यस्मा आख्या-यते स संप्रदानं, य आख्यायते स इत्यन्य' इति । 'धारेरु-त्तमर्णः' (१. ४. ३५) इति तु शेषषष्ठ्यां प्राप्ताया । देवद-त्ताय शतं धारयतीत्यत्र हि शतधारणस्य देवदत्तो निमित्तं,

तेन दत्तत्वाद् धनस्य । पुष्पेभ्यः स्पृहयतीत्यत्र पुष्पाणामीप्सिततमत्वात् कर्मसंज्ञायां प्राप्तायां 'स्पृहेरीप्सितः'(१. ४. ३६) इति विधानम् । एवं 'क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः' (१. ४. ३७) इति । देवदत्ताय राध्यतीक्षत इत्यत्र देवदत्तस्य गणकप्रयोजकत्वाद्धेतुसंज्ञायां प्राप्तायां 'राधीक्ष्योर्यस्य विप्रश्नः' (१. ४. ३९) इति वचनम् । एवं 'प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता' (१.४. ४०) इति । देवदत्ताय गां प्रतिशृणोतीत्यत्र हि देवदत्तो याच्ञया गां प्रतिजानानं प्रयुङ्क्ते । 'अनुप्रतिगृणश्च' (१. ४. ४१) इति कर्मसंज्ञायां प्राप्तायाम् । 'होत्रेऽनुगृणाती'त्यस्य हि होतारं शंसन्तं प्रोत्साहयतीत्यर्थः । एवं संप्रदानस्य द्वैविध्यं व्याख्यातम् । अपादानस्य त्रैविध्ये हरिः प्रमाणम् । य आह —

"निर्दिष्टविषयं किञ्चिदुपात्तविषयं तथा ।
अपेक्षितक्रियं चेति त्रिधापादानमुच्यते ॥"

इति । कैयटमिश्रा अप्याहुः 'त्रिविधं चेदपादानमि'त्यादि । तत्र यस्य धातुनापायलक्षणो विषयो निर्दिष्टः, तन्निर्दिष्टविषयमपादानम् । यथा — ग्रामादागच्छति, पर्वतादवरोहतीत्यादि । उपात्तः क्रियान्तरस्य गुणभावेन प्रधानभावेन वा यत्रापायलक्षणो विषयः, तदुपात्तविषयम् । यथा — वलाहकाद् विद्योतत इति । अत्रहि निःसरणाङ्गे विद्योतने विद्योतनाङ्गे निःसरणे वा द्युतिर्वर्तते । वलाहकान्निःसृत्य ज्योतिर्विद्योतते, वलाहकाद्वा विद्योतमानं निःसरतीत्यर्थः । तथा कुसूलात् पचतीत्यादानाङ्गे पाके पचिर्वर्तते । एवं ब्राह्मणाच्छंसीति । यत्र क्रियाशब्दस्यानु-

पलब्धेरनुमीयमाना क्रिया, तदपेक्षितक्रियम् । यथा माथुराः पाटलिपुत्रकेभ्य आढ्यतरा इति । उपात्तविषये धातुनैवापायः स्वीकृतः, अत्र तु तदभाव इति भेदः ॥

एवं विभक्त्यनुक्रमानुसारेण सम्प्रदानापादानभेदमुक्त्वा प्राप्तावसरं शेषलक्षणं सम्बन्धं कारकान्यत्वादतिक्रम्याधिकरणभेदमाह —

तथाधारश्चतुर्विधः ।

इति । यथा कर्मादीनां भेदः, तथाधारस्यापि भेदश्चतुर्विध इत्यर्थः । कथम् । व्यापकमौपश्लेषिकं वैषयिकं सामीपिकं चेति । व्यापके 'तिले तैलं, दध्नि सर्पिरि'ति । अत्र तिलादेस्तैलादिना समवायसम्बन्धात् सकलावयवव्याप्त्या व्यापकमित्युच्यते । औपश्लेषिके 'कटे आस्ते, रथे तिष्ठती'ति । अत्र सङ्घिनः कटादेः सकलावयवव्याप्त्यसम्भवात् कतिपयावयवव्याप्त्या कर्तुरुपश्लेषादौपश्लेषिकमेतत् । आधाराधेयसम्बन्धस्योपश्लेषस्य सर्वाधिकरणसाधारणत्वाद् गोबलीवर्दन्यायेनौपश्लेषिकस्यान्येषां च भेदः । वैषयिके 'खे शकुनयः, जले मत्स्या' इति । अत्राकाशादेस्तात्त्विकावयवाभावात् कल्पितप्रदेशतया सम्बन्धाद्वैषयिकमेतत् । अनन्यत्रभावश्चात्र विषयार्थः । सामीपिके 'गङ्गायां घोषः प्रतिवसती'त्यादि । अत्र प्रवाहरूपायां घोषवासस्याशक्यत्वात् समीपस्याधेयेन सम्बन्धात् सामीपिकमेतत् ।

नन्वत्र मुख्ये भवति गौणे कार्यं कथं भवेत् ।
मैवमस्मिन् प्रकरणे ह्ययं न्यायो न विद्यते ॥

साधकग्रहणात् सिद्धे यत् तमग्रहणं कृतम्।
स्वरितेनेति सूत्रेणाप्यधिकं कार्यमादृतम्॥

एवं भेदं प्रदर्श्य सामान्यं कारकमाचष्टे —

करोति कारकं

इति। अन्वर्थत्वयुक्तेयं संज्ञेत्यर्थः। अन्यथा 'अकथितमि'-त्यत्राप्रधानवाच्यकथितशब्दाश्रयणे ब्राह्मणस्य पुत्रं पन्थानं पृ-च्छतीत्यत्र ब्राह्मणस्यापि कर्मसंज्ञा प्रसज्येत। अत्र च संज्ञा-या भाव्यमानत्वाद् भूतविभक्त्यनुपपत्त्या भाव्यमानविभक्तेः प्रथमायाः स्थाने सुब्व्यत्ययेन सप्तमी कृता। न च का-रकसंज्ञाया अपादानादिभिः समावेशः स्तम्बेरम इत्यादौ सप्तमीकृदन्तोत्तरपदप्रकृतिस्वरासिद्ध्यर्थो न प्राप्नोति, एकसंज्ञा-धिकारादिति वाच्यम्। 'ध्रुवमपाय' इति योगविभागेन कारक-संज्ञाविधानादपादानमिति सूत्रे ध्रुवमपाय इत्यनुवर्तनात् कार-कं सदपादानसंज्ञं भवतीत्येवमपादानादीनां विधानाच्च। न तु संज्ञाशब्दानां स्वरूपवाच्यत्वमेव युक्तमिति वाच्यम्। महत्याः संज्ञायाः करणादावृत्त्याद्यनुमानात् कारकं क्रियां कुर्वत् का-रकसंज्ञं भवतीत्यर्थलाभात्। शक्तिश्च कारकं, न तु द्रव्यम्। 'क्रियाणामभिनिष्पत्तौ सामर्थ्यं साधनं विदुरि'त्युक्तत्वात्॥

नन्वेवं स्वतन्त्रस्यैव क्रियानिष्पत्तौ व्यापारदर्शनात् तस्यैव कारकसंज्ञा स्याद्, न तु कर्मादीनाम्। न च सर्वेषां तद्वत् स्वातन्त्र्यं, कर्तृसंज्ञाया अपि सर्वेषां प्रसङ्गादित्याशङ्क्याह —

सर्वं तत्स्वातन्त्र्यविवक्षया ॥ ३ ॥

इति । कर्मादीनामपि कारकत्वमस्त्येव । तेषां कर्मादीनां यत् स्वव्यापारे स्वातन्त्र्यं, तद्विवक्षयेत्यर्थः । 'पूरणगुण–'(२.२. ११)इति षष्ठीसमासप्रतिषेधोऽत्र न भवति, 'वर्तमानसामीप्ये–' (३.३.१३१) इति निर्देशेन तस्यानित्यत्वज्ञापनात् । अन्ये त्वाहुः—लोकप्रसिद्धाः शुक्लादयो गुणशब्देन तत्र गृह्यन्ते, न तु संसर्गादिलक्षणलक्षिता इति । अयमाशयः—यद्यपि विक्लेदनादिप्रधानक्रियानिष्पादने कर्मादीनां स्वातन्त्र्यं नास्ति, तथापि विक्लित्तिज्वलनधारणावधिभावोपनिगमानुमत्यादिलक्षणेषु स्वव्यापारेषु स्वातन्त्र्यात् तदाश्रयेण कारकसंज्ञा तेषां प्रवर्तत एव । स्वव्यापारे स्वातन्त्र्यमनुभवतामेव प्रधानक्रियायामुपयोगात् कर्तृसन्निधावपि स्वव्यापारस्यानिवर्तनादविरोधः स्वातन्त्र्यपारतन्त्र्ययोः । अत एव करणं कारकमित्यादिसामानाधिकरण्योपपत्तिः । कर्तृसंज्ञा तु कारकाधिकारादेव स्वातन्त्र्ये लब्धे पुनः स्वतन्त्रश्रुतेर्नियमार्थत्वात् स्वातन्त्र्यमेव यस्य, तस्य विधानात् पारतन्त्र्योच्छुरितानां कर्मादीनां न भवतीति न (कदा ? का) चिदनुपपत्तिः ॥ ३ ॥

एवं कारकसंज्ञां प्रतिपाद्य संज्ञावाक्यानां विधिवाक्यशेषभूतत्वात् तत्र विहितां सुब्विभक्तिं नियमोक्तिमुखेन दर्शयति —

तत्र कर्तर्यभिहिते प्रथमैव विधीयते ।

इति । तिङ्कृत्तद्धितसमासैरनभिहिते कर्तरि प्रातिपदिकमात्रस्यावशिष्टत्वात् तत्र विहिता प्रथमैव भवति, नान्या

विभक्तिः । तत्र तिङाभिहिते देवदत्तः पचतीत्याद्युदाहरणम् । छन्दोध्यायी देवदत्त इति कृता । श्राद्धी श्राद्धिको ब्राह्मण इति तद्धितेन । ऊढरथोऽनड्वानिति समासेन ॥

तृतीया वाथ षष्ठी वा स्मृतानभिहिते द्विधा ॥ ४ ॥

इति । वाशब्दः समुच्चये । अथ शब्दः पादपूरणार्थः, मङ्गलार्थो वा । 'मङ्गलमध्यानि शास्त्राणि प्रथन्ते' इति हि भाष्यकारः प्राह । यथा 'भूवादयो धातवः' (१. ३. १) इत्यत्र वकारः । अत्र विभक्तिः सामान्यं, तस्य द्वित्वसङ्ख्या भेदिका, इति सामान्यभेदकधर्मलक्षणविधार्थविहितधाप्रत्ययोपपत्तिः । एवं सर्वत्र । अनभिहिते कर्तरि द्विप्रकारा विभक्तिः तृतीया षष्ठी च । तृतीया 'ओदनः पच्यते देवदत्तेन' । षष्ठी 'भवतः शायिका, भवत आसिका' । 'कर्तृकर्मणोः कृति' (२.३.६५) इति कर्तरि षष्ठी । राज्ञां मतः, राज्ञां बुद्धः । 'क्तस्य च वर्तमाने' (२. ३. ६७) इति षष्ठी । 'न लोका—'(२. ३. ६९) इति प्रतिषेधे प्राप्ते वचनम् । भवतः कटः कर्तव्यः । 'कृत्यानां कर्तरि वा'(२. ३. ७१) इति षष्ठी ॥ ४ ॥

तथा कर्मण्यभिहिते विभक्तिं विद्धि पूर्विकाम् ।

इति । तथेति कर्तृवदित्यर्थः । पूर्वैव पूर्विका । यावादित्वात् कन् । प्रथमामित्यर्थः । ओदनः पच्यते देवदत्तेनेत्याद्युदाहरणम् ।

अनुक्ते प्रथमां हित्वा पञ्चमीं सप्तमीं तथा ॥ ५ ॥

इति। अनुक्ते कर्मण्येता विभक्तीर्हित्वा वर्जयित्वा परिशिष्टा द्वितीयादयो भवन्ति। द्वितीया 'ग्रामं गच्छति, ओदनं पचति'। तृतीया 'पित्रा सज्ञानीते, मात्रा सज्ञानीते'। 'संज्ञोऽन्यतरस्यां कर्मणि' (२. ३. २२) इति तृतीया। चतुर्थी 'ग्रामाय गच्छति, ग्रामाय व्रजति'। 'गत्यर्थकर्मणि—'(२.३.१२)इत्यादिना चतुर्थी। एधेभ्यो व्रजति, फलेभ्यो व्रजति। 'क्रियार्थोपपदस्य कर्मणि स्थानिनः'(२.३.१४) इति चतुर्थी। न त्वा तृणाय मन्ये, न त्वा बुसाय मन्ये। 'मन्यकर्मण्यनादरे विभाषाप्राणिषु' (२. ३. १७) इति चतुर्थी। षष्ठी अपां स्रष्टा, पुरां भेत्ता। 'कर्तृकर्मणोः कृति' (२. ३. ६५) इति षष्ठी। 'अधीगर्थदयेशां कर्मणि'(२. ३. ५२) इत्यादिभिर्विहिता षष्ठी नात्रोदाहरणम्। तत्र 'शेष'इत्यधिकारात् कर्मणि शेषत्वेन विवक्षिते षष्ठीविधानात्। 'कर्तृकर्मणोः कृति' इत्यत्र तु पुनः कर्मग्रहणाद् न शेषाधिकारः। तथा च धर्मानुस्मरणमित्यादौ समासो भवति। अन्यथा 'शेष' इत्येव सिद्धायां षष्ठ्यां पुनर्विधानान्नियमार्थाद् यथा मातुः स्मृतमित्यादौ समासो न भवति, (य?त)थात्रापि न स्यात्। सूत्रप्राप्त्यपेक्षयैतदुक्तं, न तूपसङ्ख्यानमप्यपेक्ष्य। तेनाधीती व्याकरण इत्यादौ 'क्तस्येन्विषयस्य कर्मण्युपसङ्ख्यानम्' (वा.२.३. ३६) इति कर्मणि सप्तमी भवति॥ ५॥

तृतीया पञ्चमी चैव षष्ठी च करणे त्रिधा।

इति। अनुक्त इत्यनुषङ्गः। उक्ते तु मांसपचनो वह्निरित्यादौ पूर्ववत् प्रथमा द्रष्टव्या। एवं सम्प्रदानापादानाधिकर-

णेषु गोघ्नोऽतिथिः प्रस्कन्दनः स्तम्बः निशानिशाणे (?) त्यादौ प्रथमा द्रष्टव्येति भावः। तृतीया 'दात्रेण लुनाति, परशुना छिनत्ति'। पञ्चमी 'स्तोकान्मुक्तः, अल्पान्मुक्तः'। 'करणे च स्तोका—'(२.३.३३) इत्यादिना पञ्चमी। षष्ठी 'सर्पिषो जानीते, मधुनो जानीते'। 'ज्ञोऽविदर्थस्य करणे' (२. ३. ५१)इति षष्ठी। घृतस्य यजते, सोमस्य यजते। 'यजेश्च करणे' (२. ३. ६३) इति षष्ठी। यद्यपि 'ज्ञोऽविदर्थस्य करण' इत्यादौ शेषाधिकारात् कर्मादिव्यतिरिक्तस्य च शेषत्वान्न करणे षष्ठीति सिद्धान्तः, तथापि प्रयोगबाहुल्यप्रतिपादनाय भूतपूर्वं करणत्वमाश्रित्य 'षष्ठी च करणे त्रिधे' त्युक्तमिति केचित्। अन्ये तु 'तृतीया पञ्चमी चैव करणे कारके द्विधे'ति पठन्ति॥

षष्ठी चतुर्थी तृतीया संप्रदाने त्रिधा मता॥ ६॥

इति। षष्ठी 'पुरुषमृगश्चन्द्रमसो दातव्यः'। 'चतुर्थ्यर्थे बहुलं छन्दसि' (२. ३. ६२) इति षष्ठी। अत्रापि पूर्ववत् षष्ठीप्रदर्शनोपपत्तिः। 'चतुर्थी च तृतीया च सम्प्रदाने द्विधा मते'ति वा पाठः। चतुर्थी 'उपाध्यायाय गां ददाति'। 'चतुर्थी सम्प्रदाने'(२.३.१३) इति चतुर्थी। तृतीया 'दास्या मालां सम्प्रयच्छते, वृषल्या सम्प्रयच्छते'। दास्यै मालां ददातीत्यर्थः। 'दाणश्च सा चेच्चतुर्थ्यर्थे(१.३.५५) इत्यात्मनेपदम्। अशिष्टव्यवहारे तृतीयाया वक्तव्यत्वाच्चेच्छब्दस्य चार्थवृत्तित्वाद्वा तृतीया॥ ६॥

पञ्चमी खल्वपादाने वर्तते न ततोऽन्यतः।

इति। खल्वित्यवधारणे। अन्यत इति आद्यादित्वात् प्रथ-

मार्थे तसिः । अपादाने कारके पञ्चम्येव । ततः पञ्चम्या अन्या विभक्तिर्नास्ति । वृक्षात् पर्णं पततीत्याद्युदाहरणम् ॥

सप्तम्येवाधिकरणे

इति। स्थाल्यां पचतीत्याद्युदाहरणम् । ननु च 'कृत्वोऽर्थ-प्रयोगे कालेऽधिकरणे'(२. ३. ६४) इति द्विरह्नो भुङ्क्ष इत्यादावधिकरणे षष्ठ्यपि भवति । नैषाधिकरणे,शेषाधिकारादित्यदोषः । एवमपि पुष्येण पायसमश्नीयादित्यादौ 'नक्षत्रे च लुपि'(२.३.४५) इत्यधिकरणे तृतीयापि भवति । सा किं न दर्शिता । एवं तर्हि एवकारो भिन्नक्रमः। अधिकरण एव सप्तमी, न कारकान्तर इति सप्तमी नियम्यते। कथं तर्हि अधीती व्याकरण इत्यादौ 'क्तस्येन्विषयस्य—'(वा० २. ३. ३६) इति कर्मणि सप्तमी । उपसङ्ख्यानानपेक्षया चैतदुक्तमित्यदोषः । अन्ये त्वस्य व्याख्यान(स्य स ? स्यासा)मज्ञस्यं मन्यमानाः पाठान्तरं वर्णयन्ति — "पञ्चमी खल्वपादाने तथाधिकरणे द्विधा । तृतीया सप्तमी चैव" इति ॥

प्रकृतमुपसंहरति —

कारकस्यैष सङ्ग्रहः ॥ ७ ॥

इति । अत्र यदि सामान्येन येनकेनाप्यभिहितेऽनभिहिते च कर्मादिकारके विभक्तयो भवन्तीत्युच्यते, तदा कटं करोति भीष्ममुदारं शोभनं दर्शनीयमित्यादौ ईप्सिततमविशेषणवि-

शिष्टकटवस्तुगतकर्मणः साकल्येन तस्मादुत्पद्यमानया द्वितीयया-भिहितत्वाद् भीष्मादिभ्यो द्वितीया न स्यात् । यथा कृतः कटः शोभनो दर्शनीय इत्यादौ करोतेरुत्पद्यमानेन क्तप्रत्ययेन सर्वस्य कर्मणोऽभिहितत्वादन्येभ्यो द्वितीया न भवति । तस्माद्विशेषविषयमभिहितानभिहितत्वमत्राभिमतम् ॥ ७ ॥

के पुनस्तद्विशेषा इत्यत्राह —

समासस्तद्धितस्तिङ्कृच्चत्वारस्तेऽभिधायकाः ।
त एवानभिसम्बन्धाद् भवन्त्यनभिधायकाः ॥ ८ ॥

इति । अनभिसम्बन्धादिति समासादीनां कर्मादिनाभिधेयेनाभिधायकत्वेन सम्बन्धाभावादित्यर्थः । न्यायसिद्धं चैतत्, न तु वचनलभ्यम् । तथाहि—इह यस्माद् या विभक्तिरुत्पद्यते, तया तद्वाच्यगतकर्मादि वक्तुं द्योतयितुं वा शक्यते, नान्यवाच्यगतमपि । कटशब्दश्च कटत्वजातियुक्तमर्थमाह , नतु भीष्माद्याकारविशिष्टम् । ततश्च यथा तद्विशिष्टप्रतिपादनाय तत्प्रयोगो भवति, एवं तद्गतकर्मादिप्रतिपादनाय तेभ्योऽपि द्वितीयादयो भवन्त्येव । क्तप्रत्ययस्तु प्रकृत्यर्थस्य क्रियारूपस्य कर्मत्वाभावात् तं प्रति यस्य कर्मभावः, तमभिधत्त इति युक्तं भीष्माद्याकारविशिष्टकटकर्माभिधानं तस्य ॥ ८ ॥

अभिधायकोक्तिप्रसङ्गायातसमासस्वरूपमाह —

षोढा समासः संक्षेपाद्

इति । अव्ययीभावद्विगुद्वन्द्वतत्पुरुषबहुव्रीहिकर्मधारय-

भेदेन षट्प्रकारः समासः। संक्षेपात् संकोचाद्, अवान्तरभेदाविवक्षयेत्यर्थः। तत्र द्विगुकर्मधारययोस्तत्पुरुषेऽन्तर्भावाद् गोबलीवर्दन्यायेन भेदः॥

अष्टाविंशतिधा पुनः।

इति। अवान्तरभेदविवक्षायां त्वष्टाविंशतिप्रकार इत्यर्थः॥

नित्यानित्यत्वयोगेन लुगलुक्त्वेन च द्विधा॥ ९॥

इति। यदि नित्यत्वमनित्यत्वं च भेदकधर्म आश्रीयते, तदा द्वैविध्यम्। तत्र नित्यसमासः कारणभेदात् त्रिधा भवति। कश्चिद्विभाषाधिकारात् प्राग् विधानात्। यथा—अधिस्त्रीत्यादिः। कश्चिन्नित्याधिकारविहितत्वात्। यथा—उद्दालपुष्पप्रभञ्जिकादिः 'नित्यं क्रीडाजीविकयोः'(२.२.१७)इत्यादिना विहितः। कश्चित् सामर्थ्यात्। यथा—सुराजा, अतिराजा, ब्राह्मणार्थः सूप इत्यादिः। अत्र स्वादीनां विग्रहवाक्यस्थानां शोभनाद्यर्थप्रतिपादनसामर्थ्याभावादन्येन विग्रहप्रदर्शनात् सामर्थ्याद् वाक्याभावलक्षणं नित्यत्वम्। अनित्यसमासो विभाषाधिकारविहितापत्रिगर्तादिः। एवं लुगलुक्त्वाभ्यामपि द्वैविध्यम्। लुग् 'राजपुरुषः, ब्राह्मणकम्बलः'। अलुग् 'दूरान्मुक्तः, अल्पान्मुक्तः'। 'स्तोकान्तिक—'(२.१.३९) इति समासः। 'पञ्चम्याः स्तोकादिभ्यः' (६.३.२)इत्यलुक्। एवमानङ्वधिकालुक्प्रकरणस्थौजःसहोम्भस्तमसःप्रभृतिसूत्रविहितौजसाकृतादयो द्रष्टव्याः॥ ९॥

अष्टाविंशतिधेत्युक्तं विवृणोति —

तत्राष्टधा तत्पुषः

इति । सप्तविभक्त्यन्तनञ्तत्पुरुषभेदेनाष्टप्रकारस्तत्पुरुषः। तत्र प्रथमातत्पुरुषः—पूर्वं कायस्य पूर्वकायः, अपरकायः । 'पूर्वापराधर–'(२.२.१)इत्यादिना समासः। अर्धं पिप्पल्याः अर्धपिप्पली । 'अर्धं नपुंसकम्'(२.२.२)इति समासः। द्वितीयं भिक्षायाः द्वितीयभिक्षा, तृतीयभिक्षा। 'द्वितीयतृतीय–'(२.२.३) इत्यादिना समासः । प्राप्तो जीविकां प्राप्तजीविकः, आपन्नजीविकः । 'प्राप्तापन्ने च द्वितीयया'(२.३.४)इति समासः । मासो जातस्य स मासजातः, संवत्सरजातः । 'कालाः परिमाणिना' (२.२.५) इति समासः। द्वितीयातत्पुरुषः—कष्टं श्रितः कष्टश्रितः, कान्तारश्रितः। 'द्वितीया श्रिता—'(२.१.२४)इत्यादिना समासः। खट्वारूढो जाल्मः । 'खट्वा क्षेपे'(२.१.२६) इति समासः। अहरतिसृता मुहूर्ताः, रात्र्यतिसृता मुहूर्ताः । 'कालाः' (२.१.२८) इति समासः । मुहूर्तसुखं, सर्वरात्रकल्याणी । 'अत्यन्तसंयोगे च' (२.१.२९)इति समासः। तृतीयातत्पुरुषः— शङ्कुलया खण्डः शङ्कुलाखण्डः। 'तृतीया तत्कृता—' (२.१.३०) इति समासः । मासेन पूर्वः मासपूर्वः, पितृसदृशः । 'पूर्वसदृश—' (२.१.३१) इत्यादिना समासः। अहिना हतः अहिहतः, नखैर्भिन्नः नखभिन्नः। 'कर्तृकरणे कृता बहुलम्'(२.१.३२) इति समासः । दध्युपसिक्त ओदनो दध्योदनः । 'अन्नेन व्यञ्जनम्'(२.२.३४)इति समासः । गुडेन मिश्रा धानाः गुडधानाः। 'भक्ष्येण मिश्रीकरणम्'(२.१.३५)

इति समासः । चतुर्थीसमासः — यूपदारु, कुण्डलहिरण्यं, ब्राह्मणसूपः, कुमारबलिः । 'चतुर्थी तदर्था–'(२.१.३६)इति समासः । पञ्चमीसमासः — वृकभयं, दस्युभयम् । 'पञ्चमी भयेन'(२.१.३७)इति समासः । सुखापोढः, कल्पनापोढः । 'अपेतापोढ–'(२.१.३८)इति समासः । षष्ठीसमासः — राजपुरुषः, ब्राह्मणकम्बलः । 'षष्ठी'(२.२.८) इति समासः । ब्राह्मणयाजकः, क्षत्रिययाजकः । 'कर्तरि च'(२.२.१६)इति प्रतिषेधे प्राप्ते 'याजकादिभिश्च'(२.२.९) इति समासः । सप्तमीसमासः — अक्षशौण्डः, अक्षधूर्तः । 'सप्तमी शौण्डैः'(२.१.४०)इति समासः । सांकाश्यसिद्धः, आतपशुष्कः । 'सिद्धशुष्कपक्वबन्धैश्च' (२.१.४१) इति समासः । तीर्थध्वाङ्क्षः, तीर्थकाकः । 'ध्वाङ्क्षेण क्षेपे'(२.१.४२) इति समासः । मासदेयं, संवत्सरदेयम् । 'कृत्यैर्ऋणे'(२.१.४३) इति समासः । अरण्येतिलकाः, अरण्येमाषकाः । 'संज्ञायाम्'(२.१.४४) इति समासः । 'हलदन्तात् सप्तम्याः–'(६.३.९)इत्यलुक् । पूर्वाह्णकृतम्, अपराह्णकृतम् । 'क्तेनाहोरात्रावयवाः'(२.१.४५) इति समासः । तत्रकृतं, तत्रभुक्तम् । 'तत्र'(२.१.४६)इति समासः । अवतप्तेनकुलस्थितम्, उदकेविशीर्णम् । 'क्षेपे'(२.१.४७) इति समासः । पात्रेसमिताः, उदुम्बरमशकाः । 'पात्रेसमितादयश्च' (२.१.४८)इति समासः । नञ्समासः — अब्राह्मणः, अवृषलः । 'नञ्' (२.२.६) इति समासः ॥

षड्विधः कर्मधारयः ।

इति । सामान्यविशेषकुत्सितपूर्वपदोपमानपूर्वपदोपमितपूर्वपदत्वर्णोभयभेदेन षड्विधत्वम् । तत्र सामान्यशब्देन

'विशेषणं विशेष्येण—' (२. १. ५७) इति सामान्येन विहितः समास उच्यते । विशेषशब्देनापि तत्प्रपञ्चार्थं ये विहिताः 'पूर्वापरप्रथम—' (२. १. ५८) इत्यादिभिः सूत्रैः, ये च 'पूर्वकाल—' (२. १. ४९) इत्यादिभिः पूर्वादिपूर्वनिपाताद्यर्थं, तेषामुभयेषां ग्रहणम् । यद्यपि कुत्सितपूर्वपदादीनामपि विशेषेऽन्तर्भावः, तथापि प्रसिद्धत्वप्रतिपादनार्थं प्रपञ्चार्थं च भेदेनोपादानं कृतम् । सामान्ये 'नीलोत्पलं, रक्तोत्पलम्' । नीलं च तदुत्पलं चेति विगृह्य भेदकलक्षणविशेषणवाचिसुबन्तस्य भेद्यलक्षणविशेष्यवाचिना सह 'विशेषणं विशेष्येण बहुलम्' इति समासः । विशेषे 'स्नातानुलिप्तः, दग्धप्ररूढः' । 'पूर्वकालैक—' इत्यादिना समासः । पूर्वेषुकामशमी, अपरेषुकामशमी । 'दिक्सङ्ख्ये संज्ञायाम्' (२. १. ५०) इति समासः । संज्ञायां नियमार्थोऽयम् । पूर्वपुरुषः, अपरपुरुषः । 'पूर्वापर—' इत्यादिना समासः । एवमापादपरिसमाप्तेर्यानि सूत्राणि वर्णसूत्रवर्जितानि, तेषामुदाहरणान्यूह्यानि । कुत्सितपूर्वपदे 'वैयाकरणखसूचिः, याज्ञिककितवः' । यः पृष्टो निष्प्रतिभत्वाद् अहो विमलं गगनमिति प्रश्नं विस्मार(यितुं ? यति), स एवमुच्यते—खसूचिश्चासौ वैयाकरणश्चेति । तेन वैयाकरणत्वकुत्सनेन पूर्वपदस्य कुत्सितत्वात् 'कुत्सितानि कुत्सनैः' (२. १. ५३) इति विशेष्यपूर्वपदार्थः समासो भवति । एवं याज्ञिककितव इत्ययाज्ययाजनतत्पर उच्यते । उपमानपूर्वपदे 'शस्त्रीश्यामा, कुमुदश्येनी' । शस्त्रीव श्यामेति विगृह्य 'उपमानानि सामान्यवचनैः'(२. १. ५५)इति समासः । अत्र शस्त्र्यादेः सामानाधिकर(ण ? ण्य)प्रसिद्ध्यर्थमुपमेयवृत्तित्वमभेदेनोपचारादूरीक्रियते । पू-

वावस्थाश्रयेण चोपमानानीत्युच्यते । एवञ्च गौणत्वाद् 'विशेषणं विशेष्येण बहुलम्'(२.१.५७) इति समासो न प्राप्नोतीत्ययमारम्भः । उपमेयपूर्वपदे 'पुरुषव्याघ्रः, पुरुषसिंहः' । पुरुषोऽयं व्याघ्र इवेति विगृह्य 'उपमितं व्याघ्रादिभिः —' (२. १. ५६) इति समासः । एतद्वचने न केवलं गौणत्वमेव हेतुः, किन्तु विशेष्यपूर्वपदनिपातप्रापणापि। वर्णोभयपदे 'कृष्णशबलः, लोहितशबलः' । सामानाधिकरण्योपपत्तयेऽवयवद्वारेण समुदायाभिधानाद् गौणत्वादयमारम्भः ॥

षड्विधश्च बहुव्रीहिः

इति । तत्र 'अनेकमन्यपदार्थे' (२.२.२४) इति विहितो द्विविधः द्विपदो बहुपदश्चेति । चित्रगुः, शबलगुः, सुसूक्ष्मजटकेशेन, सुनताजिनवाससा, इत्युदाहरणम् । केचित् तु तद्गुणसंविज्ञानातद्गुणसंविज्ञानभेदेन द्वैविध्यमाहुः । तस्यान्यपदार्थस्य सम्बन्धी गुण उपसर्जनीभूतो वर्तिपदार्थो व्यवहारे संविज्ञायते यस्मिन् बहुव्रीहौ, स तद्गुणसंविज्ञानः । तस्मादन्योऽतद्गुणसंविज्ञानः । पूर्वस्योदाहरणं 'दीर्घविषाणमानयेति । अत्र यद्यप्यन्यपदार्थस्यैव शब्दवाच्यत्वं, तथापि समवायस्य प्रवृत्तिनिमित्तत्वाद् अपृथक्सिद्धयोरेव च तद्भावात् सामर्थ्यादन्यानयने पात्रानयनवद् वर्तिपदार्थस्यापि कार्ययोगो भवति । तथा शुक्लवाससमानयेत्याद्यप्युदाहरणं, यत्र संयोगः प्रवृत्तिनिमित्तम् । विशेषणत्वविवक्षायां चेदमुदाहरणम् । यदा तु काकनिलयनादिवदुपलक्षणत्वेन

विवक्ष्यते यः शुक्लवासा दृष्टः स आनीयतामिति, तदेतन्नोदाहरणम्। अपरस्य 'चित्रगुः, शबलगुरि'त्याद्युदाहरणम्। अत्र हि स्वस्वामिसम्बन्धस्य प्रवृत्तिनिमित्तत्वाद् देशान्तरगतयोरपि स्वस्वामिभावस्याविहतत्वात् पुरुषस्यैव कार्ययोगः, न तु गवाम्। सूत्रान्तरविहितश्चतुर्विधः—सङ्ख्योत्तरपदोऽन्तरालाभिधेयकः सरूपोपलक्षितः सहपूर्वपदश्चेति। सङ्ख्योत्तरपदस्तावद् 'उपदशाः, उपविंशाः, द्वित्राः, द्विदशाः'। 'सङ्ख्ययाव्ययासन्नादूराधिकसङ्ख्याः सङ्ख्येये'(२.२.२५) इति समासः। 'बहुव्रीहौ सङ्ख्येये डज्' (५.४.७२)इति डच् समासान्तः। अन्तरालाभिधेये 'दक्षिणपूर्वा दिक्, पूर्वोत्तरा'। दक्षिणस्याश्च पूर्वस्याश्च दिशोऽन्तरालमिति विगृह्य 'दिङ्नामान्यन्तराले' (२. २. २६) इति समासः। सरूपोपलक्षिते 'केशाकेशि, दण्डादण्डि'। केशेषु केशेषु गृहीत्वेदं युद्धं प्रवृत्तं, दण्डैश्च दण्डैश्च प्रहृत्येदं युद्धं प्रवृत्तमिति विगृह्य 'तत्र तेनेदमिति सरूपे' (२. २. २७) इति समासः। 'इच् कर्मव्यतिहारे' (५. ४. १२७) इति समासान्तः। 'अन्येषामपि दृश्यते'(६. ३.१३७) इति पूर्वपदस्य दीर्घः। तिष्ठद्गुप्रभृतिषु 'इच् कर्मव्यतिहारे' इति पाठादव्ययत्वात् सुब्लुक्। इतिकरणाद् विवक्षार्थाद् युद्धक्रियायामेव समासः। सहपूर्वपदे 'सपुत्रः, सच्छात्रः'। सह पुत्रेणागत इति विगृह्य 'तेन सहेति तुल्ययोगे'(२. २. २८)इति समासः। 'वोपसर्जनस्य' (६. ३. ८२) इति सभावः॥

द्विगुराभाषितो द्विधा॥ १०॥

इति। एकवदनेकवद्भेदेन। एकवद्भावे तावत् 'पञ्च पू-

लाः समाहृताः पञ्चपूली, दशपूली' । 'तद्धितार्थोत्तरपदसमाहारे च' (२.१.५१) इति समासे कृते 'सङ्ख्यापूर्वो द्विगुः' (२.१.५२) इति द्विगुसंज्ञायां 'द्विगुरेकवचनम्' (२.४.१) इत्येकवद्भावे च 'स नपुंसकम्' (२.४.१७) इति नपुंसकलिङ्गतायां प्राप्तायाम् 'अकारान्तोत्तरपदो द्विगुः स्त्रियां भाष्यते' (वा० २.४.३०) इति स्त्रीत्वविज्ञानाद् 'द्विगोः' (४.१.२१) इति ङीपि रूपम् । अनेकवद्भावे पञ्चकपालः पुरोडाशः पञ्चकपालौ पञ्चकपालाः । पञ्चसु कपालेषु संस्कृत इति विगृह्य तद्धितार्थे विवक्षिते समासे कृते 'संस्कृतं भक्षाः' (४.२.१६) इति विहितस्याणो 'द्विगोर्लुगनपत्ये' (४.१.८८) इति लुक् । समाहारद्विगोरेकवद्भावविधानादिह न भवति, पञ्चनावप्रियः, दशनावप्रियः । उत्तरपदे समासे कृते 'नावो द्विगोः' (५.४.९९) इति टच् समासान्तः ॥ १० ॥

द्वन्द्वश्चतुर्विधो ज्ञेयः

इति । अत्र कश्चित्—समुच्चयान्वाचययोरर्थग्रहणादसामर्थ्याच्च द्वन्द्वाभावादितरेतरसमाहारविहितो द्विविध एव द्वन्द्वः । ततश्चार्थस्य चातुर्विध्यं प्रतिपादयितुं तद्वतचातुर्विध्यारोपेण चतुर्विध इत्युक्त इति प्रतिपादितवान् । वयं तु वदामः—अर्थभेदाद् द्विविधस्यापि द्विपदबहुपदभेदेन द्वैविध्याच्चतुर्विध इत्युक्तमिति । इतरेतरयोगे द्विपदस्य 'प्लक्षन्यग्रोधौ, देवदत्तयज्ञदत्तौ' बहुपदस्य 'प्लक्षन्यग्रोधधवखदिरपलाशाः, देवदत्तयज्ञदत्तविष्णुमित्राः' । समाहारे द्विपदस्य 'वाक्त्वचं, सुक्त्वचम्' । वाक् च त्वक् च इति विगृह्य समाहारे द्वन्द्वे कृते 'द्वन्द्वाच्चुदषहान्तात् समाहारे' (५.४.

१०६)इति टच् समासान्तः । प्राण्यङ्गानां द्वन्द्व एकवद् भवतीत्येकवद्भावादेकवचनम् । बहुपदस्य पाणिपादशिरोग्रीवम् । पूर्ववदेकवद्भावः । वृक्षा इत्यादिवदुद्भूतावयवभेदः समूह इतरेतरयोग इति तत्र द्विवचनबहुवचने । तिरोहितावयवभेदस्तु समाहारः । तत्र वनमित्यादिवदेकवचनं सिद्धम् । 'द्वन्द्वश्चे'त्याद्येकवद्भावप्रकरणं तु विषयविभागार्थं— प्राण्यङ्गादीनां समाहार एव द्वन्द्वः, वृक्षमृगादीनामुभयत्र, अन्येषामितरेतरयोग इति ॥

अव्ययीभावो द्विधा मतः ।

इति । अव्ययपूर्वपदनामपूर्वपदभेदेन । आद्यस्योदाहरणं 'कुम्भस्य समीपमुपकुम्भं' 'यावदमत्रं ब्राह्मणानामन्त्रयस्वे'त्यादि । *समीपार्थे यदव्ययं वर्तते, तत् समस्यते, 'यावदवधारण'(२.१.८) इत्येताभ्यां समासः । 'अव्ययीभावश्च'(१.१.४१) इत्यव्ययसंज्ञायाम् 'अव्ययादाप्सुपः'(२.४.८२) इति सुब्लुकि प्राप्ते 'नाव्ययीभावाद्' (२.४.८३) इत्यादिनाम्भावे 'अमि पूर्वः'(६.१.१०७) इति पूर्वरूपे रूपम् । अपत्रिगर्तं वृष्टो देवः, परित्रिर्गतम् । 'अपपरिबहिरञ्चवः पञ्चम्या' (२.१.१२) इति समासः । आपाटलिपुत्रं वृष्टो देवः । आङ् मर्यादाभिविध्योः' (२. १. १३) इति समासः । अभ्यग्नि शलभाः पतन्ति, प्रत्यग्नि । 'लक्षणेनाभिप्रती आभिमुख्ये'(२.१. १४) इति समासः । अनुवनमशनिर्गता । 'अनुर्यत्समया'(२.१. १५) इति समासः । अनुगङ्गं वाराणसी । 'यस्य चायामः'(२.१. १४) इति समासः । नामपूर्वपदस्य अस्त्यत्र किञ्चित् सूपः सूपप्रति,

* 'अव्ययं विभक्ती'त्यादिसूत्रेणेत्यर्थः ।

शाकप्रति । 'सुप् प्रतिना मात्रार्थे'(२.१.९) इति समासः । एकपरि, द्विपरि । 'अक्षशलाकासङ्ख्याः परिणा' (२.१.१०) इति समासः । तिष्ठद्गु, वहद्गु । 'तिष्ठद्गुप्रभृतीनि च' (२.१.१७) इति समासः । पारेगङ्गं, मध्येगङ्गम् । 'पारेमध्ये षष्ठ्या वा'(२.१.१८) इति समासः । निपातनादेत्वं च । द्विमुनि व्याकरणं, त्रिमुनि व्याकरणम् । 'सङ्ख्या वंश्येन' (२. १. १९) इति समासः । सप्तगङ्गं, द्वियमुनम् । 'नदीभिश्च' (२.१.२०) इति समासः । उन्मत्तगङ्गं नाम देशः, लोहितगङ्गम् । 'अन्यपदार्थे च संज्ञायाम्' (२.१.२१) इति समासः ॥

एवमष्टाविंशतिप्रकारतामुपपाद्य गुरुसंज्ञाकरणसामर्थ्यायातपूर्वाचार्यसंज्ञापरिग्रहप्रयुक्ततदीयावधिलब्धसमासार्थप्राधान्यमाह —

तेषां पुनः समासानां प्राधान्यं

इति । अत्र समासशब्देन समासार्थो लक्ष्यते । नहि संज्ञानां प्राधान्यं समस्ति, संज्ञिप्रत्यायनैकनिष्ठत्वात् । नापि संज्ञिनां शब्दरूपाणाम् , अर्थप्रत्यायनैकपरत्वात् । अथवा तेषां समाससंज्ञाभाजां योऽर्थः, तस्य प्राधान्यमस्तीत्यर्थः ॥

भेदमाह —

तच्चतुर्विधम् ॥ ११ ॥

इति । पूर्वपदोत्तरपदान्यप(दार्थो?दो)भयपदार्थप्राधान्यभेदेन । तत्रोत्तरपदार्थप्रधानस्तत्पुरुषः । यथा — राजपुरुषः, कष्टश्रित इत्यादि । अत्र पुरुषादेः क्रियायोगो विशेषणयोगश्च । शोभनो राजपुरुष आनीयतामिति प्राधान्यं तस्य । राज्ञस्तु तदुपलक्ष-

णत्वेनोपादानात् क्रियाविशेषणयोगाभावादप्राधान्यम् । नञ्समासस्यापि भाष्येऽब्राह्मणादिशब्दानामारोपणात् क्षत्रियादिवृत्तित्वमभ्युपगम्य ब्राह्मणादिपदार्थप्राधान्यं स्थापितम् । क्वचित् तु पूर्वपदार्थप्रधानः । यथैकदेशिसमासः 'प्राप्तापन्ने—'(२.२.४) सूत्रविहितश्च । पूर्वकायः, प्राप्तजीविक इति । 'कालाः परिमाणिना'(२.२.५) इति विहित उत्तरपदार्थप्रधान एव । मासजातः, संवत्सरजात इति । तथाच तत्र भाष्यं— 'किंप्रधानोऽयं समासः उत्तरपदार्थप्रधान' इत्यादि । कर्मधारयस्याप्युत्तरपदार्थप्राधान्यप्राचुर्यम् । उपमितसमासस्तु पूर्वपदार्थप्रधानः । तद्धितार्थद्विगुस्तद्धितविनाभावी तदर्थप्राधान्यात् स्वार्थविवेकानर्हः । उत्तरपदद्विगुरपि त्रिपदबहुव्रीह्येकदेशीभूतस्तदर्थमेवानुसरति । समाहारद्विगुस्तु यदि समाह्रियत इति समाहारः, तदोत्तरपदार्थप्रधानः । पञ्चपूल्यानीयतामित्यादौ समाह्रियमाणानां पूलानां शब्दवाच्यत्वात् । अथ समाहरणं समाहारः तदान्यपदार्थप्रधानः । अव्ययीभावः प्रायेण पूर्वपदार्थप्रधानः । यथोपकुम्भादयः । सूपप्रतीत्यादयस्तूत्तरपदार्थप्रधानाः । उन्मत्तगङ्गादयोऽन्यपदार्थप्रधानाः । बहुव्रीहिरन्यपदार्थप्रधानः । द्वित्रादयोऽन्यपदार्थप्रधानाः । तथा च तद्विधायकसूत्रस्य कैमर्थक्यं पूर्वपक्षीकृतं वार्त्तिककृता 'अशिष्यः सङ्ख्योत्तरपदलक्षणः सङ्ख्येयवार्ताभिधायित्वादि'ति । अयमर्थः — 'सङ्ख्ययाव्यया—'(२.२.२५) इत्यादिना विहितः समासो न वक्तव्यः, पूर्वसूत्रेणैव सिद्धत्वात् । तथाहि—द्वित्राः, त्रिचतुरा इत्यादौ द्वौ वा त्रयो वेति वार्थः प्रतीयते । अधिकविंशाः अधिकत्रिंशा इ-

त्यादावधिका विंशतिर्यासां ता अधिकविंशा गाव इति सङ्ख्येयम्। तत्र 'अनेकमन्यपदार्थे'(२.२.२४) इत्येव सिद्धमिति। भाष्यकारस्तु—'उपदशाः, अधिकदशा' इत्यादौ दशशब्दस्य सङ्ख्येयवृत्तित्वादुपशब्दस्य च समीपवाचित्वादन्यपदार्थाभावादव्ययादिग्रहणस्य कर्तव्यतां स्थापयन् उपदशादीनामन्यपदार्थप्राधान्यं नानुमन्यते । द्वित्रादयस्तु तत्पक्षेऽप्यन्यपदार्थप्रधानाः । तथा च भाष्यं—'तत्र प्रथमानिर्दिष्टं सङ्ख्याग्रहणं शक्यमकर्तुमि'ति । दक्षिणपूर्वादयोऽप्यन्तरालाद्यभिधायिनोऽन्यपदार्थप्रधानाः। तथा च वार्त्तिकं—'दिक्समाससहयोगयोश्चान्तरालप्रधानाभिधानात् तृतीयासप्तम्योश्च क्रियाभिधानादि'ति। इतरेतरद्वन्द्वः उभयपदार्थप्रधानः । *अथ समूहसमूहिनोर्भेदो नेत्युच्येत, तर्ह्ययमप्युभयपदार्थप्रधान इत्येषा दिक् । नहि शब्दानामभिधानवैचित्र्यं परिगणनार्हम् । अनर्थकं च तत्परिगणनं, लोकव्यवहाराधीनत्वादर्थावधारणस्य । अत एव सूत्रकारेण पूर्वाचार्यलक्षणनिरसनपरं सूत्रं प्रणीतं—'प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात्' (१.२.५६) 'कालोपसर्जने च तुल्यम्'(१.२.५७) इति । सङ्ग्रहकारस्तु बालव्युत्पत्त्यर्थं गुरुसंज्ञाकरणाशयं दर्शितवान् ॥ ११ ॥

एवं समासमभिधायाभिधायकोक्त्यनुक्रमानुसारेण तद्धितस्वरूपमाह —

सामान्याव्ययभावाख्यस्त्रिविधस्तद्धितो मतः ।

इति ।

---

* अत्र 'समाहारद्वन्द्वस्तु समूहप्रधानः' इति वाक्यमपेक्षितं भाति ।

अत्र सामान्यशब्देन प्रत्ययास्ते विवक्षिताः ।
येऽपत्यभाजो रक्तादावुत्पन्नाश्चातुरर्थिकाः ॥
शैषिकास्तसिना मुक्ता विकारावयवार्थजाः ।
वहत्यवधयः प्राग्घितीयक्रीतावधी अपि ॥
प्राग्वतीया वतिश्चान्त्यस्ततो नानाञ्विवर्जिताः ।
खञ्खशालच्प्रभृतयो मत्वर्थीयास्ततः परे ॥
पाशबाद्याः शसः प्राग् ये मान्तकृत्वोर्थवर्जिताः ।
समासान्ताश्च ते सर्वे सामान्यप्रत्यया मताः ॥
तसिर्नानाञ् वतिस्तेनेत्यादिसूत्रत्रयेण यः ।
तसिल्प्रभृतयो मान्तौ कृत्वोर्थाश्च शसादयः ॥
अव्ययाख्या मता भावशब्देन त्वतलादयः ।
प्रकृतिः प्रत्ययोऽर्थश्च तद्विशेषणमेव च ॥
उदाहरणमित्येतान्युन्नेयानीह पण्डितैः ।
सङ्ग्रहप्राणनाशः स्यात् तद्धितार्णवमज्जने ॥

अत्र समासतद्धितयोरुत्पत्तौ विशेषमाह —

पदानां तु समर्थानां प्रथमाद्या प्रसूयते ॥ १२ ॥

इति । अयमर्थः — समाससंज्ञा तावत् 'समर्थः पदविधिः (२.१.१) इति समर्थवचनात् समर्थयोर्द्वयोर्बहूनां वा सर्वेषां प्रवर्तते, न त्वेकस्य । तेन राज्ञः पुरुष इति विगृह्य राजपुरुषशब्दयोरुभयोरेका संज्ञा भवति । एवं पदविधित्वात् तद्धितोऽपि प्राप्तः । 'समर्थानां प्रथमाद्या'(४. १. ८२)

इत्यधिकारात् समर्थानां पदानां मध्ये प्रथमनिर्दिष्टादेवोत्पद्यते, नान्यस्मात् । तेनोपगोरपत्यमिति विगृह्य 'तस्यापत्यम् (४. १. ९२) इत्यत्र तस्येत्यस्य प्रथमनिर्दिष्टत्वादुपगुशब्दादेवाण्प्रत्ययः, नापत्यशब्दादपि । औपगव इति । वाग्रहणाद् विकल्पेनायं प्रत्ययः । तेन तद्धितेन वाक्यस्य बाधा न भवति । समर्थानामिति प्रथमादिति च स्वार्थिकप्रत्ययावधिरधिकारः, यतः सामर्थ्यस्य सम्बन्ध्यन्तरापेक्षत्वात् स्वार्थिकेषु च तदभावादुपस्थानानुपयोगः । वाग्रहणं त्वापञ्चमाध्यायपरिसमाप्तेस्तसिलादीनां विकल्पार्थमनुवर्तत एव । केषाञ्चिन्नित्यत्वं प्रकारान्तरेण ॥ १२ ॥

एवं तद्धितं संगृह्य तदनन्तरं निर्दिष्टतिङमाह —

तिङां तु नव पूर्वार्धं लादेशावपरौ द्विधा ।
परस्मैपदमाख्यातं तङानावात्मनेपदम् ॥ १३ ॥

इति । अत्र पूर्वार्धशब्देन तत्र भवाः प्रत्यया लक्ष्यन्ते । न च तदर्थत्वेऽपि तदीयलिङ्गसङ्ख्यानुरोधः, लक्षणविषये स्वलिङ्गसङ्ख्यापरित्यागात् । यथा गङ्गायां घोष इत्यत्र तीरार्थत्वेऽपि स्त्रीलिङ्गतैव । अपरशब्देन शतृकसू विवक्ष्येते । द्विधाशब्देन द्विधाभूतावुच्येते । आन इत्युत्सृष्टानुबन्धयोः शानचूकानचोः सामान्यनिर्देशः । अयमर्थः — 'तिप्तस्झि—' (३.४.७८) इत्यादिसूत्रनिर्दिष्टानामष्टादशानां प्रत्ययानां

---

१. 'च' क. पाठः.

मध्ये पौर्वार्धिका नव तिबादयो मसन्ताः प्रत्ययाः, लडादेशाः शता, लिडादेशाः क्वसुश्च लादेशत्वात् 'लः परस्मैपदम्' (१.४.९९) इति परस्मैपदसंज्ञका वेदितव्याः । परिशिष्टास्तादयो महिङन्ताः लडादेशलिडादेशौ शानच्कानचौ च तङानावात्मनेपदम्' (१.४.१००) इति परस्मैपदसंज्ञापवादात् नपदसंज्ञकाः । शानन्नादयस्तु न लडादेशा इति स्थापितं भाष्ये ॥ १३ ॥

तिङामवान्तरसंज्ञामाह —

परस्माआत्मनेभागे वचनानि त्रिधा त्रिधा ।
त्रयस्ते पुरुषा ज्ञेयाः प्रथमो ध्यमोत्तमौ ॥ १४ ॥

इति । अत्र परस्मैशब्देनात्मनेशब्देन च 'अप्रत्यये तथैवेष्ट' इत्युत्तरपदलोपविधानात् परस्मैपदा मनेपदे उच्येते, यथा देवभीमादिभिः शब्दैर्देवदत्तभीमसेनादयः । वचनशब्देनोच्यतेऽनेनार्थ इति कृत्वा प्रत्यय उच्यते । परस्मैपदभाग आत्मनेपदभागे च ये प्रत्ययास्त्रिधा त्रिधा भूता त्रयः सम्पन्नाः, ते क्रमेण प्रथमपुरुषमध्यमपुरुषोत्तमपुरुषसंज्ञका वेदितव्याः । ते 'तिप् तस् झि' इति प्रथमः, 'सिप् थस् थ' इति मध्यमः, 'मिप् वस् मस्' इत्युत्तमः । एवं 'त आतां झ' इति प्रथमः, 'थास् आथां ध्वम्' इति मध्यमः, 'इट् वहि महिङ्' इत्युत्तमः । सूत्रे त्रीणि त्रीणीत्यस्य विशेष्यप्रदर्शनेनायुक्तताशङ्काप्रतिक्षेपार्थं वचनानीत्युक्तम् । अन्यथा 'प्रत्यया ये त्रिधा त्रिधा' इत्युच्येत । एवमुत्तरत्र पदानीत्यपि तानीत्यस्य विशेष्यप्रदर्शनार्थम् ॥ १४ ॥

एकद्विबहुसंज्ञानि पदान्येकैकशस्तिङाम् ।

इति । पदशब्देन पद्यतेऽनेनार्थ इति प्रत्यय उच्यते, न तु परिभाषितं सुप्तिङन्तम् । तिङां यानि त्रीणि त्रीणि भूत्वा प्रथमादिसंज्ञायुक्तानि पदानि, तान्येकैकश एकमेकं पदं क्रमेणैकवचनद्विवचनबहुवचनसंज्ञानि भवन्ति । तिबित्येकवचनं, तसिति द्विवचनं, झीति बहुवचनम् । एवमन्यत्राप्यूह्यम् । **नन्वेकैकश** इति कथं साधुः, यावता शसैव वीप्साया द्योतितत्वाद् द्विर्वचनेन न किञ्चित् प्रयोजनम् । न च यथा क्रियासमभिहारे विधीयमानो लोट् स्वस्य तदर्थाभिव्यञ्जनासामर्थ्याद् द्विर्वचनमपेक्षते लुनीहि लुनीहीत्येवायं लुनातीति, तद्वदत्राप्यस्त्विति वाच्यम् । 'द्विशो ददाति', 'तान्येकवचनद्विवचनबहुवचनान्येकशः' (१. ४. १०२) इत्यादौ विनापि द्विर्वचनेन वीप्साभिव्यक्तिदर्शनात् । किञ्च 'येन नाप्राप्त'न्यायेन शस् द्विर्वचनं बाधते । तथा च जिनेन्द्रहरदत्ताभ्यामुक्तं — 'नित्यवीप्सयोः' (८. १. ४) इति द्विर्वचने प्राप्ते तदपवादः शस् विधीयत इति । **अत्रोच्यते** । यथा वृषशब्देनैव वृषार्थप्रतिपत्तावपि वृषभशब्दः प्रयुज्यते, तथैकश इत्यनेन वीप्साया द्योतितत्वेऽपि क्वचित् द्विर्वचनमपि प्रयुज्यते । नहि शब्दानां शक्तिवैचित्र्यं सामान्यतो दृष्टेनानुमानेन व्यवस्थापयितुमलम् । यथा स्त्रीत्वं क्वचिदेकेन प्रत्ययेन व्यज्यते । क्वचिद् द्वाभ्यां गार्ग्यायणी वात्स्यायनीति । दृषदित्यादौ प्रातिपदिकेनैव । शस्द्विर्वचनयोः सहप्रयोगोऽन्यत्रापि दृश्यते

'एकैकशः पितृसंयुक्तादि'ति। न च सामान्यविशेषभावमात्रमेव बाध्यबाधकभावनिमित्तं, किं तर्हि, विरोधोऽपीति वार्त्तिककारस्य मतम्। य आह—'श्नंबहुजकक्षु नानादेशत्वादुत्सर्गप्रतिषेध' इति, तदाश्रयेणैतत् प्रयुक्तम्। भाष्यकारस्तु—विरोधाभावेऽपि तक्रकौण्डिन्यन्यायेन बाध्यबाधकभावमिच्छति। तन्मते सूत्रकारकल्पः सङ्ग्रहकारस्तद्वच्छान्दसं प्रयोगं कृतवानिति मन्तव्यमित्यलमतिप्रसङ्गेन॥

एवं संज्ञामुपपाद्य तस्या विधिविषयत्वान्नियममुखेन तदर्थं दर्शयति—

परस्मै कर्तरि ज्ञेयः

इति। 'शेषात् कर्तरि परस्मैपदम्'(१. ३. ७८)इत्यादिना आपादपरिसमाप्तेर्यत् परस्मैपदं विहितं, तत् कर्तर्येव॥

व्यावर्त्यमाह—

न भावे नापि कर्मणि॥ ४५॥

इति। याति देवदत्तः, अनुकरोति देवदत्तः, पराकरोति देवदत्त इत्याद्युदाहरणम्॥ १५॥

आत्मने त्रिषु विज्ञेयः

इति। 'अनुदात्तङित आत्मनेपदम्'(१. ३. १२) 'कर्तरि कर्मव्यतिहारे'(१. ३. १४) इत्यादिना प्रकरणेन यदात्मनेपदं नियतं, तत् त्रिषु कारकेषु भवति॥

त्रिष्वित्युक्तं विवृणोति—

भावे कर्तरि कर्मणि ।

इति ॥

तत्र विशेषमाह —

धातोरकर्मकाद् भावे

इति । एतच्च 'लः कर्मणि च भावे चाकर्मकेभ्यः' (३.४.६९) इति वचनाल्लभ्यते । तथाहि—'भावकर्मणोः' (१. ३. १३) 'शेषात् कर्तरि परस्मैपदम्' (१. ३. ७८) इति भावकर्मकर्तृष्वात्मनेपदपरस्मैपदविधानाल्लिङ्गाच्चकारस्यैतेऽर्था अनुमीयन्ते । तत्र 'लः कर्मणि चे'ति वचनं वाक्यभेदेन लकारः कर्मणि भवति, अकर्मकेभ्यस्तु भाव इत्येवमुत्सर्गापवादरूपेण सकर्मकेभ्यो भाव आत्मनेपदाभावं साधयतीति वार्त्तिककारस्य सिद्धान्तः । य आह—'लग्रहणं सकर्मकनिवृत्त्यर्थमि'ति । तच्च कैयटमिश्रैर्व्याख्यातं—"लग्रहणमिति । यदीदं नारभ्येत, यथा भावे विधीयमाना घञादयः सकर्मकेभ्यो भवन्ति ओदनस्य पाकः, सूत्रस्य कृतिरिति, तथा भावकर्मणोरित्यनेन भाव आत्मनेपदं सकर्मकेभ्योऽपि स्यात् । ततश्च पच्यते यवागूं देवदत्तेनेत्यपि स्यादि"ति । भाष्यकारोऽपि प्रत्याख्यानवादिमुखेन भावकर्मणोरित्यत्राकर्मकपदन्यासात् सकर्मकेभ्यो भाव आत्मनेपदाभावमुपपाद्य कर्तरीति योगविभागाश्रयेण वाक्यद्वयं प्रतिपाद्य प्रथमेन वाक्येनाननियमं द्वितीयेन तद्विधिं च प्रदर्श्यारम्भवादिमुखेनानविषये विप्रतिषेधात् 'कर्तरि कृद्'(१. ४. ६७) इत्यस्य प्रवर्तनात् तस्य भावकर्मार्थत्वाभावाद् दुष्टं प्रत्याख्यानपक्षं निरस्य

सूत्रारम्भं समर्थयमानो 'लः कर्मणि चे'त्यनेनैव पूर्वोक्तार्थलाभं मन्यते ॥

प्रथमैकवचस्तथा ॥ १६ ॥

इति । भावे प्रथमपुरुषैकवचनमेव, न तु मध्यमोत्तमपुरुषौ, नापि द्विवचनबहुवचने । तत्र मध्यमोत्तमौ युष्मदस्मत्सामानाधिकरण्ये विधीयमानौ भावस्य तत्सामानाधिकरण्यासम्भवान्न भवतः । आख्यातवाच्यस्य भावस्याश्रयभेदेऽपि भेदाप्रतिभानाद् द्विवचनबहुवचने अपि न भवतः । पाकौ पाका इत्यादौ तु शब्दैक्यादेकशेषतस्तत्सिद्धिः । तथा चोक्तं —

"निवृत्तभेदा सर्वैव क्रियाख्यातेऽभिधीयते ।
श्रुतेरशक्या भेदानां प्रविभागप्रकल्पना ॥"

इति । भूयते देवदत्तेन, आस्यते भवद्भ्याम्, आस्यते भवद्भिरित्युदाहरणम् ॥ १६ ॥

सकर्माकर्मकाद्धातोः कर्तरि स्मृतमात्मने ।

इति । यदात्मनेपदं कर्तरि स्मृतं, तत् सकर्मकेभ्योऽकर्मकेभ्यश्च भवतीति योजना । एतेन सूत्रे चकारद्वयस्यार्थो दर्शितः । पचते, यजते, आस्ते, शेते इत्युदाहरणम् ॥

यत् कर्मणि तु निर्दिष्टं वर्तते तत् सकर्मकात् ॥ १७ ॥

इति । उक्तार्थम् । पच्यते देवदत्तेन यवागूः, गम्यते ग्राम इत्युदाहरणम् ॥ १७ ॥

नाम्नैव सन्नियोक्तव्यः प्रथमः पुरुषो भवेत् ।

इति । नामापरपर्यायैः सुबन्तैरेव सम्बन्धे प्रथमपुरुषो भवतीत्यर्थः । आर्थः सम्बन्धः । स शब्द(स्य) सन्निधानेऽसन्निधाने च भवति । तेन पचति देवदत्तः, भवति, पचतीत्यादिप्रयोगः सर्व उपपन्नो भवति । यद्यपि नामान्तर्भूतत्वं युष्मदस्मदोरप्यस्ति, तथापि 'शेषे प्रथमः'(१. ४. १०८) इति सूत्रे शेषशब्देन यदुच्यते, तदेवेह नामशब्देन विवक्षितम् । यद्वा नामशब्देन लिङ्गयुक्तस्यार्थस्य वाचकः शब्द उच्यते । तथा च निरुक्तकृता यास्काचार्येण नामलक्षणमुक्तं 'सत्त्वप्रधानानि नामानी'ति । सीदन्त्यस्मिन् जातिगुणक्रियादय इति सत्त्वशब्देन जात्याद्याधारभूतं लिङ्गसंख्याकर्मादिकारकशक्तियुक्तमिदंतदादिव्यपदेशयोग्यं वस्त्वभिधीयते । तद् यस्मिन्नुच्चारिते प्राधान्येन प्रतीयते विशेष्यत्वात्, जात्यादयस्तु गुणभावेन, तन्नामेति तस्यार्थः । 'अलिङ्गे च युष्मदस्मदी', ताभ्यां लिङ्गविशेषासम्प्रत्ययादित्येवकारेण युष्मदस्मदोर्व्यवच्छेदः ॥

त्वं युवां यूयमित्येभिस्त्रिभिरेव तु मध्यमः ॥ १८॥
अहमावां वयं त्वेभिरुत्तमः

इति। युष्मदि समानाधिकरणे अस्मदि समानाधिकरणे इत्युच्यते । सामानाधिकरण्यं च समानाभिधेयत्वम् । तच्च कारकत्व एव भवति। ततश्च कर्तरि कर्मणि तिङ्विधाने तेनाभिहितत्वाद् युष्मदस्मद्भ्यां तयोः कर्तृकर्मणोः प्रथमयैव भवितव्य-

मिति त्वमादियोग एव मध्यमोत्तमौ भवतः, न तु त्वामादियोग इत्याशयः । अत्रापि पूर्ववदार्थसम्बन्धाश्रयणात् 'स्थानिन्यपी'ति सूत्रावयवप्रतिपादितार्थलाभः । त्वं पचसि, युवां पचथः, यूयं पचथ, अहं पचामि, आवां पचावः, वयं पचाम इत्युदाहरणम् ॥

व्यावर्त्यमाह —

नान्यथा मतः ।

इति ॥

क्वचित्तु मध्यमोत्तमयोः प्राप्तयोः उत्तममध्यमौ भवत इत्याह—

अन्यथा तु प्रहासे स्यात्

इति । प्रहासः परिहासः, तस्मिन् गम्यमाने त्वमादियोगे उत्तमो भवति अहमादियोगे मध्यम इत्यर्थः ॥

प्रहासविषयेऽपि क्वचिदेव, न सर्वत्रेति प्रदर्शयितुमुदाहरणमाह—

यथा मन्ये नु भोक्ष्यसे ॥ १९ ॥

इति । मन्योपपदे धातौ मध्यमो विधीयते, मन्यतेश्चोत्तमः, तस्य चैकवद्भावः । एहि मन्ये ओदनं भोक्ष्यसे । न च भोक्ष्यसे, भुक्तः सोऽतिथिभिः । एहि मन्ये रथेन यास्यसि । न च यास्यसि, यातस्तेन पिता इत्युदाहरणम् ।

लङ्लिङ्लुटो लृट् च ततश्च लेट् लोट्
षट् टित्त्वयुक्ताः कथिता लकाराः ।

लङ्लिङ्लुङो लृङ् च ङितो लकारा-
श्चत्वार एवं दशधा लकाराः ॥
तत्राद्यो वर्तमानेऽर्थे क्वचिद् भूतभविष्यतोः ।
भूतोऽनद्यतनो योऽर्थः परोक्षः स द्वितीयगः ॥
तृतीयश्चानद्यतने भविष्यत्यर्थ ईरितः ।
भविष्यति तुरीयः स्यात् क्वचिदर्थान्तरेऽपि च ॥
लिङर्थे पञ्चमं विद्याच्छन्दस्येव स ईर्यते ।
विध्यादिष्विष्यते षष्ठः क्वचिदन्यत्र दृश्यते ॥
भूतानद्यतनेऽर्थे स्यात् सप्तमोऽन्यत्र च क्वचित् ।
विध्यादिष्वष्टमोऽन्यत्र क्वचित् सम्भावनादिके ॥
नवमो भूतमात्रे स्यात् तथान्यत्रेष्यते क्वचित् ।
क्रियातिपत्तौ दशमो भूते चापि भविष्यति ॥
सार्वधातुकसंज्ञस्तिङ् लिट आशीर्लिङस्तु यः ।
तमार्धधातुकं विद्याच्छन्दस्युभयथा भवेत् ॥
शबादयः कर्तरि स्युः परतः सार्वधातुके ।
भावे कर्मणि यक् तस्मिन् स्यतासी लृङ्लृटोर्लटि ॥
सिप् स्मृतो बहुलं लेटि लुङि स्युः सिजङादयः ।
एते विकरणाः प्रोक्तास्तत्र शित सार्वधातुकम् ॥

एवं तिङां दिङ्मात्रं प्रदर्श्य तदनन्तरोक्तं कृतमाह —

कृतस्त्रिष्वपि वर्तन्ते भावे कर्तरि कर्मणि ।

इति । कृतस्त्रिषु भावकर्मकर्तृषु वर्तन्ते । अन्येषु करणा-

दिष्वपीत्यपिशब्दस्यार्थः । तत्र सङ्ग्रहार्थत्वादस्य ग्रन्थस्य प्रसिद्धतरान् भावादिषु वर्तमानानेवोत्तरत्रोदाहरिष्यामः । अन्ये तु वृत्त्यादिग्रन्थदर्शनवशादूह्या इति भावः ॥

तत्र प्रथमं भावे प्रत्ययान् दर्शयति—

अजब्ल्युट्क्तिन्घञो भावे युजकाराङ एव च ॥ २० ॥

इति । एते प्रत्ययाः कर्तृवर्जिते कारके संज्ञायां भवन्ति । क्वचिदसंज्ञायामपि । तत्र भावे बाहुल्याद् भाव इत्युक्तं मल्लग्रामन्यायेन । तथाहि—प्रासः प्रसेवः । 'अकर्तरि च कारके संज्ञायाम्' (३. ३. १९) इति कर्मणि घञ् । प्रास्यति तमिति कुन्त उच्यते । गोदायः कम्बलदायः । संप्रदाने घञ् । यस्मै गां ददाति, स उच्यते । मधुराहारः तक्षशिलाहारः । अपादाने घञ् । आहरत्यस्मादित्याहारः । मधुराया आहारः मधुराहारः । यस्मादाहृत्य मधुरां प्रति द्रव्याणि नीयन्ते, स देशविशेष उच्यते । विशेषणसमासो वा । संज्ञायामुदाहृतम् । असंज्ञायामपि दृश्यन्ते । को भवता दायः, दत्त इत्यर्थः । को भवता लाभः, लब्ध इत्यर्थः । नहि कस्यचित् संज्ञा । अत्र केन घञ्, अनेनैव । संज्ञाग्रहणं हि प्रत्याख्यातं 'संज्ञाग्रहणानर्थक्यं च सर्वत्र घञो दर्शनादि'-ति । वृत्तिकारेण तु—चकारस्य भिन्नक्रमत्वात् संज्ञायां च भवति क्वचिदसंज्ञायां चेति व्याख्यातमिति तन्मतेऽप्यसंज्ञायां घञ् भवति । करणाधिकरणयोस्त्वपवादत्वात् 'करणाधिकरणयोश्च' (३. ३. ११७) इति ल्युडेव भवति, न तु घञ् । इध्मवश्चनः पलाशशातन इति करणे । गोदोहनी सक्तुधानी इत्यधिकरणे ।

अच् तावत्, चयः जयः क्षयः । 'एरच्' (३. ३. ५६)इत्यच् । भयं वर्षम् । 'नपुंसके भयादीनामुपसङ्ख्यानम्'(वा०.३.३.५६)इत्यच् । नपुंसके क्तादिनिवृत्त्यर्थमेतत् । अप्, 'ऋदोरप्'(३.३.५७)इत्याद्येकत्रिंशत्सूत्रीविहितो द्रष्टव्यः । करः गरः यवः लवः ग्रहः वरः दरः इत्याद्युदाहरणम् । ल्युट्, हसनं छात्रस्य शोभनं यजनं जल्पनम् । 'ल्युट् च'(३. ३. ११५) इति ल्युट् । क्तिन्, 'स्त्रियां क्तिन्' (३. ३. ९४) इत्यादिसूत्रविहितो द्रष्टव्यः । कृतिः धृतिः, प्रस्थितिः सङ्गीतिः, वृष्टिः इष्टिः । घञ् 'भावे' (३. ३. १८) इत्यारभ्य 'कर्मव्यतीहारे णच्–' (३. ३. ४३) इत्यतः प्राग् विहितो द्रष्टव्यः । त्यागः रागः, एकस्तण्डुलनिचायः द्वौ शूर्पनिष्पावावित्यादीन्युदाहरणानि । अत्र घञुत्सर्गः । पूर्वोक्तास्तस्यापवादाः । युच्, कारणा हारणा आ(सना) श्रन्थना । 'ण्यासश्रन्थो युच्'(३.३.१०७) इति युच् । अकारः, चिकीर्षा जिहीर्षा । 'अ प्रत्ययात्'(३. ३. १०२)इत्यकारः । कुण्डा हुण्डा ईहा । 'गुरोश्च हलः'(३. ३. १०३) इत्यः । अङ्, जरा त्रपा भिदा छिदा । 'षिद्भिदादिभ्योऽङ्' (३. ३. १०४) इत्यङ् । चिन्ता पूजा कथा कुम्बा चर्चा । चिन्तिपूजिकथिकुम्बिचर्चश्च'(३. ३. १०५)इत्यङ् । प्रदा उपदा प्रधा उपधा । 'आतश्चोपसर्गे' (३. ३. १०६) इत्यङ् । अत्राकाराङौ क्तिनोऽपवादौ । युच् त्वक्तिनोरपवादः ।

णजिनुण्क्यबनिण्वुल्शा इञ्ण्वुचौ च सयादयः ।
तुमुन्क्त्व्यथुञ्नङो ननकी चकारेण समुच्चिताः ॥

॥ २० ॥

सकर्माकर्मकाद्धातोः क्तो भवेत् कर्मभावयोः ।

इति । यथासङ्ख्यमत्र सम्बन्धः । सकर्मकेभ्यः कर्मणि, अकर्मकेभ्यस्तु भाव इति । 'तयोरेव कृत्यक्तखलर्थाः' (३. ४. ७०) इत्यत्र 'भावे चाकर्मकेभ्य' इत्यनुवर्तनात् । हरदत्तेन तु 'वयं तु ब्रूम' इत्यादिना एवकारस्यायमर्थः कृच्छ्रेण साधितः । भुक्त ओदनो देवदत्तेन, आसितं भवता, शयितम् । अत्र 'नपुंसके भावे क्तः' (३. ३. ११४)इत्येतत्सङ्ग्रहार्थो वाक्यभेदोऽनुषङ्गश्च द्रष्टव्यः । सकर्म(क?)ाकर्मकाद्धातोः क्तो भवेदित्येकं वाक्यम् । अत्र भाव इत्यनुषज्यते । हसितं छात्रस्य, शोभनं शयितमिति । ततः कर्मभावयोरिति । इह सकर्म(क?)ाकर्मकादित्याद्यनुषङ्गः । यद्वा 'नपुंसके भावे क्त' इत्ययमपि (स?) क्तः सकर्मकेभ्यो न भवति । 'तयोरे'वेत्यत्र क्तमात्रस्य ग्रहणात्, तत्र च भावे चाकर्मकेभ्य इत्यनुवर्तनात् । अत्र च टीकाकृत् प्रमाणम् । तथा च 'णेरध्ययने वृत्तम्'(७. २. २६) इत्यत्र पूर्वोक्तमर्थमधिकृत्य तेनोक्तम्— "अवश्यं चैतद् बोद्धव्यम् । अन्यथा 'नपुंसके भाव उपसङ्ख्यानमि'त्यस्मिन् 'शेषविज्ञानात् सिद्धमि'ति प्रत्याख्याते सकर्मकाद् भावे क्ते विधीयमाने कर्मणो द्वितीया प्रसज्ज्येत, ग्रामं गतम् ओदनं भुक्तमिती"ति ॥

कृत्याश्चैव खलर्थाश्च तयोरेवानुवर्णिताः ॥ २१ ॥

इति । अत्र सकर्म(क?)ाकर्मकाद्धातोरित्यनुवर्तते । पूर्ववद्यथासङ्ख्यं सम्बन्धः । कृत्या इति 'तव्यत्तव्यानीयरः' (३.१.९६) इत्यारभ्य 'ण्वुल्तृचौ' (३.१.१३३) इत्यस्मात् प्राग् ये प्रत्यया उच्यन्ते । पक्तव्य ओदनो भवता, भोक्तव्य ओदनः, आसितव्यं

भवता, शयितव्यं करणीयं हरणीयम् इति । चेयं जेयम् । 'अचो यत्' (३. १. ९७)इति यत् । कार्यं हार्यम् । 'ऋहलोर्ण्यत्' (३. १. १२४) इति ण्यत् । एवमन्येषामप्युदाहरणानि द्रष्टव्यानि । अत्र 'वासरूपोऽस्त्रियाम्'(३.१. ९४)इति वचनादुत्सर्गापवादयोः समावेशो भवति । तेन जेतव्यमित्याद्यपि भवति । खलर्थशब्देन खलो युचश्च ग्रहणम् । प्रयोगबहुत्वापेक्षं खलर्था इति बहुवचनं, लक्षणबहुत्वेन वा । ईषत्करः दुष्करः सुकरः । 'ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल्' (३. १२६) इति खल् । ईषदाढ्यंभवं भवता, दुराढ्यंभवं, स्वाढ्यंभ . ३। ईषदाढ्यंकरो देवदत्तो भवता, दुराढ्यंकरः, स्वाढ्यङ्करः । 'कर्तृकर्मणोश्च भूकृञोः'(३. ३. १२७)इति खल् । ईषत्पानः सोमो भवता, दुष्पानः, सुपानः । 'आतो युच्' (३.३.१२८) इति युच् । सूपसदनोऽग्निः, सूपसदनमन्तरिक्षम् । 'छन्दसि गत्यर्थेभ्यः' (३.३.१२९) इति युच् । सुवेदनामकृणोर्ब्रह्मणे गाम् । 'अन्येभ्योऽपि दृश्यते'(३. ३. १३०) इति युच् ॥ २१ ॥

त्रिषु गत्यर्थकादिभ्यः

इति । त्रिषु प्रकृतेषु भावकर्मकर्तृषु गत्यर्थादिभ्यो धातुभ्यः क्तो भवति । गतो देवदत्तो ग्राममिति कर्तरि । ग्रामो देवदत्तेन गत इति कर्मणि । गतं देवदत्तेनेति भावे । आदिशब्देन श्लिषादीनामुपादानम् । उपश्लिष्टो गुरुं भवान् । उपश्लिष्टो गुरुर्भवता । उपश्लिष्टं भवता । अतिशयितो गुरुं भवान् । अतिशयितो गुरुर्भवता* । उपस्थितो गुरुं भवान् । उपस्थितो गुरुर्भवता । उपासितो गुरुं भवान् । उपासितो गुरुर्भवता । अनूषितो गुरुं भवान् । अनूषितो

* 'अतिशयितं भवता' इत्यूह्यम् । एवमुत्तरत्रापि ।

गुरुर्भवता । अनुजातो माणवको माणविकाम् । अनुजाता माणवकेन माणविका । आरूढो वृक्षं भवान् । आरूढो वृक्षो भवता । अनुजीर्णो वृषलीं देवदत्तः । अनुजीर्णा वृषली देवदत्तेन । केवलानां श्लिषादीनामकर्मकत्वादकर्मकग्रहणेन सिद्धत्वात् सकर्मकार्थं सर्वत्रोपसर्गप्रयोगः । तथा च भाष्यम्—'अकर्मका अपि हि धातवः सोपसर्गाः सकर्मका भवन्ति' इति ॥

[1]तथा चैवादिकर्माणि ।

इति । कर्मशब्दः क्रियावचनः, न साधनवचनः, आदिशब्देन विशेषणात् । बहूनां समवाये आदिव्यपदेशात् । साधनकर्म(ण)स्त्वेकत्वाद् विशेषणानुपयोगात् । आद्येषु क्रियाक्षणेषु भूतत्वेन विवक्षितेषु यः क्तः, सोऽपि त्रिषु भवतीत्यर्थः । प्रकृतः कटं देवदत्तः । प्रारब्धवानित्यर्थः । प्रकृतः कटो देवदत्तेन । प्रकृतं देवदत्तेन । ननु च केषुचित् क्रियाक्षणेष्वतीतेष्वप्यभिमतफलप्रयोजकसकलक्रियानिष्पत्त्यभावाद् वर्तमानत्वमेव क्रियायाः, न तु भूतत्वमिति कथं भूताधिकारविहितप्रत्ययोपपत्तिः । उच्यते । कस्मिंश्चिदेवावयवे समूहरूपस्य समाप्तिः शब्देन गम्यते । तथाहि — कश्चित् पाटलिपुत्रं जिगमिषुरेकमहर्गत्वाह 'इदमद्य गतमि'ति । तत्र या लोकप्रसिद्धा गमनक्रिया, तस्याः परिसमाप्तिं बुद्ध्यावधार्य प्रतिपादकः प्रतिपादयति । प्रतिपत्तापि तथैव प्रतिपद्यते । ततश्चावयवभूतत्वे क्रियाभूतत्वोपपत्त्या भूतप्रत्ययोपपत्तिः । उक्तञ्च—

---

१. 'तयोरेवा' क. पाठः.

"समूहः स तथाभूतः प्रतिभेदं समूहिषु ।
समाप्यते ततो भेदे कालभेदस्य सम्भवः ॥"

इति । न च प्रारम्भकाले कट(त्व?)ाभावात् कथं प्रकृतकटशब्दयोः सामानाधिकरण्यमिति वाच्यम् । तादर्थ्यात् कारणे कार्यशब्दस्य प्रवर्तनात् ॥

गत्यर्थसूत्रेऽकर्मकपदश्रवणात् तत्र च भावकर्मकर्तृग्रहणानुवर्तनाच्चाकर्मकेभ्योऽपि त्रिषु भवतीति कस्यचिद् भ्रान्तिः स्यात् । तन्निराकरणायाह—

अकर्मकात् समुत्पन्नो वर्तते कर्तृभावयोः ॥ २२ ॥

इति । न तु कर्मणि, असम्भवात् । तेनान्यार्थैव कर्मग्रहणानुवृत्तिः । ग्लानो भवान् ग्लानं भवतेत्युदाहरणम् ॥ २२ ॥

कर्तृप्रत्ययानाह —

इष्णुच्क्तवतुविच्तृन्किप्क्मरच्पाकन्ल्युणिन्यचः ।
उरण्णुकञ्कञ्टक्टकाः सर्व एते च कर्तरि ॥ २३ ॥

इति । इष्णुच्, अलङ्करिष्णुः निराकरिष्णुः प्रजनिष्णुः उत्पचिष्णुः उत्पतिष्णुः उन्मदिष्णुः रोचिष्णुः अपत्रपिष्णुः वर्तिष्णुः वर्धिष्णुः सहिष्णुः चरिष्णुः । 'अलङ्कृञ्–'(३. २. १३६) इत्यादिनेष्णुच् । इषदं धारयिष्णुः, वीरुधः पारयिष्णवः । 'णेश्छन्दसि'(३. २. १३७)इतीष्णुच् । भविष्णुः, 'भ्राजिष्णुना लोहितचन्दनेन' । 'भुवश्च'(३. २. १३८)इतीष्णुच् । क्तवतुः, भुक्तवान् पक्कवान् । 'निष्ठा'(३. २. १०२)इति भूते क्तवतुः । विच्, 'उपय-

ड्भीरूर्ध्वं वहन्ति तदुपयज उपयट्त्वम्'। 'विजुपे छन्दसि'(३. २. ७३)इति विच्। कीलालपाः शुभंयाः। 'आतो मनिन्क्वनिब्वनिपश्च'(३. २. ७४) इति विच्। 'रेडसि पर्णं नयेत्'। 'अन्येभ्योऽपि दृश्यन्ते' (३. २. ७५) इति विच्। तृन्, कर्ता कटान् वदिता जनापवादान्। तच्छीले 'तृन्'(३. २. १३५)इति तृन्। मुण्डयितारः श्राविष्ठायना भवन्ति वधूमूढाम्, अन्नमपहर्तार आहरका भवन्ति श्राद्धे सिद्धे, उन्नेतारस्तौल्वलायना भवन्ति पुत्रे जाते। अत्र तद्धर्माणि। कर्ता(पि?) कटं, गन्ता *खेलमिति तत्साधुकारिणि। क्विप्, उखायाः स्रंसत इत्युखास्रत्, पर्णानि ध्वंसत इति पर्णध्वत्। 'क्विप् च' (३. २. ७६) इति सोपपदेभ्यः सर्वधातुभ्यः सामान्येन विहितः क्विप्। शंस्थाः। 'स्थः क च' (३. २. ७७) इति क्विप्। एतद् बाधकशम्यञ्बाधनार्थम्। ब्रह्महा भ्रूणहा वृत्रहा। 'ब्रह्मभ्रूणवृत्रेषु क्विप्' (३. २. ८७) इति क्विप्। नियमार्थमेतद् वचनम्। तत्र धातुः कालश्च नियम्यत इति भाष्यकृन्मतम्। तदेवादरणीयम्। केचित्तु चातुर्विध्यं नियमस्याहुः। मातृहा पितृहा सप्तमं नरकं प्रविशेत्। 'बहुलं छन्दसि' (३. २. ८८) इति पूर्वेण नियमादप्राप्तः क्विब् विधीयते। एवमुत्तरसूत्राणां नियमार्थानामुदाहरणान्युन्नेयानि। विभ्राट्, भाः। 'भ्राजभास–'(३. २. १७७)इत्यादिना क्विप्। भित्, छित्। 'अन्येभ्योऽपि दृश्यते' (३. २. १७८) इति क्विप्। अनुपपदार्थमेतत्। 'क्विप् चे'त्यत्र हि सुप्युपसर्गेऽपीति च वर्तते। तथा चाह —'क्विब्विधि-

---

* 'खेटम्' इति काशिका।

रनुपपदार्थ' इति । विभूरिति कश्चित्, प्रतिभूः साक्षी । 'भुवः संज्ञान्तरयोः' (३. २. १७९) इति क्विप् । शुचिषत् अन्तरिक्ष सत्, अण्डसूः प्रसूः, मित्रद्विट् प्रद्विट् । 'सत्सूद्विष–'(३.२.६१) इत्यादिना क्विप् । प्रपञ्चार्थमेतत् । क्मरच्, प्रसृमरः घस्मरः अद्मरः । 'सृघस्यदः क्मरच्' (३. २. १६०) इति क्मरच् । षाकन्, जल्पाकः भिक्षाकः कुट्टाकः लुण्टाकः वराकः वराकी । 'जल्पभिक्षकुट्टलुण्टवृङः षाकन्' (३. २. १५५) इति षाकन्प्रत्ययः । ल्युः, नन्दनः रमणः । नन्द्यादिभ्यो ल्युरिति ल्युः । णिनिः, ग्राही उत्साही । ग्रहादिभ्यो णिनिरिति णिनिः । अच्, ओदनस्य पचः । पचादिभ्योऽजित्यच् । अत्र केचित् —साहचर्यं व्यवस्थाहेतुरिति न्यायाद् नन्द्यादिसूत्रविहितणिन्यचावेवोदाहरन्ति । यथा रामलक्ष्मणावित्युक्ते दाशरथी रामः प्रतीयते, न तु जामदग्न्यः । अन्ये तु व्याप्तिन्यायाश्रयेण 'कुमारशीर्षयोर्णिनिः' (३. २. ५१) 'सुप्यजातौ णिनिस्ताच्छील्ये' (३. २. ७८) इत्यादिसूत्रविहितं णिनिं, 'हरतेरनुद्यमनेऽच्'(३.२.९) इत्यादिसूत्र(वि?)शिष्टमचं चोदाहरन्ति । कुमारघाती शीर्षघाती, उष्णभोजी शीतभोजी, उष्ट्रक्रोशी ध्वाङ्क्षरावी, स्थण्डिलशायी अश्राद्धभोजी, कषायपायिणो गान्धाराः, दर्शनीयमानी, अंशहरः रिक्थहरः, कवचहरः क्षत्रियकुमारः, पुष्पाहरः फलाहरः, पूजार्हो ब्राह्मणी, स्तम्बेरमो हस्ती कर्णेजपः सूचकः, शम्भवः शंवद इत्याद्युदाहरणानि । उः, चिकीर्षुः जिहीर्षुः आशंसुः भिक्षुः । 'सनाशंसभिक्ष उः'(३.२. १६८) इत्युः । 'विन्दुरिच्छुः' (३. २. १६९) । मित्रयुः । 'क्याच्छन्दसि'(३. २. १७०) इत्युः । अण्, कुम्भकारः नग-

रकारः काण्डलावः वेदाध्यायः । 'कर्मण्यण्' (३. २. १) इत्यण् । क्षेमकारः । 'क्षेमप्रियमद्रेऽण् च' (३. २. ४४) इत्यण् । उकञ्, अपलाषुकं वृषलसङ्गतं, प्रपातुका गर्भा भवन्ति, कामुका एनं स्त्रियो भवन्ति । 'लषपतपद'(३.२.१५४)इत्यादिना उकञ् । 'कर्तृकर्मणोः कृति'(२·३.६५)इति षष्ठ्याः 'न लोक—' (२. ३. ६९)इति प्रतिषेधः । कञ्, तादृशः यादृशः । 'त्यदादिषु दृशोऽनालोचने कञ्च' (३. २. ६०) इति कञ् । 'आ सर्वनाम्नः' (६. ३. ९१) इत्याकारः । टक्, वक्रगः सामगः सुरापः क्षीरपः । 'गापोष्टक्' (३. २. ८) इति टक् । एवमुत्तरसूत्रोदाहरणानि द्रष्टव्यानि । टः, कुरुचरः मद्रचरः । 'चरेष्टः' (३. २. १६) इति टः । भिक्षाचरः सेनाचरः आदायचरः । 'भिक्षासेनादायेषु च'(३.२.१७) इति टः । पूर्वसूत्रेऽधिकरण इति वर्तते । अनधिकरणार्थोऽयमारम्भः । कः, विक्षिपः विलिखः ज्ञः प्रियः किरः । 'इगुपधज्ञाप्रीकिरः कः' (३. १. १३५) इति कः । गृहं वेश्म, गृहा दाराः । 'गेहे कः' (३.१.१४४) इति कः । गोदः कम्बलदः पार्ष्णित्रम् अङ्गुलित्रम् । 'आतोऽनुपसर्गे कः' (३. २. ३) इति कः । एवमुत्तरत्रोदाहरणान्यूह्यानि ।

ण्वुल्तृच्छणाः ष्वुन्थकनौ ण्युड्वुनिन्खरश्खचस्तथा ।
डः ख्युन् खिष्णुच् खुकञ् किंश्च ण्विञ्युड्विट्कब्ण्विनस्ततः ॥

मानिन्कनिब्वनिबिनिड्वनिपोऽतृन्कसू पुनः ।
कानच् शानंश्चं चानश्च क्वसुक्नुवुञ्घिनुणश्च युच् ॥

आलुञ्घुरचो रश्च कुरच्च किकिनौ नजिङ् ।
करबारू कुक्कुकनौ कुकन्डुट्रून्व(र)ग्घञः ॥

इत्रश्चोणादयश्चैव चकारेण समुच्चिताः ।
अनुक्तानां हि सिद्ध्यर्थं चकार इह पठ्यते ॥

॥ २३ ॥

भावे स्वोत्तरकाला ल्यम्णमुल्क्त्वाः पूर्वकालजाः ।

इति पाठः । तुमुन् क्त्वा पूर्वकालजा इति पाठस्त्वयुक्तः । तथाहि—क्रियार्थायां क्रियायामुपपदे विधीयमानस्य तुमुनः स्वोत्तरकालजत्वपूर्वकालजत्वे न सम्भवतः, प्रत्युत उत्तरकालजत्वमेव । शकधृषादिसूत्रविहितस्याप्युभयासम्भवः । एवं 'समानकर्तृकेषु तुमुन्' (३. ३. १५८) इति । नापि 'कालसमय—' (३. ३. १६७) इत्यादिविहितस्यात्र ग्रहणार्हता । अत्रोत्तरकालशब्देन तत्रभवो धात्वर्थो लक्ष्यते, पूर्वकालशब्देन पूर्वकालक्रियावचनधातुलक्षणा प्रकृतिः । एवं ह्युच्यमाने सूत्रार्थविमर्शनवशादेककर्तृकत्वं लक्षणाङ्गत्वेनानुक्तसिद्धमिति भावः । तेनैतदुक्तं भवति—द्वयोर्बहूनां वा धात्वर्थानां यदैकः कर्ता भवति शक्तिभेदेऽपि शक्तिशक्तिमतोर्भेदाविवक्षया कर्तृशक्तिमद्देवदत्तादेरेकत्वाश्रयेण, तदा विशेष्यभूताख्यातवाच्यप्रधानक्रियापेक्षयान्ये भूताः परस्परान्वयानर्हाः पूर्वकालवृत्तय इति तेभ्यः सर्वेभ्यः क्त्वादयः प्रत्यया (न?) भवन्ति भावे । न च 'कर्तरि कृत्' (३.४.६७)इति वचनात् कर्तरि भाव्यामिति वाच्यम् । तुमर्थाधिकारात् । तुमुनपि कथं कर्तरि न भवतीति चेत् । उच्यते । 'तुमर्थे सेसेनसेऽसेन्—'(३.४.९)इत्यत्र तुमर्थग्रहणं सयादिप्रापणार्थत्वेऽनर्थकं, सामान्यविधिनैव सिद्धत्वात् । अतस्तुमर्थेग्रहणसामर्थ्यात् तुमुन् कर्तरि न भवतीत्यनुमीयते । न चान्योऽर्थो निर्दिश्यते । अतः

'अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ती'ति न्यायात् स्वार्थे धातुलक्षणप्रकृत्यर्थे भावे तुमुन्विधिः। तेन तदर्थवृत्तयः प्रत्यया भावे भवन्ति। अत एव प्रकृत्यर्थस्य साध्यरूपत्वात् तत्रैवैषां विधानाल्लिङ्गसङ्ख्यासम्बन्धायोगः। घञादयस्तु प्रकृत्यर्थव्यतिरिक्ते भावशब्दवाच्येऽर्थे विधानात् तद्वाजः। णमुल् तु प्रकृत्यर्थस्याभीक्ष्ण्यविशिष्टत्वमप्यभिकाङ्क्षति। ल्यब्ग्रहणं विस्पष्टार्थं, क्त्वाग्रहणेनैव सिद्धत्वात्। ल्यप्, प्रकृत्य कटं गतः, प्रहृत्य। 'समानकर्तृकयोः पूर्वकाले' (३. ४. २१) इति क्त्वा। 'समासेऽनञ्पूर्वे क्त्वो ल्यप्' (७. १. ३७) इति ल्यप्। 'ह्रस्वस्य पिति कृति तुक्' (६. १. ७१) इति तुक्। णमुल्, पायं पायं व्रजति, भोजं भोजं व्रजति। पुनः पुनः पीत्वा व्रजतीत्यर्थः। 'आभीक्ष्ण्ये णमुल् च' (३. ४. २२) इति णमुल्। 'आतो युक् चिण्कृतोः' (७. ३. ३३) इति युक्। क्त्वा, स्नात्वा भुङ्क्ते, स्नात्वा भुक्त्वा पीत्वा व्रजतीति। व्यादाय स्वपितीत्यादौ तु स्वप्नादिक्रियाक्षणानां व्यादानादेः पूर्वापरकालभावित्वात् समूहिषु च प्रत्येकं समूहस्य समाप्तत्वादपरकालभाविस्वापाद्यपेक्षया व्यादानादेः पूर्वकालत्वस्यापि भावात् क्त्वादिसिद्धिः। न च विपरीतप्रयोग आशङ्कनीयः। व्यादानोत्तरकालस्वप्नक्रियाप्रतिपादनाय शब्दप्रयोगात्। यदा तु स्वप्नोत्तरकालं व्यादानं प्रतिपाद्यं, तदा सुप्त्वा व्याददातीति भवत्येव। प्राभाकरैस्तु — पूर्वं प्रयुज्यमानाद्धातोरिति व्याख्यातम्। अनुष्ठानविषयं पौर्वकाल्यं नाद्दतम्। तेषां व्याकरणाधिकरणे वार्तिककारमुखानां सर्वेषां प्रामाण्यमभिधायान्यत्रार्थान्तरवर्णनेन तदभिप्रेतार्थान्यथाकर-

णात् तेषामेवाप्रामाण्यमङ्गीकुर्वतां वचनं पूर्वमपरेण व्याहन्यत इत्युपेक्ष्यं तत्। उक्तं ह्यस्मदाचार्यैः — "व्यादाय स्वपिति संमील्य हसतीत्युपसङ्ख्यानमपूर्वकालत्वादि"त्यादि ॥

कर्मणि प्रथमा तेषां

इति । तेषां ल्यबाद्यन्ताभिधेयानां कर्मणि कारके प्रथमा भवति । कदा, यदानुप्रयोगलकारेण कर्मणोऽभिधानम् । पक्त्वौदनो भुज्यते देवदत्तेनेति ॥

द्वितीया तु विशिष्यते ॥ २४ ॥

इति । न केवलं प्रथमैव, किन्तु द्वितीयापि लकारेणानभिहिते कर्मणि शास्त्रेणानुशिष्यत इत्यर्थः । पक्त्वौदनं भुङ्क्ते देवदत्त इति । एतन्न्यायाश्रयेण कर्तरि प्रथमातृतीये अनुक्तसिद्धे इत्यभिप्रायः । ननु लकारेण स्वप्रकृतिवाच्यक्रियासाधिन्योः कर्तृकर्मशक्त्योरभिधानेऽपि क्त्वाप्रत्ययेन स्वप्रकृत्यर्थकर्तृकर्मणोरनभिधानात् तत्र तृतीयाद्वितीये स्यातां, न तु प्रथमा। उच्यते ।

आख्यातादिपदार्थस्य विशेष्यत्वात् प्रधानता ।
इतरस्याप्रधानत्वं साधिन्यौ च तदर्थयोः ॥
शक्ती गुणप्रधानत्वं तद्वारानुभविष्यतः ।
तत्र प्रधानभूतस्य व्रजेच्छक्तिर्यदा भिदाम् ॥
तदा गुणक्रियाशक्तिस्तद्वदेव प्रकाशते ।
प्रधानं ह्यनुरुन्धन्ति गुणास्तन्मुखदृष्टयः ॥

॥ २४ ॥

वर्तमाने तु निर्देशे वर्तेते शतृशानचौ ।

इति । निर्देशशब्दः कर्मव्युत्पत्त्याभिधेयवचनः । वर्तमाने प्रारब्धापरिसमाप्तैकफलावच्छिन्नक्रियाक्षणसन्तानलक्षणेऽर्थे वर्तमानाद्धातोः परस्य लटः स्थाने शतृशानचौ वर्तेते भवत इत्यर्थः । पचन् पचमान इति । अनयोर्विधायकं योगं विभज्य प्रथमासमानाधिकरणे विकल्पोऽप्रथमासमानाधिकरणे नित्यत्वं च भाष्ये स्थापितम् ॥

द्रव्यसंज्ञापनात् ताभ्यां समासो न तु सिध्यति ॥ २५ ॥

इति । द्रव्यस्यौदनादेः संज्ञापनात् सम्प्रत्यायनादर्थाद् ब्राह्मणस्य पचन्नित्यादिभिः, ताभ्यां शतृशानजन्ताभ्यां सह षष्ठीसमासो न सिध्यति, सापेक्षत्वादसामर्थ्यात् । तेन यत्र सामर्थ्यं चोरस्य द्विषन्नित्यादौ, तत् पूरणसूत्रस्थसत्पदप्रयोजनमिति दर्शितं भवति । तथाचोक्तम् — 'इदं तर्हि प्रयोजनं चोरस्य द्विषन् वृषलस्य द्विषन्नि'ति ॥ २५ ॥

ग्रन्थगौरवभीत्याहं श्लोकानां पञ्चविंशतेः ।
पदार्थभारं निर्वोढुं प्रभवेयं भवे भवे ॥ २६ ॥

इति । ग्रन्थगौरवभयात् संक्षिप्तैः पञ्चविंशतिसङ्ख्यायुक्तैरेतैः श्लोकैः पदपदार्थलक्षणभारं निर्वोढुं प्रभवेयं समर्थः स्यामहं भवे भवे जन्मनि जन्मनि । यदा यदा जन्म, तदा तदेत्यर्थः । पदपदार्थभारनिर्वहणसामर्थ्यं नाम पदपदार्थावगममूलवाक्यवाक्यार्थावधारणलब्धश्रुतिस्मृतिविहितनित्यनैमित्तिक-

काम्यकर्मानुष्ठानजन्यादृष्टपरिपाकासादितप्रत्यवायपरिहारस्वर्गादि-फलावाप्तिकारकता। यद्वा पदशब्देन पद्यतेऽनेनार्थ इति वाक्य-मुच्यते, अस्मन्मते वाक्यस्यैव वाचकत्वात्। तच्च महावाक्यं, यद्विवर्तोऽयं प्रपञ्चः। तदेवार्थो वस्तु। तद्धारनिर्वहणं नाम व्याकरणसंस्कारपूर्वकयोगशोधितान्तःकरणस्य निवृत्तवर्णपदा-वान्तरवाक्यतदर्थभेदप्रतिभासस्याखण्डसच्चिदानन्दसान्द्रशब्द-तत्त्वसाक्षात्कारः। तथा च भाष्यकारेणानुषङ्गिकप्रयोजनप्रकरणे भाषितं—'महता देवेन नः साम्यं(यथा)स्यादित्यध्येयं व्याकरण-मि'ति। महता देवेनेति परेण शब्दब्रह्मणेत्यर्थः। साम्यं तदा-कारता। एतच्च शास्त्रस्यानुषङ्गिकं प्रयोजनं शास्त्रैकदेशसम्बद्धस्य प्रकरणस्याप्युक्तम्। एवं ब्रह्मप्राप्तिविषयप्रार्थनालक्षणमङ्गला-चरणमुखेन सङ्ग्रहः समापितः॥ २६॥

एवं वररुचिप्रोक्तः सङ्ग्रहश्चर्चितो मया।
यथामति न कात्स्न्र्येन भासन्ते तादृशां गिरः॥

वेदो नाम महत्पदं जनपदो यत्र द्विजानां ततिः
साङ्गं वेदमधीत्य वाच्यमखिलं मीमांसतेऽस्य स्फुटम्।
तत्र ग्रामवरे क्वचिन्निवसता नाम्ना च नारायणे-
नैषा वाररुचार्थदीपनपरा दीपप्रभा निर्मिता॥

दीपप्रभासमेतः वाररुचसङ्ग्रहः

समाप्तः।

शुभं भूयात्।

Ready for sale.

भक्तिमञ्जरी (Stuti) by H. H Svâti Śri Râma Varma Mahârâjah. 1 0 0

Trivandrum Sanskrit Series.

No. 1 — दैवम् (Vyâkarana) by Dêva with Purushakâra of Krishnalîlâsukamuni. 1 0 0

No. 2 — अभिनवकौस्तुभमाला – दक्षिणामूर्तिस्तवौ by Krishnalîlâsukamuni. 0 2 0

No. 3 — नलाभ्युदयः (Kâvya) by Vâmana Bhaṭṭa Bâṇa. 0 4 0

No. 4 — शिवलीलार्णवः (Kâvya) by Nîlakaṇṭha Dîkshita. 2 0 0

No. 5 — व्यक्तिविवेकः (Alankâra) by Mahima Bhaṭṭa with commentary. 2 12 0

No. 6 — दुर्घटवृत्तिः (Vyâkarana) by Saraṇadeva. 2 0 0

No. 7 — ब्रह्मतत्त्वप्रकाशिका (Vedânta) by Sadâsivendra Sarasvatî. 2 4 0

No. 8 — प्रद्युम्नाभ्युदयम् (Nâtaka) by Ravi Varma Bhûpa. 1 0 0

No. 9 — विरूपाक्षपञ्चाशिका (Vedânta) by Virûpâkshanâtha with the commentary of Vidyâchakravartin. 0 8 0

No. 10 — मातङ्गलीला (Gajalakshaṇa) by Nîlakaṇṭha. 0 8 0

No. 11 — तपतीसंवरणम् (Nâtaka) by Kulasekhara Varma with the commentary of Sivarâma. 2 4 0

No. 12 — परमार्थसारः (Vedânta) by Bhagavad Âdisesha with the commentary of Râghavânanda. 0 8 0

No. 13 — सुभद्राधनञ्जयम् (Nâtaka) by Kulasekhara Varma with the commentary of Sivarâma. 2 0 0

No. 14 — नीतिसारः (Nîti) by Kâmandaka, with the commentary of Sankarârya. 3 8 0

No. 15 — स्वप्नवासवदत्तम् (Nâtaka) by Bhâsa. 2 8 0

No. 16 — प्रतिज्ञायौगन्धरायणम् (Do.) Do. 1 8 0

No. 17—पञ्चरात्रम् (Do.) Do. 1 0 0

No. 18—नारायणीयम् (Stuti) by Nârâyaṇa Bhaṭṭa with the commentary of Desamangala Vârya. 4 0 0

No. 19—मानमेयोदयः (Mîmâmsâ) by Nârâyaṇa Bhaṭṭa and Nârâyaṇa Paṇḍita. 1 4 0

No. 20—अविमारकम् (Nâtaka) by Bhâsa. 1 8 0

No. 21—बालचरितम् (Do.) Do. 1 0 0

No. 22—मध्यमव्यायोग-दूतवाक्य-दूतघटोत्कच-कर्णभारोरुभङ्गानि (Nâtaka) by Bhâsa 1 8 0

No. 23—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (1 & 2 Kâṇḍas) 1 12 0

No. 24—जानकीपरिणयः (Kâvya) by Chakrakavi. 1 0 0

No. 25—काणादसिद्धान्तचन्द्रिका (Nyâya) by Gangâdharasûri 0 12 0

No. 26—अभिषेकनाटकम् (Nâtaka) by Bhâsa 0 12 0

No. 27—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinatha and Vivarana of Nârayana Pandita (1 & 2 Sargas) 1 12 0

No. 28—वैखानसधर्मप्रश्नः (Dharmasûtra) by Vikhanas 0 8 0

No. 29—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswamin (3rd Kanda) 2 4 0

No. 30—वास्तुविद्या (Silpa) 0 12 0

No. 31—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswamin (4th, 5th, & 6th Kandas) 1 0 0

No. 32—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (3rd, 4th & 5th Sargas) 2 8 0

No. 33—वाररुचसंग्रहः (Vyâkarana) with the commentary Dîpaprabhâ of Nârâyana 0 8 0

Apply to :—

The Agent for the sale of

Government Sanskrit Publications,

Trivandrum.

TRIVANDRUM SANSKRIT SERIES.

NO. XXXV.

THE MAṆISÂRA

(ANUMÂNAKHAṆḌA)

OF

GOPÎNÂTHA

EDITED

BY

T. GAṆAPATI SÂSTRÎ

Curator of the Department for the publication of Sanskrit manuscripts,

TRIVANDRUM.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJAH OF TRAVANCORE.

TRIVANDRUM:

PRINTED AT THE TRAVANCORE GOVERNMENT PRESS.

1914

(*All Rights Reserved.*)

ZZ-d-81

अनन्तशयनसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ३५.

मणिसारः

(अनुमानखण्डः)

श्रीगोपीनाथविरचितः

संस्कृतग्रन्थप्रकाशनकार्याध्यक्षेण

त. गणपतिशास्त्रिणा

संशोधितः ।

स च

अनन्तशयने

महामहिमश्रीमूलकरामवर्मकुलशेखरमहाराजशासनेन

राजकीयमुद्रणयन्त्रालये

मुद्रयित्वा प्रकाशितः ।

कोळम्बाब्दाः १०८९, क्रैस्ताब्दाः १९१४.

PREFACE.

The Manisâra gives a description of the substance Tattvachintâmani, the well-known work on Nyâya of Gangesopâdhyâya ; and the Anumânakhanda of this work is now placed before the public. The Pratyaksha-Khanda of the work is often referred to in this volume by the word प्रत्यक्षमणिसार, but this has not come to our hands; while the Sabda-Khanda obtained by us is incomplete. The edition of Anumânakhanda is based on two palm-leaf manuscripts, one of which (marked क.) in Malayalam character belongs to Panthalam Palace, and it is incomplete and somewhat incorrect. The other manuscript (marked ख.) lent by Mr. Sakti Sastrial of Ayikkudi is in Tamil Grantha character, and complete and correct.

The author of the Manisâra is Gopînâtha. The colophon in the Tarkabhâshâprakâsikâ, a commentary on Tarkabhâshâ of Kesavamisra, namely "सोमसुतकुलसमुद्भूतमहोपाध्यायभवनाथकुमारसुतगोपीनाथविरचितायां तर्कभाषाप्रकाशिकायां" shows that the commentary was written by a Gopînâtha, son of Bhavanâthakumâra. The author of the Manisâra and of Tarkabhâshâprakâsikâ might be identical ; for in dealing with the subject Arthâpatti (अर्थापत्ति) in Tarkabhâshâprakâsikâ, the author says:—"अर्थापत्तिर्नप्रमाणं मानाभावात्। यथा चैतत् तथा प्रतिपादितं मणिसारे, that is, the subject has been explained by him in Manisâra.

Gopînâtha often refers to Pakshadharamisra, the author of Âloka, a commentary on Tattvachintâmani, and Pakshadharamisra who is the same as Jayadeva, the author of the play called Prasannarâghava lived in the 16th Century A. D. The father of Sankaramisra, the author of Kanâdarahasya and other works on Nyâya is known as Bhavanâtha. If the Bhavanâtha mentioned by Gopînâtha be identical with the father of Sankaramisra, Gopinâtha might then be a contemporaneous kinsman of Sankaramisra. The latter (Sankaramisra) is the fourth in the succession of the pupils of Vâsudeva Bhattâchârya, the fellow-student of Jayadeva, and might therefore be placed a century later than Jayadeva.

Trivandrum. T. GANAPATI SÂSTRÎ.

निवेदना ।

एष श्रीगङ्गेशोपाध्यायेन प्रणीतस्य **तत्त्वचिन्तामणि**नाम्नो न्यायग्रन्थस्य सारप्रतिपादको **मणिसारो** नाम, यस्यायमनुमानखण्ड इदानीं प्रकाश्यते । अनुमानखण्डे प्रत्यक्ष**मणिसार**शब्देन* तत्र तत्रास्य प्रत्यक्षखण्डः स्मर्यते । किन्त्वसौ नोपलब्धोऽस्माभिः । शब्दखण्डस्त्वस्मद्वशेऽस्ति । परं तु सोऽसमग्रः । अनुमानखण्डस्य संशोधनाधारभूतावुभावादर्शौ । तत्रैकः **पन्तलराज**सम्बन्धी केरलीयलिपिरसमग्रो नातिशुद्धः क. संज्ञः । अन्यस्तु **आयकुटि शक्ति**शास्त्रिस्वामिकः समग्रः शुद्धो द्रमिलग्रन्थलिपिः ख. संज्ञः ।

अस्य प्रणेता श्री**गोपीनाथः** । **केशव**मिश्रकृतायास्**तर्कभाषा**या व्याख्यायां **तर्कभाषाप्रकाशिका**यां " सोमसुतकुलसमुद्भूतमहोपाध्याय**भवनाथ**कुमारसुत**गोपीनाथ**विरचितायां **तर्कभाषाप्रकाशिका**यां प्रमाणपरिच्छेदः समाप्तः " इति सविशेषणो यो **गोपीनाथः** कीर्त्यते, स एवायमिति प्रतिभाति, यस्मात् **तर्कभाषाप्रकाशिका**यां स्वकर्तव्यतया प्रसक्तमर्थनिरूपणं स **मणिसारे** कृतं मन्यते । तत्र ह्यर्थापत्तिविचारे स एवमाह — " अर्थापत्तिर्न प्रमाणं, मानाभावात् । यथा चैतत् तथा प्रतिपादितं **मणिसारे** " इति । एष **मणिसारे पक्षधर**मिश्रं **तत्त्वचिन्तामणि**व्याख्यानस्य**आलोक**स्य कर्तारं बहुशः स्मरति । **पक्षधर**मिश्र इति **जयदेव**मिश्र एवोच्यते । तमेव **प्रसन्नराघव**नाटकस्यापि कर्तारं वदन्ति । स च क्रैस्ताब्दीये षोडशे शतके स्थित इति प्रसिद्धम् । कणादरहस्यादिकर्तुः **शङ्कर**मिश्रस्य पिता **कश्चन भवनाथः** श्रूयते । अयं **गोपीनाथ**निर्दिष्टाद् **भवनाथाद्** यदि न भिन्नः, तर्हि **गोपीनाथेन शङ्कर**मिश्रस्य समकालेन दायादेन भवितव्यम् । **शङ्कर**मिश्रस्तु **जयदेव**सहाध्यायिनो **वासुदेव**भट्टाचार्यसार्वभौमस्य शिष्यपरम्परायां चतुर्थो गण्यत इति **जयदेवा**च्छतावरवर्षार्वाचीनः सम्भाव्यते ।

अनन्तशयनम्. त. गणपतिशास्त्री.

* सप्तमं पृष्ठं दृश्यताम्.

॥ श्रीः ॥

गोपीनाथविरचितः

मणिसारः ।

अनुमानखण्डः ।

सङ्गतिग्रन्थः ।

क्रीडाकोपकषायमायतमपाकर्तुं नते शङ्करे
सद्यः स्मेरचमूरुलाञ्छनकलासम्पर्कसङ्कोचिताः ।
सावष्टम्भसुरारिसङ्घविविधाहङ्कारकूटच्छिदो
रुद्राणीचरणारविन्दरुचयो विघ्नं विनिघ्नन्तु नः ॥

निर्गलितं मणिमध्यादालोकादौ च विस्तीर्णम् ।
निष्कृष्य युक्तिसारं गोपीनाथस्तनस्तनुते ॥

प्रत्यक्षानुमानयोरुपजीव्योपजीवकभावसङ्गत्या प्रत्यक्षानन्तरमनुमानं निरूप्यते । यद्यपि लिङ्गपक्षव्याप्त्यादिज्ञानानामनुमितिरूपत्वनियमेऽनवस्थाप्रसङ्गेन प्रत्यक्षरूपत्वमङ्गीकरणीयमेव । अतीन्द्रियसाध्यकादिस्थलेऽपि परम्परया प्रत्यक्षापेक्षित्वमिति यथा, तथानुमित्युपनीतप्रत्यक्षे अदृष्टद्वारा जन्यप्रत्यक्षमात्रे चानुमितेरप्युपजीव्यत्वमस्तीति तन्निरूपणमेव प्रथममस्तु । तथाप्यनुभवत्वव्याप्याया यज्ञातेः प्रमाणविभाजकत्वं, तदवच्छिन्नं प्रत्युपजीव्यत्वमिह विवक्षितम् । अस्ति चानुमितित्वावच्छिन्ने प्रत्यक्षस्य तथात्वं, न तु प्रत्यक्षत्वावच्छिन्नेऽनुमितेरपि, ईश्वरप्रत्यक्षे तदभावात् । एवमनुमितिकरणस्य व्याप्त्यादिज्ञानस्यापि प्रत्यक्षोपजीवकतानियम एव, न तु प्रत्यक्षकरणस्यापि तदुपजीवकत्वं नियतं, श्रोत्रादौ तदभावादिति । वस्तुतस्तु प्रत्यक्षानुमानयोरुभयोरप्युपजीव्योपजीवकभावादुभयत्रापि सङ्गतिरस्तु । न चैवमनुमाननिरूपणस्यापि प्राथमिकत्वापातः । निरूपणप्राथ-

म्यस्येच्छाधीनतया सङ्गत्यनियम्यत्वात् । सङ्गतेश्च पूर्वापरग्रन्थैकवाक्यतामात्रप्रयोजकत्वात् । अन्यथा दश दाडिमानीतिवद् उपेक्षणीयतापत्तेः । यद्वा आनन्तर्याभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयः सङ्गतिः । तच्च यद्यपि कारणत्ववत् कार्यत्वमपि, कारणे निरूपिते किमस्य कार्यमिति जिज्ञासावत् कार्ये निरूपिते किमस्य कारणमिति जिज्ञासाया अपि भावात्, तथापि निरूपणप्राथम्ये इच्छैव नियामकेत्युक्तम् । एवमनुमानोपमानयोरप्युपजीव्योपजीवकभाव एव सङ्गतिः । लाघवज्ञानसहकारेण गवयपदस्य गवयत्वविशिष्टे शक्तिज्ञानमेव ह्युपमितिः । सा च शक्तेः पूर्वं ज्ञाने सति स्यात् । तज्ज्ञानं च नानुमानमन्तरेण, शक्तेरीश्वरेच्छाया अतीन्द्रियत्वात् । तथा चोपमितित्वावच्छिन्नोपजीव्यत्वमेव तत्रापि नियामकमिति क्वचिदनुमानस्यापि तदुपजीवकत्वे न दोषः । यद्वा सङ्गतेरुभयसाधारण्येऽपि प्रागुक्तरीत्या अनुमाननिरूपणप्राथम्यमिति दिक् ॥

इति सङ्गतिग्रन्थः ।

अथानुमितिलक्षणम् ।

'तत्रानुमितिकरणत्वमनुमानत्वम् । अनुमितिश्च व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यं ज्ञानमि'ति मणिकृतः । नन्विह कः समासः । न तावद् व्याप्तिविशिष्टः पक्षधर्मश्चेति द्वन्द्वः । प्रमानुमित्यव्याप्तेः । वास्तवपदार्थभेदस्थल एव तस्य भावात् । अत्र च तदभावात् । न च ज्ञाप्यपदार्थभेदे द्वन्द्व इत्यपि । तथा सत्यसंभवात् । परामर्शस्याभेदावगाहितयान्योन्यभेदानवगाहित्वात् । नापि कर्मधारयः । तथा सति भ्रमानुमित्यव्याप्तेः । कर्मधारयस्य पदार्थाभेद एव भावात् । तत्र च तदभावात् । अत एव न षष्ठीतत्पुरुषोऽपि । भ्रमानुमित्यव्याप्तेर्दुष्परिहरत्वादिति ।

अत्र पक्षधरमिश्राः—द्वन्द्व एव समासः । न चोक्तदोषः । पदार्थभेद इव पदार्थतावच्छेदकभेदेऽपि तस्य साधुत्वात् । प्रयोगानुरोधेन व्याकरणस्मृतिप्रवृत्तेः । तस्य चोभयत्र दर्शनात् । अन्यथा नीलघटयोरभेदः संसर्ग इत्यादौ

साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानं निःश्रेयसहेतुरित्यादौ च का गतिः। तथा च प्रमानुमितावपि पदार्थतावच्छेदकभेदसत्त्वाद् नाव्याप्तिः। यद्वा व्याप्तिविशिष्टादिपदं व्याप्तिविशिष्टत्वादिपरम्। तथा च पदार्थभेदेनैव द्वन्द्व इति पक्षेऽपि नानुपपत्तिः। न चैवमन्यत्र व्याप्तिविशिष्टत्वमन्यत्र पक्षधर्मत्वं च गृहीतं यत्र, ततस्तदनुव्यवसायः, तत्रानुव्यवसायेऽतिव्याप्तिरिति वाच्यम्। एकत्र धर्मिणीति विशेषणदानात्। अत एव व्याप्तिविषयकं पक्षधर्मताज्ञानमित्यपि। ज्ञानेन सह एकत्रेति विशेषणस्य तत्राप्यावश्यकत्वादित्याहुः।

अत्रेदं शङ्क्यते — एवं सत्येकशेषस्य द्वन्द्वापवादकता न स्यात्। पदार्थतावच्छेदकस्य घटत्वस्य भेदाभावेन द्वन्द्वप्रसक्तेरेवाभावात्। निषेधस्य प्रसक्तिपूर्वकत्वात्। किञ्च 'सर्वो द्वन्द्वो विभाषैकवद् भवती'त्यपि व्यर्थं, पदार्थतावच्छेदकभेदस्थलीयद्वन्द्वे धर्मिण एकत्वाद् एकवद्भावस्य स्वत एव सिद्धत्वात्। अपि च नीलघटयोरित्यादौ द्वित्वान्वयानुपपत्तिः, धर्मिणस्तदन्वययोग्यत्वात्। न चात एवावच्छेदकान्वितं तत्, तथाव्युत्पत्तेः। विभक्त्युपस्थाप्यसङ्ख्यादेर्विशेष्यान्वयनियमात्। अन्यथा एकत्र दण्डिपुरुषावित्यादिप्रयोगापत्तिः। न चेष्टापत्तिः। तथा सति 'न ह्येकत्र दण्डिनि दण्डिपुरुषौ गच्छत इति वक्तारो भवन्ती'ति वार्तिकविरोधात्। न चैवं नीलघटयोरिति प्रयोगानुपपत्तिः। तस्य नीलत्वघटत्वयोरित्यर्थात्। अभेद इत्यस्याप्याश्रयाभेद इत्यर्थात्। किं बहुना, एवं सति कर्मधारयोच्छेद एव, पदार्थतावच्छेदकभेदस्य तत्रापि भावेन द्वन्द्वस्याप्रतिहतत्वादिति। यद्वेत्यनुपपन्नम्। एकत्र धर्मिणीति विशेषणप्रक्षेपेऽपि धूमत्वेन वह्निव्याप्तिग्रहे द्रव्यत्वेन पक्षधर्मताज्ञानेऽनुमित्यनुदयात् तज्जन्यसमूहालम्बनातिव्याप्तिः। न च यद्धर्मविशिष्टत्वेन ज्ञायमाने धर्मिणि व्याप्तिविशिष्टत्वधीः, तद्धर्मवत्त्वेन पक्षधर्मताधीर्विवक्षितेति नोक्तदोष इति वाच्यम्। द्रव्यं धूमो वह्निव्याप्यो द्रव्यवांश्चायमिति ज्ञानजन्यानुव्यवसायातिव्याप्तेस्तथापि भावात्। न च यावद्धर्मविशिष्टत्वेनोपस्थिते व्याप्तिवैशिष्ट्यधीः, तावद्धर्मावच्छिन्नपक्षधर्मताधीर्विवक्षिता। तत्र च धूमत्वेनाप्युपस्थिते व्याप्तिबुद्धेः, तस्य च पक्षधर्मताबुद्धावविषयत्वादिति वाच्यम्। तथा सत्युदाहृतस्थल एव द्रव्यत्वपरित्यागेन पक्षधर्मताज्ञानादनुमितिर्न स्यात्, उक्तविवक्षायास्तत्राभावात्। न च यद्धर्मपुरस्कारेण व्याप्तिधीः, तद्धर्मपुरस्कारेण पक्षधर्मताधीरित्यर्थः। द्रव्यं धूम इत्यत्र द्रव्यत्वस्य

न पुरस्कार इति वाच्यम् । तथाप्येकत्र धर्मिणीत्यत्रैकत्वं वास्तवं वा ज्ञातं वा विवक्षितम् । नाद्यः । भ्रमानुमित्यव्याप्तेः । नान्त्यः । परामर्शे धर्म्यैक्यभाने मानाभावेनासंभवात् । किञ्च, एतद्विशेषणे दत्तेऽपि पक्षतासहकृतत्वविवक्षाया आवश्यकत्वेन तत एवोक्तसमूहालम्बनातिव्याप्तिवारणमिति किमुक्तविशेषणेनेति ।

अत्रेदं प्रतिभाति — नहि वयं पदार्थतावच्छेदकभेदत्वेन द्वन्द्वसाधुतां ब्रूमः, येन द्वन्द्वापवाद(त्वा)नुपपत्तिः स्यात् । किन्तु पदज्ञानजन्यप्रतीतिविषयभेदत्वेन । तच्च विशेष्यविशेषणभेदसाधारणमिति विशेष्यभेदादेकशेषस्थलेऽपि द्वन्द्वप्रसक्तौ सरूपेत्यादिसूत्रेण तदपवादात् । सर्वो द्वन्द्व इत्यत्र सर्वपदं संकुचितमेव । द्वित्वं चानन्वितमेव । द्विवचनं प्रयोगसाधु(त्व)मात्रं धर्म्यैक्यस्थले । यद्वा अवच्छेदकान्वय्येव तत् । विशेष्यान्वयस्यौत्सर्गिकत्वात् तस्य च बाधकेन निरासात् । न चैकत्रापि दण्डिपुरुषावित्यादिप्रसङ्गः । साधुत्वे इष्टापत्तेः । पूर्वाप्रयोगाच्च न प्रयोग इति । कर्मधारयोच्छेदोऽपि नास्ति । पदार्थभेदविवक्षायां तत्रैव च पदार्थतावच्छेदकभेदविवक्षायां कर्मधारयद्वन्द्वप्रवृत्तेरिति । एकत्र धर्मिणीत्यत्रापि नोक्तदोषः । पक्षतासहकृतत्वविवक्षायामपि व्याप्तिविशिष्टपक्षधर्मताज्ञानत्वेन जनकत्वमवश्यं वाच्यमेव, वक्तव्ययुक्तेः । तथा च विशेषणं विनासम्भव एव, उक्तरूपेणातिप्रसक्तेश्चाकारणतावच्छेदकत्वात् । किन्त्वेकधर्मिकतदुभयवैशिष्ट्यज्ञानत्वेनैव जनकत्वम् । अत एवैकत्वभानमावश्यकमिति दिक् ।

उपाध्यायास्तु — व्याप्तिविशिष्टश्चासौ पक्षधर्मश्चेति कर्मधारय एव समासः । तदुत्तरतल्प्रत्ययेन पदार्थतावच्छेदकद्वयसामानाधिकरण्यशक्तेन तदुभयसामानाधिकरण्यप्राप्तौ तत्र च ज्ञानान्वयेन सामानाधिकरण्यावगाहिज्ञानजन्यत्वमर्थो लभ्यत इति न भ्रमानुमितावव्याप्तिरित्याहुः । तच्चिन्त्यम् । अवान्तरवाक्यार्थस्य व्याप्तिविशिष्टत्वपक्षधर्मत्वोभयसामानाधिकरण्यस्य बाधेन महावाक्यार्थस्य ज्ञानान्वयस्य दूरपरास्तत्वाद् भ्रमानुमित्यव्याप्तेरपरिहारात् । ज्ञानरूपसम्बन्धस्य यथाकथञ्चित् सामानाधिकरण्यघटकत्वेन तदव्याप्तिनिरसनेऽप्यसम्भवस्य दुरुद्धरत्वात् । तथाहि — वह्निव्याप्यधूमवानिति परामर्शोऽनुमितिहेतुः । न चासौ स्वप्रकारीभूतव्याप्त्यादेर्वैशिष्ट्यं संसर्गमर्यादया विषयीकुर्वन् तद्वैशिष्ट्यमपि सामानाधिकरण्यरूपं विषयीकरोति । तथा सति भासमानवैशिष्ट्यप्रतियोगितया

वैशिष्ट्यस्य प्रकारतापत्तेः । न च विशिष्टबुद्धौ विशेष्यविशेषणसंबन्धमात्रविषयत्वे दण्डीति बुद्धेः दण्डपुरुषसंयोगा इति ज्ञानाद् भेदो न स्यादिति वैशिष्ट्यसम्बन्धोऽधिको विशिष्टधीविषयोऽङ्गीकार्य एव । अत एव भासमानवैशिष्ट्यप्रतियोगित्वपर्यन्तं प्रकारतालक्षणमिति वाच्यम् । तथापि दण्डपुरुषसंयोगतत्सम्बन्धा इत्यतो दण्डीत्यस्य भेदानुपपत्तेः समूहालम्बनाद् भेदकान्तरस्यैव वाच्यत्वात् । अत एव समूहालम्बने सम्बन्धतावच्छेदकगोचरत्वं विशिष्टबुद्धौ तदगोचरत्वमित्येव भेदकमिति पक्षधरमिश्राः । यदि च विषयभेद एव धीभेदक इति मतं, तथापि नानुपपत्तिः । विशिष्टबुद्धौ विशेषणप्रतियोगिकस्य विशेष्यनिष्ठस्य स्वरूपसम्बन्धस्य विषयत्वात् । विशेषणसंबन्धनिरूपितस्वरूपसंबन्धापेक्षया विशेषणसंबन्धस्य लघुत्वात् । यथा च विशेषणादिनिरूपितस्वरूपसम्बन्धस्य विशिष्टधीविषयत्वेऽप्युपजीव्यतया लघुतया च समवायसिद्धिः, तथा प्रत्य(क्षं निरूपित?क्ष)मणिसारे विवेचितम् । ननु तथापि व्यभिचारिहेतुकानुमितौ लक्षणमिदमव्याप्तं, व्याप्तेस्तत्रासत्तया ज्ञानाभावात् । भ्रमस्यापि प्रमापूर्वकत्वात् । न च अन्यत्र गृहीतव्याप्तेस्तत्राप्यारोप इति वाच्यम् । व्याप्तिर्हि प्रतिसाध्यं प्रतिसाधनं च तत्तद्व्यक्तिघटिततया भिन्ना । तथा च तत्साधने तत्साध्यनिरूपितव्याप्तिज्ञानमेव वाच्यम् । अन्यथातिप्रसङ्गात् । तच्चाप्रसिद्धमिति चेद्, न । तत्साधनाधिकरणे साध्यं साध्ये च तन्निष्ठात्यन्ताभावाप्रतियोगित्वमवगाहते यद् ज्ञानं, तस्यैव व्याप्तिज्ञानपदेन विवक्षितत्वात् तस्य तत्रापि सत्त्वादिति । नन्वेवमपि व्यतिरेक्यनुमितौ लक्षणमिदमव्याप्तं, तत्रान्वये पक्षधर्मतायाः व्यतिरेके च व्याप्तेर्ज्ञानेन तदुभयविशिष्टज्ञानाभावादिति चेद्, न । व्यतिरेकव्याप्तिज्ञानस्यापि साधनसाध्यव्यभिचारधीविरोधितया स्वव्यभिचारधीविरोधिव्याप्तिज्ञानस्य विवक्षितस्य सत्त्वात् । न च तथापि परम्परासम्बन्धेन व्याप्तिपक्षधर्मतयोर्वैशिष्ट्यज्ञानस्य विवक्षितत्वे वह्निव्याप्यधूमजनकार्द्रेन्धनवानयमिति ज्ञानादनुमित्यापत्त्या साक्षात्सम्बन्धेन तदुभयवैशिष्ट्यज्ञानं वाच्यम् । तच्च व्यतिरेकिणि नास्त्येवेत्यव्याप्तिरेवेति वाच्यम् । यादृशं वैशिष्ट्यज्ञानं पक्षधर्मे व्यभिचारधियं विरुणद्धि, साक्षात्परम्परोदासीनस्य तस्यैव व्याप्तिवैशिष्ट्यज्ञानस्य विवक्षितत्वात् । यथा च व्यतिरेकव्याप्तिज्ञानमन्वय(स्य ?)व्यभिचारधीविरोधि(ता ?) तथा वक्ष्यामः । यद्व्यतिरेकसहचारेणान्वयव्याप्तिर्गृह्यत इति मतेन लक्षणमिदम् । तेन नाव्याप्तिशङ्का । नन्वेवमपि संशयोत्तरप्रत्यक्षे लक्षण-

मतिव्याप्तं, विशेषदर्शनजन्यत्वात् तस्य । तथा व्याप्तिविशिष्टपक्षधर्मत्वाभावज्ञाने प्रतियोगिज्ञानत्वेन परामर्शजन्येऽतिव्याप्तिः । तथा व्याप्तिविशिष्टपक्षधर्मतावानयमिति ज्ञाने विशेषणज्ञानत्वेन परामर्शजन्येऽतिव्याप्तिः । तथा परामर्शानुव्यवसाये विषयत्वेन परामर्शजन्येऽतिव्याप्तिः । तथा पूर्वानुभवत्वेन परामर्शजन्ये व्याप्तिविशिष्टपक्षधर्मत्वस्मरणेऽतिव्याप्तिः । तथा अतिदेशवाक्यार्थज्ञानत्वेन परामर्शजन्यायामुपमितावतिव्याप्तिः । तथा उपनयावान्तरवाक्यार्थज्ञानजन्यन्यायजन्यशाब्दज्ञानेऽतिव्याप्तिः । किं बहुना, भगवद्व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यतया जन्यज्ञानमात्र एवातिव्याप्तिरिति ।

अत्र केचित्—तत्प्रत्यक्षानुमित्योर्वैजात्यादवश्यं सामग्रीवैलक्षण्यं वाच्यम् । तथा चानुमितौ परामर्शः, प्रत्यक्षे च करादि पुरुषत्वव्याप्यं करादिमांश्चायमिति ज्ञानद्वयं हेतुरिति संशयोत्तरप्रत्यक्षे परामर्शजन्यतया नातिव्याप्तिरित्याहुः । तच्चिन्त्यम् । लाघवेनानुमितावित्र प्रत्यक्षेऽपि विशिष्टज्ञानस्यैव हेतुत्वाद्, अन्यथा वैपरीत्यापत्तेः, विनिगमकाभावादिति पक्षधरमिश्राः । अत्र प्रत्यक्षानुमित्योरुभयोरपि परामर्शजन्यत्वे संशयोत्तरप्रत्यक्षेऽनुमित्यनुत्पत्तये प्रत्यक्षसामग्रीबलवत्त्वं कल्प्यमिति महद् गौरवं स्यात् । तद्वरं ज्ञानद्वयमेव प्रत्यक्षहेतुरस्त्विति नव्यदूषणं भव्यम् । लाघवेन विशिष्टज्ञानहेतुत्वसिद्धौ प्रत्यक्षसामग्रीप्रतिबन्धकत्वकल्पनस्य फलमुखत्वादिति न किञ्चिदेतत् । अन्ये तु व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यमात्रवृत्तिजातीयत्वमर्थः । अनुमितित्वं तथा, प्रत्यक्षत्वादिकं च न तथेति न प्रत्यक्षादौ क्याप्यतिव्याप्तिः । संशयोत्तरप्रत्यक्षत्वादिकं च न जातिः, चाक्षुषत्वादिना सङ्करादित्याहुः । तदपि चिन्त्यम् । व्याप्यधर्मपुरस्कारप्रवृत्तातिदेशवाक्यप्रभवोपमितिमन्तरेण यत्रोपमित्यन्तराभावः, तत्र शरीरजन्यतावच्छेदकजातेरुपमितिवृत्तेस्तथात्वेन तादृशोपमित्यतिव्याप्तेस्तादवस्थ्यात् । न च शरीरजन्यतावच्छेदकजातिः सर्वज्ञानसाधारण्येकैव, तथा च तस्याः प्रत्यक्षादिवृत्तितया न तज्जन्यमात्रवृत्तित्वमिति नातिव्याप्तिः, प्रत्यक्षत्वादेरेव तद्व्याप्तस्य नानात्वेन सङ्करशङ्काविरहादिति वाच्यम् । तथा सति नानापुरुषानुमित्यादावनुगतव्यवहारानापत्तेरिति पक्षधरमिश्राः ।

अत्र शङ्क्यते—एवं सति शरीरजन्यतावच्छेदकजातिनानात्वेऽपि प्रत्यक्षानुमित्यादिसाधारणस्य शरीरजन्यत्वानुगतव्यवहारस्योच्छेद एव । यथाकथञ्चिदनुगतोपाधिना तत्समर्थनेऽनुमित्याद्यनुगतव्यवहारेऽपि समानमिति ।

अत्रेदं प्रतिभाति — अनुमितित्वादिजातिरनुमित्यादिपदवाच्यतावच्छेदकतया अनुमिनोमीत्याद्यनुव्यवसायेन च सिद्धा । सा च सिद्धिरैकत्ववाधे बाधितैव स्यादिति नानात्वेऽनुमितित्वाद्यसिद्धिप्रसङ्ग एव । शरीरजन्यतावच्छेदकजातेश्च व्याप्यतावच्छेदकतया सिद्धिरिति धूमत्वालोकत्ववदननुगमेऽप्यदोष इति विनिगमकम् । किञ्च, शरीरजन्यतावच्छेदकजाते(नै ! रै)क्ये प्रत्यक्षत्वादेस्तद्व्याप्यस्यानेकत्वे प्रतिशरीरमन्यत्राक्लृप्तशरीरजन्यतावच्छेदकजातेः तद्व्याप्यजातिचतुष्टयस्य च कल्पने जातिपञ्चककल्पनापत्तिः । शरीरजन्यतावच्छेदकनानात्वे चान्यत्राक्लृप्तजातिचतुष्टयमेव कल्प्यमिति लाघवम् । वस्तुतस्तु शरीरजन्यतावच्छेदकजातेरैक्येऽपि तद्व्याप्योपमितित्वमादाय लक्षणातिव्याप्तिर्दुर्वारैवेति नायं पन्थाः ।

तस्मादिदमत्राभिप्रेतं मणिकृतः — अप्रामाण्यशङ्काशून्यव्याप्तिविशिष्टपक्षधर्मतानिश्चयत्वावच्छिन्नकारणताप्रतियोगिककार्यताश्रयज्ञानमनुमितिरिति । संशयोत्तरप्रत्यक्षे च नाप्रामाण्यशङ्काशून्यपरामर्शत्वावच्छिन्ना कारणता । तथा सति पीतः शङ्ख इति ज्ञानकाले श्वैत्यव्याप्यशङ्खत्ववानिति परामर्शात् श्वैत्यप्रत्यक्षापत्तेः । किन्तु ग्राह्यविपरीतज्ञानविरोधिविशेषदर्शनत्वेन प्रत्यक्षहेतुत्वमिति न तत्रातिव्याप्तिः । अभावज्ञानेऽपि विशिष्टज्ञाने च प्रतियोगिज्ञानत्वेन विशेषणज्ञानत्वेन च हेतुता, न तु तत्त्वेन । यथाकथञ्चित् तथा भावेऽपि नाप्रामाण्यशङ्काशून्यत्वाद्युपयोग इति न तत्रातिव्याप्तिः । यत्तु तत्र विशेषणविषयकत्वमेव हेतुतावच्छेदकं न तु ज्ञानत्वान्तर्भावोऽपीति गौडसमाधानं, तत्तु न, प्रकृतेऽपि तथात्वात् । ज्ञानभिन्ने विषयत्वं नास्तीति प्रत्यक्षमणिसारे प्रतिपादितत्वात् । तस्माज्ज्ञानत्वनियतं तदिति सर्वत्र ज्ञानत्वान्तर्भावः, न तु व्यावर्तकतया । उपमितिशाब्दयोरपि अवान्तरवाक्यार्थज्ञानत्वेनातिदेशवाक्यार्थज्ञानत्वेन च हेतुत्वान्नातिव्याप्तिः । न च तद्विषयकप्रत्यक्षे तत्त्वेनापि हेतुत्वमिति वाच्यम् । परामर्शानुव्यवसाये व्याप्तिज्ञानं पक्षधर्मताज्ञानं च विषयः । तच्चान्यत्र व्याप्तिज्ञानत्वेन तदनुव्यवसाये पक्षधर्मताज्ञानत्वेन तदनुव्यवसाये च क्लृप्तहेतुतयैवार्थसमाजमहिम्ना संभवतीति न परामर्शत्वेन तत्र हेतुतेति । अनुमितौ चातिप्रसङ्गभीत्या तथा हेतुत्वम् । अत एव न स्मृतावतिव्याप्तिः । अप्रामाण्यशङ्कयापि स्मृतेरुत्पादेन तत्र तथा जनकत्वाभावात् । यत्तु तत्र निश्चयरूपानुभवत्वपर्यन्तं हेतुतावच्छेदकमिति, तन्न । अनुभवत्वपर्यन्तस्य गौरवेण स्मृत्यनन्तरमपि स्मृतिदर्शनेन

व्यर्थत्वात् । भगवज्ज्ञानमादायापि नातिव्याप्तिः, तस्योपादानप्रत्यक्षतया हेतुत्वे-नोक्तरूपेणाजनकत्वादिति ।

पक्षधरमिश्रास्तु — पक्षतासहकृतपरामर्शजन्यत्वं विवक्षितम् । प्रत्यक्षादौ क्वापि न पक्षता हेतुरिति नातिव्याप्तिः । न च पक्षतासहकृतव्याप्तिज्ञानजन्यत्व-मेवास्तु । तदुभयप्रत्यक्षेऽतिव्याप्तेः । न च परामर्शपक्षतोभयप्रत्यक्षे तथाप्यति-व्याप्तिः । तदुभयोरनुमित्युत्पादनियतनया प्रत्यक्षानुत्पादात् । न च पक्षताजन्यत्व-मेव लक्षणमस्तु । सामान्यप्रत्यासत्तिभू(यः तया) तया जनिते प्रत्यक्षेऽतिव्याप्तेः, सिद्ध्यभावरूपपक्षताया योग्यतया विषयत्वेन तज्जन्यप्रत्यक्षेऽतिव्याप्तेश्च पक्षता-त्वेन जनकत्वस्य लक्षणाप्रवेशादित्याहुः ।

तत्र विचार्यते — यत्र बाधाद्यवतारेण पक्षतापरामर्शाभ्यामनुमितिर्न जनिता, तत्र तदुभयसमूहालम्बनेऽतिव्याप्तिर्दुर्वारा । न च हेतुतावच्छेदकभेदा-दुभयोर्जनकत्वं विवक्षितं, समूहालम्बने च न तथा, विषयत्वस्यैव हेतुतावच्छे-दकत्वादिति वाच्यम् । सामान्यतस्तथात्वेऽपि स्वप्रत्यक्षे स्वत्वेन हेतुत्वादति-व्याप्तेस्तादवस्थ्यात् । किञ्च, पक्षताजन्यत्वमेवास्तु, व्यर्थमन्यत् । पक्षताप्रत्यास-त्तिकप्रत्यक्षे पक्षताया अहेतुत्वात्, सामान्यज्ञानस्यैव प्रत्यक्षहेतुत्वादिति वक्ष्य-माणत्वात् । अन्यथा पक्षतापरामर्शोभयप्रत्यासत्तिकप्रत्यक्षातिव्याप्तेर्दुष्परिहर-त्वात् । पक्षतायाः सिद्ध्यभावरूपायां योग्यप्रतियोगिकत्वेऽप्यप्रत्यक्षत्वाच्च न तत्प्रत्यक्षातिव्याप्तिवारणार्थमपि परामर्शपदसार्थकता । न च सिद्ध्यभावरूपपक्षता कुतो न प्रत्यक्षेति वाच्यम् । प्रतियोगियोग्यतामात्रस्याभावयोग्यतायामतन्त्र-त्वात् । अन्यथा गुरुत्वावच्छिन्नघटाभावस्यापि प्रत्यक्षत्वापातात् । तथा च प्रतियोगितावच्छेदकावच्छिन्नयोग्यता तन्त्रं वाच्या । सा च नेह । सि(द्ध!)-साधयिषानन्तरसिद्ध्यननुगुणानन्तरितकालस्य प्रतियोगितावच्छेदकप्रविष्टस्यायो-ग्यत्वादिति ।

अत्र प्रतिभाति — अनुभवत्वसाक्षाद्व्याप्यजात्या यज्जातीयज्ञानं प्रति पक्ष-तापरामर्शयोरन्यतरमन्तरेणान्यतरस्य न जनकत्वं, तत्त्वमिह विवक्षितम् । पराम-र्शपक्षताप्रत्यक्षादौ च न तथा । केवलस्यापि परामर्शादेः प्रत्यक्षजनकत्वात् । अनुमिति-त्वावच्छिन्नं प्रति तु मिलितयोरेव जनकत्वमिति न क्वाप्यतिव्याप्तिशङ्का । यद्वा

परापरभावापन्नकार्यतावच्छेदकवति कार्यतावच्छेदकैक्ये वा पक्षतापरामर्शयोः सहकारित्वं विवक्षितम्। समूहालम्बने तु न तथा। स्वप्रत्यक्षत्वस्य कार्यतावच्छेदकतया व्यभिचारेण व्याप्यव्यापकभावाभावादैक्याभावाच्च आर्थः समाजः। न चैवं सति पक्षतासहकृतव्याप्तिज्ञानजन्यत्वं तत्सहकृतपक्षधर्मताज्ञानजन्यत्वं वास्तु, किं विशिष्टज्ञानजन्यत्वेनेति वाच्यम्। विशिष्टज्ञानत्वावच्छिन्नकारणताया व्याप्तिज्ञानत्वाद्यवच्छिन्नकारणतापेक्षया भिन्नाया एव लक्षणप्रवेशात् तत्र च वैयर्थ्याभावात्। लक्षणद्वय एव तात्पर्यमित्यपि केचित्। वस्तुतस्तु — व्याप्तिविशिष्टपक्षधर्मताज्ञानत्वेन जनकता विवक्षितेति न परामर्शानुव्यवसायादावतिव्याप्तिः। न चैवं पक्षतासहकृतत्वविशेषणवैयर्थ्यम्। संशयोत्तरप्रत्यक्षातिव्याप्तिवारणाय तदावश्यकत्वात्। पक्षतापदेन च प्रकृते सिद्ध्यभाव एव विवक्षितः। स च योग्य एवेति तत्प्रत्यक्षातिव्याप्तिवारणाय परामर्शजन्यत्वमपि विशेषणमावश्यकमिति न कोऽपि दोष इति दिक्।

उपाध्यायास्तु — विरोध्यनुपरागकालीनस्वजनकस्वरूपयोग्यपक्षतोपरागकालीनपरामर्शाव्यवहितजन्यत्वं लक्षणार्थः। पक्षता च सिषाधयिषाविरहसहकृतसिद्ध्यनुमानातिरिक्तसाधकमानान्यान्याभावरूपा। (न च? सा च न) प्रत्यक्षरूपमानस्थले संशयोत्तरप्रत्यक्ष इति न तत्रातिव्याप्तिः। विरोधिज्ञानानुपरागकालीनत्वविशेषणाच्च बाधादिकालीनपरामर्शानुव्यवसायवारणम्। अव्यवधानेन च ततो न स्मृत्यनुव्यवसायाविति न तयोरप्यतिव्याप्तिः। अवान्तरवाक्यार्थज्ञानं च न महावाक्यार्थधीहेतुरिति न न्यायजन्यशाब्दज्ञानेऽप्यतिव्याप्तिः। उक्तोपमितावपि नातिव्याप्तिः। अनुमितिसामग्रीबलवत्त्वेनानुमितेरेव प्रथमं तत्रोत्पादात्। उत्तरकाले उपमित्युत्पत्तावप्यव्यवधानाभावात्। न च तत्पदादिना यत्र व्याप्तिविशिष्टपक्षधर्मत्वोपस्थितिः, तत्र पदार्थोपस्थितित्वेन शाब्दबुद्धौ परामर्शस्य हेतुत्वादतिव्याप्तिरिति वाच्यम्। तत्र परामर्शरूपसामग्र्याः शाब्दानुमितिसाधारण्येन विनिगमनाविरहेणैकस्यानुत्पत्तेः। परामर्शानन्तरमनुव्यवसायापत्त्या भिन्ने विषयेऽनुमितिसामग्रीबलवत्त्वस्य योग्यताज्ञानाद्यनुव्यवसायापत्त्या शाब्दधीसामग्रीबलवत्त्वस्यापि वाच्यत्वात्। यदा शाब्दबोधेच्छया तत्र शाब्दबोधोत्पत्तिः, तदा शब्दाव्यापारत्वमपि परामर्शे विशेषणमिति वदन्ति।

तच्चिन्त्यम्। एवं सत्यपि यो वह्निव्याप्यवान् स वह्निमानिति महाव्याप्ति-

प्रत्यक्षेऽतिव्याप्तेः । तत्रापि व्याप्यतावच्छेदकव्याप्यत्वप्रकारकज्ञानस्य सहचारज्ञानत्वेन हेतुत्वात् । पक्षतायुपरागसत्त्वाच्च । किञ्च, यत्रालोकेन वह्न्यनुमितीच्छा धूमे च व्याप्यत्वपरामर्शः, तत्रापि साध्यसिद्धीच्छाघटितपक्षतासत्त्वेऽपि लिङ्गान्तरसिषाधयिषाप्रतिबन्धेनानुमित्यनुत्पन्न† परामर्शानुव्यवसायातिव्याप्तिः । अपिचेदं वह्निज्ञानं प्रमा वह्निव्याप्यवति तज्ज्ञानत्वादित्यत्र यः परामर्शस्तत्रातिव्याप्तिः । न चेह लिङ्गज्ञानतया परामर्शस्य जनकत्वेऽपि वह्निज्ञानसत्त्वान्न पक्षतोपराग इति वाच्यम् । तज्ज्ञानस्याप्रामाण्यशङ्काकलङ्किततयासत्कल्पत्वात् । अन्यथा प्रामाण्यानुमितिवैयर्थ्यापातात्, तद्घटकार्थनिश्चयादिति पक्षधरमिश्राः ।

अत्रेदं शङ्क्यते — भिन्ने विषये प्रत्यक्षापेक्षया अनुमितिसामग्रीबलवत्त्वेन महाव्याप्तिप्रत्यक्षपूर्वमनुमित्युत्पादेन पक्षताविरहान्न तत्रातिव्याप्तिः । प्रत्यक्षमानाभावस्यापि पक्षताघटकत्वेन तत्सत्त्वेनापि तत्र पक्षताविरहादतिव्याप्त्यभावः । किञ्चेत्यपि न । तल्लिङ्गकतत्साध्यकसिद्धीच्छात्वेन पक्षताघटकत्वात् तस्य च तत्राभावात्, तल्लिङ्गकत्वपर्यन्तस्य पक्षत्वाघटकत्वेऽपि तावद्दूरपर्यन्तस्य लक्षणप्रवेश इत्युपाध्यायाभिप्रेतत्वात् । अपिचेत्यपि न । अप्रामाण्यशङ्काशून्यत्वपर्यन्तस्य गुरुत्वेन लाघवात् सिद्ध्यभावमात्रस्य पक्षतात्वात् तस्य च तत्राभावादतिव्याप्त्यभावादिति ।

अत्रेदं स्फुरति—यत्र महाव्याप्तिप्रत्यक्षम्, अनन्तरमनुमितिर्मेऽस्त्वितीच्छा, तत्र प्रथमं महाव्याप्तिप्रत्यक्षे बाधकाभावेन पक्षतासत्त्वेन चा(ति)व्याप्तेर्दुष्परिहरत्वात् । प्रत्यक्षमानाभावस्य पक्षताघटकत्वेऽपि समानविषयकप्रत्यक्षाभावस्यैव तद्घटकत्वात् तस्य तत्र सत्त्वात् । वस्तुतस्तु उपमित्सादिना यत्र प्रथममुपमितिः, तत्रोक्तविशेषणैरप्यतिव्याप्तेर्वारयितुमशक्यत्वात् तदर्थमपि विशेषणान्तरं देयमिति अनन्त(र?)विशेषणदानापेक्षया पक्षताज(नक?न्य)त्वमात्रमेव लघु लक्षणे प्रवेश्यतामिति मिश्राभिसन्धिः । अत एव बहुविशेषणप्रवेशोऽप्येवं न स्यादिति कण्ठरवेण तैरेवोक्तमिति दिक् ।

इदं पुनरवशिष्यते — व्याप्तिः साध्यसाधनाधिकरणभेदेन भिन्ना । तथा चैकसाध्यनिरूपितव्याप्तिप्रवेशेऽपरसाध्यकानुमित्यव्याप्तिः । सर्वव्याप्त्यनुगतं च न

---

† अनुत्पन्नानुमितिकत्यर्थः स्यात् ।

किञ्चिदेकमस्ति, येन तथा लक्षणप्रवेशः स्यादिति ।

अत्रेदं तत्त्वं — यत्किञ्चित्साध्यनिरूपितव्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यवृत्त्यनुभवत्वाव्यापकजातिमत्त्वस्य लक्षणार्थत्वाद् हेतुत्व चात्र तत्त्वेन विवक्षितमिति न काप्यतिव्याप्तिरिति । यद्वा तत्त्वेनापि जनकता न विवक्षिता । किन्तु येन परामर्शेनानुमितिमात्रमुत्पादितं, तत्परामर्शजन्यज्ञानवृत्त्यनुभवत्वाव्यापकजातिमत्त्वं लक्षणमिति न काप्यतिव्याप्तिः ।

गौडास्तु — परामर्शे चरमकारणत्वं लक्षणार्थः । चरमत्वं तु स्वोत्पत्त्युत्तरभाविप्रतिबन्धकाभावातिरिक्तानपेक्षत्वम् । न च प्रत्यक्षादौ परामर्शस्य तदस्ति । इन्द्रियसन्निकर्षादेस्तादृशस्यापेक्षणादिति न काप्यतिव्याप्तिरित्याहुः । तच्चिन्त्यम् । यत्रेन्द्रियसन्निकर्षानन्तरमुत्पन्नपरामर्शेन संशयोत्तरप्रत्यक्षजननं, तत्रातिव्याप्तेः । अनुभवत्वसाक्षाद्व्याप्यजात्या यज्जातीयज्ञानजनने काप्रि परामर्शो नाचरमं कारणमित्यर्थे तु गौरवम् । अनुभवत्वसाक्षाद्व्याप्यजात्या यज्जातीयज्ञानत्वावच्छिन्नं प्रति परामर्शः कारणमित्यस्यैव लघुत्वे(न?)नाविकलत्वात् । यत्तु संशयोत्तरप्रत्यक्षे विशेषदर्शनं हेतुरेव न, तस्यापरकोटिज्ञानप्रतिबन्धकमात्रत्वात् । कोटिप्रत्यक्षं तु सामान्यसामग्रीत एवेति न तत्रातिव्याप्तिरिति । तन्न । संशयोत्तरप्रत्यक्षे विशेषदर्शनस्याहेतुत्वे(न?) अपरकोटिज्ञानप्रतिबन्धकत्वस्यैवानुपपत्तेः । विरोधिज्ञानसामग्रीत्वस्यैव तत्प्रतिबन्धकत्वयुक्तित्वात् । संशयोत्तरप्रत्यक्षे गुणानुरोधेनावधारणादिव्यवस्थानुरोधेन च तद्धेतुत्वस्य सिद्धत्वात् । यथा चैतत् तथा प्रत्यक्षमणिसारे प्रतिपादितं, प्रतिपादयिष्यते चाग्र इति सङ्क्षेपः ॥

इत्यनुमितिलक्षणम् ।

अथ व्याप्तिवादः ।

तत्र व्याप्यवृत्तिसमानाधिकरणव्यधिकरणान्यतरधर्मावच्छिन्नग्राह्यसम्बन्धारोप्यकसाध्याभा(वा)वच्छिन्नाधिकरणवृत्तितज्जातीययावदभावप्रतियोगित्वं व्याप्तिः । वृक्षः संयोगी द्रव्यत्वादित्यत्र पक्षे साध्याभाववति तज्जातीयहेत्वभावासत्त्वेऽपि नाव्याप्तिः । तत्र साध्याभावस्याव्याप्यवृत्तित्वात् । केवलान्वयिसाध्यकेऽपि ना-

व्याप्तिः, व्यधिकरणधर्मावच्छिन्नसाध्याभावस्य तत्रापि प्रसिद्धतया तद्वति तज्जातीयहेत्वभावसत्त्वात्। समवायसम्बन्धेन वह्नित्वावच्छिन्नवह्न्यभाववति धूमत्वावच्छिन्नधूमाभावासम्बन्धिनि च धूमावयवे व्यभिचारेऽपि न तत्राव्याप्तिः, तदभावस्य ग्राह्यसम्बन्धानारोप्यकत्वात्। संयोगस्य तत्र ग्राह्यसम्बन्धत्वात्। यावत्पदेन धूमवान् वह्नेरित्यत्रापि नातिव्याप्तिः। व्यधिकरणधर्मावच्छिन्नधूमाभाववति तादृशवह्न्यभावेऽपि धूमत्वावच्छिन्नधूमाभाववत्ययोगोलके वह्नित्वावच्छिन्नवह्न्यभावासत्त्वेन व्यभिचारात्।

यद्वा ग्राह्यसम्बन्धारोप्यकव्याप्यवृत्तियत्समानाधिकरणसाध्यतावच्छेदकभिन्नसाध्यतावच्छेदकान्यूनानतिरिक्तवृत्तिधर्मानवच्छिन्नयावत्साध्यतावच्छेदकाश्रयमात्रप्रतियोगिकाभावत्वावच्छिन्ने व्यधिकरणधर्मावच्छिन्नप्रतियोगिकत्वं तत्र व्याप्तिः। समवायसम्बन्धावच्छिन्नवह्न्यभावस्य धूमसमानाधिकरणस्य व्यधिकरणधर्मावच्छिन्नाप्रतियोगिकत्वेऽपि न तत्राव्याप्तिः। तस्य ग्राह्यसम्बन्धानारोप्यकत्वात्। व्याप्यवृत्तित्वविशेषणाच्च नाव्याप्यवृत्तिसाध्यकाव्याप्तिः। धूमसमानाधिकरणयावद्वह्निमात्रप्रतियोगिकव्यासज्यवृत्त्यभावमादायाव्याप्तिवारणाय साध्यतावच्छेदकान्यूनानतिरिक्तवृत्तिधर्मानवच्छिन्नत्वं विशेषणम्। तस्य च साध्यतावच्छेदकान्यूनानातिरिक्तवृत्तिबहुत्वाद्यवच्छिन्नत्वात्। एवमपि व्यभिचारिणि धूमत्वावच्छिन्नधूमाभावस्य साध्यतावच्छेदकधूमत्वान्यूनानतिरिक्तवृत्तिधूमत्वावच्छिन्नतया तत्तद्धूमाभावस्य च यावत्साध्यतावच्छेदकधूमत्वाश्रयप्रतियोगिकत्वाभावेन व्यधिकरणधर्मावच्छिन्नधूमाभावस्यैवोक्तसकलविशेषणावच्छिन्नतया तत्र च व्यधिकरणधर्मावच्छिन्नप्रतियोगिकत्वसत्त्वादतिव्याप्तिः स्यादिति साध्यतावच्छेदकभिन्नत्वं साध्यतावच्छेदकान्यूनानतिरिक्तवृत्तिधर्मविशेषणम्। तथा च धूमत्वावच्छिन्नाभावस्यापि साध्यतावच्छेदकभिन्नसाध्यतावच्छेदकान्यूनानतिरिक्तवृत्तिधर्मानवच्छिन्नत्वसत्त्वेन विशेषणान्तरसत्त्वेन व्यधिकरणधर्मावच्छिन्नप्रतियोगिकत्वस्य च तत्राभावेन न तत्रातिव्याप्तिः। पर्वतीयधूमसमानाधिकरणमहानसीयवह्न्यभावस्य न व्यधिकरणधर्मावच्छिन्नप्रतियोगिकत्वमित्यव्याप्तिभिया यावत्त्वं विशेषणम्। मात्रपदं च घटवह्न्युभयवृत्तिद्वित्वावच्छिन्नाभावमादायाव्याप्तिवारणाय। व्यभिचारिणि नैवम्। वह्निसमानाधिकरणधूमाभावस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगित्वाभावात्। केवलान्वयिनि च नाव्याप्तिः। व्यधिकरणधर्मावच्छिन्नाभावस्य तत्रापि प्रसिद्धत्वादिति केचित्।

इदं तु लक्षणद्वयं व्यधिकरणधर्मावच्छिन्नप्रतियोगिकाभावं दूषयन् मणिकृत् तात्पर्यतो दूषयाञ्चक्रे। तथाहि — घटनिर्विकल्पकाद् घटाभावाग्रहेण प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानं फलीभूतज्ञानसमानप्रकारकप्रतियोगिज्ञानं वाभावज्ञानं प्रति कारणं वाच्यम्। न चैतद् व्यधिकरणधर्मावच्छिन्नाभावेऽस्ति। शशीयत्वावच्छिन्नतया शृङ्गस्याज्ञानात्। शृङ्गं शशीयं नेति प्रतीतौ सत्यामेवैतादृशाभावप्रतीतेः। तस्माच्छृङ्गे शशीयत्वाभावमात्रं विषय इति।

अत्र वदन्ति — आहार्यानाहार्यसाधारणप्रतियोगितावच्छेदकविशिष्टज्ञानमेवाभावज्ञानहेतुः। तथा च विशेषदर्शनेऽप्याहार्यप्रतियोगितावच्छेदकवैशिष्ट्यज्ञानादस्तु व्यधिकरणधर्मावच्छिन्नाभावधीः। विशेषादर्शने त्वनाहार्यभ्रम एव प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानरूपः। न च तत्राभावबुद्ध्यसम्भवः, प्रतियोगितावच्छेदकविशिष्टप्रतियोगिन एवाधिकरणे ज्ञानादि(ति) वाच्यम्। गवि शृङ्गप्रत्ययदशायामेव शशीयत्वावच्छिन्नतया गृह्यमाणशृङ्गाभावधीसम्भवात्। न च शृङ्गत्वावच्छिन्नाभावो धीविषयो न तु व्यधिकरणधर्मावच्छिन्नाभाव इति वाच्यम्। सामग्रीसत्त्वे तद्विषयतायामपि बाधकाभावादिति।

अत्राहुः — ससम्बन्धिकपदार्थग्रहे सम्बन्धितावच्छेदकविशिष्टसम्बन्धिज्ञानमनाहार्यं हेतुः। कथमन्यथाहार्यघटज्ञानाद् न घटसंयोगप्रत्यक्षम्। अत एव शृङ्गे शशीयत्वग्रहकालेऽपि शशशृङ्गं नास्तीति प्रतीतिर्न विशिष्टाभावमवगाहते। शृङ्गे शशीयत्वग्रहकालीनप्रतीतेस्तदाकारायाः कारणबाधेन शृङ्गे शशीयत्वाभावमात्रविषयत्वकल्पनात्। तस्यास्तद्विषयत्वेनैवोपपत्तेः। नहि समानाकारप्रतीतेः समयपुरुषादिभेदाद् विषयभेदं क्वाप्याकलयाम इति न क्वापि व्यधिकरणधर्मावच्छिन्नाभावः प्रतीतिविषय इति।

अत्र शङ्क्यते — संयोगस्थले पृथक्कल्पनावश्यं वाच्यैव। अन्यथातीन्द्रियस्यापि संयोगः प्रत्यक्षः स्यात्। तथा च तत्रानाहार्यप्रतियोगिप्रत्यक्षत्वेन विशेषहेतुत्वेऽपि सामान्यसामग्र्यामनाहार्यत्वविशेषणप्रवेशो गौरवपराहतो ग्रस्तश्च व्यभिचारेण। आहार्यज्ञानानुव्यवसाये आहार्यज्ञानस्यैव सम्बन्धिज्ञानात्मकस्य हेतुत्वात्। न च तत्राप्याहार्यधीजनकमनाहार्यविशेषणज्ञानमेव हेतुरितिं वाच्यम्। विनश्यदवस्थविशेषणधीजन्यस्याहार्यज्ञानस्यानुव्यवसाये तथापि व्यभिचारात्। आहार्यज्ञानसम्बन्धिविशिष्टगोचरत्वाभावेन पूर्वविशेषणज्ञानस्य सम्बन्धिज्ञानत्वाभा-

वाच्य । यच्चोक्तं समानाकारप्रत्ययस्य समानविषयत्वनियम इति । तदप्यसत् । विभक्ताविति प्रत्ययस्य विभागसत्त्वकाले तद्विषयकत्वात् । तन्नाशकाले च संयोगनाशविषयकत्वात् । संयोगवन्नेति प्रतीतेर्द्रव्यगुणाद्यधिकरणभेदेन भिन्नविषयकत्वाच्च । यदपि योग्यानुपलब्ध्यभावान्न व्यधिकरणधर्मावच्छिन्नाभावधीः । तथाहि—प्रतियोगितद्व्याप्येतरयावत्प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्युपलम्भकसमवधाने सत्युपलब्ध्यभावोऽभावधीहेतुः । इह तु प्रतियोगितावच्छेदकविशिष्टप्रतियोग्युपलम्भस्य भ्रमतया दोषोऽप्युपलम्भको वाच्यः । तथा च तत्सत्त्वेऽनुपलब्धिरेव न, तदसत्त्वे च योग्यतैव नेति कथमभावधीः । न च प्रतियोग्युपलम्भकसमवधानमात्रं योग्यता, न तु प्रतियोगितावच्छेदकावच्छिन्नोपलम्भकपर्यन्तमिति वाच्यम् । तथा सति गुरुत्वावच्छिन्नघटाभावप्रत्यक्षतापत्तेः । तदुक्तमाचार्यचरणैः —

"दृष्टोपलम्भसामग्री शशशृङ्गादियोग्यता ।
न तस्यां नोपलम्भोऽस्ति नास्ति सानुपलम्भने ॥"

इति । तस्माद् व्यधिकरणधर्मावच्छिन्नाभावस्थले विशेषणाभावमात्रं विषय इत्येव (जायत ? ज्याय) इति । तदप्यसत् । प्रतियोगितद्व्याप्येतरेत्यस्य साधारणप्रतियोग्युपलम्भकेत्यर्थो वाच्यः । अन्यथा संयोगादिनाशजन्यसंयोगाभावप्रत्यक्षाव्याप्तेः । तथा च दोषस्याप्यसाधारण्येन तत्समवधानस्य योग्यतायामप्रवेशेनोक्तदोषाभावात्, मणिकृन्मते प्रतियोगिसत्त्व(प्रसञ्जन)प्रसञ्जितप्रतियोगिकानुपलब्धेरादराच्च । न च शशीयत्वावच्छिन्नशृङ्गाप्रसिद्ध्या यदि शशीयत्वावच्छिन्नशृङ्गं गवि स्यादित्याकारमापादकं कथमिति वाच्यम् । शशीयत्वं शृङ्गे आरोप्य तद्विशिष्टशृङ्गस्य गव्यापादनसम्भवात् ।

केचित्तु नेहानुपलब्धिरस्ति । अनाहार्यप्रतियोगितावच्छेदकप्रतियोगिसंसर्गज्ञानाभावरूपत्वात् तस्याः । शृङ्गं शशीयं नेति विशेषदर्शनवतः तादृशज्ञानरूपप्रतियोग्यप्रसिद्ध्या कथं तदभावः । न च परकीयज्ञानमादाय प्रसिद्धस्य प्रतियोगिनः तदात्मन्यभावः कारणमिति वाच्यम् । तथा सति पराज्ञातव्यक्तिद्वये परस्परव्यावृत्तधर्मावच्छिन्नपरस्पराभावप्रत्ययो न स्यादिति तत्र विशेषणाभावमात्रं प्रतीतिविषय इत्यन्यत्रापि तथा समानाकारप्रतीतेः समानविषयकत्वादिति । तदपि

---

१. 'म्भस' क. पाठः.

चिन्त्यम् । तत्कालीनतत्पुरुषीयप्रतियोग्याधिकरणगोचरतदिन्द्रियजन्यसंसृष्टबुद्धावनाहार्यत्वाभावस्यैवानुपलम्भत्वात् । तस्य च प्रकृतेऽपि सम्भवात् । यथा चैतत् तथा प्रत्यक्षमणिसारे व्यक्तमुक्तम् । किं बहुना, पराज्ञातव्यक्तिद्वयस्थले उक्तानुपलम्भरूपहेतुबाधेन तादृशप्रतीतेर्विशेषणाभावविषयकत्वकल्पनेऽप्यन्यत्र विशिष्टाभावविषयकत्वे बाधकाभावः । अन्यथा प्रत्यभिज्ञानस्य शब्दादौ तज्जातीयविषयकत्वकल्पनाद् घटादावपि तथा स्यादिति जितं क्षणिकतावादिनेति ।

यदपि च प्रतियोगितावच्छेदकप्रकारकप्रतियोग्युपलब्ध्यभावो नाभावधीहेतुः । कम्बुग्रीवादिमति घटत्वं नेति धीकालेपि अत्र घट इति ज्ञाना(न)न्तरं कम्बुग्रीवादिमान्नास्तीति प्रतीत्यनापत्तेः । गौरवेण कम्बुग्रीवादिमत्त्वस्य घटाभावप्रतियोगितानवच्छेदकत्वात् । प्रतियोगितावच्छेदकघटत्वावाच्छिन्नस्य चोपलम्भात् । तस्मात् प्रतियोगिमात्रवृत्तित्वेन गृह्यमाणधर्मप्रकारकप्रतियोगिज्ञानाभावः कारणं वाच्यः । न च व्यधिकरणधर्मावच्छिन्नाभावे तदस्ति । शृङ्गमात्रवृत्तित्वेन गृह्यमाणशृङ्गत्वावच्छिन्नस्यैवोपलम्भादिति । तदपि न । एवं सति घटत्वं घटभिन्नेऽप्यस्तीति भ्रमदशायामत्र घट इति ज्ञानेऽपि घटो नेहेति प्रतीत्यापत्तेः । प्रतियोगिमात्रवृत्तित्वेन घटत्वस्याज्ञानात् । तस्मात् फलीभूताभावप्रतीतौ प्रतियोग्यंशे यावान् प्रकारः, तन्मध्ये तस्याधिकाधिकरणत्वेनागृहीतो यत्किञ्चित्तद्धीप्रकारः, तत्प्रकारकप्रतियोगिज्ञानाभावोऽभावधीहेतुः । अत एव घटोऽस्तीति ज्ञानानन्तरं प्रमेयघटो नास्तीति न प्रतीतिः । अभावप्रतीतिप्रकारयोः प्रमेयत्वघटत्वयोराधिकाधिकरणत्वेनागृहीतघटत्वप्रकारकज्ञानसत्त्वात् । अत एव च घटोऽस्तीति ज्ञानानन्तरं नीलघटो नेहेति मतिः । घटत्वप्रकारकप्रतियोगिज्ञानेऽपि घटत्वस्य नीलत्वाधिकाधिकरणकत्वेन ग्रहात् । अस्ति चैतद् व्यधिकरणधर्मावच्छिन्नाभावेऽपि । अभावप्रतीतिप्रकार (क?) शशीयत्वाधिकाधिकरणकत्वेन गृहीतशृङ्गत्वविशिष्टशृङ्गग्रहेऽपि विशिष्टाभावसत्त्वादिति ।

यच्च कश्चिदवोचत्—शृङ्गे शशीयत्वाभावग्रहात् कथमभावप्रतीतेः प्रतियोगिनि तद्वैशिष्ट्यधीरिति । तदप्यसारम् । अभावप्रतीतावपि तद्वैशिष्ट्यज्ञानस्या-

---

१. 'कप्रकारकप्र' क. पाठः. २. 'दित्वस्य' ख. पाठः. ३. 'क' ख. पाठः. ४. 'त्वात्वाधिक' क. पाठः. ५. 'त्वाधिक' क. पाठः. ६. 'णत्वे' क. पाठः.

हार्यत्वात् । तत्र च बाधस्याविरोधित्वादिति न किञ्चिदेतत् ।

यत्तु — एवं सति घटत्वावच्छिन्ने पटे द्रव्यत्वं नेति प्रतीत्या व्यधिकरणधर्मावच्छिन्नाधिकरणताकोऽप्यभावः सिध्येदिति यथा तत्राधिकरणे विशेषणाभावमात्रं विषयः तथेह प्रतियोगिन्यपि । अन्यथानन्ताभावकल्पनापत्तेरिति । तदपि न । अधिकरणतावच्छेदकभेदादभावभेदस्य प्रतियोगितावच्छेदकभेदादिवानभ्युपगमेन प्रतिबन्धभावात् । भवतु वा प्रतीतिबलात् सोऽपि, किं नश्छिन्नम्, अनुभवेन वस्तुव्यवस्थायां गौरवस्याकिञ्चित्करत्वात् । अन्यथा बहु व्याकुलीस्यादित्यलं बहुना ।

यच्च मान्यैरुक्तं — जनकीभूतारोपविषयस्यैव प्रतीतिविषयाभावप्रतियोगित्वमिति नियमः । न चेह शृङ्गस्यारोपः, तस्य गवि सत्त्वात् । न च विशिष्टस्यारोपोऽसत्त्वादिति वाच्यम् । विशिष्टस्यानतिरेकेण विशेषणमात्रस्यैवारोप इति तस्यैवाभावो धीविषय इति । तदपि न भव्यमिव । शुद्धविशेषणविशेष्ययोर्विशिष्टव्यवहाराभावेन विशेषणावच्छिन्नविशेष्यस्य विशिष्टतया वाच्यत्वात् । तस्य च विशेष्यमात्रसत्त्वेऽप्यसत्त्वादारोपसम्भवात् । न च विशेषणावच्छिन्नविशेष्यस्य प्रकृतेऽत्यन्तासत्त्वान्नारोप इति वाच्यम् । विशेष्ये विशे(षा?षणा)रोपेण विशिष्टप्रसिद्धौ तदनन्तरं तस्याप्यारोपे बाधकाभावात् । किञ्च, आरोपपदेनाहार्यज्ञानमेव वाच्यम् । अन्यथा घटाभावभ्रमे विद्यमानतया घटस्यानारोपेण भासमानाभावप्रतियोगित्वं न स्यात् । न स्याच्चाभावबुद्धेर्भ्रमत्वम् । तथा चाहार्यज्ञानं शृङ्गसत्त्वेऽप्यविरुद्धमेवेति व्यधिकरणधर्मावच्छिन्नाभावे बाधकाभाव इति ।

अत्राहुः — प्रतियोगित्वं स्वरूपसम्बन्धः । स च जनकत्वगर्भः । न चासतः शशीयत्वावच्छिन्नशृङ्गस्य जनकता । पूर्ववर्तित्वाभावादिति न व्यधिकरणधर्मावच्छिन्ने प्रतियोगितासम्भव इति न तादृशाभावसिद्धिरिति ।

अत्र शङ्क्यते । प्रतियोगित्वं शृङ्गे न तु विशिष्टे । येनोक्तदोषाशङ्का स्यात् । तन्निष्ठायां च प्रतियोगितायां शशीयत्वमवच्छेदकमात्रं प्रतीतिबलादास्थीयत इति ।

अत्रायमभिसन्धिः — कारणतावच्छेदकरूपेण कारणस्य पूर्वसत्ता मृग्यते ।

---

१. 'घ्या' क. पाठः.

अन्यथानिष्प्रसङ्गात् । तच्चात्र न सम्भवति विशिष्टस्यासत्त्वात् । यद्वा लाघवेन प्रतियोगिनाश्रयेण सहाभावस्य विरोध इति न शृङ्गमात्रवृत्तिः प्रतियोगिता । तथा सत्यभावावत्त्वप्रसङ्गात् । प्रतियोगिनस्तस्य सत्त्वात् । तस्मादवच्छेदकावच्छिन्ननिष्ठा प्रतियोगिता वाच्या । तच्च प्रकृते न सदिति किं प्रतियोगिता समाश्रयेदिति ।

वस्तुतस्तु भावाभावयोर्विरोधस्य प्रमाणसिद्धतया यथासम्भवं विरोधः कल्प्यत इति कथमेकत्र शृङ्गतदभावयोः सम्भवः । नास्तीति प्रतीतेश्च विशेषणाभावविषयत्वेनाप्युपपत्तेः । यत्र चोपपत्तिर्नास्ति तत्रागत्या सामानाधिकरण्यं तयोः स्वीक्रियत एव संयोगतदभावयोरिव । तदनुरोधाच्चावच्छेदैक्यमपि तत्र विरोधे तन्त्रमभ्युपेयते । अत एव तद्वति सम्बन्धान्तरेण तदभाव इत्यपि नास्ति । तत्रापि सम्बन्धाभावमात्रविषयतयैव प्रतीतिरूपपत्तौ विरोधस्यात्यागात् । अत एव व्यासज्यवृत्तिप्रतियोगिकाभावोऽपि न । तद्वति साहित्याभावेनैवोपपत्तेरिति वदन्ति ।

इदं त्वचशिष्यते - एवमपि व्यधिकरणधर्मावच्छिन्नान्योन्याभावे बाधकाभावः । प्रतियोगितावच्छेदकेन सह तस्य विरोधात् । तस्य च प्रकृतेऽप्यविकलत्वादिति ।

अत्र प्रतिभाति - तत्रापि प्रतियोगितावच्छेदकेन सह न विरोधः । किन्तु प्रतियोगिनैव, लाघवात् । सर्वत्रारोप्येण सह विरोधाङ्गीकारात् । आरोप्यता च क्वचित् तादात्म्यावच्छिन्नस्य, क्वचित् संसर्गावच्छिन्नस्य प्रतियोगिन इत्यन्यदेतत् । न च शशीयत्वं शृङ्गतादात्म्यम् । तस्य स्वाश्रयासाधारणधर्मत्वाभावात् । किं बहुना, तदसाधारणो धर्मस्तत्प्रतियोगिकान्योन्याभावमात्रे विरोधी । स च धर्म इह शृङ्गत्वमिति केनापि रूपेण तद्वति न शृङ्गान्योन्याभावः । अत एव वृक्षे न संयोगवदन्योन्याभावः । असाधारणधर्मस्य तादृक्षत्वस्य प्रतिबन्धकत्वात् । कालादौ च जगदाधारताहानिभिया कालत्वेन स्वान्योन्याभावाधारत्वं, न तु देशतया । तथात्वे कालः कालो नेति मत्यापत्तेरिति । अत्र च भूतले शशशृङ्गं नास्तीति प्रतीतेर्व्यधिकरणधर्मावच्छिन्नाभावविषयकत्वे बाधकाभावः । शृङ्गस्य प्रतियोगिनस्तत्रासत्त्वादिति (देश्यमानादेयं?)§ गवि तादृशप्रतीतिविशेषणाभावविषयत्वेऽन्यत्रापि तथात्वात् समानप्रकारकप्रतीतिबाधकं विना समानविषयकत्वनियमादिति ।

---

१. 'दर्श्यव' क. पाठः. २. 'दर्श्यम्।' क. पाठः.

§ 'देश्यमनादेयम्' इति पाठ्यं भाति ।

अस्मत्पितृचरणास्तु — अवच्छेदकत्वं स्वरूपसम्बन्धो वान्यद् वा सर्वथाऽवच्छेद्यानतिरिक्तवृत्तेरेव । अन्यथा द्रव्यत्वस्य दण्डजन्यतावच्छेदकत्वं मेयत्वस्य घटजनकतावच्छेदकत्वं च स्यादिति भूयानतिप्रसङ्ग आपद्येत । तथा च शशीयत्वं कथं शृङ्गाभावप्रतियोगितावच्छेदकं, तदवृत्तित्वात् । अत एव मणिकृतापि युक्तं 'प्रतियोग्यवृत्तिश्च धर्मो न प्रतियोगितावच्छेदक' इति । न च व्यधिकरणधर्मावच्छिन्नविषयताप्रतियोगिज्ञानत्वस्य भ्रमलक्षणत्वेनाभिधानादिदमसङ्गतमिति वाच्यम् । तत्रावच्छिन्नेत्यस्य प्रकारकेत्यर्थात् । वस्तुतोऽतिरिक्तविषयता नास्त्येव । अनतिरिक्तायां तु समानाधिकरणेदन्त्वाद्यवच्छेदकं, न तु व्यधिकरणो धर्मः । न च प्रमुष्टत(त्त्वा?त्ता)कभ्रान्तस्मृतौ समानाधिरणधर्मस्याप्रकारत्वात् किमवच्छेदकमिति वाच्यम् । तत्राप्रकारीभूतस्याप्यनतिप्रसक्तधर्मस्यावच्छेदकत्वादित्याहुः ।

तस्माद् व्यधिकरणधर्मावच्छिन्नाभावघटितं व्याप्तेरसम्भवीति लक्षणान्तरं मणिकृत ऊचुः । तथाहि — "प्रतियोग्यसमानाधिकरणयत्समानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकावच्छिन्नं यन्न भवति, तेन सह तस्य सामानाधिकरण्यं तदवच्छिन्नस्य सर्वस्यापि व्याप्तिरि"ति ।

अत्र वदन्ति — तत्तद्भूससमानाधिकरणविशेषाभावप्रतियोगितावच्छेदकतत्तद्वह्नित्वावच्छिन्नत्वाद् वह्नीनां प्रसिद्धानुमानाव्याप्तिः । न च यन्न भवतीत्यस्य यदवच्छिन्नं न भवतीत्यर्थः, तथा च वह्नित्वावच्छिन्नं प्रति तत्तद्वह्नित्वं नावच्छेदकमिति नाव्याप्तिरिति वाच्यम् । तत्तद्वह्नित्वस्य वह्नित्वावच्छिन्नानतिप्रसक्तत्वेन तदवच्छिन्नं प्रत्यप्यवच्छेदकत्वादिति ।

अत्र पक्षधरमिश्राः — नञ्व्यत्यासेन प्रतियोगितानवच्छेदकावच्छिन्नत्वमर्थः । तथा च तत्तद्वह्नित्वस्य प्रतियोगितावच्छेदकत्वेऽपि साध्यतावच्छेदकवह्नित्वस्य प्रतियोगितानवच्छेदकत्वाद् नाव्याप्तिशङ्केत्याहुः ।

अत्र शङ्क्यते — एवं सति व्यभिचारिण्यतिव्याप्तिः । धूमत्वस्यापि तादृशात्यन्ताभावप्रतियोगितानवच्छेदकत्वात् । प्रतियोगितायाः तत्तत्स्वरूपरूपायाः धूमत्वानवच्छेद्यत्वात् । अतिरिक्तवृत्तेरनवच्छेदकत्वात् । न च तादृशात्यन्ताभावप्रतियोगितावच्छिन्नप्रतियोग्यनवच्छेदकत्वं विवक्षितम् । तच्च धूमत्वे नास्त्येव । तादृशात्यन्ताभावप्रतियोगिसकलधूमवृत्तितया धूमत्वस्य तादृशावच्छेदकत्वसत्त्वा-

---

१. 'गित्वा' क. पाठः.

दिति वाच्यम् । एवं सत्यव्याप्तेर्दुष्परिहारत्वात् । धूमवन्निष्ठयावद्वह्निविशेषाभावप्रतियोगिसर्ववह्निवृत्तितया वह्नित्वस्यापि प्रतियोगितात्वावच्छिन्नप्रतियोग्यवच्छेदकत्वादिति ।

अत्र नव्याः — एकत्वमभावविशेषणम् । तथा च हेतुसमानाधिकरणैकाभावप्रतियोगितानवच्छेदकत्वमर्थः । तच्च धूमत्वस्य नास्ति । वह्निसमानाधिकरणधूमसामान्याभावप्रतियोगितावच्छेदकत्वात् । वह्नित्वे च नैवम् । धूमवति वह्निसामान्याभावाभावेन तथाभूतैकाभावप्रतियोगितानवच्छेदकत्वात् तस्य । अत एव सामान्याभावसाधनमपि मणिकृतो युज्यत इति नाव्याप्तिर्न वातिव्याप्तिरिति वदन्ति ।

अत्रेदं चिन्त्यम् — अयमन्धकाराभाववानेतत्त्वादिति व्यभिचारिण्यतिव्याप्तिः । अन्धकारस्य यावद्द्रव्यभूतरूपवत्तेजस्संसर्गाभावस्यैकत्वाभावेन हेतुसमानाधिकरणैकाभावप्रतियोगितानवच्छेदकत्वाद् अन्धकाराभावत्वस्य । न चोद्भूतरूपवत्तेजस्त्वावच्छिन्नसामान्याभाव एक एवान्धकार इति न तत्रातिव्याप्तिरिति वाच्यम् । कस्यचित् तेजसः प्रागभावस्य कस्यचिद् ध्वंसस्य सत्त्वेनात्यन्ताभावासत्त्वात् । अत्यन्ताभावस्य प्रतियोगिनेव प्रागभावादिनापि विरोधात् । ननु विरोधः फलबलकल्प्यः । स च घटज्ञाने तदधिकरणे तदत्यन्ताभावाग्रहात् तेन सहास्तु । न तु प्रागभावादिनापि, मानाभावात् । प्रत्युत ध्वंसप्रागभावकाले इदानीं कपालेषु घटो नास्तीति प्रतीत्या अविरोध एवेति चेद्, एवं सत्यपसिद्धान्तापातात् । अस्तु वान्धकारः सामान्याभावः । तथापि यत्र तावद् विशेषाभावः साध्यः, तत्रैव व्यभिचारिण्यतिव्याप्तिर्दुर्वारा । किं बहुना, यदा घटत्वं तदा घट इति कालिकव्याप्त्यतिव्याप्तं लक्षणम् । घटत्वसमानकालीनैकध्वंसप्रतियोगितानवच्छेदकत्वाद् घटत्वस्य । ध्वंसस्य सामान्याभा(वा? वत्वा)भावेन एकविशेषाभावस्यैव प्राप्तेः, तत्प्रतियोगितायाश्चैकघटमात्रवृत्तित्वेनातिरिक्तवृत्तिघटत्वानवच्छेद्यत्वादिति । तस्मादिदमत्राकृतम् — एकत्वं हेत्वधिकरणविशेषणम् । तेनैकहेत्वधिकरणनिष्ठयावदभावप्रतियोगितात्वावच्छिन्नानवच्छेदकत्वमर्थः पर्यवस्यति । स च सद्धेतावस्त्येव । एकधूमाधिकरणमहानसवृत्त्यत्यन्ताभावसमूहप्रतियोगितानाश्रयमहानसीयवह्निवृत्तित्वेन वह्नित्वस्य तथाभूताभावप्रतियोगितानवच्छे-

१. 'गित्वा' क. पाठः. २. 'वः । य' क. पाठः.

दकत्वात् । अतिरिक्तवृत्तेरनवच्छेदकत्वात् । व्यभिचारिणि च नैवम् । एकद्व्यधिकरणायोगोलकवृत्त्यत्यन्ताभावानां यावद्धूमप्रतियोगिकानां याः प्रतियोगितास्तासां धूमत्वावच्छेद्यत्वात् । तादृशप्रतियोगितात्मावच्छिन्नानतिरिक्तवृत्तित्वाद् धूमत्वस्य । एवं कालिकव्याप्तावपि नातिव्याप्तिशङ्केति । नन्वेकाधिकरणकत्वमव्यावर्तकं, सर्वेषां प्रत्येकमेकत्वादिति चेद्, न । यदधिकरणनिष्ठाभावप्रतियोगिवृत्तित्वं, तदधिकरणनिष्ठाभावाप्रतियोगिवृत्तिभिन्नत्वस्योक्तप्रतियोगितावच्छेदकत्वस्यात्र विवक्षितत्वादिति न किञ्चिदनुपपन्नम् ।

यत् त्वेकत्वं हेतुविशेषणमेवेति नोक्तव्याप्तिरिति, तन्न । इयं गन्धवती पृथिवीत्वादित्यादौ विशेषाभावमादायाव्याप्तेस्तथाप्यनुद्धारात्, हेतोरेकत्वादिति न किञ्चिदेतत् । अत्र चायमेतत्कपिसंयोगी एतत्त्वादित्यादावव्याप्तिः । एतत्त्वस्य हेतुसमानाधिकरणतत्कपिसंयोगाभावप्रतियोगितावच्छेदकत्वादेतत्संयोगत्वस्येत्यत उक्तं प्रतियोग्यसमानाधिकरणेति । तथा च तदभावस्य प्रतियोगिसमानाधिकरणत्वात् प्रतियोग्यसमानाधिकरणघटाद्यभावप्रतियोगितानवच्छेदकत्वं तत्रास्त्येवेति नाव्याप्तिः ।

केचित्तु — यावद्विशेषाभावव्यापकत्वात सामान्याभावस्य तद्वति संयोगसामान्याभावोऽप्यस्तीति तमादाय वृक्षः संयोगी द्रव्यत्वादित्यत्राव्याप्तिवारणाय तत्पदमिति वदन्ति । तच्चिन्त्यम् । वृक्षे संयोगसामान्याभावसत्त्वे वृक्षे संयोगो नेति धीः स्यात्, न त्वग्रे वृक्षे संयोगो नेति । न चैकावच्छिन्नयावद्विशेषाभावः सामान्याभावव्यञ्जक इति सत्त्वेऽपि संयोगसामान्याभावस्तत्रैकावच्छिन्नयावद्विशेषाभावाभावान्न प्रतीयत इति वाच्यम् । एकावच्छिन्नयावद्विशेषाभावस्य तत्सत्तायामेव नियामकत्वात् । अन्यथा यत्किञ्चिद्विशेषाभाव एव सामान्याभावव्याप्योऽस्तु, एकावच्छिन्नयावद्विशेषाभावरूपव्यञ्जकविरहान्न तस्योपलब्धिरिति तत्केवलान्वयित्वमेव किं न ब्रूयाः । ननु वृक्षे संयोगसामान्याभावोऽङ्गीकार्य एव । वृक्षत्वावच्छेदेन संयोगस्य कस्याप्यभावेन वृक्षत्वस्य संयोगाभाववृत्त्यवच्छेदकत्वात् । यो यद्वृत्त्यवच्छेदको न भवति, स तदभाववृत्त्यवच्छेदक इति व्याप्तेः । अन्यथा द्रव्यभिन्नत्वस्य गुणवृत्त्यनवच्छेदकस्यापि गुणाभाववृत्त्यनवच्छेदकत्वापातादिति चेद्, न । त्वदुक्तव्याप्तेः प्रमेयत्वादौ व्यभिचारात् । तस्य द्रव्यत्ववृत्त्यनवच्छेदकस्य द्रव्यत्वाभाववृत्त्यनवच्छेदकत्वात् । किञ्च, वृक्षत्वं

संयोगवृत्त्यवच्छेदकमेवास्तु। न च संयोगाभावसमानाधिकरणत्वात् कथं संयोगवृत्त्यवच्छेदकं तद्, अतिप्रसक्तत्वादिति वाच्यम्। हन्तैवं संयोगसमानाधिकरणत्वात् कथं संयोगाभावावच्छेदकमित्यपि दीयतां दृष्टिः। किं बहुना, वृक्षत्वावच्छेदेनाकाशादिसंयोगसत्त्वात् कथं तदवच्छेदेन संयोगसामान्याभावः। यावद्विशेषाभावमन्तरेण सामान्याभावसत्त्वस्य केनाप्य(न)ङ्गीकारात्। न च संयोगत्वेनैवाव्याप्यवृत्तित्वात् कथमाकाशादिसंयोगोऽपि वृक्षं व्याप्य वर्तताामिति वाच्यम्। अव्याप्यवृत्तित्वस्य स्वाभावसमानाधिकरणत्वरूपस्यान्यथानुपपत्त्यैव कल्पनात्। तस्याश्च मूले हरिसंयोगो न शाखायामित्यादिप्रतीत्या द्रव्यसंयोग एव भावेन तत्राव्याप्यवृत्तिताकल्पनात्। न चान्यथानुपपत्त्या क्वचिदव्याप्यवृत्तितायां कल्प्यमानायां संयोगत्वेनैव तत्कल्पना लाघवात् प्रसरतीति वाच्यम्। एतादृशकल्पनायां लाघवस्याकिञ्चित्करत्वात्। अन्यथा संयोगत्वापेक्षयापि गुणत्वसत्त्वादिकं सामान्यत्वादव्याप्यवृत्तितावच्छेदकमस्त्वित्येव किं न रोचयेः। यदि च वृत्तिमत औत्सर्गिकं व्याप्यवृत्तित्वमापवादिकमव्याप्यवृत्तित्वमिति न गुणत्वं तत्रावच्छेदकमभ्युपेषि, तदा संयोगत्वेऽपि दृक्पातस्तादृशोऽस्तु। अस्तु वा संयोगत्वेनाव्याप्यवृत्तितानियमः, तुष्यतु दुर्जन इति न्यायात्। तथापि नानुपपत्तिः। स्वाधिकरणनिष्ठाभावप्रतियोगित्वमव्या(प्य)वृत्तित्वम्। तच्चाकाशवृक्षसंयोगस्य घटाद्यवच्छिन्नाकाशनिष्ठाभावप्रतियोगित्वेनैवोपपन्नं, लाघवेन स्वाधिकरणनिष्ठाभावप्रतियोगित्वस्यैवाव्याप्यवृत्तित्वपदा(र्था ? र्थत्वा)त्। यावदधिकरणगर्भत्वे गौरवादित्यास्तां विस्तरः। अत एव वृक्षे मास्तु संयोगसामान्याभावः, तथापि वृक्षः संयोगी द्रव्यत्वादित्यत्रैवाव्याप्तिवारकं प्रतियोग्यसमानाधिकरणपदम्। द्रव्ये यावद्विशेषाभावसत्त्वेन संयोगत्वस्य तत्प्रतियोगितावच्छिन्नं प्रत्यवच्छेदकत्वादव्याप्तिसम्भवादित्यपि कस्यचित् प्रलपितमपास्तम्। वृक्षे यावत्संयोगाभावस्याभावात्। आकाशादिसंयोगस्य वृक्षत्वावच्छेदेनैव सत्त्वादित्युक्तत्वात्। तस्मादयमेतत्संयोगी एतत्त्वादित्यादावव्याप्तिवारणाय प्रतियोग्यसमानाधिकरणपदमित्येव तत्त्वम्।

नन्वत्र व्याप्तिरेव नास्ति, कथमव्याप्तिः, अलक्ष्यत्वात्। व्याप्तिसत्त्वे संयोगावच्छिन्नप्रदेश इव संयोगाभावावच्छिन्नप्रदेशेऽप्यनुमित्युदयापातात्। किञ्च, साध्याभावसामानाधिकरण्यसत्त्वाद्धेतुरयं व्यभिचार्येवेति चेद् न। पक्षतावच्छेद-

कसमानाधिकरण(वा[1] सा)ध्यस्यानुमितिविषयतया तदवच्छेदेन साध्यसिद्धावापादकासम्भवात्[2]। किञ्च, पक्षधर्मतावलात् साध्यसिद्धिरनुमितौ, पक्षधर्मता च पक्षे हेतुसत्ता पक्षीयसाध्यं विनानुपपन्ना तमाक्षिपतीत्याकारा पक्षतावच्छेदकावच्छेदेन न साध्यं विषयीकरोति, किन्तु तदाश्रये। किञ्चित्यपि न। प्रतियोगिविरुद्धसाध्याभावसहचारस्य व्यभिचारत्वादित्युपाध्यायाः।

अत्र पक्षधरमिश्राः — पक्षतावच्छेदकसामानाधिकरण्येन हेतुज्ञाने पक्षतावच्छेदकसामानाधिकरण्येन साध्यभानम्, एवं पक्षतावच्छेदकावच्छिन्ने हेतुज्ञाने तु पक्षतावच्छेदकावच्छिन्न एव साध्यभानमित्यङ्गीकार्यमेव। अन्यथा क्वचित् पक्षतावच्छेदकसामानाधिकरण्येन क्वचित् पक्षतावच्छेदकावच्छेदेन साध्यानुमितिरिति स्याद्, नियामकाभावात्। तस्माद् येन रूपेण हेतुज्ञानं, तेन रूपेण साध्यं सिध्यतीति नियम इति संयोगाभावावच्छिन्नप्रदेशे संयोगानुमाने आपादकसत्त्वेऽपि बाधादेव तदवच्छेदेन न संयोगानुमानमिति तत्त्वम्। यच्च बाधानुपपत्त्या साध्यसिद्धिरित्युक्तं, तदपि न। स्वरूपसदनुपपत्तेर्भ्रमानुमित्यव्या(प्ति[2]ः,)ज्ञानानुपपत्तेश्चासम्भवात्, पक्षीयसाध्याभाने तद्विनानुपपत्तेर्ज्ञातुमशक्यत्वादित्याहुः।

अत्र शङ्कते — यत्र यत्र हेतुधीस्तत्रतत्र साध्यं सिध्यतीत्येव नियमः, न तु येन रूपेणेत्यादि, मानाभावात्। पक्षतावच्छेदेन साध्यस्य काप्यभानात्। अनुपपत्तिज्ञानं न सम्भवति पक्षीयसाध्याभानादिति यदुक्तम्, तदपि न। पक्षे हेतुः साध्यं विनानुपपन्न इति ज्ञानस्य पक्षीयसाध्यज्ञानं विनापि सम्भवात्। तस्मात् संयोगाभावप्रदेशे संयोगानुमितावापादकाभाव इत्युपाध्यायोक्तमेव सम्यग्, न तु तत्र बाधप्रतिबन्धवशादनुमित्यनुदय इति।

अत्र प्रतिभाति — संयोगाभावप्रदेशे संयोगानुमितौ सामग्र्येवापादिका। न च पक्षतावच्छेदकसमानाधिकरणसाध्यज्ञानमात्रं सामग्रीति इत्युक्तमेवेति वाच्यम्। सत्यम्। परं तु तदेव सामानाधिकरण्यं संयोगाभावप्रदेशमादाय सिध्यतु, यदि तत्र बाधो न विरोधीति मिश्राशयात्। अनुपपत्तिज्ञानं च यद्यप्यु(क्त[2]क्त)रूपेण सम्भवति, तथापि तस्य हेतुत्वे मानाभावः। व्याप्त्यादिज्ञानेनान्यथासि-

---

१. 'क' क. पाठः. २. 'न सा' क. पाठः.

द्धत्वादिति । वस्तुतस्तु पर्वते प्राग्भागाद्यवच्छेदेन धूमदर्शनानन्तरम् अप्राग्भागावच्छेदेन प्रवर्तेत, यदि पर्वतमात्रे वह्निभानम् । तस्माद् यदवच्छेदेन हेतुज्ञानं, तदवच्छेदेन साध्यं भासत इत्यवश्यमभ्युपेयम् । नन्विदमयुक्तम्, इदं द्रव्यं संयोगादित्यत्र व्यभिचारात् । तत्र संयोगस्य हेतोः शाब्दाद्यवच्छेदेन द्रव्यत्वस्य साध्यस्य च सर्वावच्छेदेन ग्रहादिति चेद्, न । बाधकाभावे सत्युक्तनियमाङ्गीकारात् ।

ननु प्रतियोग्यसमानाधिकरणपददाने शुद्धपुरुषाविनाभूतेन दण्डाविशिष्टपुरुषव्यभिचारिणा तद्गृहत्वादिना दण्डावच्छिन्नपुरुषस्य व्याप्त्यापत्तिः । तद्गृहत्वादिसमानाधिकरणदण्डावच्छिन्नपुरुषाभावस्य प्रतियोगिसमानाधिकरणतया विशिष्टाभावप्रतियोगितानवच्छेदकत्वस्य दण्डावच्छिन्नपुरुषत्वे सत्त्वादिति चेद्, न । प्रतियोग्यसामानाधिकर(ण्येन ? ण्यपदेन) प्रतियोगितावच्छेदकावच्छिन्नासामानाधिकरण्यस्य विवक्षितत्वात् । भवति च पुरुषसमानाधिकरणत्वेऽपि दण्डावच्छिन्न-पुरुषत्वरूपप्रतियोगितावच्छेदकावच्छिन्नासमानाधिकरण एव सोऽभाव इति नातिव्याप्तिः । नन्वेवमपि अयं भूतत्वमूर्तत्वोभयवान् मूर्तत्वादिति व्यभिचारिण्यतिव्याप्तिः । मूर्तत्वसमानाधिकरणस्य मनोनिष्ठभूतत्वमूर्तत्वोभयाभावस्य द्वित्वावच्छिन्नमूर्तत्वसमानाधिकरणतया प्रतियोगितावच्छेदकावच्छिन्नासामानाधिकरण्यविरहादिति चेद्, न । प्रतियोगितावच्छेदकैपर्याप्त्यधिकरणासामानाधिकरण्यस्य तदर्थत्वात् । अस्ति च मनसि द्वित्वावच्छिन्नभूतत्वमूर्तत्वाभावः प्रतियोगितावच्छेदकद्वित्वपर्याप्त्यधिकरणमिलितासमानाधिकरण इति न तत्रातिव्याप्तिः । ननु तथाप्यसम्भवः, काले सर्वेषामभावानां प्रतियोगिसमानधिकरणतया प्रतियोग्यसमानाधिकरणाभावाप्रसिद्धेः । आकाशादेरवृत्तितापक्षे आकाशाद्यभावस्य प्रतियोगिव्यधिकरणस्य प्रसिद्धावपि व्यभिचारिण्यतिव्याप्तिः, प्रतियोग्यसमानाधिकरणवह्निसमानाधिकरणाकाशाद्यभावाप्रतियोगित्वात् साध्यधूमादेः । न च क्वचिदधिकरणे प्रतियोग्यसामानाधिकरण्यं विवक्षितम् । तच्च धूमाभावादेः कालेऽभावेऽपि अयःपिण्डादावस्त्येवेति नाप्रसिद्धिर्न वातिव्याप्तिरिति वाच्यम् । एवं सति संयोगाभावस्यापि गुणादौ प्रतियोग्यसामानाधिकरण्यात् संयोगसाध्यकाव्याप्तितादवस्थ्यात् । तस्माद्वे-

---

१. 'का' क. पाठः

त्वधिकरणत्वावच्छेदेन प्रतियोग्यसामानाधिकरण्यं वाच्यम् । नच धूमाभावादौ ना त्येव । काले सामानाधिकरण्यात् । न च कालभिन्नाधिकरणे प्रतियोग्यसामानाधिकरण्यं विवक्षितमिति न तदादायाप्रसिद्धिरिति वाच्यम् । तथा सति कालो जगदाधारः कालत्वादित्यादिकालमात्राधिकरणनिष्ठव्याप्त्यव्याप्त्यापत्तेः । कालत्वरूपहेत्वधिकरणस्य कालभिन्नस्याप्रसिद्धया कालभिन्नहेत्वधिकरणत्वावच्छेदेन प्रतियोग्यसामानाधिकरण्यस्य कुत्राप्यभावेनाप्रसिद्धिरिति ।

मैवम् । हेत्वधिकरणे क्वचिद् प्रतियोग्यसामानाधिकरण्यस्य विवक्षितत्वात् । तच्च धूमाभावादौ काले विरहेऽपि अयःपिण्डादिरूपाधिकरणेऽस्त्येवेति न कालमादायाप्रसिद्धिर्व्यभिचार्यतिव्याप्तिर्वा । अत एवं न संयोगसाध्यकाव्याप्तिः । द्रव्यत्वाधिकरणे संयोगाभावस्य प्रतियोगिसामानाधिकरण्यनियमात् । अत एव वृक्षः संयोगी सत्त्वादित्यत्रापि नातिव्याप्तिः । सत्त्वाधिकरणीभूतगुणादौ संयोगाभावस्य प्रतियोग्यसामानाधिकरण्यात् ।

केचित्तु ग्राह्यसामानाधिकरण्यप्रविष्टसम्बन्धेन प्रतियोग्यसामानाधिकरण्यमर्थ इति काले(पक्ष ? न प्रति)योग्यसामानाधिकरण्याप्रसिद्धिः । तत्र स्वरूपसम्बन्धेन सर्वेषां सत्त्वेऽपि ग्राह्यसामानाधिकरण्य(ग्रह ? प्रविष्ट)संयोगादिना सत्त्वाभावेनोक्तप्रतियोग्यसामानाधिकरण्यसत्त्वात् । अत एव धूमवति समवायावच्छिन्नवह्न्यभावसत्त्वेऽपि नाव्याप्तिः । तस्य ग्राह्यसामानाधिकरण्यप्रविष्टसंबन्धेन प्रतियोग्यधिकरणवृत्तितया विशिष्टाभाव(त्वा)सत्त्वादिति ।

तच्चिन्त्यम् — एवं सति कालो जगदाधारः कालत्वादित्यव्याप्त्यापत्तेः । तत्र ग्राह्यसामानाधिकरण्यप्रविष्टजगदाधारतायाः स्वरूपसम्बन्धेन प्रतियोग्यसमानाधिकरणकालत्वसमानाधिकरणाभावाप्रसिद्धेः । तेन सम्बन्धेन सर्वेषां कालवृत्तित्वादिति ।

पक्षधरमिश्राः — आरोप्यसम्बन्धेन प्रतियोग्यसमानाधिकरण्यं विवक्षितम् । तथा च न कालमादायाप्रसिद्धिः । तत्रारोप्यसमवायादिना प्रतियोग्यसमानाधिकरण्यसत्त्वात् । न चैवं समवायसम्बन्धावच्छिन्नवह्न्यभावमादाय सदनुमाना-

---

१. 'व सं' क. पाठः.

व्याप्तिः । आरोप्यसम्बन्धेन समवायावच्छिन्नवह्न्यभावस्यापि प्रतियोग्यसमानाधिकरणत्वादिति वाच्यम् । ग्राह्यसामानाधिकरण्यप्रविष्टसम्बन्धावच्छिन्नत्वस्याभावे विशेषणत्वात् । समवायावच्छिन्नवह्न्यभावस्तु न तथा । संयोगस्य ग्राह्यसामानाधिकरण्यप्रविष्टत्वादित्याहुः ।

अत्र शङ्क्यते—कालो जगदाधारः कालत्वादित्यत्र हेतुसमानाधिकरणस्य ग्राह्यसामानाधिकरण्यप्रविष्टसम्बन्धावच्छिन्नाभावस्याप्रसिद्ध्या लक्षणस्याव्याप्तिरिति । अत्रायमाशयः—आरोप्यसम्बन्धेन प्रतियोग्यसमानाधिकरणहेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकग्राह्यसामानाधिकरण्यप्रविष्टसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नत्वमर्थः । अस्ति च धूमसमानाधिकरणसमवायसम्बन्धावच्छिन्नवह्न्यभावप्रतियोगितानवच्छेदकत्वं संयोगसम्बन्धावच्छिन्नवह्नित्वस्येति नाव्याप्तिः । अत एव कालत्वहेतावपि नाव्याप्तिः । कालनिष्ठघटत्वाद्यभावस्य समवायसम्बन्धारोप्यकस्य स्वरूपसम्बन्धावच्छिन्नसाध्याप्रतियोगिकत्वादिति । ननु तथापि प्रसिद्धानुमानाव्याप्तिः । धूमसमानाधिकरणस्य धूमावयवनिष्ठस्य प्रतियोग्यसमानाधिकरणवह्न्यभावस्य या प्रतियोगिता तदवच्छेदकत्वाद् वह्नित्वस्येति चेद्, न । ग्राह्यसामानाधिकरण्यप्रविष्टसम्बन्धेन हेत्वधिकरणस्य विवक्षितत्वात् । धूमावयवश्च न संयोगेन धूमाधिकरणमिति नाव्याप्तिः । नन्वेवमपि प्रतियोग्यसमानाधिकरणाभावाप्रसिद्धिः । सर्वाभावस्य सर्वप्रतियोगिकत्वात् । तथाहि—घटाभावे पटो नास्तीति प्रतीतिः सर्वानुभवसिद्धा पटाभावविषयिणी च । तथा च तत्र पटाभावस्य भिन्नस्य विषयता न सम्भवति । अभावाधिकरणकाभावानङ्गीकारात् । किन्तु घटाभाव एव पटाभावरूपस्तत्र विषय इत्यङ्गीकार्यम् । तथा च सिद्धं घटाभावस्य पटाभावत्वम् । एवमन्याभावत्वमपीति धूमसमानाधिकरणस्य पटाद्यभावस्य प्रतियोगिधूमसमानाधिकरणत्वादसम्भव इति चेद्, न । घटाभावेऽप्यन्यत्र सिद्धस्य पटाभावस्य वृत्तौ बाधकाभावात् । अभावमात्राधिकरणाभावस्यैवास्माभिरनङ्गीकारात् । यदि च सिद्धान्तश्रद्धाजाड्यादभावाधिकरणकाभावानङ्गीकारः, तथापि नानुपपत्तिः । प्रतियोगिव्यवहारविषयासामानाधिकरण्यस्य घटाद्यभावस्य विवक्षितत्वात् । अस्ति च घटाद्यभावप्रतियोगिव्यवहारविषयता घटे, न तु पटे । व्यवहारस्यापर्यनुयोज्यत्वात् ।

ननु तथापि विकल्पासहविशेषणमिदम् । तथाहि—प्रतियोग्यसामाना-

धिकरण्यं यावत्प्रतियोग्यसामानाधिकरण्यं यत्किञ्चित्प्रतियोग्यसामानाधिकरण्यं वा विवक्षितम् । नाद्यः । अयं संयोगसामान्याभाववान् सत्त्वादित्यत्रातिव्याप्तेः । सत्त्वसमानाधिकरणस्य संयोगरूपाभावस्य विशेषाभावरूपप्रतियोगिसमानाधिकरणतया यावत्प्रतियोग्यसामानाधिकरण्याभावात् । प्रतियोग्यसमानाधिकरणघटाभावादिप्रतियोगितानवच्छेदकत्वात् साध्यतावच्छेद(क)स्य । नापरः । अयं संयोगविशेषाभाववान् वृक्षत्वादित्यादावव्याप्तेः । वृक्षत्वसमानाधिकरणसंयोगरूपस्य साध्याभावस्य सामान्याभावरूपप्रतियोग्यसमानाधिकरणतया संयोगविशेषाभावत्वस्य साध्यतावच्छेदकस्य तत्प्रतियोगितावच्छेदकत्वादिति ।

मैवम् । यत्किञ्चित्प्रतियोग्यसामानाधिकरण्यमेव विवक्षितम् । न चोक्तदोषः । यत्प्रतियोग्यसामानाधिकरण्यं, तद्वृत्तिप्रतियोगितानवच्छेदकत्वस्य विवक्षितत्वात् । अयं संयोगसामान्याभाववान् सत्त्वादित्यत्र सत्त्वसमानाधिकरणस्य संयोगरूपस्य साध्याभावस्य सामान्याभावात्मकप्रतियोग्यसमानाधिकरणत्वात्, संयोगसामान्याभावत्वस्य संयोगसामान्याभाववृत्तिप्रतियोगितावच्छेदकत्वादतिव्याप्तिविरहात् । संयोगविशेषाभाववान् वृक्षत्वादित्यत्र हेतुसमानाधिकरणस्य संयोगरूपसाध्याभावस्य सामान्याभावात्मकप्रतियोग्यसमानाधिकरणत्वेऽपि संयोगविशेषाभावत्वस्य सामान्याभाववृत्तिप्रतियोगितावच्छेदकत्वविरहादव्याप्तिविरहात् । विशेषाभावत्वस्य विशेषाभाववृत्तिप्रतियोगितायामेवावच्छेदकत्वात् । तथा च स्वाश्रयासमानाधिकरणहेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वं पर्यवसानार्थः । स्वपदेनावच्छेद्यप्रतियोगितापरामर्शादिति न काप्यनुपपत्तिः । नन्विदं लक्षणं द्वित्वावच्छिन्नवह्न्यभावादिकमादाय सदनुमानाव्याप्तम्[1] । अथ द्वित्वावच्छिन्नवह्न्यभावः प्रतियोगिसमानाधिकरण एवेति न तमादायाव्याप्तिरिति चेद्, न । प्रतियोगितावच्छेदकावच्छिन्नासामानाधिकरण्यस्य तदर्थस्योक्तत्वात् । तस्य च द्वित्वा(वच्छिन्न)वह्न्यभावेऽपि सत्त्वेनाव्याप्तितादवस्थ्यात् । अथ प्रतियोगितावच्छेदकावच्छिन्नासामानाधिकरण्यमित्यत्र सामानाधिकरण्याभावोऽर्थः । स च यत्किञ्चित्प्रतियोगिसत्त्वेन नास्ति । तथा च द्वित्वावच्छिन्नाभावप्रतियोगितावच्छेदकं द्वित्वं वह्नित्वं च । तन्मध्ये वह्नित्वरूपप्रतियोगितावच्छेदकावच्छिन्नसामानाधिक-

१. 'प्तिः' क. पाठः.

रण्यसत्त्वान्न द्वित्वावच्छिन्नाभावमादायाव्याप्तिरिति चेद्, न। एवं सति वह्निघटोभयवान् धूमादिति व्यभिचारिण्यतिव्याप्तेर्दुष्परिहरत्वात्। धूमसमानाधिकरणद्वित्वावच्छिन्नाभावप्रतियोगितावच्छेदकवह्नित्वावच्छिन्नसमानाधिकरणत्वाद् द्वित्वावच्छिन्नाभावस्य। अत एव द्वित्वावच्छिन्नाभावमादायाव्याप्तिवारणायाव्यासज्ज्यवृत्तिप्रतियोगिकत्वमभावविशेषणमित्यपि कस्यचित् कल्पनमपास्तम्। एवं सत्युक्तव्यभिचारिण्यतिव्याप्तेर्दुष्परिहरत्वात्। वह्निघटोभयवृत्तिद्वित्वस्य धूमसमानाधिकरणाव्यासज्ज्यवृत्तिप्रतियोगिकाभावप्रतियोगितानवच्छेदकत्वात्। तस्माद् द्वित्वावच्छिन्नाभावमादाय लक्षणाव्याप्तिर्दुष्परिहरेति।

अत्र केचित् — द्वित्वावच्छिन्नाभावानङ्गीकारेण लक्षणमिदम्। तेन धूमवति वह्न्यभावस्याभावान्न धूमसमानाधिकरणाभावप्रतियोगितावच्छेदकं वह्नित्वमिति नाव्याप्तिः। नन्वेवं घटपटोभयवानयं धूमादिति व्यभिचारिणि लक्षणस्यातिव्याप्तिरिति दोषः। धूमसमानाधिकरणस्य घटाभावस्य पटाभावस्य च प्रतियोगिताया द्वित्वस्य व्यासज्ज्यवृत्तितया अतिप्रसक्तत्वेनानवच्छेदकत्वादिति चेद्, न। घटाभावपटाभावयोर्धूमसमानाधिकरणतया तादृशाभावप्रतियोगितात्वेनानुगतप्रतियोगितानतिप्रसक्ततया द्वित्वस्य तदवच्छेदकत्वात्। नन्वेवमपि अयमात्मत्वद्रव्यत्वोभयवान् गुणवत्त्वादित्यादावतिव्याप्तिः। गुणवत्त्वमसमानाधिकरणात्म(त्व)विरहसत्त्वेऽपि द्रव्यत्वविरहासत्त्वेन तदुभयवृत्तिद्वित्वस्य तादृशाभावाप्रतियोगिवृत्तेस्तदनवच्छेदकत्वादिति चेद्, न। तत्राव्यभिचारसत्त्वेऽपि द्वित्वावच्छिन्नेन हेतोः सामानाधिकरण्याभावादतिव्याप्त्यनवकाशात्। न च तादृशाभावप्रतियोगितानवच्छेदकद्वित्वावच्छिन्नद्रव्यत्वसामानाधिकरण्यस्य हेतौ सत्त्वात् कथं नातिव्याप्तिरिति वाच्यम्। प्रतियोगितानवच्छेदकपर्याप्त्यधिकरणसामानाधिकण्यस्य तदर्थत्वात्। तस्य च तत्राभावात्। द्वित्वपर्याप्त्यधिकरणमिलितासामाधिकरण्यात्। नन्वेवमपि घटत्वद्रव्यत्वोभयवानयं गुणवत्त्वादित्यत्रातिव्याप्तिः। द्वित्वस्य हेतुसमानाधिकरणाभावाप्रतियोगिनि द्रव्यत्वेऽपि वृत्त्या प्रतियोगितानवच्छेदकत्वात्। तदवच्छिन्नघटत्वद्रव्यत्वोभयसामानाधिकरण्यसत्त्वाच्च गुणवत्त्वस्येति चेद्, न। हेतुसमानाधिकरणाभावप्रतियोगितानधिकरणपर्याप्तवृत्तिकेतरधर्मत्वस्यैवोक्तप्रतियोगितावः

---

१. 'हा' क. पाठः. २. 'हा' क. पाठः, ३. 'वयो' क. पाठः,

च्छेदकत्वेन विवक्षितत्वात् । भवति घटत्वद्रव्यत्वोभयवृत्ति द्वित्वं हेतुसमानाधिकरणाभावप्रतियोगितानधिकरणद्रव्यत्वपर्याप्तवृत्तिकभिन्नं, द्वित्वस्यैकमात्राश्रयापर्याप्तवृत्तिकत्वात् । तथा च तत्र द्वित्वं प्रतियोगितावच्छेदकमेवेति नातिव्याप्तिरिति ।

वस्तुतस्तु व्यासज्ज्यवृत्त्यभावाङ्गीकारपक्षेऽपि द्वित्वावच्छिन्नप्रतियोगिकवह्न्यभावमादाय न लक्षणाव्याप्तिः । तथाहि — हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकावच्छिन्नाभाववदवृत्तित्वविशिष्टकत्वमेवात्रोक्तप्रतियोगितावच्छेदकत्वेन विवक्षितम् । अस्ति च धूमसमानाधिकरणद्वित्वावच्छिन्नवह्न्यभावप्रतियोगितावच्छेदकद्वित्वावच्छिन्नाभाववद्वह्निमति वह्नित्वावच्छिन्नस्य वृत्तिरिति वह्नित्वे तदनवच्छेदकत्वम् । प्रतियोगितावच्छेदके च यावत्त्वं विशेषणम् । तेन वह्नित्वरूपप्रतियोगितावच्छेदकावच्छिन्नाभाववदवृत्तित्वविशिष्टकत्वस्य वह्नित्वेऽपि भावादव्याप्तिरिति दूषणं निरस्तम् । वह्नित्वस्य द्वित्वरूपप्रतियोगितावच्छेदकावच्छिन्नाभाववद्वृत्तित्वविशिष्टकतया यावत्पदेन तद्दोषनिरासात् । अत एवायं वह्निघटोभयवान् धूमादित्यत्र नातिव्याप्तिः । धूमसमानाधिकरणद्वित्वावच्छिन्नाभावप्रतियोगितावच्छेदकानां वह्नित्वघटत्ववह्निघटोभयवृत्तिद्वित्वानामवच्छिन्नस्याभाववति द्वित्वविशिष्टस्यावृत्तितया द्वित्वे निरुक्तप्रतियोगितावच्छेदकत्वसत्त्वात् ।

यद्वा हेतुसमानाधिकरणाभावप्रतियोगितात्वावच्छिन्नान्यूनानतिरिक्तवृत्तित्वमिह तत्प्रतियोगितावच्छेदकत्वं विवक्षितम् । धूमसमानाधिकरणद्वित्वावच्छिन्नवह्न्यभावप्रतियोगितात्वावच्छिन्नस्य वह्नित्वं न्यूनवृत्त्येव, तदाश्रयघटावृत्तित्वात् । तथा च न वह्नित्वं द्वित्वावच्छिन्नाभावप्रतियोगितावच्छेदकमिति नाव्याप्तिशङ्का । द्वित्वावच्छिन्नसाध्यकव्यभिचारिणि च द्वित्वं तादृशप्रतियोगितात्वावच्छिन्नान्यूनानतिरिक्तवृत्त्येवेति नातिव्याप्तिरिति ।

अथवा प्रतियोग्यसामानाधिकरण्यपदस्य साध्यतावच्छेदकावच्छिन्नासामानाधिकरण्यमर्थः । व्यासज्ज्यवृत्तिप्रतियोगिकवह्न्यभावस्तु न वह्नित्वावच्छिन्नासमानाधिकरण इति न तमादाय सद्धेत्वव्याप्तिशङ्का । न चैवं सद्धेतौ सर्वत्राव्याप्तिः, धूमसमानाधिकरणाभावस्य वह्नित्वावच्छिन्नवह्निसामानाधिकरण्यनियमेनोक्तार्थस्य तत्राप्रसिद्धेरिति वाच्यम् । आरोप्यसम्बन्धेन साध्यतावच्छेदकावच्छिन्नेनासामानाधिकरण्यस्य विवक्षितत्वात् । तच्च सद्धेतुस्थलेऽप्यस्त्येव । अन्ततः समवायसम्बन्धावच्छिन्नवह्न्यभावस्यैव तादृशत्वात् । न च तथा सत्यव्याप्तिः, तादृशाभावप्र-

तियोगितावच्छेदकत्वाद् वह्नित्वस्येति वाच्यम् । तादृशाभावे ग्राह्यसामानाधिकरण्यप्रविष्टसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगिकत्वाभावस्यैव विवक्षितत्वादिति प्रागेवोदितत्वात् । अत एव संयोगसामान्याभाववान् सत्त्वादित्यत्र नातिव्याप्तिः, संयोगरूपस्य साध्याभावस्य साध्यतावच्छेदकसामान्याभावत्वावच्छिन्नासामानाधिकरण्यनियमात् । संयोगविशेषाभावसाध्यके नाव्याप्तिः, संयोगस्य साध्याभावस्य विशेषाभावत्वावच्छिन्नसामानाधिकरण्यनियमात् ।

वस्तुतस्तु प्रतियोग्यसमानाधिकरणमित्यत्र प्रतियोगित्वसामानाधिकरण्योभयाभावावच्छिन्नसाध्यकत्वमर्थः । द्वित्वावच्छिन्नाभावस्तु न तथा । साध्यतावच्छेदकावच्छिन्नेन सह प्रतियोगित्वसामानाधिकरण्ययोरुभयोरपि सत्त्वेन तदुभयाभा(वा)वच्छिन्नसाध्यकत्वस्य तादृशाभावेऽभावात् । सद्धेतौ घटाद्यभावस्तादृशः । साध्यस्य तेन सह प्रतियोगित्वासत्त्वेन तदुभयाभा(वा)वच्छिन्नत्वस्य सत्त्वात् । एकसत्त्वेऽपि द्वित्वावच्छिन्नाभावसत्त्वात् । व्यभिचारिणि तु साध्याभाव एव तादृशः । प्रतियोगित्वसत्त्वेऽपि साध्यस्य तत्सामानाधिकरण्याभावेन तदुभयाभावावच्छिन्नत्वसत्त्वात् । अत एव संयोगसामान्याभावसाध्यकेऽपि नातिप्रसङ्गः । संयोगस्य सामान्याभावरूपसाध्येन सहासमानाधिकरणतया तस्य प्रतियोगित्वसामानाधिकरण्योभयाभावावच्छिन्नत्वात् । संयोगविशेषाभावसाध्यके च नाव्याप्तिः । संयोगस्य विशेषाभावसामानाधिकरण्यप्रतियोगित्वयोरुभयोरपि सत्त्वेनोभयाभावावच्छिन्नत्वाभावादिति युक्तमुत्पश्यामः ।

ननु द्रव्यत्वसाध्यके गुणकर्मान्यत्वविशिष्टसत्त्वे हेतौ लक्षणाव्याप्तिः । सत्त्वरूपहेतुसमानाधिकरणाभावप्रतियोगित्वाद् द्रव्यत्वस्य । न च गुणकर्मान्यत्वविशिष्टसत्त्ववति न द्रव्यत्वाभाव इति नाव्याप्तिरिति वाच्यम् । एवं सति व्यभिचारिण्यतिव्याप्तेः । आर्द्रेन्धनप्रभवत्वविशिष्टवह्निमति धूमाभावाभावादिति चेद्, न । यद्धर्मावच्छिन्नसाधनसमानाधिकरणाभावाप्रतियोगित्वमित्यर्थाद्, गुणकर्मान्यत्वविशिष्टसत्त्वसमानाधिकरणाभावप्रतियोगित्वं न द्रव्यत्वस्येति नाव्याप्तिः । व्यभिचारिण्यार्द्रेन्धनप्रभववह्नित्वेन धूमव्याप्यतास्त्येव, वह्नित्वेन तु नास्त्येवेति नातिप्रसङ्गः । अत्यन्ताभावपदं च विरोध्यभावपरम् । अन्यथा अयं घटाभाववान् पटाभाववत्त्वादिति व्यभिचारिण्यतिव्याप्तिप्रसङ्गात् । अत्यन्ताभावत्वस्य साधनसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकत्वात् । अभावप्रतियोगिकाभा-

वानङ्गीकारात् । भावप्रतियोगिकाभावप्रतियोगितायाश्चाभाववृत्तिधर्मानवच्छेद्यत्वात् । विरोधिपरत्वे च भावस्यैवाभावविरोधित्वात् प्रतियोगितावच्छेदकमभावत्वं भवत्येवेति नातिप्रसङ्गः ।

पक्षधरमिश्रास्तु — अत्यन्ताभावपदं ग्राह्यसामानाधिकरण्यविरोधिसंसर्गाभावपरमवश्यं वाच्यम् । तेन दैशिकसामानाधिकरण्येऽत्यन्ताभावस्य, कालिकसामानाधिकरण्ये ध्वंसप्रागभावयोर्लाभः । अन्यथा यदा घटत्वं तदा घट इति कालिकव्यक्तिव्याप्यता जातौ प्रसज्ज्येत । महाप्रलये घटत्ववति घटध्वंससत्त्वेऽपि तदत्यन्ताभावाभावेन घटत्वस्य तादृशात्यन्ताभावप्रतियोगितानवच्छेदकत्वात् । न च महाप्रलये घटध्वंसवत् तदत्यन्ताभावोऽप्यस्त्येव, तत्प्रतियोगितावच्छेदकमेव घटत्वमिति नातिव्याप्तिरिति वाच्यम् । तथा सति गोत्वाश्वत्वयोरपि कालिकव्याप्तिर्न स्यात् । गोत्ववति काले ऽश्वत्वात्यन्ताभावस्यापि सत्त्वादिति वदन्ति ।

अत्र शङ्कयते — प्रलयेऽत्यन्ताभावसत्त्वेन तस्य चात्यन्ताभावस्य तत्कालोपाधौ व्यक्त्यसमानकालत्वेन प्रतियोग्यसमानाधिकरणहेतुसमानाधिकरणात्यन्ताभावप्रतियोगित्वेन व्यक्तेर्जातिनिरूपितव्यापकताया अप्रसङ्गः, जातौ तु नैवम् । विद्यमानस्यापि जात्यत्यन्ताभावस्य सकलकालोपाधौ प्रतियोगिसमानकालतानियमाद् विशिष्टाभावप्रतियोगित्वस्य तत्रासत्त्वादव्याप्तिनिरासादिति ।

अत्रायमाशयः — पक्षधरमिश्राणां कालिकव्याप्तावन्वयव्यतिरेकाभ्यां ध्वंसप्रागभावगर्भव्यभिचारज्ञानस्य, दैशिकव्याप्तावत्यन्ताभावगर्भव्यभिचारज्ञानस्य(च) प्रतिबन्धकत्वाद् ग्राह्यसामानाधिकरण्यविरोधिसंसर्गाभावपरत्वमावश्यकम् । तदुक्तं पक्षधरमिश्रैः — तत्र तदत्यन्ताभावसत्त्वेऽपि ध्वंसप्रतियोगित्वज्ञानस्य विरोधित्वादिति ।

अत्र कश्चित् — अत्यन्ताभावपदमावश्यकम्, अन्यथा संयोगवान् गुरुत्वादित्यत्र गुरुत्ववति काले यत्किञ्चित्संयोगावश्यंभावेन पूर्वसंयोगध्वंससत्त्वेऽपि संयोगसामान्यस्य गुरुत्वव्यापकता कालिकी हीयेत । गुरुत्वसमानाधिकरणसकलसंयोगध्वंसस्य तत्तत्कालोत्पन्नस्यानतिप्रसक्ततया संयोगत्वस्य प्रतियोगितायामवच्छेदकत्वात् । अत्यन्तपददाने तु न दोषः । गुरुत्वकाले संयोगात्यन्ताभावसत्त्वेऽपि तस्य प्रतियोगिसमानकालत्वात् । प्र(त्य ! ति)योग्यसमानकालात्यन्ताभावप्रतियोगितानवच्छेदकत्वस्य संयोगत्वे सत्त्वादिति । तदसत् । एकत्वस्याधि-

करणविशेषणतायाः प्रागेवोक्तत्वात्। तथा च गुरुत्वाधिकरणीभूतयत्किञ्चिदेककालवृत्तिग्राह्यसामानाधिकरण्यविरोध्यभावप्रतियोगितावच्छेदकभिन्नत्वं पर्यवस्यति। तच्च संयोगत्वेऽस्त्येव। भिन्नभिन्नकाले गुरुत्वाश्रयीभूते सर्वसंयोगध्वंससत्त्वेऽपि एकस्मिन् गुरुत्वाधिकरणकाले तावद्ध्वंसासत्त्वादिति।

(अत्राभावे ग्राह्यसामानाधिकरण्यविरोधित्वं) ग्राह्यसामानाधिकरण्यविरोधितावच्छेदकावच्छिन्नत्वम्। विरोधि(क?)तावच्छेदकं च दैशिक्यामत्यन्ताभावत्वादि, कालिक्यां तु ध्वंसत्वं प्रागभावत्वं च। व्याप्तौ च वस्तुतो विरोधितावच्छेदकं प्रविष्टं, न तु विरोधितावच्छेदकत्वेन तस्य ज्ञानमपेक्षितं, येन विरोधित्वस्य सहानवस्थाननियमलक्षणस्य प्रवेश आत्माश्रयादिशङ्का स्यात्। नन्ववच्छेदकत्वमवच्छित्तिधीजनकत्वम्। तच्च नियमगर्भत्वेन व्याप्तिगर्भमित्यात्माश्रयादि दुर्वारमिति चेत्।

अत्र केचित्—अवच्छेदकत्वं स्वरूपसंबन्धात्मकमेव। अन्यथा घटजनकतावच्छेदकं दण्डत्वं, न चक्रभ्रमजनकत्वमनतिप्रसक्तमित्यत्र नियामकाभावप्रसङ्गात्। तथा चात्रापि स्वरूपसंबन्धात्मकमेवावच्छेदकत्वम्। यथा च तथा सति नात्माश्रयादि तथा वक्ष्यत इति वदन्ति।

तच्चिन्त्यम्। एवं सति अयं प्रमेयधूमवान् वह्नेरित्यत्र वह्निसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वस्य स्वरूपसंबन्धात्मकस्य लघुनि धूमत्व एव भावेन प्रमेयधूमत्वे गुरुणि तदभावेन व्यभिचारिण्यतिव्याप्तेर्दुष्परिहरत्वात्। अत एवानतिप्रसक्तलघुधर्मान्तराघटितशरीरत्वे सत्यनतिप्रसक्तत्वमवच्छेदकत्वं नीलधूमत्वादिव्यावृत्तम(त्य?न्य)त्रेतीहापि तदेव विवक्षितमिति निरस्तम्। प्रमेयधूमत्वादावनतिप्रसक्तधूमत्वघटितशरीरतया प्रतियोगितानवच्छेदकत्वप्रसङ्गेन व्यभिचारिण्यतिव्याप्तेस्तादवस्थ्यात्। तस्मादनतिप्रसक्तत्वमात्रमिहावच्छेदकत्वं लघुगुरुसाधारणमवधेयम्। न च प्रतियोगिता तत्तत्स्वरूपरूपा, तदतिप्रसक्तमेव धूमत्वादीति व्यभिचारिण्यतिव्याप्तिरिति वाच्यम्। प्रतियोगितात्वेनानुगमस्य प्रागेवोक्तत्वात्। ननु प्रतियोगितात्वमपि तासु नानुगतमेकमस्तीत्यननुगमः सर्वथापि भवत्येवेति चेद्, न। तादृशात्यन्ताभावनिरूपितत्वस्यानुगतधर्मस्य सर्वत-

---

१. 'स' क. पाठः.

त्प्रतियोगितासाधारणस्य सत्त्वादनुगमसंभवात् । नन्वेवमपि यदा गोत्वं तदा गौरित्यत्रातिव्याप्तिः । गोत्वसमानकालीननानागोध्वंसप्रतियोगितानवच्छेदकत्वाद् गोत्वस्य । नहि तत्राप्यभाव एकोऽस्ति, येन तत्प्रतियोगितात्वेनानुगतप्रतियोगितानां गोत्वमवच्छेदकं भवेदिति चेद्, न । ऐकाधिकरण्यावच्छिन्नत्वेन तत्रापि ध्वंससमुदायानुगमात् । तेन च प्रतियोगितायां अनुगमसंभवात् । अत एव प्रतियोगितात्वेनानुगमे आत्माश्रयः, प्रतियोगितात्वस्य स्वरूपसंबन्धघटितस्य व्याप्तिघटितत्वादित्यपि दूषणमपास्तम् । अभावनिरूपितत्वेनैव तत्रानुगमेन प्रतियोगितात्वस्याप्रवेशात् ।

नन्वयं वह्निमदाश्रयो धूमवदाश्रयत्वादित्यादौ नानाव्यक्तिसाध्यतावच्छेदकसद्धेतावव्याप्तिः । हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वात् तत्तद्व्यक्तीनाम् । किञ्च, पर्वतो वह्निमानित्यत्राप्यव्याप्तिरेव । धूमसमानाधिकरणाभावप्रतियोगितावच्छेदकमहानसीयत्वावच्छिन्नवह्नित्वादिप्रविष्टतया वह्नित्वस्य तदनवच्छेदकत्वाभावादिति चेद्, न । तादृशाभावप्रतियोगितानवच्छेदकत्वं यद्धर्मावच्छिन्नमित्यर्थो भवति । उक्तस्थले तत्तद्धूमेः प्रतियोगितावच्छेदकत्वेऽपि वह्नित्वावच्छिन्नत्वेन न प्रतियोगितावच्छेदकता, किन्तु तत्तद्वह्नित्वावच्छिन्नत्वेनैव । तेन रूपेण व्यापकतावच्छेदकत्वं नास्त्येवेति न तत्र दोषः । वह्नित्वमपि महानसीयवह्नित्वत्वाद्यवच्छिन्नं प्रतियोगितावच्छेदकं न तु वह्नित्वत्वावच्छिन्नम् । अतो न तत्राव्याप्तिः । नन्वन्योन्याभावस्य व्याप्यवृत्तित्वाद् यदि वह्नित्वे(न?) तत्तद्वह्नित्वघटकतया प्रतियोगितावच्छेदकत्वं, तदा वह्नित्वत्वावच्छिन्नवह्नित्वेऽपि प्रतियोगितावच्छेदकभिन्नत्वमसंभवीति चेद्, न । वह्नित्वत्वावच्छेदेन वह्नित्वे प्रतियोगितावच्छेदकत्वात्यन्ताभावस्य विवक्षितत्वात् । प्रतियोगितावच्छेदकत्वत्वविशिष्टप्रतियोगितावच्छेदकत्वसापेक्षज्ञानतयास्य प्रतियोगितावच्छेदकभेदापेक्षया गुरुप्रतिपत्तिकत्वेऽप्युक्तयुक्त्या आवश्यकत्वात् । ननु सामानाधिकरण्यं समानेनाधिकरणेन सम्बन्धः । सम्बन्धत्वं च विशिष्टप्रत्ययजनकत्वगर्भमित्यात्माश्रयादिस्तथापि दुर्वार एवेति चेद्, न । सम्बन्धस्य प्रवेशेऽपि सम्बन्धत्वस्याप्रवेशेनोक्तदोषाभावात् । ननु तथापि शुद्धस्य सम्बन्धस्य कथं भानमिति सम्बन्धत्वभानं प्रकारतया वाच्यमेवेति चेद्, न । संयोगत्वादिना गृहीतस्य सम्बन्धस्य व्याप्तिघटकत्वात् । ननु व्याप्तिज्ञानस्यानुमितिजनकताग्रहो

न सम्बन्धत्वज्ञानमन्तरेण । नहि संयोगज्ञानत्वादिनानुमितिहेतुताग्रहः, व्यभिचारादित्युक्तदोषस्तदवस्थ एवेति चेद्, न । भ्रान्तोऽसि । अनुमितिकरणताग्रहे ग्राह्यकारणताप्रविष्टव्याप्तेरिव संबन्धत्वप्रविष्टव्याप्तेरपि प्रवेशे क्षत्यभावात् । प्राथमिकव्याप्तिग्रहे तत्प्रवेशस्यैव वारणीयत्वात् । किञ्च, व्याप्तिर्न सर्वसाधारण्येकेति तत्तद्व्याप्तिज्ञानत्वेन तत्तदनुमितित्वेन हेतुहेतुमद्भावो ग्राह्यः । स च संयोगज्ञानत्वादिनापि ग्रहीतुं शक्यत एवेति न तत्रापि संबन्धत्वज्ञानापेक्षा ।

ननु व्यधिकरणधूमवह्न्योः सामानाधिकरण्यं नास्तीति तयोर्व्याप्तिर्न स्यात् । न च समानाधिकरणवृत्तिधर्मवत्त्वमित्यर्थः । तच्च धूमत्वमादाय सर्वत्राप्यस्तीति वाच्यम् । तादृशयत्किञ्चिद्धर्मवत्त्वस्य मेयत्वमादायातिप्रस(क्ता ? क्त)त् । यावद्धर्मवत्त्वस्य चात्राप्यभावात् । तद्धूमत्वादेरन्यधूमावृत्तित्वात् । न च सामानाधिकरण्यावच्छेदकधर्मवत्त्वमर्थः, तच्च धूमत्वमेवेति नातिप्रसङ्ग इति वाच्यम् । तथा सति तावन्मात्रस्यैवादुष्टतया पूर्वदलवैयर्थ्यापातादिति ।

मैवम् । यद्धर्मावच्छिन्नसमानाधिकरणाभावप्रतियोगितानवच्छेदकावच्छिन्नस्य साध्यस्य सामानाधिकरण्यं, तद्धर्मावच्छिन्नत्वस्य लक्षणार्थत्वात् । तच्च व्यधिकरणधूमस्याप्यस्तीति नोक्तदोषः । यदि च समानाधिकरणयोरेव व्याप्तिरिति मतं, तदा यथाश्रुतमेवादरणीयम् । न च तथा सत्यवच्छेदकपर्यन्तधावनवैयर्थ्यम् । तावता साधनसमानाधिकरणाभावाप्रतियो(ग्य ? गि)साध्यसमानाधिकरणत्वस्यैवाविकलत्वात् । अत एव मणिकृतापि यद्वेत्यादिना समानाधिकरणमात्रव्याप्तिलक्षणं कुर्वता तथैव लिखितमिति वाच्यम् । इयं गन्धवती पृथिवीत्वादित्यत्राव्याप्तेस्तथा सति दुर्वारत्वापातात् । पृथिवीत्वसमानाधिकरणाभावप्रतियोगित्वात् सर्वगन्धानाम् । तस्मादत्राप्यवच्छेदकविवक्षावश्यिकेति नोक्तशङ्कावकाशः । मणिकारस्यापि व्यधिकरणयोः सामानाधिकरण्याभावान्न व्याप्तिरित्येवाभिमतं, न त्वत्रावच्छेदकविवक्षा न कार्येति ।

पक्षधरमिश्रास्तु — समानाधिकरणव्याप्तिपक्षेऽवच्छेदकविवक्षा मणिकारस्यानभिमतैव । न चैवमियं गन्धवती पृथिवीत्वादित्यत्राव्याप्तिः कथमुद्धर्तव्येति वाच्यम् । स्वाधिकरणीभूतयद्व्यक्तिनिष्ठाभावाप्रतियोगिनी या साध्यव्यक्तिः, तद्व्यक्त्या सह स्वाधिकरणीभूततत्तद्व्यक्तिवृत्तित्वं (इति ?) व्याप्तिरित्यर्थात् । अस्ति च पृथिवीत्वाधिकरणभूतघटनिष्ठाभावाप्रतियोगित्वं घटीयगन्धव्यक्तेरिति

घटीयगन्धेन सह पृथिवीत्वस्य घटरूपाधिकरणवृत्तित्वमेव व्याप्तिः । एवं पटादिगन्धेनापि सह तत्तदधिकरणवृत्तित्वमेव व्याप्तिरिति न काप्यनुपपत्तिः । न चैवं पृथिवीत्ववद् द्रव्यत्वमपि गन्धव्याप्यं स्यादेवेति वाच्यम् । द्रव्यत्वस्य घटादिरूपाधिकरणावच्छिन्नस्य व्याप्यत्वापादन(मि?इ)ष्टापत्तेः । द्रव्यत्वत्वेन च न तस्य गन्धव्याप्यता । द्रव्यत्वत्वावच्छिन्नद्रव्यत्वस्य गन्धं विनापि जलादौ सत्त्वात् । पृथिवीत्वत्वावच्छिन्नपृथिवीत्वं न गन्धं विनापि काप्यस्तीति भवति तेन रूपेण तस्य व्याप्यतेत्यप्याहुः ।

अत्र शङ्क्यते — द्रव्यत्वमेकमेव, तच्चोक्तक्रमेण च गन्धव्याप्यं भवत्येवेति व्याप्यमात्रवृत्तेर्द्रव्यत्वत्वस्य कुतो न गन्धव्याप्यतावच्छेदकत्वमिति ।

अत्रायमाशयो मिश्राणां — यद्धर्मावच्छिन्नसाधनाधिकरणीभूतयावद्व्यक्तिनिष्ठाभावाप्रतियोगिता साध्यतावच्छेदकाश्रयस्य, तद्धर्मस्य तत्साध्यतावच्छेदकाश्रयव्याप्यतावच्छेदकत्वम् । अस्ति च पृथिवीत्वत्वावच्छिन्नपृथिवीत्वाधिकरणीभूतयावद्व्यक्तिनिष्ठाभावाप्रतियोगित्व[1] गन्धत्वाश्रयस्य । पृथिवीत्वाधिकरणे यत्किञ्चिद्गन्धावश्यकत्वात् । अतो भवति पृथिवीत्वत्वं तद्व्याप्यतावच्छेदकं, न तु द्रव्यत्वत्वावच्छिन्नद्रव्यत्वाधिकरणेऽपि सर्वत्र गन्धावश्यकत्वं, येन द्रव्यत्वत्वं तद्व्याप्यतावच्छेदकं भवेदिति दिक् ।

एवमन्योन्याभावगर्भव्याप्तिलक्षणम् । अन्यच्च साध्यसामानाधिकरण्यावच्छेदकरूप(व)त्वं, साध्याधिकरणतावच्छेदकाधिकरणताप्रतियोगि(क?)त्वं, स्वाधिकरणतान्यूनवृत्त्यधिकरणताप्रतियोगिसाध्यसामानाधिकरण्यादिकमपि व्याप्तिलक्षणमूह्यम् । एवं च साध्याभाववदवृत्तित्वं, साध्यवत्प्रतियोगिकान्योन्याभावासामानाधिकरण्यं, साध्याभावव्यापकाभावप्रतियोगित्वं, साध्याविनाभूतत्वमित्यादि प्राचीनव्याप्तिलक्षणानामप्युक्तलक्षणकथनपरतया केवलान्वयिसाध्यकाव्याप्त्यादिकं साध्यत्वादिप्रवेशेनात्माश्रयादिकं च न शङ्कनीयमिति संक्षेपः ।

इदन्त्ववधेयं — संसर्गाभावः क्वचिदत्यन्ताभावः । स च सति संभवे सामान्याभाव एव प्रवेश्यः । यावद्विशेषाभावापेक्षया लघुत्वाल्लघुप्रतिपत्तिकत्वाच्च । अत एव सामान्यावच्छिन्नप्रतियोगिकश्चाभावः पृथगेव । अन्यथा वायौ प्रसिद्धरू-

---

१. 'गिकत्वं' ख. पाठः.

पत्रयाभावनिश्चयेऽपि वायौ रूपं न वेति संशयो न स्यात्। निश्चिते तदभावादिति मणिकृतः।

अत्र वदन्ति — एतावन्त्येव रूपाणि। तानि न सन्ति वायाविति निश्चयदशायां संशयस्यासिद्धतया रूपान्तरसंभावनाकाले संशयो वाच्यः। तथा च यथा रूपकोटौ रूपत्वेन संभावितं व्यक्त्यन्तरं विषयः, एवं तदभावकोटावपि व्यक्त्यन्तराभावो विषयोऽस्तु, किं सामान्याभावेन। किञ्च, समानप्रकारकसंशयस्य तादृशनिश्चयनिवर्त्यतया विशेषतस्तद्रूपाभावत्वेन निश्चयेऽपि रूपाभावत्वेनास्तु तेषामेव संशयविषयत्वं तत्तद्रूपत्वेन व्यतिरेकानिश्चयेऽपि रूपत्वेन रूपाणामिवेति।

अत्राहुः — एतावन्त्येव रूपाणीत्यवधारणभावेऽपि रूपान्तरसंभावनाविरहेऽपि संशयस्यानुभवसिद्धतया तदभावस्य संशयविषयत्वाभावः। किञ्चेत्यपि न। रूपत्वाश्रयाभावत्वेन निश्चयात्। रूपत्वावच्छिन्नाभावत्वेन तथात्वे सामान्याभावसिद्धेः। न च रूपत्वाश्रययावदभावत्वेन संशयः, रूपत्वाश्रयेण केनापि सह यावदभावस्याविरोधेन तेन रूपेण संशययोगात्। स्वस्वाभावयोरेव विरोधात्। विरोधिनोरेव संशयकोटित्वादिति विशेषाभावस्य स्वप्रतियोगिकस्य निश्चये सामान्याभाव एव संशयकोटिः, स्वप्रतियोगिकत्वादिति पक्षधरमिश्राः।

अत्रेदं शङ्क्यते — प्रसिद्धरूपातिरिक्ते रूपत्वसंशयं विना संशयोऽयमसिद्ध एव। तथा च रूपत्वेन शङ्कितस्याभावः संशयकोटिरस्तु। अस्तु वा यावदभावत्वेनापि संशयः। सहानवस्थाननियतत्वेन ज्ञातयोरेव संशयकोटित्वात्। यावदभावस्यापि प्रतियोगिसहानवस्थाननियतत्वेन ज्ञानात्। किञ्च, संशयो द्वेधा। एको रूपत्वावच्छिन्नरूपकोटिकः। अपरस्तु तत्तद्रूपत्वावच्छिन्नरूपकोटिकः। तत्रान्ते तत्तद्रूपाभावस्य प्रत्येक(स्यैर्मे)व विरोधितया संशयकोटिता, प्रथमे तु रूपत्वाश्रययावदभावस्यैव विरोधितया संशयकोटित्वं, फलबलेन तथैव विरोधनिश्चयात्। नहि यावदभावस्याधिकरणे निश्चये सति सामान्यावच्छिन्नकोटिकसंशयोऽस्ति। न (यावद्वा य)त्किञ्चिदभावनिश्चये तादृशसंयोगो नास्तीति। तस्मात् सामान्याभावे मानाभाव इति।

---

१. 'त्वाभा' क. पाठः.

अत्र पक्षधरमिश्राः — प्रतियोगिभेदेनाभावो न भिद्यते। तथा सति घट-प्रतियोगिकाभावचतुष्टयस्य भेदो न स्यात्। किन्तु प्रतियोगितावच्छेदकभेदात्। तच्चात्राप्यस्त्येव। अन्यन्ताभावे संसर्गस्यान्योन्याभावे तादात्म्यस्य प्रागभाव-ध्वंसयोः प्रतियोग्युत्तरकालपूर्वकालयोरवच्छेदकत्वात्। तथा च रूपसंसर्गप्रति-योगितावच्छेदकावच्छिन्नाभावः सामान्याभाव एव। बाधकं विना संबन्धितावच्छे-दकभेदात संबन्धि(क?)पदार्थभेदस्वीकारादिति।

अत्र शङ्कचते — अन्योन्यात्यन्ताभावयोर्द्वयोरपि प्रतियोगितावच्छेदकं लाघवाद् घटत्वमेव। तथा च तस्याभेदा(द) भेदापत्तिः। ननु तादात्म्यसंसर्गयो-रारोप्यसंसर्गत्वात् तद्भेदात् तयोर्भेद इति चेद्, न। तर्हि क्वचित् प्रतियोगिता-वच्छेदकभेदः, क्वचिदारोप्यसंसर्गभेदोऽभावभेदक इत्यननुगमः। न चारोपविषय-भेदत्वेन भेदकत्वं, तच्च प्रतियोगितावच्छेदकसंसर्गप्रतियोगिभेदसाधारणमिति नाननुगम इति वाच्यम्। तथा सति अधिकरणस्याप्यारोपविषयतया तद्भेदादप्य-भावभेदेऽपसिद्धान्तापातादिति।

अत्र प्रतिभाति — अधिकरणभेदादभावभेदेऽभाव एव धर्मिभिन्नो न सिध्येत्। अधिकरणेनैव तद्व्यवहारोपपत्तेः। नह्यधिकरणाननुगमेनानुगतघटात्य-न्ताभावव्यवहारोऽनुपपन्न इत्यतो युक्त्यन्तरमस्ति भिन्नाभावसाधकम्। अतो बाधकादधिकरणभिन्नारोपविषयभेदेनाभावभेद इति कल्प्यते। गौरवस्य प्रामाणि-कत्वात्। प्रतियोगितावच्छेदकभिन्नत्वविशेषणे मानाभावात्। सामान्याभावस्वी-कारापत्तेश्च फलमुखत्वात्। किञ्च, दण्डी पुरुषो नास्तीत्यत्र शुद्धपुरुषाभावस्या-सत्त्वेऽपि दण्डविशिष्टपुरुषाभावस्यानुभूयमानतया प्रतियोगितावच्छेदकभेदेनाभाव-भेदोऽवश्यमङ्गीकरणीयः। अपि च घटो नास्तीति सामान्याभावावगाहिबुद्धौ विशेषाभावसहस्रस्य विषयतया कल्पने गौरवमिति लाघवादेकाभावसिद्धिः। न च विशेषाभावानामननुगमेऽपि कूटत्वं साधकमिति वाच्यम्। अननुगमापेक्षया कल्प्यत्वगौरवस्य हीनत्वात्। अन्यथा स्वरूपसंबन्धस्य विशिष्टधीविषयत्वे गतं समवायेन। कर्तृजन्यतायां च घटत्वादेरननुगतस्यापि कूटत्वा(द)वच्छेदकत्व-प्रसङ्गेन कल्प्यक्षित्यादिकर्त्रापि गतमेव। किं बहुना, द्रव्यत्वगुणत्वकर्मत्वाभाव-समूहस्य सत्ताविरहव्यवहारकत्वापातात् भिन्नसत्ताविरहोऽपि न स्यात्। न स्याच्च द्रव्यत्वाद्यभावोऽपि। पृथिवीत्वाद्यभावकूटादेव तद्व्यवहारोपपत्तेः। एवं पृथिवीत्व-

घटत्वादेरप्यभावः पृथङ् न स्यात्। तस्माद् विशिष्टबुद्धौ समवायवत् सामान्याभाववुद्धौ हेतुतया लाघवादेकाभावसिद्धिः। किञ्च, द्रव्यं नेति बुद्धिर्द्रव्याभावविषयिणी। घटो न, द्रव्यं नेति बुद्ध्योरन्यतरत्वाद्, घटो नेति बुद्धिवदित्यनुमाने लाघवादेकोऽभावो विषय इति स एव द्रव्यत्वावच्छिन्नान्योन्याभाव इति दिक्।

केचित्तु — मिलिते घटद्वये रूपं नास्तीति बुद्ध्यापत्तिः, यावद्विशेषाभावस्य सामान्याभावं प्रति प्रयोजकस्य प्रत्येकं सत्त्वादित्यतिरिक्तसामान्याभावोऽङ्गीकार्य इत्याहुः। तच्चिन्त्यम्। ऐकाधिकरण्यावच्छिन्नयावद्विशेषाभावस्य सामान्याभावस्य व्यवहारजनकत्वादिति।

नव्यास्तु — एकघटसत्त्वे घटसामान्याभावो नास्तीति प्रतीतिर्न स्यात्। यावद्विशेषाभावस्य सामान्याभावरूपतया तदभावस्य यावद्विशेषरूपस्य तत्राभावात्। तथा च सामान्याभावो यावद्विशेषाभावापेक्षया भिन्नोऽङ्गीकार्यः। न चैवमेकालोकसत्त्वे अन्धकारो नास्तीति प्रतीतेरन्धकारस्यापि तत्रभावात् (तथा च?) सामान्याभावत्वावच्छिन्नत्वापत्तिरिति वाच्यम्। अन्धकारो नास्तीति प्रतीतेर्यावदुद्भूतरूपतेजोविरहो नास्तीत्यर्थः। तथा च यावत्त्वावच्छिन्नाभावस्याभावो व्यासज्यवृत्तिप्रतियोगिक एकसत्त्वेऽप्यविरुद्ध एव। न चात्रापि स एव प्रकारः, व्यासज्यवृत्त्यभावस्वीकारेऽपि सामान्याभावस्य सिद्धत्वादिति वदन्ति।

यत्तु इह रूपं नेति सामान्याकारैव (प्रतीतिः) रूपत्वावच्छिन्नाभावे प्रमाणमिति, तत्तुच्छम्। इयं प्रतीतिरधिकरणेऽभावं, तत्र च रूपप्रतियोगिकत्वं, रूपे च रूपत्ववत्तां विषयीकरोति। तच्च विशेषाभावविषयत्वेऽप्युपपद्यत एवेति न सामान्याभावे मानमिति।

इदं तु विचार्यते — प्रतियोगितावच्छेदकभेदादत्यन्तान्योन्याभावयोरिव प्रागभावध्वंसयोरपि सामान्याभावत्वमस्तु। न च प्रागभावस्य प्रतियोगिकालविरुद्धकालतयानादौ संसारे प्रतियोगियत्किञ्चिद्घटस्य सर्वदा सत्त्वाद् घटत्वावच्छिन्नप्रागभावस्यासं(भाविनि? भवेन) यत्किञ्चित्प्रतियोगितावश्य(क)तया च एकघटोत्पत्त्या नाशाप(त्ते? त्ति)रिति वाच्यम्। घटत्वावच्छिन्नप्रागभावस्य घटो भविष्यतीति प्रतीतिसि(द्ध्य? द्ध)स्य प्रतियोग्याविरुद्धकालतया यावत्प्रतियोग्युत्पत्तिनाश्यतया च महालये विनाशाद् ध्वंससामान्याभावत्वे बाधकाभावाच्च। न च ध्वंसस्य प्रतियोगिजन्यतया घटत्वावच्छिन्नयावतां च एकदासम्भावि(त)तया कथं तद-

वच्छिन्नध्वंसस्योत्पत्तिरिति वाच्यम् । यावत्प्रतियोगिजन्यतायां गौरवेण यत्किञ्चित्प्रतियोगिजन्य(त्वं ? त्वस्य) महालयकाले सम्भवेन तदा घटत्वावच्छिन्नध्वंसोत्पत्तौ बाधकाभावात् । किं बहुना, दशघटानामेकदण्डोत्पन्नानां दशसंख्यावच्छिन्नप्रागभावे बाधकाभावः । एवमेकदा नष्टानां तेषां तद्धर्मावच्छिन्नप्रतियोगिकध्वंसे बाधकाभावादिति ।

अत्र ब्रूमः — तत्तद्घटप्रतियोगिकप्रागभावत्वेनैव तत्तद्घटनाश्यता तत्तद्घटविरुद्धकालता च, न तु तन्मात्रप्रतियोगिप्रागभावत्वेन, गौरवात् । तथा च घटत्वावच्छिन्नप्रागभावः कदा वर्ततां, संसारस्यानादितया यत्किञ्चिद्घटस्य सर्वदा सत्त्वात् । एवं ध्वंसेऽपि तत्तद्घटध्वंसत्वेनैव तत्तद्घटजन्यता, न तु तन्मात्रध्वंसत्वेन, गौरवादिति पर्यवसितं यावत्प्रतियोगिजन्यत्वं ध्वंसस्येति यावद्घटस्यैकदा सत्त्वाभावात् कथं ध्वंसोत्पत्तिः । किञ्च, ऐकाधिकरण्यावच्छिन्नयावद्विशेषाभावं विना न सामान्याभाव इति सर्वानुभवसिद्धं, प्रागभावध्वंसौ प्रतियोगिसमवा(यवृत्तिरि ? यिवृत्ती इ)त्यपि । तथा च विशेषाभावानामैकाधिकरण्याभावात् कथं सामान्याभावयोः ध्वंसप्रागभावयोः सत्तेति न तयोः सामान्याभावत्वम् । अत एव किं बहुनेत्यपि निरस्तम् । किञ्च, तत्प्रागभावध्वंसाधारस्य तदाधारतानियमेनान्यघटाधारतान्यकपाल आपद्येत । प्रसज्यते च घटानामभेदः । तत्प्रागभावजन्यस्य तत्त्वनियमात् । न च सामान्यप्रागभावो न प्रतियोगिजनक इति वाच्यम् । तथा सति प्रागभावत्वव्याकोपात् । दशघटत्वावच्छिन्नध्वंसस्यापि तत्तद्विशेषध्वंससामग्रीप्रसूतत्वेन तदभेदप्रसङ्गात् । ननु विशेषध्वंसाजनकघटान्तरजन्यत्वेन ततोऽस्य भेद इति चेद्, न । एवं सत्यपि विशेषध्वंससामग्र्यामधिकप्रवेशेन तदुत्पत्त्या प्रमाया ज्ञानविशेषत्ववत् तस्य विशेषध्वंसविशेषत्वापत्तेरित्यास्तां पल्लवेन ।

इदं त्ववधेयम् — अन्योन्याभावगर्भव्याप्तौ प्रतियोग्यसामानाधिकरण्यं न विशेषणम् । अन्योन्याभावस्याव्याप्यवृत्तित्वविरहेणाव्याप्त्यप्रसङ्गात् । न च तदेवासिद्धम् । अभेदस्याबाधितप्रत्यभिज्ञानात् । भेदाभेदयोः परस्परविरोधादिति माणिक्कृतः ।

अत्र शङ्क्यते — वृक्षत्वेन भेदाभावेन तेन रूपेणाभेदप्रत्यभिज्ञा । संयोगित्वेन भेदधीरस्तु । को दोषः । भेदाभेदयोः परस्परविरोधोऽप्येकावच्छेदेनैव

कल्प्यः, मूले वृक्षः संयोगवानग्रे नेति प्रतीतेः। अन्यथा घटतदत्यन्ताभावयोर्वैयधिकरण्यदर्शनात् संयोगतदत्यन्ताभावयोरपि तथात्वं स्यादिति (वल्लभाचार्यमते सर्वापेक्षया बलवत्त्वादिति!।)

अत्र वदन्ति—संयोगात्यन्ताभावविषयत्वेनैव संयोगवान् नेति बुद्धेरुपपत्तौ न परस्परविरुद्धसंयोगतद्वदन्योन्याभावयोरेकत्र समावेशकल्पना। संयोगवदन्योन्याभावग्रहकाले संयोगत्वावच्छिन्नसंयोगग्रहस्य तदत्यन्ताभावग्रहहेतोरावश्यकत्वात्। अत एवान्योन्याभाव एवं सति क्वापि विषयो न स्याद्, धर्मात्यन्ताभावविषयत्वेनैव तद्बुद्ध्युपपत्तेरिति अत्र दूषणमपास्तम्। घटान्योन्याभावधीकाले[1] घटत्वत्वविशिष्टघटत्वज्ञानस्य तदत्यन्ताभावधीहेतोरनियमेनान्यथासिद्ध्यभावाद्, भावाभावसामानाधिकरण्यस्यान्यथानुपपत्तिकल्प्यतया प्रकृतेऽन्योन्यात्यन्ताभावयोरन्यतरविषयताविनिगमकचिन्तायां संयोगात्यन्ताभावग्रहसामग्रीसत्त्वात् तन्मा(त्रा?त्र)विषयत्वेन तत्प्रतीत्युपपत्तेरुक्तत्वाच्च। न चैवं विशिष्टप्रतियोगित्वेनोल्लेखो न स्यादिति वाच्यम्। विशेषणमात्रविषयकस्यापि स्वर्गीत्यत्रैव तादृशोल्लेखदर्शनात्। अत एव गुणे संयोगवदन्योन्याभावो विषय एव तत्प्रतीतेः। संयोगवदभिन्नत्वेनाज्ञानादिति। वस्तुतस्तु यदि संयोगवति तद्वदन्योन्याभावः, तदा घटपटौ भिन्नाविति वदिमौ भिन्नाविति प्रत्ययापत्तिः। द्रव्यभेदे सति द्वित्वादिसङ्ख्योत्पत्तेरिति तत्त्वम्।

यत्तु अभिन्ने धर्मिणि भिन्नधर्मावच्छेदेन वृत्तिरव्याप्यवृत्तिता। न चैतदन्योन्याभावस्य सम्भवति, तस्मिन् सति धर्म्यभेदस्यैवाभावादित्यन्योन्याभावो नाव्याप्यवृत्तिरिति। तत्तु न। वृक्षत्वेन धर्म्यभेदस्य सत्त्वादिति सङ्क्षेपः।

इति व्याप्तिवादः।

अथ भूयोदर्शनवादः।

नन्वस्तु तावद् व्याप्तिः। तद्ग्रहो न भूयोदर्शनेन। भूयोधिकरणदर्शनस्य

---

१. 'तोर्निय' क. पाठः.

भूयोरूपदर्शनस्य भूयोनिरूपितदर्शनस्य वा व्यभिचारिसाधारणतयाव्यभिचारिण्य-सत्त्वेन चानिश्चायकत्वाद्, भूयस्त्वस्याननुगमाच्च । अत एव सकृत्सहचारदर्शन-मपि व्यभिचारिसाधारणतया न तन्निश्चायकम् । तथा च सकृ[1]दसकृदुदासीनसह-चारदर्शनमपि । तर्कस्तु व्याप्तिग्रहमूलकतयानवस्थाकलित एवेति न व्याप्तिग्राहकः । किं बहुना, सहचारस्य व्यभिचार्यव्यभिचारिसाधारणतया संशायकतया न व्याप्ति-निश्चायकत्वं, संशयसामग्र्या निश्चयप्रतिबन्धकत्वात् । यत्तु व्यभिचारसंशय एव तज्जन्यो व्याप्तिनिश्चयप्रतिबन्धकः (न च ? इति तन्न ।) ग्राह्यसंशयस्य प्रतिबन्धकत्वे मानाभावेनोत्तेजकाकल्पनाद्, विशेषदर्शनकालीनसंशयकाले निश्च-यानुत्पादस्य संशयसामग्रीप्रयुक्तत्वाद् एकमात्रकोटिविशेषादर्शनसहकृतसंशयत्वेन प्रतिबन्धकत्वकल्पनापेक्षया संशयसामग्रीत्वेन प्रतिबन्धकताकल्पनाया लघुत्वाद्, विरोधिसामग्रीत्वेन संशयसामग्र्याः प्रतिबन्धकत्वकल्पनाच्च । न च ग्राह्याभावनि-श्चयत्वेन प्रतिबन्धकत्वे गौरवमिति लाघवात् तज्ज्ञानत्वेनैव तथात्वमिति संशय-स्यापि प्रतिबन्धकत्वसिद्धिरिति वाच्यम् । तथा सति विशेषादर्शनविशिष्टग्राह्याभा-वज्ञानाभावस्य निश्चयं प्रति हेतुत्वमिति बाधे सत्यनुमित्यापत्तेः । बाधस्य विशेषदर्श-नविशिष्टतया विशिष्टाभावस्य सत्त्वात् । तथा च विपरीतनिश्चयस्य ग्राह्याभावनि-श्चयत्वेन संशयस्य च विशेषादर्शनविशिष्टग्राह्यसंशयत्वेन प्रतिबन्धकत्वं वाच्यम् । तथा च द्वितीयकल्पनायां गौरवम् । वस्तुतस्तु विपरीतज्ञानत्वेन यत्र प्रतिबन्ध-कता, तत्र प्रतिबन्ध्यतावच्छेदकं ग्राह्यज्ञानत्वं, तन्निश्चयत्वं वा । नाद्यः । संशया-नन्तरं संशयानुत्पत्तिप्रसङ्गात् । संशयात्मकग्राह्याभावज्ञानसत्त्वात् । नान्त्यः । विपरी-तनिश्चयानन्तरं संशयोत्पत्तिप्रसङ्गात् । विपरीतज्ञानस्य ग्राह्यनिश्चय एव प्रति-बन्धकतया संशयोत्पत्तौ बाधकाभावादिति न संशयनिश्चयसाधारणी प्रतिबन्धक-ता भवतीति तत्त्वम् । तस्मात् सहचारादिधर्मदर्शनस्य व्यभिचारसंशयसामग्रीत्वेन व्याप्तिग्रहप्रतिबन्धकत्वमिति ।

अत्र मणिकृतः — व्यभिचारज्ञानविरहसहकृतं सहचारज्ञानं व्याप्तिग्राह-कम् । व्यभिचारज्ञानं निश्चयः शङ्का च । सा च क्वचिदुपा(दि?धि)सन्दे(ह?हात्) क्वचित् साधारणधर्मदर्शनादेः । तदभावश्च क्वचित् तर्कात्, क्वचित् स्वतः सिद्ध एवेति न वानवस्था न वा व्याप्तिग्रहानुपपत्तिरिति ।

---

१. 'कृत्सकृ' क. पाठः.

अत्र वदन्ति — व्यभिचारज्ञानमिह साध्याभाववद्वृत्ति(त्व)ज्ञानं हेतौ वा, स्वसमानाधिकरणाभावप्रतियोगित्वज्ञानं साध्ये वा। नाद्यः। केवलान्वयिनि साध्याभावाप्रसिद्ध्या तदभाववद्वृत्तित्वज्ञानासम्भवेन तदभावासम्भवाद् व्याप्त्यग्रहप्रसङ्गात्। नान्त्यः। व्यभिचारव्याप्त्योः न परस्पराभावरूपत्वमित्यग्रे मणौ प्रतिपादनात् तद्विरोधः, उक्तव्यभिचारविरहरूपत्वाद् व्याप्तेः। न च व्याप्तेर्व्यभिचाराभावविशिष्टसामानाधिकरण्यरूपतया न व्यभिचारविरहरूपत्वमिति न तद्विरोध इति वाच्यम्। तथापि व्यभिचारज्ञानाभावमात्रं वा व्याप्तिनिश्चायकम्, उत तन्निश्चयाभावः। आद्ये हेतुमत्तया निश्चिते साध्यसन्देहात्मकव्यभिचारज्ञानसत्त्वान्न क्वाप्यनुमान(प्र)वृत्तिः स्यात्। अन्त्ये सन्दिग्धानैकान्तिकोच्छेदः। किञ्च, अत्यन्ताभावगर्भायामन्योन्याभावगर्भव्यभिचारज्ञानस्यापि प्रतिबन्धकत्वाद् आभासाधिक्यापत्तिः। किं बहुना, साध्याभाववद्वृत्तित्वज्ञानस्य क्वचिद्, हेत्वधिकरणनिष्ठाभावप्रतियोगित्वज्ञानस्य क्वचित् प्रतिबन्धकत्वमित्यननुगमः। अपि च परकीयव्यभिचारज्ञाने सत्यपि व्याप्तिग्रहणात् स्वव्यभिचारज्ञानस्याभावः कारणं वाच्यः। तथा च यस्य व्यभिचारज्ञानं नास्ति, तस्य व्याप्तिग्रहो न स्यात्। न च व्यभिचारज्ञानमात्रं स्वपरसाधारणं प्रतियोगि, तदभावो[1] यदात्मनि, तत्र व्याप्तिग्रह इति परकीयव्यभिचारज्ञानाभावमादायैव तत्र व्याप्तिग्रह इति वाच्यम्। प्रत्युत्पन्नव्यक्तिद्वये पुरुषान्तरीयज्ञानाविषये व्याप्त्यग्रहप्रसङ्गात्। व्यभिचारज्ञानाप्रसिद्ध्या तदभावासम्भवात्। न चैश्व(र्यैरं) व्यभिचारज्ञानं तत्र नास्तीति वाच्यम्। अव्यभिचारिणि व्यभिचारग्रहे ईश्वरस्य भ्रान्तत्वापत्तेरिति।

अत्राहुः — हेत्वधिकरणत्वेन ज्ञायमानधर्मिनिष्ठाभावप्रतियोगित्वनिश्चयविषयत्वाभावो यत्र साध्ये यस्य यदास्ति, तस्य तदा तद्व्याप्तिग्रहः। प्रत्युत्पन्नस्थले तत्प्रतियोगित्वाभावघटितव्याप्तिग्रहस्य तत्प्रतियोगित्वज्ञानमन्तरेणासम्भवाद् अभावज्ञानस्य प्रतियोगिज्ञानजन्यतानियमाद् अन्ततस्तत्पुरुषीयव्यभिचारज्ञानमेवास्तीति न कोऽपि दोषः। अत एव पक्षीयव्यभिचार(ज्ञान?)संशयो न प्रतिबन्धकः, न वा सन्दिग्धानैकान्तिकोच्छेदः। न चैवमुपाधिसन्देहाद्याहितव्यभिचारसंशयोऽपि निश्चितहेतुमति साध्यसन्देहरूपः प्रतिबन्धको न स्यादिति वाच्यम्। अन्याहितस-

---

१. 'वयोर्यदा' क. पाठः.

न्देहाभावत्वेनापि व्याप्तिग्रहहेतुत्वमित्यग्रे वक्ष्यमाणत्वात्। अत एव साध्याभाववद्वृत्तित्वज्ञानमप्युक्तक्रमेणैव प्रतिबन्धकं, न पृथग् ग्राह्याभावज्ञानत्वेन। अन्यत्र क्लृप्तप्रतिबन्धकत्वातिक्रमे बीजाभावात्। अत एव चात्यन्ताभावगर्भव्याप्तौ नान्योन्याभावगर्भव्यभिचारज्ञानं साक्षात्प्रतिबन्धकं, किन्त्वत्यन्ताभावगर्भव्यभिचारज्ञानद्वारेत्यग्रे वक्ष्यते।

ननु व्यभिचारज्ञानाभावो भवतु प्रतिबन्धकाभावत्वेन व्याप्तिग्रहहेतुः। सहचारधीस्तु कुतः। व्याप्तौ सहचारस्य विशेष्यतया तत्सन्निकर्षस्यैव हेतुत्वात्। अन्तरा तज्ज्ञानकल्पने मानाभावात्। अन्यथा सर्वत्र विशेष्यज्ञानहेतुताप्रसक्तावपसिद्धान्तापातात्। न च व्याप्तिविशेषणकप्रत्यक्षे विशेषणज्ञानतया सहचारधीर्हेतुः, तथापि व्याप्तिप्रत्यक्षत्वावच्छेदेन तद्धेतुत्वासिद्धेः। तद्विशेष्यकप्रत्यक्षे अहेतुत्वात्, सहचारज्ञानत्वेन हेतुत्वालाभाच्च। अन्यथा व्यभिचारग्रहस्यापि विशेषणज्ञानतया हेतुत्वे कुतो विशेषाभिधानं सहचारधीर्हेतुरिति। सिद्धं चैतद् विशिष्टधीर्विशेषणधीजन्येति। तथा च साधनानर्थक्यम्। न च व्यतिरेकसहचारस्यान्वयव्याप्तिनिश्चायकतया न विशेषणधीत्वेन तस्य हेतुता, किन्तु सहचारज्ञानत्वेनैवेति वाच्यम्। सहचारधीहेतुत्वसिद्धौ व्यतिरेकसहचारस्यान्वयव्याप्तिनिश्चायकता कल्प्या। तस्यैवाद्याप्यसिद्धेरसिद्धमसिद्धेनेति न्यायापातात्। किञ्च, सहचारज्ञानस्य हेतुता न सहचारज्ञानत्वेन, अतिप्रसङ्गात्। नापि स्वसहचारज्ञानत्वेन, व्यतिरेक्यव्याप्तेः। न च व्यभिचारज्ञानविरोधित्वेन स्वस्वाभावसहचारज्ञानानुगमः, अन्वयसहचारज्ञानस्य व्यभिचारघटकसाध्याभावधीविघटकत्वेन व्यतिरेकसहचारज्ञानस्यापि व्यभिचारघटकहेतुज्ञानविरोधितया व्यभिचारधीविरोधि(त्वा)दिति वाच्यम्। सहचारग्रहेऽप्यधिकरणान्तरे व्यभिचारज्ञानेन तस्य व्यभिचारज्ञानविरोधित्वाभावात्। न च तदधिकरणनिष्ठव्यभिचारज्ञानविरोधित्वं विवक्षितमिति वाच्यम्। तथा सति वह्निघटसहचारज्ञानस्यापि धूमवह्निव्याप्तिग्राहकतापत्तेः। तस्यापि वह्न्यभावघटितव्यभिचारधीविरोधित्वात्। एवं रासभधूमाभावसहचारज्ञानस्यापि धूमज्ञानविरोधित्वेन तद्व्यभिचारज्ञानविरोधित्वेन धूमवह्निव्याप्तिग्राहकतापात इति। अपि च, व्यभिचारज्ञानविरहसहकृतसहचारधीरनुमितावेव तद्धेतोरिति न्यायाद्धेतुरस्तु। किमन्तरा व्याप्तिग्रहणेनेत्यलं विस्तरेणेति।

अत्र पक्षधरमिश्राः — विरुद्धे सहचारभ्रमाद् व्याप्तिभ्रम इत्यनुभवसिद्धम्।

तथा च यद्विशेषयोरिति न्यायेन सहचारज्ञानमात्रस्य व्याप्तिप्रत्यक्षहेतुता कल्प्यते । यच्च तद्धेतोरिति न्यायाद् व्यभिचारधीविरहसहकृतसहचारधीरनुमितावेव हेतुरस्त्वित्युक्तं, तदपि न । अनुमितौ व्याप्तिज्ञानस्याहेतुत्वे व्यभिचारज्ञानप्रतिबन्धकत्वस्यैवासिद्धेः । ग्राह्याभावानवगाहिज्ञानस्य जनकधीविघट(क?)नद्वारैव प्रतिबन्धकत्वादिति वदन्ति ।

अत्र शङ्क्यते — व्याप्तिभ्रम एव सहचारभ्रमो न त्वनयोर्हेतुहेतुमद्भावोऽस्ति, मानाभावात् । अपि च, व्यभिचारिणि सहचारभ्रमं विनापि व्याप्तिभ्रमदर्शनाद् न तद्भ्रमो व्याप्तिभ्रमहेतुः । यच्च व्यभिचारधीप्रतिबन्धकत्वान्यथानुपपत्त्या व्याप्तिधीहेतुत्वमवादि, तदप्यसारम् । साक्षादप्रतिबन्धकेन प्रतिबन्धकरणे जनकज्ञानविघटनापेक्षणात् । व्यभिचारधियस्तु साक्षादेव प्रतिबन्धकत्वात् । न च ग्राह्याभावाविषयकतया प्रतिबन्धकस्य जनकधीविघटकत्वमिति नियम इति वाच्यम् । तथा सति शाब्दबोधे असाधुत्वधीः प्रतिब(न्धकी? न्धिका) न स्यात् । साधुत्वज्ञानस्य तत्राहेतुत्वेन जनकज्ञानविघटकत्वाभावादिति ।

अत्र नव्याः — भ्रमो दोषजन्यः । स च सति सम्भवे अनुगत एव कल्प्यो बाधकाभावात् । तथा च विरुद्धस्थलीयव्याप्तिभ्रमत्वावच्छेदेन सहचारभ्रमस्य दोषतया हेतुत्वं सिद्धम् । यद्विशेषयोरिति न्यायेन व्याप्तिप्रत्यक्षत्वावच्छेदेन सहचारज्ञानत्वेन हेतुत्वं कल्प्यते । न च सहचारभ्रमजनक एव तत्र दोषोऽस्तु, आवश्यकत्वादिति वाच्यम् । तस्याननुगमात् । सहचारभ्रमजनकत्वेन चानुगमे लाघवाद् धर्मिधीवत् सहचारभ्रमस्यैव हेतुत्वौचित्यादिति समादधते ।

नन्विदमप्यसत् । साधारणस्थले व्याप्तिभ्रमं प्रत्यव्यभिचारभ्रमस्य प्रयोजकत्वावश्यकत्वेन व्याप्तिभ्रमत्वावच्छेदेन तस्य दोषता कल्प्यतां, तत एव विरुद्धस्थलीयव्याप्तिभ्रमस्याप्युपपत्तौ तदवच्छेदेन सहचारभ्रमरूपदोषान्तरकल्पनायां मानाभावादिति ।

अत्र ब्रूमः — आकाशादाववृत्तिपदार्थे अव्यभिचारभ्रमं विनापि व्याप्तिभ्रमदर्शनाद् विरुद्धस्थलीयव्याप्तेर्भ्रमत्वमेव सहचारभ्रमजन्यतावच्छेदकं कल्प्यते । न च तत्राप्यव्यभिचारभ्रम एव प्रयोजकोऽस्तु । प्रतियोग्यधिकरणानधिकरणहेतुसमानाधिकरणात्यन्ताभावाप्रतियोगित्वस्याव्यभिचारस्यावृत्तिपदार्थे सत्त्वेन तद्भ्रमाभावाद्, अवृत्त्यभावस्य प्रतियोग्यधिकरणाप्रसिद्ध्या तादृशाभावाप्रतियोगित्व-

स्याकाशादौ सत्त्वात् । यद्वा साध्यसामानाधिकरण्यावच्छेदकरूपत्वलक्षणव्याप्ति-ज्ञानहेतुत्वाभिप्रायकः सहचारधीहेतुताप्रवादः । तज्ज्ञाने सहचारस्य विशेषणत्व-नियमेन विशेषणज्ञानतया तद्धेतुत्वात् ।

अन्ये तु — अव्यभिचरितसामानाधिकरण्यव्याप्तिपक्षेऽपि सामानाधिकर-ण्यस्य व्यधिकरणवह्निधूमयोरभावेन सामानाधिकरण्याश्रयवृत्तिधर्मत्वमर्थो वाच्यः । तज्ज्ञाने च सामानाधिकरण्यज्ञानस्य विशेषणज्ञानतानैयत्येन हेतुत्वमित्याहुः । यत्तु भूयस्सहचारज्ञानमुत्सर्गविधया व्याप्तिग्राहकं, भूयः सहचरितस्य औत्सर्गिकव्या-प्तियोगादिति । तन्न । उत्सर्गस्य बाधकैकापोद्यनियमरूपतया नियमस्य च व्या-प्तिरूपतया ग्रहीतुमशक्यत्वात् । तस्यैव प्रकृते चिन्त्यमानत्वादिति न किञ्चिदेतत् । असाधुत्वज्ञानस्य शाब्दज्ञान इव व्यभिचारज्ञानस्याप्युनुमितौ साक्षात्प्रतिबन्धक-त्वमस्तु, किं व्याप्तिधीहेतुतयेतीदन्त्ववाशिष्यते ।

अत्रोच्यते — व्याकरणव्युत्पाद्यत्वस्य साधुत्वस्य ज्ञानं न शाब्दज्ञानहेतुः सम्भवति, व्याकरणाप्रतिसन्धानदशायामपि शाब्दबोधात् । तथा च तत्रागत्या-साधुत्वज्ञानस्य साक्षात्प्रतिबन्धकता । तदभावस्य हेतुता दृष्टचरी कल्प्यताम् । इह तु व्यभिचारज्ञानस्य ग्राह्याभावावगाहितया अन्यत्र कृत्स्नप्रतिबन्धकतयैवोप-पत्तावदृष्टचरप्रतिबन्धकतायां मानाभावेन व्याप्तिधीविघटकतयैव प्रतिबन्धकत्वक-ल्पनात् । किञ्च, परामर्शानन्तरजातव्यभिचारज्ञानेऽप्यनुमित्यप्रतिबन्धेन न तत्र तस्य साक्षात्प्रतिबन्धकता । न च परामर्शानन्तरं व्यभिचारज्ञानासम्भवः । ग्राह्याभावा-वगाहिप्रत्यक्षस्यैव ग्राह्यप्रत्यक्षप्रतिबन्धकतया शाब्दादिपरामर्शनन्तरं प्रात्यक्षिक-व्यभिचारज्ञाने बाधकाभावात् । अपि चानुमितौ व्यभिचारज्ञानाभावो हेतुरव्यभि-चारज्ञानं वेति विचारे लाघवादव्यभिचारज्ञानमेव हेतुतया कल्प्यते । अन्यथायो-ग्यताज्ञानाभावस्य शाब्दबुद्धौ, प्रवृत्तौ च बलवदनिष्टाजनकताज्ञानाभावस्य हेतु-त्वापत्तौ बहुविप्लवः प्रसज्येतेति । यच्च तदधिकरणनिष्ठव्यभिचारज्ञानविरोधिसह-चारज्ञानत्वेन हेतुतायामतिप्रसक्तमभ्यधायि, तदबोधात् । तदधिकरणपदेन व्य-भिचारप्रयोजकसाध्याभावहेतुरूपदलद्वयान्यतरवत्तयोपस्थिताधिकरणस्य विवक्षित-त्वात् । तथा च घटवह्निसहचारग्रहकाले घटधूमाभावसहचारग्रहस्थले वा धूमव-त्तया वह्न्यभाववत्तया वाधिकरणोपस्थितौ व्यभिचारधीविरहे च भवत्येव व्याप्ति-ग्रह इति न काप्यनुपपत्तिः ।

केचित्तु — सहचारधीत्वेनैव व्याप्तिग्राहकता । तस्याश्च व्यभिचारधीविरहो द्वारम् । तेन सा यत्र व्यभिचारधियं प्रतिबध्नाति तत्र व्याप्तिग्रहं जनयति । अत एव व्यभिचारधीविरहसहकाले तथोक्तद्वारिणो द्वारसाहित्येनैव फलजनकत्वादित्यवोच(त्?न्)। तच्चिन्त्यम् । सहचारज्ञानस्य तदधिकरण एव व्यभिचारधीविरोधित्वात् , व्यभिचारधीविरहस्य च सकलाधिकरणीयस्य व्याप्तिबुद्धिहेतुतया अतद्द्वारत्वात् । तस्मात् सहचारज्ञानं व्यभिचारप्रयोजकरूपवत्त्वोपस्थिताधिकरणनिष्ठव्यभिचारज्ञानविरोधिसहचारज्ञानत्वेन व्याप्तिधीहेतुः । सकलाधिकरणीयव्यभिचारधीविरहश्च तत्सहकारीत्येव तत्त्वम् ।

स्यादेतत् । व्याप्तेः प्रत्यक्षत्वे सर्वमिदं सङ्गच्छते । तदेव तु नास्ति । साधनवन्निष्ठाभावप्रतियोगिसामान्यान्योन्याभावस्य योग्यायोग्यप्रतियोगित्वेन योग्यानुपलब्ध्यग्राह्यत्वादिति । मैवम् । अयोग्यप्रतियोगिकाभावस्यापि योग्यप्रतियोगितावच्छेदकरूपेण प्रत्यक्षत्वात्, तेन रूपेणापादनसम्भवात् । प्रकृतेऽपि तादृशाभावप्रतियोगित्वस्य प्रतियोगितावच्छेदकस्य योग्यत्वात् । अत एव घटादावितरभेदः प्रत्यक्ष इति वक्ष्यति मणिकारः । यदि च तादृशप्रतियोगित्वाभाव एव व्याप्तिप्रविष्टः, तदा प्रतियोगिनस्तस्य योग्यत्वादनुपपत्तिरेव नास्ति । यत्तु — व्याप्तेरयोग्यत्वेऽप्युपनीतप्रत्यक्षत्वं सम्भवत्येव । न चोपनयोऽप्यनुमानेनैव, प्रत्यक्षासम्भवात् । तथा च व्याप्तिबुद्धावुपनयापेक्षायामनवस्थेति वाच्यम् । अन्यथानुपपत्त्या जन्मान्तरीयसंस्कारोपनीतव्याप्तिग्रहस्य क्वचिद्भावेन तद्विरमादिति गौडैर्दूषितम् । तन्न । उक्तक्रमेण व्याप्तेर्लौकिकप्रत्यक्षस्यैवोपपत्तावुपनीतभानानुरोधेन जन्मान्तरीयसंस्कारानपेक्षणात् । तस्य जीवनान्यथानुपपत्तिकल्प्यत्वादिति ।

ननु तर्का(व्य?व्य)भिचारशङ्कापाकरणे व्याप्तिग्रह इति अनुपपन्नं, तर्कस्यापि व्याप्तिग्रहमूलत्वेनानवस्थाप्रसङ्गात् । न चोक्तं क्वचिद्व्यभिचारशङ्काविरहः स्वतः सिद्ध एव, कोट्यद्युपस्थित्यभावेनापि संशयाभावादिति नानवस्थेति वाच्यम् । कोट्युपस्थितिविरहे हेतुमन्निष्ठाभावाप्रतियोगि(क?)त्वस्याप्यग्रहप्रसङ्गाद् व्याप्तिग्रहस्यानुपपत्तेरिति चेद्, न । हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकावच्छिन्नोपस्थितौ तद्भिन्नत्वस्य पूर्वाज्ञातस्यापि भानसम्भवेन व्याप्तिग्रहसम्भवात् । संशयस्य कोटिद्वयोपस्थितिसाध्यतया व्यभिचाराव्यभिचारकोट्युपस्थितिं विना-

१. 'तिव्यभिचारसाध्यतयाव्यभिचारको' क. पाठः.

सम्भवात् । क्वचित् तद्व्यभिचारशङ्कावारणार्थं तर्कापेक्षायामपि सर्वत्र तदपेक्षा नास्तीति नानवस्था । ननु स्वस्य कोऽस्यस्मृत्यादिना शङ्काविरहादस्तु व्याप्तिग्रहः । यस्त्वनुमानप्रामाण्यप्रतिकूलश्चार्वाको ममावश्यं व्यभिचारशङ्कास्तीति न व्याप्तिग्रह इत्यनुमानं न प्रमाणमेवेति ब्रूते, तं प्रति किमुत्तरमिति चेद्, न । धूमवह्न्योः कार्यकारणभाव(आ ! ग्र)हस्यैव शङ्कापनायकत्वात् । न च शङ्कायां कार्यकारणभावोऽपि दुर्ग्रहः । तत्रानन्यथासिद्धान्वयव्यतिरेकसहकृतप्रत्यक्षस्य ग्राहकत्वात्, तस्य च तर्कविशेषसहकारेण निर्णायकतया शङ्कानवकाशात् । स च तर्कः धूमो यदि वह्न्यसमवहितसामग्र्यजन्यत्वे सति वह्निसमवहितसामग्र्यजन्यः स्याद्, नोत्पन्नः स्याद् आकाशवदिति मणौ व्यक्तम् । अत्र च विपर्ययापर्यवसानमनाशङ्क्यं, प्रत्यक्षसहकारित्वादस्य । अनुमानसहकारिण एव तर्कस्य तदपेक्षणात् । वह्न्यसमवहितसामग्र्यजन्यत्वं पक्षविशेषणमित्यपि केचित् । अत्र तर्के उत्पन्नत्वस्य सुदृढप्रमाणावधृततया इष्टापत्तिशङ्का नास्त्येव । वह्न्यसमवहितसामग्र्यजन्यत्वासिद्धिमूलशैथिल्ययोः सम्भावना परैर्वाच्या । सापि तव नास्तीति परं प्रति वाच्यम् । तत्र चेत् परो ब्रूयाद् अस्त्येव मम शङ्केति, तदा तं प्रति व्याघातो देयः । तथा सति (नियमतो ?) धूमार्थं वह्नेः, परप्रतिपत्त्यर्थं शब्दस्य, तृप्त्यर्थं भोजनस्योपादानं नियमतो न स्यात् । नहि यद्व्यतिरेकेण यत् सम्भाव्यते तदर्थं नियमात् तदुपादीयेतेति । तथा च नियतं तदुपादानमेव तादृशशङ्कापिशाच्युत्थानप्रतिबन्धकमिति परार्थानुमानमपि सम्भवति । एतदभिप्रायक एव 'उपादानं शङ्काप्रतिबन्धकमि'ति मणिरिति विभावनीयम् । यत्तु — स्वार्थानुमान एवोपादानं शङ्काप्रतिबन्धकमित्यभिप्रायको मणिः । न चोपादानं यत्नो न शङ्काप्रतिबन्धकः, विरोधिनिश्चयस्यैव तत्प्रतिबन्धकत्वाद्, उपादानजनकीभूतहेतुताग्रहस्य चोपादानपदार्थत्वे अन्योन्याश्रयः, शङ्काप्रतिबन्धे हेतुताग्रहात् तेन च शङ्काप्रतिबन्धादिति वाच्यम् । उपादानपदेन वह्न्यसमवहितानुपादानप्रयोजकवह्न्यसमवहिताजन्यत्वज्ञानस्य विवक्षितत्वादिति । तन्न । वह्न्यसमवहिताजन्यत्वज्ञानाद् वह्न्यसमवहितजन्यत्वशङ्काव्युदासेऽपि अहेतुक(त्व)शङ्काया अप्रतिबन्धात् । न च वह्न्यसमवहिताजन्यत्वधीः कार्यं सहेतुकमित्यनुमितिसहाया सर्वशङ्कापनायिकेति वाच्यम् । तस्या अनुमितेर्व्याप्तिग्रहमूलकतयानवस्थानात् । शङ्काव्युदासस्य तत एव भावे तर्कानर्थक्यापत्तेश्च ।

केचित्तु — उपादानप्रयोजकीभूतान्वयव्यतिरेकशालित्वज्ञानमेव शङ्काप्रतिबन्धकत्वेन विवक्षितम्। यद्धर्मावच्छेदेन यद्धर्मावधारणं तद्धर्मावधारणस्य तत्र तच्छङ्काप्रतिबन्धकत्वात्। धूमत्वावच्छेदेन वह्निव्याप्त्यवगमाद् धूमत्वज्ञानस्यैव वह्निव्याप्तिसंशये तथा(च?)वह्न्यन्वयव्यतिरेकशालित्वावच्छेदेन वह्निजन्यत्वावधारणात् तज्ज्ञानस्य (च) तत्संश(य?ये) विरोधित्वम्। न चैवं तर्को व्यर्थः, शङ्काप्रतिबन्धस्य तत्फलस्यान्वयादिज्ञानादेव सिद्धेरिति वाच्यम्। तर्कस्यैवान्वयादिज्ञानरूपत्वात्। वह्न्यसमवहितसामग्र्यजन्यत्वे सतीत्यनेन व्यतिरेकस्य, वह्निसमवहितसामग्र्यजन्यत्वेनार्थादन्वयस्य विषयीकरणात्। यदभावे यदभावः, तद्भावेऽपि तदभावे तदनुत्पादप्रसङ्गात्। तथा च तर्कतयान्वयादिज्ञानतया च स एव शङ्काप्रतिबन्धक इति न व्यर्थ इत्याहुः।

अत्रेदं चिन्त्यम् — अन्वयादिकं नियतं शङ्काप्रतिबन्धकमनियतं वा। नाद्यः। सहचारदर्शनस्य नियतान्वयव्यतिरेकज्ञानरूपत्वाभावे तदसिद्धेः। नान्त्यः। व्यभिचारिसाधारणतया शङ्का(यां?याम)प्रतिबन्धकत्वात्। अत एव नान्वयाद्यनुविधायित्वज्ञानमवच्छेदकधर्मज्ञानत्वेन शङ्कापनायकम्। अन्वयाद्यनुविधायित्वज्ञानस्य व्यभिचार्यन्यथासिद्धसाधारणतयावच्छेदकधर्मत्वाभावात्। न चावच्छेदकधर्मत्वाभावेऽपि तत्त्वेन ज्ञानात् शङ्काप्रतिबन्धो भूयादेव, तावतैव तर्कस्य सार्थक्यमिति वाच्यम्। भ्रमरूपावच्छेदकत्वज्ञानस्य विवक्षितत्व एतावत्प्रयासवैफल्यात्। भ्रमेण यत्किञ्चिद्धर्मस्यैवावच्छेदकत्वग्रहसम्भवात्। किं बहुना, तर्कस्यान्वयविषयत्वमेव नास्ति। यदभावे यदभावस्तद्भावेऽपि तदभावे तन्नोत्पद्येतेत्यस्य व्याप्त्यन्तरत्वात्।

नव्यास्तु — अन्वयाद्यनुविधायित्वज्ञानं तर्कमूलभूतं तर्कभिन्नमेव शङ्काप्रतिबन्धकम्। तथा च तर्कस्यान्वयादिविषयत्वाभावेऽपि न क्षतिः। न चैवं शङ्काप्रतिबन्धस्य तर्कप्रयोजनस्यान्वयादिज्ञानादेव सिद्धेः किं तर्केणेति वाच्यम्। तर्कस्यानिष्टप्रसञ्जनात्मकस्य शङ्काजन्यविरोधिजिज्ञासानिवारकत्वेन सार्थत्वादिति वदन्ति। तन्न। अन्वयादिज्ञानस्य व्यभिचार्यादिसाधारण्येन शङ्कानपनायकत्वादित्युक्तत्वात्। शङ्कापनायकत्वे च शङ्काविरहादेव जिज्ञासानुत्पादे तर्कवैफल्यात्, पूर्वजिज्ञासानाश्यस्य च विरोधिगुणमात्रसाध्यत्वादिति। तस्मात् स्वार्थस्थले कोट्यनुपस्थित्यादेरेव शङ्कानवश्यंभाव इति परार्थस्थल एवोपादानं शङ्कोत्था(प?)नप्रतिबन्धकमिति दिक्।

ननु व्याप्तेरत्यन्तान्योन्याभावादिगर्भतया कथं तज्ज्ञानमनुमितिहेतुः, परस्परव्यभिचारादिति चेद्, अन्योन्याभावगर्भव्याप्तिज्ञानस्य लाघवेनानुमितिहेतुत्वादिति मणिकृतः ।

अत्र केचिद् — अत्यन्ताभावस्य प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यारोपपूर्वकधीविषयत्वम्, अन्योन्याभावस्य तु प्रतियोगितावच्छेदकारोपपूर्वकधीविषयत्वमात्रमिति शीघ्रोपस्थितिकत्वमेवात्र विवक्षितम् । न च ग्राहकलाघवं न विनिगमकं, किन्तु ग्राह्यलाघवमेवेति वाच्यम् । ग्राह्ययोरत्यन्तान्योन्याभावगर्भयोः साम्ये विनिगमकचिन्तायामन्योन्याभावगर्भायां ग्रा(ह्य ? ह)कलाघवस्य विनिगमकत्वसम्भवादिति मणिकृतोऽभिसन्धि वर्णयाञ्चक्रिरे । तदमञ्जुलम् । तदभावज्ञानत्वावच्छेदेनैव तदारोपस्य लाघवाद्धेतुतयात्यन्ताभावज्ञानवदन्योन्याभावज्ञानस्यापि प्रतियोग्यारोपजन्यत्वाद्, उक्तविनिगमकस्यासम्भवात् । इयांस्तु विशेषः, यदेकत्र संसर्गावच्छिन्नप्रतियोग्यारोपः कारणमपरत्र तादात्म्यावच्छिन्नतदारोप इति । (यत्किञ्चिदेतत् ? ।) प्रतियोग्यसामानाधिकरण्यांशस्यान्योन्याभावगर्भायामप्रवेशेनात्यन्ताभावगर्भव्याप्त्यपेक्षया लाघवमित्यन्ये । तदप्यभद्रम् । अन्योन्याभावोऽव्याप्यवृत्तिरिति भ्रमदशायामव्याप्यवृत्तिव्याप्तिज्ञानानुपपत्त्या प्रतियोगितावच्छेदकसमानाधिकरणत्वेनाज्ञायमानत्वस्यात्रापि देयत्वात् । तादृशो भ्रम एव न सम्भवतीति तु साहसम् । भ्रमस्य विशेषादर्शनसमुत्थस्य निवर्तयितुमशक्यत्वात् । किं बहुना, प्रतियोग्यसामानाधिकरण्याज्ञानदशायां धूमसमानाधिकरणाभावाप्रतियोगी वह्निरिति व्याप्तिघटकाविशिष्टपदार्थभानेनानुमित्यभावापत्त्यानुभवविरोधात् तदंशज्ञानमनुपयुक्तमेव वाच्यम् । तथा च स्वरूपसत्या व्याप्तेरनुमित्यजनकतया ज्ञेयांशस्यात्यन्तान्योन्याभावगर्भयोः साम्येन विनिगमनायाः कर्तुमशक्यत्वाद् नान्योन्याभावगर्भव्याप्तिज्ञानमात्रस्य हेतुता । अत एवान्योन्याभावगर्भायां प्रतियोगिवृत्तित्वेनाज्ञायमानत्वं विशेषणम्, अत्यन्ताभावगर्भायां च प्रतियोग्यधिकरणवृत्तित्वेनाज्ञायमानत्वं विशेषणमिति पूर्वस्य लघुत्वमिति गौडानां काल्पितं परास्तम् । ज्ञेयभागस्य साम्येनोक्तस्यानियामकत्वात् ।

पक्षधरमिश्रास्तु — विनिगमनाविरहात् सर्वस्या अपि व्याप्तेः ज्ञानमनुमितिहेतुः, ग्रन्थस्तूपलक्षणपरः । न च परस्परव्यभिचारः । तत्तदनुमितिविशेषे

---

१. 'यां प्र' क. पाठः.

तत्तद्व्याप्तिज्ञानस्य हेतुत्वात् । न चैवमनुमितित्वावच्छिन्ने अनुगतहेत्वलाभः । व्यभिचारधीविरहसहकृतसहचारधिय एव तत्रानुगतहेतोः सत्त्वात् । यद्वा, अन्योन्याभावगर्भैवेत्यस्यान्योन्यं साध्यसाधने अभावश्च इत्येतन्मात्रगर्भव्याप्तिः प्रयोजिकेत्यर्थः । तेनानौपाधिकत्वे उपाधेरधिकस्य प्रवेशात् तदेव व्यवच्छेद्यम् । अत्यन्तान्योन्याभावगर्भाः सर्वा अपि संग्राह्या एव । न चैवमननुगमः । व्यभिचारज्ञानविरोधिव्याप्तिज्ञानत्वेन सर्वानुगमात् । अथवा शीघ्रोपस्थितिकत्वाद् अन्योन्याभावगर्भैव प्रयोजिका । हेतुसमानाधिकरणान्योन्याभावप्रतियोगिनोः साध्यसाधनयोरवश्यमुपस्थित्या तादृशात्यन्ताभावप्रतियोगिनश्च उपस्थित्यनियमेनात्यन्ताभावज्ञानापेक्षयान्योन्याभावज्ञानस्य प्रतियोगिज्ञानसत्त्वेन शीघ्रोत्पत्तिकत्वात् । हेतुसमानाधिकरणात्यन्ताभावप्रतियोगिनोः साध्यतावच्छेदकहेतुतावच्छेदकयोरुपस्थितिनियमेऽपि अत्यन्ताभावग्रहप्रयोजकप्रतियोगितावच्छेदकविशिष्टतयोपस्थित्यनियमात् । अधिकरणस्याधिकरणतावच्छेदकविशिष्टस्योपस्थितावपि तन्निष्ठात्यन्ताभावप्रतियोगित्वानियमेन व्याप्तिग्रहानुपयोगात् । केवलान्वय्यधिकरणकव्याप्तिग्रहे स्वस्य स्ववृत्तितया स्वनिष्ठात्यन्ताभावाप्रतियोगित्वात् । तथा च शीघ्रोपस्थितिलाघवेनान्योन्याभावगर्भैव व्याप्तिरनुमितिहेतुरिति यथाश्रुत एव मणिः साधीयान् । वस्तुतस्तु व्याप्तेर्भेद एव न । हेतुसमानाधिकरणधर्मविरोधिसाध्यसामानाधिकरण्यस्य व्याप्तित्वात् । हेतुसमानाधिकरणधर्मश्च व्यभिचारिणि साध्यात्यन्ताभावस्तद्वदन्योन्याभावश्चेत्यत्यन्तान्योन्याभावगर्भत्वस्य व्यपदेशः । वस्तुत उक्तक्रमेणैव हेतुत्वमिति न व्यभिचार इत्याहुः ।

अत्राद्यपक्षो न क्षोदक्षमः । तथाहि — व्यभिचाराननुगमात् तज्ज्ञानाभावोऽपि कथमनुगत इति दोषः प्रतिबन्धकाभावकूटस्य हेतुतया समाधीयतां तावत् । परामर्शानन्तरजातव्यभिचारज्ञाने सत्यनुमित्यभावापत्तिः कथं समाधेया । इष्टापत्त्यैवेति चेत्, तर्हि व्यभिचारज्ञानाभावस्यैवानुमितिहेतुत्वे विशेषेऽपि तत्तद्व्याप्तिधीहेतुत्वं न स्यादिति महानिष्टापत्तिः प्रसज्येत । किं बहुना, सामान्यहेतुता लाघवात् सहचारज्ञानस्यैवास्तु, किं व्यभिचारधीविरहेणावच्छेदकेन । अतिप्रसङ्गस्तु विशेषहेतुतत्तद्व्याप्तिज्ञानेनैव वार्य इति । द्वितीयपक्षेऽपि यद्यपि व्यभिचारधीविरोधित्वम् । यत्किञ्चित्तद्विरोधित्वं, यावत्तद्विरोधित्वं वा । नाद्यः । अत्यन्ताभावगर्भव्याप्तिज्ञानस्य तद्गर्भव्यभिचारधीविरोधिनः सत्त्वेऽन्योन्याभावगर्भव्यभिचारज्ञाने सत्यनुमित्यापत्तेः । यावद्व्याप्तिज्ञानत्वेन हेतुत्वे चान्यतरव्याप्तिज्ञानसत्त्वे

अन्यतरव्यभिचारस्फूर्तावप्यनुमित्यनापत्तेः । तत्र चेष्टापत्तेरनुभवविरोधेनानुक्तिसम्भवात् । नान्यः । एकस्या अपि व्याप्तेर्ग्राह्याभावताविरहेण यावत्तद्विरोधित्वासम्भवादिति । तथाप्युभय व्याप्तिज्ञानेऽप्यनुमितेरनुभवसिद्धतया ग्राह्याभावानवगाहित्वेऽप्यत्यन्ताभावादिगर्भ व्याप्तिज्ञानेनान्योन्याभावादिगर्भव्यभिचारधीः प्रतिरुध्यत एव, अनुभवबलात् । तथा च यावद्व्यभिचारज्ञानविरोधित्वेन उभयव्याप्त्योरनुगमः सम्भवत्येवेत्यभिमन्यिः । तृतीयपक्षस्तु न मनोज्ञः । यत्र क्वचिच्छीघ्रोपस्थितिकत्वस्यान्योन्याभावेऽप्यभावात् सामग्रीबलेन क्वचिदत्यन्ताभावस्यैव शीघ्रोपस्थितेः । किं बहुना, सकलसाधारणी व्याप्तिर्ग्राह्या इत्येतत् प्रागुक्तमेव । तथा च धूमादिव्याप्तिज्ञानस्थलेऽन्योन्याभावप्रतियोगिनः साध्यादेर्नित्यत्वाभावप्रतियोगिनोऽधिकरणस्याप्युपस्थितत्वान्न प्रतियोग्युपस्थित्यनुपस्थितिकृतमुपस्थितिलाघवादिकमिति । चतुर्थपक्षोऽपि न रम्यः । हेतुनिष्ठसकलसाधिकरणाधिकरणं तदनधिकरणाधिकरणभिन्नत्वम् । तत्प्रकारकज्ञानस्य हेतुत्वे हेतुनिष्ठात्यन्ताभावाप्रतियोगित्वादिप्रकारकज्ञानादनुमितिर्न स्यात् । न च्यात्यन्ताभावादिगर्भव्यभिचारधीः प्रतिबन्धिका, ग्राह्याभावानवगाहित्वात् । प्रत्युक्तमेव तत्प्रकारकव्याप्तिज्ञानस्य हेतुत्वे चोक्तक्रमेणानुगमस्याकिञ्चित्करत्वादिति ।

नव्यास्तु — सकलव्याप्तिज्ञाने सत्यनुमितिरित्यनुभवसिद्धा । परन्तु साक्षाद् व्याप्त्यन्तरज्ञानद्वारा वेति संशये लाघवं निर्णायकम् । तच्च प्रकृतेऽन्योन्याभावगर्भायामेव । हेतुनिष्ठात्यन्ताभावप्रतियोगितानवच्छेदकावच्छिन्नसामानाधिकरण्यापेक्षया हेतुनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकसामानाधिकरण्यस्यैकावच्छेदकशून्यतया लघुत्वात् । न च हेतुनिष्ठान्योन्याभावप्रतियोगितावच्छेदकतया तत्तद्धेः प्रसिद्धानुमानेऽप्यतिप्रसङ्गेन यद्रूपावच्छिन्नसमन्योन्याभावप्रतियोगितानवच्छेदकमित्यर्थो वाच्यः । न च व्यात्यन्ताभावगर्भापेक्षया लाघवमिति वाच्यम् । हेतुमन्निष्ठात्यन्ताभावप्रतियोगितावच्छेदकं यद्रूपावच्छिन्नमित्यस्य तत्राप्यावश्यकत्वात् । अन्यथा दण्डित्वान्यथासिद्ध्यैव हेत्वधिकरणनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकता दण्डादेः(र? रिश्य)व्याप्तिप्रसङ्गात् । विशेषणदाने च दण्डत्वावच्छिन्नं नावच्छेदकमिति नाव्याप्तिः । तथा चैतद्विशेषणस्योभयत्रापि साम्यमेव । अन्योन्याभावगर्भायां प्रतियोगितानवच्छेदकत्वमात्रं प्रविष्टम्, अत्यन्ताभावगर्भायामेकं तदवच्छिन्नपद-

मधिकमेवेति तदपेक्षयान्योन्याभावगर्भव्याप्तिर्लघीयसीति तज्ज्ञानमेवानुमितिहेतुरिति यथाश्रुत एव मणिर्निष्कलङ्क इति वदन्ति । वस्तुतस्तु हेतुनिर्णयो लाघवानुरोधाद् अनुभवानुरोधाद् वा । आद्ये सामानाधिकरण्यावच्छेदकधर्मलक्षणव्याप्तिधीरेव सर्वापेक्षया लघुविषयतया हेतुः । अत एव सहचारधीर्व्याप्तिग्रहे हेतुः, सहचारस्योक्तव्याप्तौ विशेषणस्य नियमादिति प्रागेवावदत् । न चावच्छेदकत्वं नानतिरिक्तवृत्तितामात्रम् । नीलपृथुत्वादिसाधारण्यात् । अपि तु तादृशलघुधर्म(र्मा-)घटि(त)त्वादिघटितशरीरं वाच्यं, तथा च काल्पनिकेषु लाघवमिति वाच्यम् । अत्यन्ताभावादिगर्भव्याप्तावप्यवच्छेदक(त्व)स्य प्रवेशाद्, अप्रवेशेऽपि तदपेक्षया लाघवात् । उदाहरणवाक्यप्रतिपाद्यत्वं तस्यापि नास्तीत्यवच्छेदकत्वघटकधर्मविभासकाभावादित्युपाध्यायमतभेदः । अन्ये सर्वासां व्याप्तीनां ज्ञानमनुमितिहेतुः, अनुमितिविशेषे तत्तद्व्याप्तिर्हेतुरिति नाननुगमः, अनुमितित्वावच्छिन्ने तु लिङ्गधीः सामानाधिकरण्यधीर्वेति न किञ्चिद्विशेषः ।

इदन्त्ववधेयम् — अत्यन्ताभावादिगर्भव्याप्तिर्यावद्व्यभिचारधीप्रतिबन्धिका । ग्राह्याभावावगाहनेनैव प्रतिबन्धकत्वं ज्ञानस्येति तु परिभाषामात्रं, सिद्ध्यादावनुमित्यादिप्रतिबन्धक इवेहापि फलबलेन म(ह्या ? ण्या)दिन्यायेनान्यधियः प्रतिबन्धकताकल्पनात् । अन्यथात्यन्ताभावगर्भव्यभिचारज्ञानेऽन्योन्याभावगर्भव्याप्तिज्ञानादनुमित्यापत्तेः । (अन्यथा ?) अत्यन्ताभावगर्भव्यभिचारज्ञानादन्योन्याभावगर्भव्यभिचारानुमानाद् न तद्गर्भव्याप्तिर्धीरिति चेद्, न । अनुमानस्यासार्वत्रिकतया क्वचित् तथात्वापत्तेरनुत्तरग्रन्थात् । ननु म(ह्या ? ण्या)दिन्यायाज्ज्ञानस्य प्रतिबन्धकत्वे व्यभिचारधीः साक्षादेवानुमितौ प्रतिबन्धिकास्तु । तथा च तदभाव एवानुमितिहेतुरस्तु, किं व्याप्तिज्ञानहेतुत्वेनेति चेद्, न । अनुमितौ व्यभिचारज्ञानाभावापेक्षया लाघवेनाव्यभिचारज्ञानस्य हेतुत्वात् । अन्यथा शब्दबुद्धौ योग्यताज्ञानस्य, प्रवृत्तौ कृतिसाध्यताज्ञानस्य हेतुत्वं न स्यादिति संक्षेपः ।

ननु पर्वतीयधूमस्य वह्निव्याप्त्यनवगमात् कथं तन्माद्दनुमितिः । नन्व(न्य)त्र व्याप्तिज्ञानमन्यत्र पक्षधर्मताज्ञानं चानुमितिहेतुः, अतिप्रसङ्गादिति

---

१. 'रूपहव्या' क. पाठः.

---

* ईषदित्यर्थः । 'कथिदि'ति वा पाठ्यम् ।

चेद्, अत्र प्राञ्चः — महानसीयधूमे धूमत्वदर्शनानन्तरं तयैव सामान्यप्रत्यासत्त्या धूमत्वावच्छिन्नोपस्थितौ व्याप्तिग्रहादनुमितिसम्भवात् । अन्यथा तदनुत्पादसम्भवात् । इदमेव च सामान्यस्य प्रत्यासत्तित्वकल्पकमित्याचक्षते । तदेतन्मानान्तरसिद्धायां सामान्यप्रत्यासत्तौ घटते । अन्यथा न्यायनये महानसधूमे धूमत्वपुरस्कारेण व्याप्तिग्रहे पर्वतीयधूमे धूमत्वदर्शनानन्तरमुपनीतव्याप्तिभाने बाधकाभावात्। यद्धर्मपुरस्कारेण यद्धर्मग्रहः, तद्धर्मग्रहस्यैव तत्र तदुपनायकत्वात्। परनये च समानप्रकारत्वेनैव व्याप्तिपक्षधर्मतयोर्ज्ञानस्यानुमितिहेतुत्वाद् धूमत्वप्रकारकव्याप्तिज्ञानात् तत्प्रकारकपक्षधर्मताज्ञानाच्चानुमित्युत्पत्तौ बाधकाभावात् किं सामान्यप्रत्यासत्त्येति ।

मणिकृतस्तु — सामान्यलक्षणां विना विशेषदर्शनदशायां धूमो वह्निव्यभिचारी न वेति संशयो न स्यात् । प्रसिद्धधूमे वह्निसंबन्धावगमात् । अवगते च संशयाभावात् । अन्यथातिप्रसङ्गात् । अप्रसिद्धधूमस्य चाज्ञानात् तद्धर्मिकसंशयानुत्पादाद्, धर्मिज्ञानस्य संशयहेतुत्वात् । तस्माद् धूमत्वप्रत्यासत्त्या प्रसिद्धाप्रसिद्धधूमोपस्थितौ प्रसिद्धं विहायाप्रसिद्धसंशय उत्पद्यत इत्यवश्यं सामान्यप्रत्यासत्तिरङ्गीकार्येत्याहुः ।

अत्र वदन्ति — कोटिद्वयस्मृतिर्धर्मीन्द्रियसन्निकर्षश्च संशयहेतुरस्तु, न तु धर्मिधीरपीत्यप्रसिद्धधूमस्याज्ञानेऽपि तद्धर्मिसंशये बाधकाभावः । न च तेन सहेन्द्रियसन्निकर्षाभावाज्ज्ञानमेव सन्निकर्षो वाच्यः, तदर्थमेव सामान्यप्रत्यासत्तिरङ्गीकार्येति वाच्यम् । धर्मितावच्छेदकप्रकारकज्ञानस्यैव प्रत्यासत्तित्वात्, तस्य च सामान्यलक्षणां विनापि सम्भवात्। अस्तु वा धर्मिधीः संशयहेतुः, तथापि न संशयानुपपत्तिः । तथाहि — तत्तद्धूमत्वेन निश्चितवह्निसम्बन्ध एव प्रसिद्धधूमे धूमत्वेन तत्संशये बाधकाभावात् । समानप्रकारकनिश्चयस्यैव संशयपरिपन्थित्वात् । न च समानविषयत्वेनैव संशयप्रतिबन्धकत्वं निश्चयस्येति निश्चितवह्निसम्बन्धे केनापि रूपेण न संशयः, समानप्रकारकत्वेन विरोधित्वाभ्युपगमेऽपि विशेषप्रकारकनिश्चयत्वेन सामान्यप्रकारकसंशयप्रतिबन्धकताभ्युपेयैव । अत एव इदम्पर्वतत्वेन वह्निनिश्चये पर्वतत्वेन न तत्संशय इति स्वीकृतम् । तथा च तत्तद्धूमत्वेन विशेषतो निश्चये कथं धूमत्वेन तत्संशय इति वाच्यम् । तथापि धूमत्वेन सन्दिग्धव्यक्त्यन्तरमेव संशयधर्म्यस्तु । किं बहुना, यथा प्रामाण्यसन्दे-

हाहितसंशयो निश्चिते विषये औचित्यावर्जितोऽङ्गीक्रियते, तथा प्रसिद्धधूम एव धूमत्वं वह्निव्यभिचारिवृत्ति न वेति संशयाहितव्यभिचारसंशये बाधकाभावः । कथमन्यथा सामान्यलक्षणाभ्युपगमेऽप्येतच्चन्दनखण्डप्रभवदशधूमव्यक्तिनिष्ठप्रत्येकतत्प्रभववह्निसम्बन्धग्रहे एतच्चन्दनखण्डजन्यधूम एतच्चन्दनखण्डवह्निव्यभिचारी न वेति संशयः । न ह्यत्रैव तत्राप्यनवगतवह्निसम्बन्धः सामान्योपस्थाप्यः कश्चिद् धर्म्यस्ति, येन तद्धर्मिकत्वं संशयस्य कल्प्यमिति ।

अत्र पक्षधरमिश्राः — धूमत्वं वह्निव्यभिचारिवृत्ति न वेति संशयो न वह्निव्यभिचारित्वेनोपस्थितघटादौ धूमत्वं विषयीकरोति, तत्र धूमत्वाभावनिर्णयात्। किन्तु वह्निव्यभिचारित्वेन सामान्यप्रत्यासत्त्या प्रसिद्धाप्रसिद्धवह्निव्यभिचार्युपस्थितौ प्रसिद्धं परित्यज्याप्रसिद्धतद्वृत्तित्वं धूमत्वे विषयीकरोति । अयमपि संशयः सामान्यप्रत्यासत्त्यधीन एवेति सावश्यमभ्युपगन्तव्येति समादधते ।

अत्रेदमालोचनीयं— दोषात् प्रसिद्ध एव क्वचिद् वह्निव्यभिचारिणि धूमत्वव्यतिरेकानिश्चयेन सामान्यलक्षणां विनापि धूमत्वं वह्निव्यभिचारिवृत्ति न वेति संशय उपपद्यते । ततश्च तदाहित एव धूमो वह्निव्यभिचारी न वेति संशयः सम्भवत्येव । न च धूमभिन्ने धूमत्वं नास्तीति निश्चयदशायां कथं वह्निव्यभिचारिणि प्रसिद्धघटादौ धूमत्वसंशय इति वाच्यम् । धूमभिन्नत्वेनापि दोषाद् व्यक्तिविशेषानुपस्थितेस्त्वयापि स्वीकार्यत्वात् । कथमन्यथा सामान्यलक्षणाङ्गीकारेऽपि चन्दनखण्डजन्यधूमभिन्ने न तद्धूमत्वमिति निश्चये चन्दनखण्डप्रभवधूमस्तज्जन्यवह्निव्यभिचारी न वेति संशयः ।

केचित्तु — प्रसिद्धधूमेऽत्यन्ताभावादिगर्भव्याप्तिनिश्चयेऽपि साध्यसामानाधिकरण्यावच्छेदकधर्मवत्त्वलक्षणव्याप्तिसन्देहे बाधकाभावः । तस्यानिर्णयात् । नह्यन्यनिर्णयोऽन्यसंशयपरिपन्थीति न व्यभिचारसंशयान्यथानुपपत्तिः सामान्यलक्षणायां मानम् । किञ्च, सम्बन्धितावच्छेदकभेदात् सम्बन्धि(कं?)पदार्थभेद इति तत्तद्धूमत्वावच्छिन्नव्याप्त्यपेक्षया धूमत्वावच्छिन्नव्याप्तिर्भिन्नेति तद्धूमत्वावच्छिन्नव्याप्तिनिश्चयेऽपि धूमत्वावच्छिन्नव्याप्तिसंशये बाधकाभाव इति। तच्चिन्त्यम्। धूमो वह्निव्यभिचारी न वेति संशयस्य यथाकथञ्चिद् एवमुपपादनेऽपि धूमः शुक्लो न वेत्यादिसंशयस्य सामान्यलक्षणां विनासम्भवाद्, व्याप्तिभेदवत् शुक्लत्वादिभेदाभावात् । तस्मात् प्रसिद्धधूम एव धूमत्वप्रकारकः (स्वारसिः?) स्वारसिकः सं-

शय इति वा, अन्याहितसंशय इति वा, घटादावेव धूमत्वादिरूपेण तद्धर्मिकसंशय इति वा, प्रसिद्धधूम एव क्वचिद् धूमत्वादर्शनाद् वह्निसामानाधिकरण्यादर्शनाद् वा संशय इति कल्प्यतां, किं सामान्यप्रत्यासत्त्येत्येव तत्र दूषणम् ।

पक्षधरमिश्रास्तु — सामान्यलक्षणां विनान्धकारप्रत्ययो न स्यात्, तस्य यावदुद्भूतरूपतेजस्संसर्गाभावरूपस्य प्रतियोगिरूपाभावतेजोज्ञानाधीनत्वात्, तस्य च तया विना असम्भवाद्, अतीतानागतोज्झितां सन्निकर्षान्तराभावादिति । किञ्च, ज्ञानेच्छाकृतीनां कार्यकारणभावग्रहार्थमपि सामान्यलक्षणाभ्युपेया । अन्यथा कृतिकालोत्तरं ज्ञानाभावात् तद्धेतुताग्रहानुपपत्तेः । न च स्मृत्युपनीते ज्ञाने कृतिहेतुताग्रहो मनसेति वाच्यम् । स्मृतेरनुभवपूर्वकत्वाद्, अनुभवस्य च कृतिजनकीभूतज्ञानानन्तरमुत्पादाङ्गीकारे कृतिकाले जनकीभूतज्ञानाभावेन कृतिरेव नोत्पद्येत; किंहेतुता तत्र (ग्राह्यगृह्येत । सामान्यप्रत्यासत्त्यङ्गीकारे चायं घट इति ज्ञानानन्तरं तदनुव्यवसायगृहीतघटविषयकज्ञानत्वप्रत्यासत्त्या सकलघटविषयकज्ञाना(भानुभ)वे जाते पुनर्घटविषयक(इति?)ज्ञानादिच्छाकृती भवतः । तदनन्तरं पूर्वानुभवाद् घटविषयकज्ञानस्मृतिः, तदुपनीते तत्र मनसा कार्यकारणभावपरिच्छेद इत्याहुः ।

तदपि परं प्रति न प्रमाणीकर्तुं शक्यम् । विशिष्टवैशिष्ट्यज्ञाने विशेषणतावच्छेदकप्रकारकज्ञानस्याभावज्ञाने प्रतियोगितावच्छेदकप्रकारकज्ञानस्य फलीभूतज्ञानप्रकारप्रकारकज्ञानस्य वा हेतुत्वाभ्युपगमात् । तच्च तेजस्त्वमिति तत्प्रकारकज्ञानं सामान्यलक्षणां विनापि सम्भवतीति किं सामान्यलक्षणया । यदपि ज्ञानप्रयत्नयोः कार्यकारणभावग्रहार्थं सामान्यलक्षणाङ्गीकार इत्युक्तं, तदप्यकोमलम् । अयं घट इति ज्ञानानन्तरमेतदनुव्यवसायेन घटविषयकज्ञानत्वविशिष्टतज्ज्ञानं, ततः प्रवर्तकीभूतज्ञानोत्पादादिच्छाद्युत्पादः, तदनन्तरं घटविषयकज्ञानत्वप्रकारकपूर्वानुभवजनितघटविषयकज्ञानत्वप्रकारकस्मृत्योपनीते ज्ञाने घटविषयकज्ञानं घटविषयककृतिहेतुरिति ग्रहः सम्भवत्येव, समानप्रकारकानुभवस्य तत्प्रकारकस्मृतिहेतुत्वादिति किं सामान्यलक्षणया । किञ्च, ज्ञानं तदनुव्यवसायः, ततो विनश्यदवस्थज्ञानादिच्छा, तज्ज्ञानतत्संस्कारयोस्तृतीयक्षणे उत्पत्तिः, ततः कृतिः, ततस्तदनुव्यवसायानुभूतज्ञानस्मृतिः, ततः स्मृत्युपनीते ज्ञाने कृतिहेतुताग्रहः सम्भवत्येव । न चैवं कृत्युत्पत्तिरेव न स्यात्, कृतिपूर्वक्षणे ज्ञानस्याभावा-

दिति वाच्यम् । ज्ञानस्याभावेऽपीच्छारूपतद्व्यापारसत्त्वेन कृत्युत्पत्तिसम्भवादिति यत्किञ्चिदेतत् ।

साम्प्रदायिकास्तु — सामान्यलक्षणां विना सुखादाविच्छा, पाकादौ च चिकीर्षा न स्यात् । इच्छायाः समानविषयकज्ञानसाध्यत्वात्, सिद्धस्येच्छाविषयत्वाभावाद्, असिद्धस्य चाज्ञानादित्यसिद्धज्ञानार्थं सामान्यलक्षणाङ्गीकार्येति वदन्ति ।

तदपि परो न क्षमते । तेन ज्ञानेच्छयोः समानप्रकारकत्वेन हेतुत्वाङ्गीकारात् । सिद्धपाक एव पाकत्वादिप्रकारकज्ञानात् पाकत्वादिप्रकारकेच्छाया इच्छास्वाभाव्यादसिद्धविषयिण्या उत्पादसम्भवेनासिद्धविषयकज्ञानोत्पादार्थं सामान्यलक्षणाङ्गीकारस्य व्यर्थत्वात् । किं बहुना, समानप्रकारकसिद्धेरेवेच्छोत्पत्तिविरोधितया तत्तत्सुखत्वादिप्रकारकसिद्धावपि सुखत्वादिनासिद्धसुखादावेवेच्छोत्पत्तौ बाधकाभावात् । किञ्च, पाकत्वं सुखत्वाव्यावृत्तवर्तमानपाकसुखातिरिक्तवृत्ति जातित्वाद् घटत्वादिवदित्यनुमानेननागतज्ञानं सम्भवत्येव । अत एव कृत्यनन्तरभविष्यत्त्वरूपकृतिसाध्यताज्ञानं प्रवृत्तिहेतुः, तच्चासिद्ध एवेति तज्ज्ञानार्थं सामान्यप्रत्यासत्तिः कल्पनीयेत्यपास्तम् । पाको मत्कृतिसाध्य इत्याद्यनुमानेनानागतपाकज्ञानस्य शब्दखण्डे वक्ष्यमाणत्वादित्यविचारितरमणीयमेव सामान्यप्रत्यासत्तिकल्पनमिति ।

अत्र प्रतिभाति । प्रसिद्धाङ्गकमेव प्रमाणमिति न नियमः । (अ)प्रसिद्धाङ्गकस्यापि प्रमाणत्वसम्भवात् । तथा च प्रतियोगिज्ञानस्याभावज्ञानहेतुतयान्धकारप्रत्ययस्य सामान्यलक्षणां विनासम्भव एव । यावदुद्भूतरूपतेजोज्ञानस्य प्रकारान्तरेणासम्भवात् । एवञ्च विशिष्टज्ञानस्य विशेषणज्ञानजन्यत्वानुरोधेनापि सामान्यलक्षणाङ्गीकार्या । अन्यथा पर्वतो वह्निमानित्यनुमितेरनुत्पादप्रसङ्गात् । पर्वतीयवह्नेर्विशेषणस्य प्रागज्ञानाद्, वह्नित्वरूपसामान्यप्रत्यासत्तिं विना तज्ज्ञानोपायस्याभावात् । न चानुमानात् तद्बुद्धिधीः । तथा सत्यनवस्थाप्रसङ्गाद्, अनुमानस्य व्याप्त्यादिज्ञानविलम्बेन सर्वत्रानावश्यकत्वाच्च । किञ्च, सामानाधिकरण्यं व्याप्तिः । सा च प्रत्येकं धूमस्य भिन्नैव । तथा च पर्वतीयधूमव्याप्तेस्तत्संयोगरूपायास्तद्धूमज्ञानमन्तरेण ज्ञानासम्भवः । न च तज्ज्ञानमन्तरेणानुमितिः । लाघवेन समानविषयकव्याप्तिज्ञानस्य हेतुत्वात् । पूर्वगृहीतमहानसीयवह्निव्याप्तेः पर्वतधूमवृत्तितयोपनीतभाने भ्रमत्वापत्तेः । एवं प्रतिव्यक्ति शक्तिग्रहानुरोधादपि सामान्यलक्ष-

णा। अन्यथा घटपदात् शक्यत्वेन गृहीतघटव्यक्तेरेवोपस्थितिः स्यात्, न त्वपूर्वघटव्यक्तेः। समानविषकज्ञानस्य तादृशपदार्थोपस्थितौ शाब्दबोधे च प्रयोजकत्वात्। न च समानप्रकारकत्वं तत्र नियामकं, न तु समानविषयत्वमिति वाच्यम्। तथा (च? सति) घटत्वप्रकारकशक्तिज्ञानाद् घटत्वेन प्रकारेण पटादेरप्युपस्थितिप्रसङ्गात्। तत्र नियामकान्तरकल्पनापेक्षया समानविषयत्वस्य नियामकत्वकल्पनायां लघुत्वात्। अत एव सम्प्रदायमतमप्यनवद्यं, ज्ञानेच्छयोः समानप्रकारकत्वे सति समानविशेष्यकत्वेन हेतुहेतुमद्भावादिच्छाविशेष्यभूतानागतपाकज्ञानार्थं सामान्यलक्षणाया आवश्यकत्वात्। न च ज्ञानेच्छयोः समानप्रकारतामात्रेण हेतुहेतुमद्भावो न समानविशेष्यकत्वेनापि, गौरवादिति वाच्यम्। तथा सति घटत्वप्रकारकज्ञानात् तत्प्रकारकपटविशेष्यकेच्छोत्पादप्रसङ्गात्। न चेच्छायाः स्वजनकज्ञानप्रकाराश्रयविशेष्यकत्वनियमाद् न पटविशेष्यकत्वं घटत्वप्रकारकेच्छाया इति वाच्यम्। तथा सति भ्रमस्थले रजतत्वप्रकारिकायाः शुक्तिविशेष्यकेच्छाया अनुत्पादप्रसङ्गात्। न च स्वजनकज्ञानप्रकारागृहीतासंसर्गधर्मिविशेष्यकत्वमिच्छाया इति वाच्यम्। एतदपेक्षया स्वजनकज्ञानसमानविशेष्यकत्वस्यैव लघुत्वेन नियामकत्वकल्पनाया औचित्यात्।

वयं तु ब्रूमः—सामान्यलक्षणां विना घटो नास्तीति सामान्याभावधीर्न स्यात्। प्रतियोगिज्ञानं विनाभाववुद्ध्यनुत्पादात्। प्रतियोगिनां च घटत्वावाच्छिन्नानां प्रकारान्तरेण ज्ञातुमशक्तेः। न चाभाववुद्धौ प्रतियोगिज्ञानत्वेन हेतुता न तु यावत्प्रतियोगिज्ञानत्वेन, गौरवादिति वाच्यम्। विशेषाभावग्रहस्थले तत्तत्प्रतियोगिज्ञानत्वेनैव तत्तत्प्रतियोगिज्ञानस्य हेतुत्वकल्पनात् सामान्याभावस्यापि यावद्विशेषप्रतियोगित्वेनावश्यं तावज्ज्ञानसापेक्षज्ञानतया यावत्प्रतियोगिज्ञानस्य तज्ज्ञानहेतुत्वावश्यकत्वात्। यदि च यावद्विशेषाभावस्यैव घटो नास्तीति प्रत्ययविषयत्वमङ्गीक्रियते, तदा सामान्यलक्षणा सुतरामुररीकार्या। त(द्द?दू)रीकरणं विना तत्प्रतियोगिसहस्रस्य ज्ञानाभावेन तत्प्रत्यक्षासम्भवादिति।

अस्मत्पितृचरणास्तु— अनुमितिविषयतायां नियामकान्तरस्य वक्तुमशक्यतया व्यापकत्वेन गृहीतत्वस्य तन्नियामकत्वं वाच्यम्। तच्च पर्वतीयवह्नेः सामान्यलक्षणां विना न सम्भवति। अनुमानस्यानवस्थादुःस्थत्वात्, प्रणालीसहस्रकल्पने गौरवाच्च। न च व्यापकतावच्छेदकत्वेन गृहीतधर्माश्रयत्वं नियामकम्।

भ्रमानुमितावव्याप्तेः। न च तत्राप्यन्यत्रस्थ एव वह्निर्विषयः। पर्वतातिरिक्तवृत्तिवह्निः पर्वते नास्तीति ज्ञानानन्तरं पर्वतो वह्निमानिति भ्रमानुमितौ गुञ्जापुञ्जादेरेव तत्त्वेन विषयत्वात्। किञ्च गौरवमपि, व्यापकत्वेन गृहीतत्वापेक्षया व्यापकतावच्छेदकत्वेन गृहीतधर्माश्रयत्वस्यातिगुरुत्वादित्याहुः।

नव्यास्तु — घटत्वात्यन्ताभावप्रत्ययानुपपत्तिरेव सामान्यप्रत्यासत्तौ प्रमाणम्। तथाहि — प्रतियोगितावच्छेदकप्रकारकप्रतियोगिज्ञानमभावधीहेतुः। तच्चेह घटत्वत्वम्। तच्च घटेतरावृत्तित्वे सति सकलघटवृत्तित्वम्। तज्ज्ञानं च सकलघटज्ञानमन्तरेण न सम्भवति। तदर्थं सामान्यप्रत्यासत्तिः कल्पनीयेति वदन्ति। तच्चिन्त्यं, घटेतरावृत्तित्वे सति घटनिष्ठात्यन्ताभावाप्रतियोगित्वस्यैव घटत्वत्वपदार्थतया तज्ज्ञानस्य तया विनापि सम्भवादिति।

ननु सामान्यलक्षणाङ्गीकारे सर्वसार्वज्ञ्यापत्तिः, संशयानुपपत्तिश्च। न च तेन रूपेण सार्वज्ञ्यसंशयाभावावङ्गीक्रियेते एव, रूपान्तरेण त्वापादकाभावः। तत्प्रकारकज्ञानाभावादिति वाच्यम्। भासमानवैशिष्ट्यप्रतियोगित्वस्यैव प्रकारत्वरूपतया प्रमेयमिति ज्ञाने घटत्वादिसकलवैशिष्ट्यभानेन प्रकारत्वस्य घटत्वादावनपायात्। तत्प्रकारकसंशयानुपपत्तेरेवापाद्यत्वात्। न च जनकज्ञानविषयत्वमपि प्रकारताघटकं, तच्च प्रमेयमिति ज्ञाने प्रमेयत्वस्यैव, न तु घटत्वादेरिति नातिप्रसङ्ग इति वाच्यम्। प्रमेयवानिति ज्ञाने प्रमेयमात्रस्यैव जनकज्ञानविषयत्वेन प्रकारतया घटत्वादिप्रकारकसंशयविरोधित्वापातस्य वज्रलेपत्वादिति। मैवम्। तत्प्रकारकं ज्ञानं संशयविरोधीति सत्यं, परं तु प्रकारो द्विविधः किञ्चिदवच्छिन्नः, अन्यानवच्छिन्नश्च। तत्राद्ये यद्रूपोपस्थितयत्प्रकारकं ज्ञानं तद्रूपोपस्थिततत्प्रकारकसंशयविरोध्येव, न तु शुद्धतत्प्रकारकसंशयविरोध्यपि। यथा दण्डिमद् गृहमिति ज्ञाने पुरुषस्य चैत्रादेः प्रकारत्वेऽपि दण्डावच्छिन्नस्यैव तथात्वाद् दण्डिमन्न वेति संशयो न भवति। अन्यादृशस्तु भवत्येव चैत्रवद् गृहं न वेति। तथाच प्रकृतेऽपि प्रमेयत्वोपस्थितसर्व(प्र)मेयप्रकारकनिश्चयः प्रमेयवान् न वेति संशयं प्रतिबध्नात्येव। घटो वा न वेत्यादिसंशयप्रतिबन्धाय तन्नालमिति न दोषशङ्कापि। अन्त्ये तु तादृशसंशयप्रतिबन्धक एव, यथा घटोऽयमिति ज्ञानं शुद्धघटत्वप्रकारकं घटो न वेति तादृशव्यावर्तकमिति। वस्तुतस्तु प्रकारत्वं ज्ञाननिरूपितस्वरूपसम्बन्धविशेषः संशयादिविरोधेन कल्प्यत इति फलबलेन घटोऽयमिति ज्ञाने घटत्वस्य स सम्ब-

न्धः, न तु प्रमेयमिति ज्ञाने घटत्वस्य । तथा सति घटो न वेति घटत्वप्रकारक-संशयविरोधित्वापातादिति ।

इदं तु ध्येयम् — सामान्यप्रत्यासत्तेरिन्द्रियसम्बद्धविशेषणतायामन्तर्भावः । इन्द्रियसम्बद्धे सामान्यव्यक्तीनां विशेषणत्वात् । न केवलं सामान्यस्यैव विशेषणतायामन्तर्भावः, अपि तु ज्ञानलक्षणयोगजलक्षणयोरपीति न षोढाप्रत्यासत्तिपरिगणन-विरोधः । न च विशेषण(त?ता)या लौकिकप्रत्यासत्तितया वर्तमानमात्रविषयग्राहकतयातीतानागतव्यक्तिभानानुपपत्तिः । इन्द्रियसम्बद्धाधेयतालक्षणविशेषणतायास्तथात्वेऽपीन्द्रियसम्बद्धाधारतालक्षणविशेषणतात्मकसामान्यप्रत्यासत्तेर्विलक्षणस्वभावतया तथानियमात् । यद्वा वैलक्षण्यस्यावश्यकतयातिरिक्तप्रत्यासत्तिरेवैषा । ज्ञानलक्षणयोगजलक्षणे अपि विशेषणतापेक्षया भिन्ने (इ?ए)व । षोढाप्रत्यासत्ति-परिगणनं तु लौकिकप्रत्यासत्त्यभिप्रायेण । सा चैवं ज्ञायमानैव प्रत्यासत्तिः, स्व-प्रकारकज्ञानजनकत्वनियमात् । अज्ञातस्य च प्रकारत्वायोगात् । वस्तुतस्त्वतीता-नागतसामान्यधर्मस्यापि ज्ञाने तदाश्रयप्रत्यक्षान्न ज्ञायमानसामान्यं प्रत्यासत्तिः, किन्तु सामान्यज्ञानमेव । न च सामान्यस्य नित्यत्वादतीतानागतत्वमसिद्धमिति वाच्यम् । सामान्यप्रत्यासत्तिरित्यत्र सामान्यत्वं (च?न) जातित्वं, तथा सति मेयत्वादेरतथाभूतस्यानासत्तित्वप्रसङ्गात् । किन्त्वनेकवृत्तिधर्मत्वम् । तच्च बहुत्व-संयोगादिसाधारणमिति सम्भवत्येव तेषामतीतानागतत्वमिति न तेषां प्रत्यक्षहेतुता, अपि तु तज्ज्ञानस्यैव । न चैवं ज्ञानप्रत्यासत्त्यभेदः । तस्य समानविषयकस्यास्य च भिन्नविषयकस्यासत्तितया भेदस्या(दि?ति)स्फुटत्वादिति सङ्क्षेपः ।

इति भूयोदर्शनवादः ।

अथोपाधिवादः ।

उपाधिज्ञानं च व्याप्तिज्ञाने ग्राह्याभावावगाहितया न प्रतिबन्धकम्, अनौ-पाधिक(त्व)स्याव्याप्तित्वात् । किन्तु व्यभिचारानुमितिद्वारा । अत एव तज्ज्ञानस्य व्यभिचाराननुमितिदशायामनुमित्यप्रतिबन्धकत्वान्न तत्प्रतिबन्धकतानियमघटितहे-त्वाभासतोपाधेरिति वक्ष्यते । अत एव 'यद्यभिचारित्वेन साधनस्य साध्यव्यभि-

चारित्वं, स उपाधि'रिति लक्षणं मणिकृत ऊचुः। ननु यथाश्रुतमिदमनुपपन्नम्। न ह्युपाधिव्यभिचारेण साध्यव्यभिचारः क्रियते। न च यद्यभिचारेण साध्यव्यभिचारानुमितिः स उपाधिः। तथा सत्यनुमितिकाल एवोपाधेर्दोषतायामनित्यदोषतापत्तेः। घटव्यभिचारेणापि धूमरूपसाध्यव्यभिचारस्य व्याप्तिभ्रमेणानुमातुं शक्यत्वाद् घटस्यापि धूमसाध्यके वह्निहेतुक उपाधितापत्तेः। न चानुमितेः प्रमात्वपर्यन्तविवक्षायामपि तत्प्रतीकारः। वह्निर्धूमव्यभिचारी घटव्यभिचारित्वाद् इत्यनुमितेरसल्लिङ्गजन्याया अपि विषयाबाधेन प्रमात्वात्। किं बहुना, आकाशादिसाध्यके घटादीनां तदव्यापकानां सर्वेषामप्युपाधितापत्तेः। आकाशादिव्यभिचारस्य घटादिव्यभिचारेण प्रमातुं शक्यत्वात्। अवृत्तिव्यभिचारस्य केवलान्वयित्वात् तत्साधने व्यभिचाराद्यभावात्। किञ्च, शुद्धयद्यभिचारित्वं साध्यव्यभिचारानुमापकमित्यर्थो वा, इतरसमभिव्याहारेणापि यद्यभिचारः साध्यव्यभिचारानुमापक इत्यर्थो वा विवक्षितः। नाद्यः। साधनपक्षधर्मावच्छिन्नसाध्यव्यापकोपाध्यव्याप्तेः। शुद्धतद्व्यभिचारस्य साध्यव्यभिचारव्यभिचारितया तद(न)नुमापकत्वात्। नान्त्यः। गौः शुक्लः पशुत्वादित्यत्र गोत्वावच्छिन्नशुक्लत्वव्यापकस्य सास्नावत्त्वस्योपाधितापत्तेः। न च तत्र व्यभिचारानुमानासम्भवः, पशुत्वस्य गोत्वव्यभिचारितया गोत्वाव्यभिचारित्वे सति गोत्वावच्छिन्नशुक्लत्वव्यापकव्यभिचारित्वस्य साध्यव्यभिचारानुमापकस्य तत्राभावादिति वाच्यम्। पशुत्वं शुक्लत्वव्यभिचारि गोकृष्णच्छागान्यतरस्मिन् सास्नावत्त्वव्यभिचारित्वादित्येवं व्यभिचारानुमितिसम्भवात्। एवमयं गन्धो गुणत्वादित्यत्र सुरभित्वस्य गन्धत्वाव्यापकस्याप्युपाधितापत्तिः, गुणत्वं गन्धत्वव्यभिचारि असुरभित्वतद्व्याप्यगन्धत्वान्यत्वे सति सुरभित्वव्यभिचारित्वादित्येवं व्यभिचारानुमितिसम्भवात्। न च व्यभिचारस्थानान्यत्वाविशेषितेन यद्यभिचारित्वेन साध्यव्यभिचारित्वानुमितिरित्यर्थः। अत्र त्वसुरभित्वतद्व्याप्यगन्धत्वानां व्यभिचारित्वस्थाना(नां न? नामन्य)त्व(स्य?)विशिष्टत्वान्नोपाधित्वमिति वाच्यम्। व्यभिचारस्थानान्यत्वाविशेषितेनेत्यस्य यथाश्रुतस्यासुरभित्वात्यन्ताभाववत्त्वविशेषितव्यभिचारेण व्यभिचारानुमानमादायातिप्रसङ्गे व्यभिचारस्थानव्यावर्तकविशेषणाघटितत्वमर्थो वाच्यः। तथा च साधनावच्छिन्नपक्षधर्मावच्छिन्नसाध्यव्यापकोपाध्यव्याप्तिः। विशेषणाव्यभिचारित्वेन व्यभिचारस्थानव्यावर्तकविशेषणेन घटितस्यैव तद्व्यभिचारस्य साध्यव्यभिचारानुमापकत्वात्। किं बहुना, गुणत्वं गन्धत्वव्यभि-

चारि रूपे सुरभित्वव्यभिचारित्वाद् रूपत्ववदिति क्रमेण व्यभिचारानुमानसम्भवात् सुरभित्वेऽतिव्याप्तेर्दुष्परिहरत्वादिति ।

अत्र प्रतिभाति — साध्यनिष्ठोपाधिव्याप्यतावच्छेदकधर्मवत्त्वतदव्यभिचारित्वातिरिक्तधर्माविशेषितं यद्व्यभिचारित्वं हेतौ साध्यव्यभिचारित्वसाधने व्याप्तिपक्षधर्मतोभयवत्, (कदापि?) स सर्वथा तत्साध्यकतद्धेतावुपाधिः । अत एव नानित्यदोषता, न वा घटादावतिप्रसङ्गशङ्का, धूमव्यभिचारित्वसाधने घटव्यभिचारित्वस्य व्याप्त्यभावात् । न चावृत्तिसाध्यके तथापि घटादेरुपाधित्वं स्यादेव, अवृत्तिव्यभिचारित्वव्याप्यत्वाद् घटव्यभिचारित्वस्येति वाच्यम् । अवृत्तिव्यभिचारव्याप्यतायां वृत्तित्वमात्रस्यैव लाघवेनावच्छेदकत्वाद्, घटव्यभिचारित्वत्वादेरतथात्वात् । नीलधूम(त्व)स्यावच्छेदकत्वाभावेन नीलधूमस्य व्याप्त्यभाववद् घटव्यभिचारस्यावृत्तिव्यभिचाराव्याप्यत्वात् । अत एव गौः शुक्लः पशुत्वादित्यत्र न सास्नावत्त्वं गोत्वावच्छिन्नशुक्लत्वव्यापकमुपाधिः । पशुत्वं शुक्लत्वव्यभिचारीत्यत्र गोत्ववति गोत्वाव्यभिचारित्वे सतीत्यन्यतरघटितसास्नावत्त्वव्यभिचा(रीत्य?रित्व)स्याहेतुत्वात् । उभयथापि स्वरूपासिद्धत्वात् । पशुत्वस्य गोत्ववति सास्नावत्त्वव्यभिचारित्वाभावाद् गोत्वव्यभिचारित्वाच्च । अत एव 'घटः पृथिवी द्रव्यत्वादित्यत्र घटान्यत्वावच्छिन्नसाध्यव्यापकं घटावृत्तिगुणवत्त्वमुपाधिः स्यात् । द्रव्यत्वं पृथिवीत्वव्यभिचारि द्रव्यत्वमेयत्वपटत्वानीतिधीविशेष्यत्वे सति घटावृत्तिगुणवत्त्वव्यभिचारित्वाद् मेयत्ववदिति क्रमेण व्यभिचारानुमितिसम्भवात् । हेतौ द्रव्यत्वपदं पक्षधर्मत्वसिद्ध्यर्थम् । मेयत्वपदं च दृष्टान्तसिद्ध्यर्थम् । पटत्वपदं पटत्वे सत्यन्तसिद्ध्यर्थम् । न च तदेव व्यर्थमिति वाच्यम् । घटावृत्तिगुणवत्त्वव्यभिचारित्वस्य विशेष्यभागस्य तथा सति वैयर्थ्यप्रसङ्गाद्, द्रव्यत्वमेयत्वे इतिधीविशेष्यत्वस्यैव पृथिवीत्वव्यभिचारव्याप्यत्वात् । तस्माद् द्रव्यत्वमेयत्वपटत्वानीतिधीविशेष्यत्वस्य पटत्वेऽपि सत्त्वेन तत्र पृथिवीत्वव्यभिचारित्वरूपसाध्याभावेन व्यभिचारः स्यादिति घटावृत्तिगुणवत्त्वव्यभिचारित्वपदम् । न चैवमपि द्रव्यत्वमेयत्वे इतिधीविशेष्यत्वस्यैव व्याप्यत्वे तद्घटितद्रव्यत्वमेयत्वपटत्वानीतिधीविशेष्यत्वघटितहेतोः नीलधूमवदव्याप्यत्वमेवेति वाच्यम् । द्रव्यत्वमेयत्वपटत्वगोचरज्ञानस्याखण्डस्य हेतुशरीरप्रविष्टत्वेन वैयर्थ्यशङ्काविरहात् । एवं पर्वतो वह्निमान् धूमादित्यत्र व्यञ्जनवत्त्वमुपाधिः स्यात् । धूमो वह्निव्यभिचारी धूमभेय-

त्वमहानसत्वानीतिधीविशेष्यत्वे सति व्यञ्जनवत्त्वव्यभिचारित्वाद् मेयत्ववदिति व्यभिचारानुमितिसम्भवादि'ति दूषणमपास्तम्। साध्यनिष्ठोपाधिव्याप्यतावच्छेदकघटान्यत्ववतीत्यस्य, घटान्यत्वाव्यभिचारित्वे सतीत्यस्य वा हेतौ प्रवेशयितुमशक्यत्वात्। घटान्यत्ववति द्रव्यत्वस्य घटावृत्तिगुणवत्त्वव्यभिचारित्वाभावाद् घटान्यत्वव्यभिचारित्वाच्च द्रव्यत्वस्य। अत एव न प्रसिद्धानुमाने व्यञ्जनवत्त्वेऽतिप्रसक्तिः। उक्तहेतोर्वह्निव्यभिचारव्याप्यत्वाभावाद्, धूम एव व्यभिचारात्। वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात् प्रमेयत्वाद् वेत्यत्र च बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्ष(त्व)व्यापकमुद्भूतरूपवत्त्वमुपाधिरेव। बहिर्द्रव्यत्वाव्यभिचारित्वबहिर्द्रव्यत्ववत्त्वान्यतरगर्भोद्भूतरूपवत्त्वव्यभिचारित्वस्य हेतुत्वसम्भवात्। अयं गन्धो गुणत्वादित्यत्रासुरभित्वाभावावच्छिन्नसाध्यव्यापकस्य सुरभित्वस्य तूपाधित्वमेव। गुणत्वं गन्धत्वव्यभिचारि असुरभित्वाभाववति सुरभित्वव्यभिचारित्वाद् रूपत्ववदित्यनुमानसम्भवात्। इदमेव सर्वं मनसिकृत्य पक्षधरमिश्रैः सास्नावत्त्वस्यानुपाधित्वं सुरभित्वस्य चोपाधित्वमवादीति।

ननु शुद्धसाध्यव्यापक उक्तलक्षणमव्याप्तं, साध्यतावच्छेदकावच्छिन्नसाध्यनिष्ठोपाधिव्याप्यतावच्छेदकधर्मस्य तत्राभावेन तद्घटितलक्षणासम्भवादिति चेद्, न। व्याप्यतान्यूनवृत्तिमात्रस्य व्याप्यतावच्छेदकत्वेन विवक्षितत्वाद्, न तु स्वरूपसम्बन्धविशेषोऽनतिप्रसक्तोऽवच्छेदकान्तरासमानाधिकरणो वा उपाधिव्याप्यत्वावच्छेदकत्वेन विवक्षितः। तथा च शुद्धसाध्यव्यापकेऽपि द्रव्यत्वादिकमार्द्रेन्धनादिव्याप्यतावच्छेदकं भवत्येवेति न कोऽपि दोषः। वस्तुतस्तु — साध्यनिष्ठोपाधिव्याप्यतावच्छेदकमात्रमेव प्रकृतलक्षणे प्रविष्टम्। तच्च शुद्धसाध्यव्यापके साध्यतावच्छेदकमेव। साधनावच्छिन्नपक्षधर्मावच्छिन्नसाध्यव्यापकयोस्तु साधनपक्षधर्माविति नाव्याप्तिगन्धोऽपि। यद्वा साध्यनिष्ठोपाधिव्याप्यतावच्छेदकधर्मवति यद्व्यभिचारस्थले साधनस्य साध्यव्यभिचारानियमः, स तत्रोपाधिः। अत एव वायुः प्रत्यक्षः प्रमेयत्वादित्यत्रोद्भूतरूपवत्त्वमुपाधिः। बहिर्द्रव्ये वाय्वादावुद्भूतरूपव्यभिचारिणि मेयत्वे प्रत्यक्षत्वव्यभिचारित्वात्। अत एव उपाध्याया नियमार्थे तृतीयेति व्याख्यातवन्तः। यत्तु — यद्व्यभिचारित्वेन साध्यव्यभिचार इत्यत्र व्यभिचारपदमुभयत्राप्यव्याप्यत्वपरम्। अन्यथा इदं द्रव्यमाकाशादित्यत्र परिमाणवत्त्वोपाधौ स्वाव्याप्यत्वेन द्रव्यत्वाव्याप्यत्वसाधने उपाधिलक्षणाभावेना-

व्याप्तिप्रसङ्गादिति । (तं च ? तन्न ।) तत्र व्यर्थतयोपाध्यव्याप्यत्वस्याकाशे साध्याव्याप्यत्वासाधकत्वाद्, (घट ? अ)वृत्तित्वेन वा अव्याप्यत्वेन वा तत्साधनात् । किञ्च, उपाधिव्यवस्था पारिभाषिकी । सा च व्यभिचारोन्नायक एव शास्त्रकारस्य नान्यत्रेति, अव्याप्यत्वानुमानेऽपि न तस्य संग्राह्यता । अन्यथा हेत्वाभासान्तरोन्नायकेऽव्याप्तिरित्येव कुतो नाशङ्केथाः । शास्त्रकाराव्यवहारश्च समान एवेति दिक् ।

ननु साध्यव्यभिचारोन्नायकः कस्यचिद् व्यभिचारः कस्यचिन्नेत्यत्र नियामकाभावः । न च साध्यव्यापकव्यभिचार एव तथा । साधनावच्छिन्नपक्षधर्मावच्छिन्नसाध्यव्यापकत्वस्थलाव्याप्तेरिति चेद्, न । पर्यवसितसाध्यव्यापकव्यभिचारस्य तथात्वात् । पर्यवसितत्वं च साध्यप्रसिद्ध्यवच्छेदकधर्मावच्छिन्नत्वम् । साध्यप्रसिद्ध्यवच्छेदकत्वं च साध्यप्रसिद्ध्यधिकरणवृत्तित्वम् । तेन बहिर्द्रव्यत्वादौ पक्षधर्मे नाव्याप्तिः । एवं च 'साध्यप्रसिद्ध्यधिकरणवृत्तिधर्मावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकत्वमपि लक्षणान्तरं पर्यवस्यती'ति मणिकृतः ।

अत्र वदन्ति — एवं सति प्रसिद्धानुमाने महानसत्वावच्छिन्नसाध्यव्यापकं व्यञ्जनवत्त्वमुपाधिः स्याद्, महानसत्वस्यापि साध्यप्रसिद्ध्यधिकरणवृत्तित्वात् । न चेष्टापत्तिः । सर्वेषामेव हेतूनामेवं सोपाधित्वे सोपाधिनिरुपाधिव्यवस्थाभङ्गप्रसङ्गादिति ।

अत्रोपाध्यायाः — साधनवति साध्यप्रसिद्ध्यन्यूनवृत्तिधर्मावच्छिन्नसाध्यव्यापकत्वं विवक्षितम् । बहिर्द्रव्यत्वादिकं च तथा, प्रत्यक्षस्पर्शाश्रयत्ववति प्रत्यक्षत्वप्रसिद्ध्यन्यूनवृत्तित्वात् । अतस्तदवच्छिन्नप्रत्यक्षत्वव्यापकमुद्भूतरूपवत्त्वमुपाधिरेव । महानसत्वं च धूमवति वह्निप्रसिद्धिन्यूनवृ(त्तिरे?त्त्ये)वेति न तदवच्छिन्नवह्निव्यापकं व्यञ्जनवत्त्वमुपाधिः । यद्वा, साधनव्यापकीभूतत्वं साध्यप्रसिद्ध्यवच्छेदकधर्मविशेषणं, बहिर्द्र(व्यं ? व्यत्वं) च प्रत्यक्षस्पर्शाश्रयत्वव्यापकम्, अतो बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वव्यापकमुद्भूतरूपवत्त्वमुपाधिः । महानसत्वं च न धूमव्यापकं, पर्वतादौ व्यभिचाराद्, इति न महानसत्वावच्छिन्नवह्निव्यापकं व्यञ्जनवत्त्वमुपाधिरिति समादधुः ।

तच्चिन्त्यम्— वायुः प्रत्यक्षः वायुत्वादित्यत्रोद्भूतरूपवत्त्वोपाधा(व)व्याप्तिः, साधनवति साध्याप्रसिद्धेः । किञ्च, वायुः प्रत्यक्षः मेयत्वादित्यत्रोद्भूतरूपवत्त्वमु-

पाधिर्न स्यात्। बहिर्द्रव्यत्वस्य मेयत्ववति प्रत्यक्षत्वप्रसिद्धिन्यूनवृत्तित्वाद् मेयत्वाव्यापकत्वाच्च। न च तत्र प्रत्यक्षसामग्र्या एवोपाधित्वं, न तूद्भूतरूपवत्त्वस्येति वाच्यम्। स्वयमसामर्थ्येन तथोक्तावविश्वासात्। न च विशेषणाव्यभिचारि(त्व)-सहकारेण यद्व्यभिचारः साध्यव्यभिचारानुमापकः, स एवात्र लक्ष्यत इति प्रमेयत्वहेतुके प्रमेयत्वं प्रत्यक्षत्वव्यभिचारि बहिर्द्रव्यत्वाव्यभिचारित्वे सति बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वव्यापकोद्भूतरूपवत्त्वव्यभिचारित्वादित्यस्यासिद्धतया साध्यव्यभिचारानुमापकत्वादुपाधित्वाभावस्तस्येष्ट एवेति वाच्यम्। विशेषणवति यद्व्यभिचारः साध्यव्यभिचारानुमापक इत्येव लाघवाल्लक्ष्यताप्रयोजकं, तच्च प्रमेयत्वहेतुकेऽप्यस्त्येव, प्रमेयत्वं प्रत्यक्षत्वव्यभिचारि, बहिर्द्रव्यत्ववति उद्भूतरूपवत्त्वव्यभिचारित्वादित्येवं व्यभिचारानुमानसम्भवादिति तत्राव्याप्तिः कथं न दोषाय भवेदिति न किञ्चिदेतत्।

इदं तु सम्भाव्यते — पर्यवसितपदमुभयत्रापि साध्ये साधने च देयं, तथा च यद्धर्मावच्छिन्नसाध्यव्यापकत्वं तद्धर्मावच्छिन्नसाधनाव्यापकत्वं लक्षणार्थः। महानसत्वावच्छिन्नवह्निव्यापके तदवच्छिन्नधूमव्यापके च व्यञ्जनवत्त्वे तदभावान्नातिव्याप्तिः। पक्षधर्मावच्छिन्नसाध्यव्यापके चोद्भूतरूपवत्त्वोपाधौ बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वव्यापके बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षस्पर्शाश्रयत्वाव्यापकत्वसत्त्वान्नाव्याप्तिः। यद्वा, यत्र साधनाव्यापकत्वं, तद्वृत्तिधर्मावच्छिन्नसाध्यव्यापकत्वं विवक्षितम्। व्यञ्जनवत्त्वन्तु पर्वतादौ धूमाव्यापकं तद्वृत्तिधर्मावच्छिन्नवह्निव्यापकं न भव(ती!)ति, पर्वतादावेव व्यभिचारादिति न तत्रातिव्याप्तिः। अथवा, उपाध्यनधिकरणसाधनाधिकरणवृत्तिधर्मावच्छिन्नसाध्यव्यापकत्वं विवक्षितम्। व्यञ्जनवत्त्वं च न तथा, स्वानधिकरणधूमाधिकरणगोष्ठादिवृत्तिधर्मावच्छिन्नसाध्यव्यापकत्वाभावादिति न तत्रातिव्याप्तिरिति।

अत्र कश्चित् — गन्धप्रागभावावच्छिन्नो घटो गन्धवान् पृथिवीत्वादित्यत्र एतद्गन्धप्रागभावकालीनरूपवत्त्वमेव तद्गन्धप्रागभावकालीनत्वावच्छिन्नगन्धव्यापकमुपाधिः स्यात्। एतद्गन्धप्रागभावकालीनत्वावच्छिन्नगन्धव्यापकस्यैतद्गन्धप्रागभावकालीनरूपवत्त्वस्यैतद्गन्धप्रागभावकालीनत्वावच्छिन्नपृथिवीत्वाव्यापक -

---

१. 'रानु' क. पाठः.

त्वात्, पक्ष एव व्यभिचारात्। एवमेतत्कालीनरूपवत्त्वस्य पक्षे पृथिवीत्वाव्यापकस्य तद्वृत्येतद्गन्धप्रागभावकालीनत्वावच्छिन्नगन्धव्यापकत्वसत्त्वाद् द्वितीयलक्षणस्यापि तत्रातिव्याप्तिः। एवमेतत्कालीनरूपवत्त्वानधिकरणपृथिवीत्वाधिकरणपक्षीभूतघटवृत्त्येतद्गन्धप्रागभावकालीनत्वरूपधर्मावच्छिन्नसाध्यव्यापकत्वसत्त्वादेतत्कालीनरूपवत्त्वस्य तृतीयलक्षणमपि तत्रातिव्याप्तमेव। किञ्च, घटः पृथिवी द्रव्यत्वादित्यत्र घटान्यत्वावच्छिन्नपृथिवीत्वव्यापकस्य घटावृत्तिगुणवत्त्वस्योपाधित्वाभावापत्तिः। घटान्यत्वावच्छिन्नपृथिवीत्वव्यापकस्य तदवच्छिन्नद्रव्यत्वव्यापकत्वाद्, घटे द्रव्यत्वाव्यापकस्य तद्वृत्तिधर्मावच्छिन्नसाध्याव्यापकत्वाद्, घटावृत्तिगुणवत्त्वानधिकरणद्रव्यत्वाधिकरणघटवृत्तिधर्मावच्छिन्नसाध्याव्यापकत्वाच्चेति दूषणमाह। तदमञ्जुलम्। तद्धर्मावच्छिन्नेत्यस्य तद्धर्मसामानाधिकरण्यावच्छिन्नेत्यर्थः। तथा च तद्धर्मसामानाधिकरण्यावच्छिन्नसाध्यव्यापकत्वमर्थः। न चैतदेतद्गन्धप्रागभावकालीनरूपवत्त्वेऽ(स्तीति? स्ति।) एतद्गन्धप्रागभावकालीनत्वसामानाधिकरण्यावच्छिन्नगन्धस्यैतद्घट एव पक्षीभूते सत्त्वेन तत्रैतत्कालीनरूपवत्त्वाभावेन व्यभिचारात्। एवमग्रिमलक्षणद्वयेऽपि न तत्रातिप्रसङ्गः, धर्मावच्छिन्नपदस्य सर्वत्र सामानाधिकरण्यावच्छिन्नार्थत्वकल्पनात्। यच्च किञ्चित्यादिना दूषणमुक्तं, तदपि न। घटावृत्तिगुणवत्त्वानुपाधित्वस्य प्रागेव प्रतिपादिततया तत्राव्याप्तेरदोषत्वात्। यदि च तदुपाधित्वमवश्यं स्वीक्रियत एव, तदा स्वविशिष्टोपाध्यनधिकरणसाधनाधिकरणवृत्तिधर्मावच्छिन्नसाध्यव्यापकत्वं लक्षणम्। स्वपदं च साध्यपरम्। तथा च पृथिवीत्वविशिष्टघटावृत्तिगुणवत्त्वानधिकरणं यद् द्रव्यत्वाधिकरणं जलादि, तत्तद्वृत्तिघटान्यत्वावच्छिन्नपृथिवीत्वव्यापकत्वमस्त्येव घटावृत्तिगुणवत्त्वस्येति न तत्राव्याप्तिरिति।

पक्षधरमिश्रास्तु — यत्किञ्चिद्धर्मावच्छिन्नसाध्यव्यापकत्वमेव लक्षणार्थः। न चैवं सति व्यञ्जनवत्त्वे महानसत्वावच्छिन्नसाध्यव्यापकेऽतिव्याप्तिः। महानसत्वावच्छिन्नवह्नौ साध्ये तस्याप्युपाधित्वेन संग्राह्यत्वात्। व्यभिचारानुमापकतावच्छेदकस्योक्तलक्षणस्य विशिष्टव्यभिचारोन्नायके व्यञ्जनवत्त्वे सत्त्वस्यादोषत्वादित्याहुः।

तत्तु न बुध्यते। शुद्धसाध्यव्यभिचारोन्नायकतावच्छेदकस्य प्रकृते विचा-

---

१. 'स्वा' क. पाठः.

र्यत्वात्, तस्य च यत्किञ्चिद्धर्मावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकत्वरूपस्य व्यञ्जनवत्त्वेऽपि सत्त्वेन ततोऽपि शुद्धसाध्यव्यभिचारोन्नयनापत्तेर्वारयितुमशक्यत्वादिति ।

वस्तुतस्तु — यत्किञ्चिद्धर्मावच्छिन्नसाध्यव्यापकत्वे सति शुद्धसाध्यव्यापकव्यभिचारिसाधनाव्यापकत्वं लक्षणम् । अत एव न व्यञ्जनवत्त्वादावतिप्रसङ्गः, तत्र शुद्धवह्निव्यापकव्यभिचारित्वस्य धूमेऽभावात् । साधनावच्छिन्नपक्षधर्मावच्छिन्नयोरपि शुद्धसाध्यव्यापकं प्रत्यक्षसामग्र्यादि, तद्व्यभिचारिप्रत्यक्षस्पर्शाश्रयत्वादिरूपसाधनाव्यापकत्वमुद्भूतरूपवत्त्वादेरुपाधेरस्त्येवेति नाव्याप्तिः । एवं च घटः पृथिवी द्रव्यत्वादित्यत्र घटावृत्तिगुणवत्त्वं घटान्यत्वावच्छिन्नसाध्यव्यापकमुपाधिरेव । तत्र द्रव्यत्वस्य साधनस्य पृथिवीत्वरूपसाध्यव्यापकगन्धवत्त्वव्यभिचारित्वात् । गौः शुक्लः पशुत्वादित्यत्रापि गोत्वावच्छिन्नशुक्लत्वव्यापकं सास्नावत्त्वमुपाधिरेव । एवमन्यत्राप्यूह्यम् । यद्वा, यत्किञ्चिद्धर्मावच्छिन्नव्यभिचारिसाध्यव्यापकत्वे सति साधनाव्यापकत्वं लक्षणम् । व्यञ्जनवत्त्वादौ व्यभिचारिसाध्यव्यापकत्वाभावान्नातिव्याप्तिः । साध्यव्यभिचारिसाधनाव्यापकत्वे सति यत्किञ्चिद्धर्मावच्छिन्नसाध्यव्यापकत्वं वा लक्षणार्थः । अथवा, यत्किञ्चिद्धर्मावच्छिन्नसाध्यव्यापकत्वे सति साध्यानधिकरणे साधनाव्यापकत्वं विवक्षितम् । न च व्यञ्जनवत्त्वं तथा, तस्य धूमाव्यापकत्वेऽपि वह्न्यनधिकरणे तदभावात्, तत्र धूमस्यासत्त्वादिति दिक् ।

इदं तु विचार्यते — व्यभिचारघटितोपाधिज्ञानं वा प्रतिबन्धकं, साध्यव्यापकत्वादिघटितं तज्ज्ञानं वा । नाद्यः । साधने साध्यव्यभिचारस्य साध्यव्यापकत्वादिग्रहोत्तरकल्प्यत्वात्, व्यापकव्यभिचारिणो व्याप्यव्यभिचारित्वनियमात् । न तु प्रथममेव तद्ग्रहः, उपाधेर्व्यर्थतापत्तेः । नापरः । यत्किञ्चिद्धर्मावच्छिन्नसाध्यव्यापकत्वज्ञानस्य प्रतिबन्धकत्वे व्यञ्जनवत्त्वस्यापि तद्ग्रहात् तेनापि वह्न्यनुमितिप्रतिबन्धापत्तेः । शुद्धसाध्यव्यापकत्वज्ञानस्य प्रतिबन्धकत्वे साधनावच्छिन्नपक्षधर्मावच्छिन्नसाध्यव्यापकोपाध्यप्रतिबन्धकत्वप्रसङ्गः । न च यद्धर्मावच्छिन्नसाध्यव्यापकत्वं तद्धर्मावच्छिन्नसाधनाव्यापकत्वज्ञानं प्रतिबन्धकमिति नाप्रसङ्गातिप्रसङ्गाविति वाच्यम् । तथा सति भिन्नभिन्नधर्मावच्छेदेन साध्यव्यापकत्वसाधनाव्यापकत्वयोर्ग्रहे प्रतिबन्धानापत्तेः, शुद्धसाध्यव्यापकत्वेन ग्रहे प्रतिबन्ध(का?कत्वा)

भावप्रसक्तेश्च । न च शुद्धसाध्यव्यापकत्वेन गृहीतो व्यभिचारानुमानसमर्थोऽपि उपाधिविधया न गमकः, तद्धर्मावच्छिन्नत्वादिरूपोपस्थितस्यैवोपाधित्वेन दूषकत्वादिति वाच्यम् । एवं सति पक्षधर्मावच्छिन्नसाध्यव्यापकव्यभिचारात् साध्यव्यभिचारानुमितावपि स उपाधित्वेन दूषण एव नेत्युक्त्वा निवृत्तो भव । किमिति सर्वसाधारण्याय प्राणांस्त्यजसि । महदिदमाश्चर्यं यच्छुद्धसाध्यव्यापक(मे ! एव) न तत्तया दूषक इति ।

तत्र केचित् — इदं सर्वमुपाधेस्त्रिविधस्यापि संग्राहकं लक्षणम् । प्रतिबन्धकं तु क्वचित् साध्यव्यापकत्वज्ञानं, क्वचित् पक्षधर्मावच्छिन्नसाध्यव्यापकत्वज्ञानमित्यननुगम एव दूषकतायामुपाधेरिति वदन्ति ।

ननु परमाणुरूपं प्रत्यक्षं प्रमेयत्वादित्यत्र बहिर्द्रव्यत्वावच्छिन्नसाध्यव्यापकमुद्भूतरूपवत्त्वं भवत्युपाधिः । स च न शुद्धसाध्यव्यापकः, न वा साधनावच्छिन्नसाध्यव्यापकः, न वा पक्षधर्मावच्छिन्नसाध्यव्यापकः, बहिर्द्रव्यत्वस्यासाधनत्वादपक्षधर्मत्वाच्च । तथा चायं तुरीयः स्यात् । तथा चापसिद्धान्तः । न च परमाणुरूपबहिर्द्रव्यान्यतरत्वावच्छिन्नसाध्यव्यापक एवोपाधिरिति पक्षधर्मावच्छिन्नसाध्यव्यापक एवेति वाच्यम् । घटरूपपक्षत्वे तथाप्युक्तदोषात् । नहि घटरूपबहिर्द्र(व्यत्वा[व्या)न्यतरत्वावच्छिन्नप्रत्यक्षत्वव्यापकता उद्भूतरूपवत्त्वस्य सम्भवति, घटरूप एव व्यभिचारादिति ।

अत्र केचित् – साधनसमानाधिकरणधर्मस्यैव पक्षधर्मपदेन विवक्षितत्वाद् बहिर्द्रव्यत्वमपि प्रमेयत्वरूपसाधनसमानाधिकरणत्वेन पक्षधर्म एवेति नोपाधिचातुर्विध्यम् । न चैवं साधनस्यापि पक्षधर्म एवान्तर्भावः स्यात्, स्वस्यापि स्वसमानाधिकरणत्वात् ।' तथा च तुरीयत्वं निराचिकीर्षुणोपाधेस्त्रितयत्वमपि व्याहतमिति पुत्रार्थं गता भर्तारमपि भुक्त्वा समागतेति जातमिति वाच्यम् । साधनेतरसाधनसमानाधिकरणधर्मस्य गोबलीवर्दन्यायेन पक्षधर्मपदेन विवक्षितत्वादिति समादधते ।

तच्चिन्त्यं - घटरूपं प्रत्यक्षं कर्मत्वादित्यत्र बहिर्द्रव्यत्वावच्छिन्नसाध्यव्यापकस्योद्भूतरूपवत्त्वोपाधेः तुरीयतापत्तेर्वज्रलेपत्वाद् बहिर्द्रव्यत्वस्यासाधनत्वात्, साधनासमानाधिकरणत्वाच्च ।

तस्मादिदमत्र तत्त्वं — वायुः प्रत्यक्षः वायुत्वादित्यादौ पक्षधर्मावच्छिन्नसाध्यव्यापकत्वमेवोद्भूतरूपवत्त्वादेः, साधनावच्छिन्नसाध्यस्याप्रसिद्ध्या तद्व्यापकत्वासम्भवात्। प्रागभावो विनाशी जन्यत्वादित्यादौ साधनावच्छिन्नसाध्यव्यापकत्वमेव भावत्वाद्युपाधेः। पक्षधर्मावच्छिन्नसाध्यस्य पक्षेऽपि सत्त्वात्, तत्र च भावत्वाद्युपाधेरभावात् पक्षधर्मावच्छिन्नसाध्यव्यापकत्वस्यासम्भवात्। न चैवं त्रैविध्यव्यवस्थितावपि घटरूपादिपक्षकप्रत्यक्षत्वसाध्यककर्मत्वादिहेतावुक्तचातुर्विध्यं न निराकृतमिति वाच्यम्। तत्र तस्योपाधित्वेनादोषत्वेऽप्यक्षतेः। उक्तत्रैविध्यस्थल एव शास्त्रकारस्योपाधित्वव्यवहारात्। यदि च तत्राप्युपाधित्वेन सङ्गच्छता, तदा शुद्धसाध्यव्यापकत्वे(त्येने)न साधनपक्षधर्मानवच्छिन्नसाध्यव्यापकत्वं विवक्षितमिति न काप्यनुपपत्तिः। ऋजवस्तु — उदासीनधर्मावच्छिन्नसाध्यव्यापकस्तुरीय एव। विभागस्तूपलक्षणपर इति समादधुः।

अन्ये तु — यदभावात् साधनवति क्वचित् साध्याभावः साधयितुं शक्यते, स एवोपाधिः। तथा च साधनाधिकरणं साध्याभावाधिकरणमुपाध्यभावाधिकरणत्वादित्यनुमितिर्जायमानान्यत्र साधनाधिकरणे साध्याभावस्य बाधावधारणात् पक्ष एव साध्याभावं गोचरीकरोतीति सत्प्रतिपक्ष एव पर्यवसानमित्याहुः।

तच्चिन्त्यं — क्वचिदेवं सत्प्रतिपक्षपर्यवसानेऽपि यत्र पक्षे साध्यसाधनोपाधीनां निर्णयः, अनुमित्सया चानुमानप्रवृत्तिस्तत्र पक्षे साध्याभावविषयत्वस्यासम्भवेन भिन्नविषयतया सत्प्रतिपक्षासम्भवाद् व्यभिचारानुमान एव पर्यवसानमिति दिक्।

ननु साध्यव्यापकोपाधिव्यभिचारितया हेतौ कथं साध्यव्यभिचारित्वानुमितिः। यतः साध्यव्याप्येहत्वव्यापकतया उपाधेरेव साध्याव्यापकत्वानुमित्या साध्यव्यापकत्वज्ञानासम्भव इति चेद्, न। उपाधौ साध्यव्यापकताग्राहकस्य बलवत्त्वेन तत्र साध्यव्यापकताग्रहात् तद्व्यभिचारेण हेतौ साध्यव्यभिचारानुमितिसम्भवात्। यदि च हेतुसाध्ययोः साध्योपाध्योश्च तुल्यमेव व्याप्तिग्राहकं, तदोपाधौ साध्यव्यापकत्वसन्देहेन हेतावपि साध्यव्यापकव्यभिचारित्वसंशयाहितसाध्यव्यभिचारसंशय इति भवत्येव तथाप्यनुमितिप्रतिबन्धः।

इदं त्ववधातव्यं — परामर्शोत्पत्तिपूर्वमुपाधिप्रतिसन्धाने तेन व्यभिचारो व्याप्त्यभावो वा ज्ञायत इति करणविघटनादनुमितिप्रतिबन्धकत्वमुपाधेः, परामर्श

उत्पन्ने तु समबलतादशायां सत्प्रतिपक्षद्वारा, अधिकबलतादशायां तु बाधद्वारा प्रतिबन्धकत्वम् । न चोपाधिव्यभिचाराद् व्यभिचारानुमित्यनावश्यकत्वेन तद्घटितोपाधिलक्षणव्याहतिरिति वाच्यम् । तत्स्वरूपयोग्यताघटितत्वात् तल्लक्षणस्येति पूर्वमेवोक्तत्वादिति । व्यभिचारज्ञानं चोपाधिव्यभिचारित्वरूपविशेषदर्शनजन्यं क्वचिल्लौकिकप्रत्यक्षं, क्वचिदुपाधिव्यभिचारित्वेन साध्यव्यभिचारानुमितिरू(पः ? पम्)। न च साक्षात्कारनिश्चये साक्षात्कारविपरीतज्ञानस्य विरोधित्वात् कथं व्यभिचारानुमितिर्व्याप्तिप्रत्यक्षविरोधिनीति वाच्यम् । अन्यत्र तथात्वेऽपि व्यभिचारज्ञानस्य तज्ज्ञानत्वेनैव प्रतिबन्धकत्वात् । अन्यथान्यत्र ग्राह्यसंशयस्याप्रतिबन्धकत्वात् सन्दिग्धानैकान्तिकमप्यप्रतिबन्धकं स्यात् । तथा च व्यभिचारानुमितिरप्यव्यभिचारप्रत्यक्षप्रतिबन्धिकैव ।

इदं तु शङ्क्यते — व्यभिचारानुमितिसामग्रीभूतस्य परामर्शस्यैवाव्यभिचारप्रत्यक्षप्रतिबन्धकत्वमस्तु । यद्धीर्यत्र प्रतिबन्धिका, तत्र तत्सामग्र्यपीति युक्तेस्तत्प्रतिबन्धकतावश्यकत्वस्योभयसिद्धत्वात् । अन्यथा विशेषदर्शनादीनां संशयादिप्रतिबन्धकतापि न स्यादिति ।

अत्रोच्यते — अनुमितिप्रतिबन्धकत्वं विना तत्सामग्रीभूतपरामर्शस्य प्रतिबन्धकत्वे मानाभावः । प्रतिबन्ध(क)धीसामग्रीत्वरूपविपक्षबाधकतर्काभावात् । न च पूर्वमेव[1] तत्सामग्र्यैव प्रतिबन्धे जाते व्यभिचारानुमितिः किं प्रतिबध्नात्विति वाच्यम् । प्रतिबन्धयोग्यतासत्त्वे परामर्शनाशकालीनव्याप्तिप्रत्यक्षस्य प्रसक्तस्य तया प्रतिबन्धसम्भवादिति दिक् ।

उपाधिश्च द्विविधः — निश्चितोपाधिः सन्दिग्धोपाधिश्च । तत्राद्यस्य दूषकतोक्तैव । अन्त्यस्य तु साध्यव्यापकत्वसाधनाव्यापकत्वान्यतरसन्देहेन व्यभिचारसंशयाद्यासञ्जकतया दूषकत्वम् । नन्विदमनुपपन्नम् । स श्यामो मित्रातनयत्वादित्यादौ शाकपाकजत्वस्य साधनाव्यापकत्वसंशयः पक्ष एव वाच्यः । अन्यत्र मित्रातनये श्यामत्वनिश्चयेन शाकपाकजन्यत्वनिश्चयात् । तथा च तत्संशयेन पक्षे साध्याभावसंशयात्मकव्यभिचारसंशयो जननीयः । स च न दोषः, हेतुमत्त्वेन निश्चिते साध्यसंशयात्मकव्यभिचारसंशयस्यादोषत्वात् । अन्यथानुमानमात्रविलयप्रसङ्गादिति ।

१. 'मेन' क. पाठः.

अत्रोपाध्यायाः — व्यभिचारसंशयमात्रमेव दूषणं, व्यभिचारज्ञानत्वेनैव लाघवात् प्रतिबन्धकत्वात् । तथा च हेतुमति साध्यसन्देहोऽपि प्रतिबन्धक एव । तर्कादिना तदपनये सत्यनुमानप्रवृत्तिरिति न तन्मात्रोच्छेद इति समादधुः ।

तत्र पक्षधरमिश्राः — व्यभिचारसंशयमात्रस्य प्रतिबन्धकत्वेऽनुमानमात्र एव पक्षीयव्यभिचारशङ्कापनोदनार्थं तर्कापेक्षापत्तेः, तर्कमूलभूतव्याप्तेरपि निश्चयार्थं तर्कान्तरानुसारेणानवस्थाप्रसङ्गाच्चेति दूषणमाहुः ।

अत्र केचित् — साध्यसंशयः सर्वत्र भविष्यत्येवत्यत्र मानाभावः, कोटिस्मृत्यादिहेत्वनियमात् । तथा च सर्वत्र न तर्कापेक्षेति नैतद् दूषणमिति ।

अत्रायं मिश्राणां समाधिः — सन्दिग्धसाध्यवति सर्वत्र तर्कापेक्षापत्तिः । नहि सर्वत्र तर्कापेक्षेति कश्चिद् ब्रूते, अनुभवसाक्षिकं वा । किञ्चैवं तत्र तर्कमूलभूतव्याप्तेरपि पक्षीयसाध्यसन्देहेन निश्चयासम्भव इत्यत्रापि तर्कान्तरापेक्षायामनवस्थेति ।

तस्मादत्रायं समाधिः — अनुमानमात्रोच्छेदापत्त्या सर्वत्र संशयः प्रतिबन्धक इति मास्तु । पक्षताघटकसंशयान्यसंशयत्वेन प्रतिबन्धकत्वात् । तथा च स्वारसिकसाध्यसंशयस्य पक्षताघटकतया न प्रतिबन्धकत्वमिति नानुमानमात्रोच्छेदः । अन्याहितसंशयस्तु न पक्षताघटक इति प्रतिबन्धकः स्यादेव । वस्तुतस्तूपाध्यादिसन्देहाहितसन्देहस्य पृथगेव विरोधित्वम्, अन्याहितसंशयस्य प्रामाण्यसंशयाहितार्थसंशयादेरिव प्रतिबन्धकतौचित्यादिति ।

इदं त्ववधेयं — परामर्शात् पूर्वमुपाधिसंशयस्य व्यभिचारादिसन्देहाधायकत्वेन दूषकत्वं, परामर्शानन्तरं च बाधसंशयाधायकतया दोषत्वम् । न च ग्राह्यसंशयतया बाधसंशयो न विरोधीति किं तदाधायकत्वेनेति वाच्यम् । अन्याहितव्यभिचारसंशयवत् तादृशबाधसंशयस्यापि प्रतिबन्धकतायां युक्तिसाम्यादिति संक्षेपः ॥

उपाधिवादः समाप्तः ।

अथ पक्षधर्मतावादः ।

व्याप्त्यनन्तरं पक्षधर्मता निरूप्यते । सा च पक्षताश्रयवृत्तिता । पक्षता च

१. 'नि त' क. पाठः.

सन्दिग्धसाध्यकत्वमिति प्राञ्चः । तन्न । साध्यसंशयस्योपलक्षणत्वे निश्चितेऽप्यनुमित्यापातात् । विशेषणत्वे चानुमितिपूर्वं नियमतः सत्ता वाच्या, सा चास(म्भा?-म्भ)विनी, व्याप्तिस्मृत्यादिव्यवहितत्वात् । अत एव सिसाधयिषितसाध्यधर्मकत्वं तदित्यपि निरस्तम्, उक्तक्रमेण विशेषणतोपलक्षणत्वविकल्पग्रासादिति मणिकृतः ।

अत्रेदं शङ्क्यते — संशये विशेषणतोपलक्षणत्वविकल्पोऽस्तु, न तु सिसाधयिषायामपि । सा हि सिद्धिजनकीभूता सिद्धिविषयकेच्छा ईश्वरसाधारणा विवक्षितेति भवति विशेषणमेव । न चैवं सिद्धसाधनोच्छेदः, भगवदिच्छाया नित्यतया तद्घटितपक्षतासत्त्वस्य दुर्वारत्वादिति वाच्यम् । फलीभूतसिद्धीच्छाया एव पक्षताघटकत्वात् सिद्धसाधनस्थले फलीभूतसिद्ध्यनुत्पादेन तद्गोचरभगवदिच्छाविरहात् तस्याः फलैककल्प्यत्वात् । अत एव घनगर्जितादावव्याप्तिर्निरस्ता । तत्रानुमितेरनुभूयमानत्वेन तद्गोचरभगवदिच्छासत्त्वादिति ।

अत्र ब्रूमः — एवं सति सिद्धसाधनस्थलेऽनुमितिर्दुर्वारा, प्रहरानन्तरोत्पत्स्यमानसिद्धिगोचरभगवदिच्छायास्तदापि सत्त्वेन पक्षतायाः सत्त्वात् । न च तस्यां सत्यां पक्षतासत्त्वेऽपि भाविप्रहरानन्तरक्षणस्यैव हेतोस्तदानीमभावान्न तस्यास्तदोत्पत्तिरिति वाच्यम् । तथा सति सिद्धसाधनस्थले सर्वत्रानुमित्यनुत्पादः क्षणविशेषरूपहेतुविलम्बादेवास्त्विति पक्षता कारणमेव नेति कृतं भगवदिच्छायास्तत्कुक्षिनिक्षेपेण । किञ्च, सिद्धिसामग्रीसमवहितभगवदिच्छारूपसिसाधयिषाघटिता पक्षता ज्ञानमात्र एवाव्यभिचाराद्धेतुरस्तु । तथा चानुमित्यसाधारणजनकत्वव्याघात इति सिद्धिसमानाधिकरणसिसाधयिषाघटिता वाच्या । तथा च विशेषणत्वोपलक्षणत्वविकल्पो निर्विकल्प एव मणिकृतामिति नायं पन्था इति ।

अत्र मणिकृतः — सिसाधयिषाविरहसहकृतसाधकमानाभावः पक्षता । (सा?स) च विशिष्टाभावः क्वचित् साधकमानरूपविशेष्याविरहात्, क्वचित् सिसाधयिषाविरहरूपविशेषणविरहात्मकसिसाधयिषातः, क्वचिदुभयत इत्याहुः ।

अत्रोपाध्यायाः — मानं मितिः तत्करणं च । तथा च सिद्धितत्करणान्यान्यत्वावच्छिन्नाभावत्वेन तदुभयाभावस्य हेतुत्वं पक्षतापदवाच्यत्वं च । तथा च सिद्धसाधनस्थले संशयोत्तरप्रत्यक्षस्थले च क्वापि न पक्षतेति नानुमितिरित्याहुः ।

अत्र मिश्राः — एवं सति तृणादीनामप्यन्यान्यत्वेन वह्निजनकत्वापत्तौ शक्तिवैजात्यान्यतरकल्पना भज्येत । न चानुगतकारणतावच्छेदकासम्भवात् तत्र वैजात्यकल्पनमिति नार्थः, किन्त्वनुभवसिद्धत्वादिति वाच्यम् । क्लृप्तेनान्यान्यत्वेनोपपत्तावतीन्द्रियशक्तिकल्पनायास्तथाप्यप्रसक्तेः । तस्मादन्यान्यत्वं नावच्छेदकमिति वाच्यम् । तथा चात्रापि सिद्ध्यभावः साधकमानाभावश्च प्रत्येकमेवानुमितिहेतुः पक्षता च । लाघवात् सिद्ध्यभाव एव पक्षपदप्रवृत्तिनिमित्तमिदमुक्तमित्युपसंहारस्य मणौ दर्शनादिति ।

अत्र केचित् — तृणान्यान्यत्वेन हेतुत्वे तृणफूत्काराभ्यामिवाराणि(मणि?) फूत्काराभ्यामपि वह्निप्रसङ्गात् । हेतुतावच्छेदकावच्छिन्ने सहकारिसमवधानस्यैव कार्यापादकत्वात् । अत्र तु अन्यान्यत्वस्य हेतुतावच्छेदकप्रवेशे बाधकाभावः । प्रत्युताभावद्वयापेक्षयैकाभावहेतुतैव ज्यायसी । यच्च पक्षपदप्रवृत्तिनिमित्तत्वलाघवमभ्यधायि, तदज्ञानात् । नह्यत्र परमेश्वरसङ्केत(ति?)तः, येन स लघुन्येव कल्प्येत । अपि तु शास्त्रपरिभाषा । तत्र च गौरवमतन्त्रम् । अत एव मणि(कण्ठे? ग्रन्थे) संशयोत्तरप्रत्यक्षे सामग्रीमत्त्वादनुमितावापादितायां पक्षताविरहान्नानुमितिरिति क(ण्ठाव?ण्ठ)रवेणाभिहितमिति ।

अत्रायमभिसन्धिर्मिश्राणाम् — अरणिफूत्काराभ्यां कार्यापत्तेरनेकशक्तिमत्त्वेन कारणतायामपि साम्याद् दृष्टेनान्यान्यत्वेनैवोपपत्तावतीन्द्रियशक्तिकल्पनायां मानाभावाद् अन्यान्यत्वमवच्छेदककोटिप्रविष्टं न भवतीत्यवश्यं वाच्यम् । किञ्च, एककारणताकल्पना कारणताद्वयकल्पनाविरोधिनी तत्रैव, यत्र प्रत्येककारणतावच्छेदकद्वयाघटितं कारणतावच्छेदकम् । इह तु प्रत्येकाभावकारणतावच्छेदकस्यैकाभावनिष्ठकारणतावच्छेदके प्रवेशाद् अतिरिक्तान्यपदार्थप्रवेशाच्च कुत्रैकाभावहेतुतायां लाघवशङ्कापि । यच्चोक्तं शास्त्रकारपरिभाषायां गौर(वं? वम) किञ्चित्करमिति । तदत्यन्तावोधात् । शास्त्रकारतात्पर्यस्य कल्प्यत्वस्थले तत्रापि लाघवादरात् । संशयोत्तरप्रत्यक्षेऽनुमित्यभावस्य पक्षताविरहात् प्रत्यक्षसामग्रीबलवत्त्वाद् वा सम्भव इति संशये, समाने विषये प्रत्यक्षसामग्र्या बलवत्त्वादित्यादिमणिग्रन्थानुसारेण लाघवानुसारेण च पक्षतात्वे सिद्ध्यभावस्यैव प्रमाणप्रसरात् । किं बहुना, एवं सति कार्यमात्र एवैकमन्यान्यत्वमवच्छेदकमस्त्विति गतं

दण्डत्वादेः कारणतावच्छेदकत्वेन । यदि च दण्डचक्रान्यान्यत्वं दण्डत्वादिघटितमिति तदेव लाघवादवच्छेदकमङ्गीक्रियते, तदा प्रकृतेऽपि दीयतां दृष्टिः । तस्मात् सिसाधयिषाविरहसहकृतसिद्ध्यभाव एव पक्षता, सिसाधयिषा चानुमितिगोचरेच्छामात्रं, सा च सिद्धित्वप्रकारानुमितित्वप्रकारिका वेति विशेषो नादरणीयः ।

नन्विदं लक्षणमनुपपन्नम् । सिसाधयिषा हि तल्लिङ्गकतत्पक्षकतत्साध्यकतत्पुरुषीयेच्छा पक्षताघटिका वाच्या, अन्यथातिप्रसङ्गात् । तथा च यस्य घनगर्जिताद्यनुमितौ नेच्छा, तस्य तत्सिसाधयिषाविरहेण पक्षताविरहाद् गर्जितेन घनानुमानं न स्यादिति चेद्, न । फलीभूतसिद्धावीश्वरेच्छा स्वेच्छा च प्रयोजिका । तथा च फलीभूतसिद्धिप्रयोजकतत्पक्षक(तत्)साध्यकेच्छाविरहसमानाधिकरणसिद्ध्यभावो यदात्मनि, तदात्मनि पक्षताङ्गीकाराद् घनगर्जितादावपीश्वरेच्छामादाय प्रसि(द्धि?द्धे)रदुष्टत्वात् । न च सिद्धसाधनस्थलेऽप्यनुमितिः स्याद्, ईश्वरेच्छाविरहविशिष्टसिद्धयभावस्य सिद्धिसत्त्वेऽपि सत्त्वादिति वाच्यम् । ईश्वरेच्छाविरहसमानाधिकरणसिद्धेरेव सिद्धिमदात्मनि सत्त्वेन तदभावाभावात् । अन्येच्छाया अन्यात्मन्यवृत्तेः । अस्तु वा तल्लिङ्गकतत्पक्षकतत्साध्यकसमानाधिकरणेच्छैव पक्षताघटिका, अतो न सिद्धसाधनस्थलेऽतिप्रसङ्गशङ्कापि । न चैवं यत्र कदापि स्वस्य तादृशेच्छा नास्ति, तत्राप्रसिद्धिरिति वाच्यम् । तत्र विशिष्टाभावरूपपक्षतायां हेतुत्वे मानाभावात् । नहि सर्वत्रैकरूपेण तस्या हेतुत्वं, तल्लिङ्गकत्वादिप्रवेशेनाननुगमात् । तथा च तत्र सिद्धयभावमात्रमेव कारणं, लाघवादनतिप्रसङ्गाच्च । अन्यत्र तु विशिष्टाभाव इति क्वाप्रसिद्धिशङ्कापीति युक्तमुत्पश्यामः ।

ननु तथापि विशेषणाभावप्रयुक्तविशिष्टाभावः कारणं क्वापि न सम्भवति, सिद्धिपरामर्शसिसाधयिषाणामेकदैकत्रासम्भवात् । योग्यात्मविशेषगुणत्रयस्यैकदानवस्थितेः । न च सिसाधयिषायोग्यताप्रयुक्तो विशिष्टाभावः । तथा सति सिद्धसाधनस्थलेऽप्यनुमित्यापातात् । योग्यतायामन्तत्राप्यक्षतेरिति चेद्, न । यत्र सिद्धिपरामर्शसिद्धीष्टसाधनताज्ञानात्मकसमूहालम्बनाव्यवधानेन सिसाधयिषोत्पत्तिः, तत्रैव विशेषणाभावप्रयुक्तविशिष्टाभावस्य हेतुत्वसम्भवात्, सिद्धिपरामर्शयोरेकत्वेन गुणत्रयानवस्थानशङ्काविरहादिति प्राञ्चः ।

---

१. 'वतान्या' क. पाठः.

पक्षधरमिश्रास्तु — द्वित्रक्षणान्तरितायामपि सिसाधयिषायामनुमितिदर्शनात् सिद्धिसामान्येच्छायां परामर्शोत्पत्त्युत्तरजातायामप्यनुमितिद्वयादर्शनाच्च सिसाधयिषोत्पत्त्युत्तरकालीनस्वविषयसिद्ध्यनुत्पादकाल एव तद्योग्यतारूपः पक्षताघटकः । यद्वा सिसाधयिषोत्पत्त्युत्तरकालीनत्वमपि न विशेषणम् । न चैवं सिद्धौ जातायां सिसाधयिषातोऽनुमितिर्न स्यात्, सिसाधयिषाविषयीभूतपूर्वसिद्ध्यनुत्पादकालाभावादिति वाच्यम् । इच्छायामनागतविषयकत्वनियमेन पूर्वसिद्धेः सिसाधयिषाविषयत्वाभावेनैवानतिप्रसङ्गात् । तथा च सिसाधयिषाविषयसिद्ध्यनुत्पादकाल एव सिसाधयिषायोग्यतारूपः पक्षताघटकः । वस्तुतस्तु — सिसाधयिषाविषयसिद्ध्यननुगुणानन्तरितानुत्पादकाल एव तद्योग्यतारूपः पक्षताघटकः । अत एवाद्य सिसाधयिषायां जातायामपि दैवात् सिद्ध्यनुत्पादे श्वस्तद्घटितपक्षतातो नानुमितिः, अन्तरायकालस्य सिद्ध्यननुगुणत्वात् । फलबलात् तथा कल्पनादित्याहुः । अत्र च प्रथमपक्षेऽद्य सिसाधयिषायां दैवात् सिद्ध्यनुत्पादे श्वस्तद्घटितपक्षतातोऽनुमितिप्रसङ्गः । सिसाधयिषाविषयसिद्ध्यनुत्पादकालसत्त्वादिति दूषणाच्चरमपक्ष एव साधीयानिति द्रष्टव्यम् । अत एव यावज्जीवमनुमिनुयामितीच्छायामपि न यावज्जीवमनुमित्युदयः । तादृशसिसाधयिषायां सत्यामप्यनुमित्युत्पादस्यानुभवासिद्धतयान्तरायकालस्य सिद्ध्यननुगुणान्तरितत्वकल्पनात् । फलबलस्यैव तत्कल्पकत्वादिति । नन्वेवं संशयोत्तरप्रत्यक्षस्थलेऽनुमितिरेव स्यात्, सिसाधयिषाविरहसहकृतसिद्ध्यभावरूपपक्षतापरिपूर्णानुमितिसामग्र्याः परामर्शात्मिकायाः सत्त्वादिति चेद्, न । समानविषयकसिद्धिकरणान्तराभावस्याप्यनुमितिसामग्रीघटकत्वात् । संशयोत्तरप्रत्यक्षे च समानविषयकानुमानातिरिक्तसिद्धिकरणस्य प्रत्यक्षस्यैव सत्त्वान्नानुमितिः । तत्रापि संशयानन्तरमनुमितिरास्त्वितीच्छायामनुमितिदर्शनादनुमित्सोत्तेजिका । तथा चानुमित्साविरहसहकृतानुमानातिरिक्तसाधकमानाभावः पक्षतापदाप्रतिपाद्योऽप्यनुमितिहेतुरिति नातिप्रसङ्ग इति वदन्ति ।

तत्रेदं शङ्क्यते — तत्रानुमित्सा किमनुमितिगोचरेच्छामात्रम्, उतानुमितित्वप्रकारेच्छा । नाद्यः । सिद्धिर्मेऽस्त्वितीच्छायामपि साधकमानस्थलेऽनुमित्यापत्तेः । उत्तेजिकाया अनुमितिगोचरेच्छायाः सिद्धित्वप्रकारिकायाः सत्त्वात् । नान्त्यः । संशयानन्तरं प्रत्यक्षान्यसिद्धिर्मेऽस्त्वितीच्छायामनुमितिर्न स्यात् । तादि-

च्छाया अनुमितित्वाप्रकारकत्वेनानुत्तेजकत्वात्। न च प्रत्यक्षाविषयकानुमितिविषयकेच्छोत्तेजिका, सा चानुमितित्वप्रकारकेच्छावत् प्रत्यक्षान्यासिद्धित्वप्रकारिकापीति वाच्यम्। तथा सति शाब्दधीसामग्रीसत्त्वे प्रत्यक्षान्येन जानीयामितीच्छायामनुमित्यापत्तेः। अनुमानातिरिक्तासिद्धिसामग्रीमात्रस्य तत्र प्रतिबन्धकतया इष्टापत्तेः कर्तुमशक्यत्वात्। न चानुमितिमात्रविषयकेच्छैवोत्तेजिका, प्रत्यक्षान्येन जानीयामितीच्छा तु अन्यविषयिणीति नोत्तेजिकेति वाच्यम्। एवं सति संशयोत्तरं प्रत्यक्षान्येन जानीयामितीच्छायां शाब्दधीसामग्र्यभावेऽप्यनुमितिर्न स्याद्, अनुमितिमात्रविषयकेच्छाविरहादिति।

अत्र ब्रूमः — प्रत्यक्षसामग्र्यां केवलप्रत्यक्षानिवर्त्यानुमितिविषयकेच्छोत्तेजिका। संशयोत्तरं सिद्धिरन्वितेच्छा च केवलप्रत्यक्षेणापि निवर्त्यत इति सा नोत्तेजिका। प्रत्यक्षमनुमितिश्चान्वितेच्छा तु केवलप्रत्यक्षानिवर्त्यत्वाद् उत्तेजिकैव। एवं शाब्दसामग्र्यामपि केवलशाब्दानिवर्त्यानुमितिविषयकेच्छोत्तेजिका। तत्तत्सामग्र्यभावश्च प्रत्येकमेव हेतुः, प्रतिबन्धकाभावकूटस्य हेतुत्वेनाननुगमस्य निरासात्। यद्वा, स्वनिवर्तकतापर्याप्त्यधिकरणप्रत्यक्षादिसिद्धिसामग्रीसमवहितानुमित्साभिन्नानुमित्सा सर्वत्रोत्तेजिका। प्रत्यक्षादिसिद्धिसामग्रीकाले सिद्धिरस्तिवतीच्छा न तादृशीति नोत्तेजिका। तदन्यकाले तूत्तेजिकैव। अनुमितित्वप्रकारिका अनुमितिरस्तिवतीच्छा सदोत्तेजिका, प्रत्यक्षादिसिद्धेः स्वनिवर्तकत्वाभावाद् विशिष्टाभावसत्त्वात्। प्रत्यक्षमनुमितिश्चास्तिवतीच्छास्थलेऽपि प्रत्यक्षादेः स्वनिवर्तकतापर्याप्त्यधिकरणत्वाभावाद् विशिष्टाभावोऽस्तीति तत्राप्यनुमितौ न कश्चिद् दोष इति।

इदं त्ववशिष्यते — संशयोत्तरप्रत्यक्षे अन्वयव्यतिरेकाभ्यां विशेषदर्शनवदत्रापि सिद्ध्युत्तरानुमितौ सिसाधयिषा विशेषसामग्र्यस्तु। तत एव सिद्धसाधनस्थले चातिप्रसङ्गाभावात् किं विशिष्टाभावकारणतया, तदपेक्षया विशेषसामग्रीकल्पने लाघवादिति।

अत्र मिश्राः — एवं सति मणिकालीनदाहे उत्तेजकं हेतुरस्तिवति विशिष्टाभावकारणता सर्वत्राप्युच्छिद्येत, युक्तिसाम्यादिति। यदि च मणेः प्रतिबन्ध-

१. 'व न नु' क. पाठः.

कत्वमनुभवासिद्धमिति गुरुरपि विशिष्टाभावः कारणत्वेनाङ्गीक्रियते, तदा प्रकृतेऽपि तुल्यमिति ।

अत्रेदं विचार्यते — एवं सति विशेषादर्शनविशिष्टसंशयाभाव एव प्रत्यक्षे हेतुरस्त्विति तदुत्तरप्रत्यक्षे विशेषदर्शनं हेतुरिति न स्यात्। तथाच विशेषसामग्र्युच्छेदप्रसङ्ग इति समोऽयमनुयोगः । किञ्च, मण्यादिस्थले उत्तेजकानामननुगतत्वान्न विशेषसामग्रीकल्पनं, प्रकृते च सिसाधयिषाहेतुत्वे बाधकाभावात् । यत्तु — सिद्धेः प्रतिबन्धकत्वज्ञानं विना सिसाधयिषायां विशेषकारणता निश्चेतुं न शक्यते, सामान्यसामग्रीत एव कार्यसम्भवात्। प्रतिबन्धकत्वं च कारणीभूताभावप्रतियोगित्वमित्युपजीव्यतयोत्तरकाले तन्न बाध्यते । किन्तु तत्रोत्तेजक(त्व)मात्रं कल्प्यते । एवमप्रामाण्यादिस्थलेऽपीति । तन्न। सिद्धिस्थलीयानुमितौ सिसाधयिषाया अन्वयव्यतिरेकाभ्यामेव हेतुतानिश्चयान्न (तुः) तदर्थं सिद्धिप्रतिबन्धकत्वज्ञानं पूर्व(मुः)पेक्षितं, येनोपजीव्यविरोधः स्यात् । अस्तु वा तदपेक्षा । उत्तरकालीनलाघवप्रति(बः)न्धानेन तत्त्यागे बाधकाभावात् । अन्यथा जितं कार्यान्वितशक्तिवादिनेति । यदपि — सिद्ध्यभावस्यानुमितावहेतुत्वे सिद्धसाधनस्थलेऽनुमित्यापत्तिः । न च सिद्ध्युत्तरानुमितौ सिसाधयिषा हेतुरिति तदभावात् तदभाव इति वाच्यम् । सिद्धयनुत्तरानुमितौ तथापि बाधकाभावात् तत्सामग्रीसत्त्वात् । न च सिद्धयनुत्तरानुमितौ सिद्धयभावः कारणमिति तदभावादेव तदभाव इति वाच्यम् । तथा सति सामग्रीद्वयकल्पने विपरीतगौरवाद् विशिष्टाभाव एव हेतुरस्त्विति नव्यदूषणम् । तदपि न । विशेषदर्शनप्रतिबन्देरनुद्धारात् । अत एव निश्चितार्थसंशये प्रामाण्यसंशयो विशेषसामग्रीति सिद्धान्तः । अन्यथा तत्रापि विशिष्टाभावहेतुतापत्तेरिति ।

अत्रार्वाचीनाः — यत्रोत्तेजकस्य फलं प्रति हेतुत्वं प्रमाणान्तरेण सिद्धमस्ति, तत्र विशेषसाम(ग्र्यैः ग्र्ये)व कल्प्यते । न विशिष्टाभावः, यथा संशयोत्तरप्रत्यक्षे । तत्र गुणत्वेन विशेषदर्शनप्रमायाः संशयोत्तरप्रमां प्रति हेतुत्वकल्पनात् । उत्तरकालेऽपि सिद्धकारणभावस्यैव विशेषदर्शनस्य हेतुत्वं कल्प्यते । यत्र तु नैवं, तत्रानुगततया विशिष्टाभाव एव हेतुः कल्प्यते दाहे मण्यभाव इव । तदत्र सिसाधयिषायाः कथमप्यनुमित्यहेतुत्वाद् विशिष्टाभावो हेतुत्वेन कल्प्यत इति वदन्ति ।

तदपि चिन्त्यं — यद्धर्मावच्छेदेन विशेषं प्रति हेतुता, तद्धर्माश्रयस्य यावतः सिद्धकारणभावत्वं विशेषसामग्रीकल्पने तन्त्रम्, उत यत्किञ्चिदाश्रयस्य सिद्धकारणभावत्वम्। नाद्यः। भ्रमरूपस्य विशेषदर्शनस्य गुणत्वेनाहेतुत्वात्। न च तस्य गुणत्वेनाहेतुत्वेऽपि दोषत्वेनैव हेतुत्वमस्तिवति वाच्यम्। विशेषभ्रमे सत्यपि व्यापकज्ञानस्य विषयाबाधेन प्रमात्वेन तत्र दोषान्तरस्यैव वाच्यत्वात्। नान्त्यः। ईश्वरेच्छाया अपि सिसाधयिषात्वेन तस्याश्चानुमितिं प्रति हेतुत्वकल्पनाद् दुर्वारैव विशेषसामग्रीति।

अत्र ब्रूमः — यत्र कार्येऽवान्तरवैलक्षण्यं तत्रैव विशेषसामग्री, अन्यत्र विशिष्टाभाव इति तद्विभागः। तथा च संशयोत्तरप्रत्यक्षे च विशेषदर्शनप्रयुक्तसावधारणत्वदर्शनाद् विशेषसाम(ग्र्यै?ग्र्ये)व कल्प्यते, पुरुष एवायं न स्थाणुरित्यनुभवात्। सिसाधयिषोत्तरानुमितौ मन्त्रादिस्थलीयदाहादौ च न वैलक्षण्यमस्तीति तत्र सर्वत्र विशिष्टाभाव एव हेतुः। प्रामाण्यसंशयस्थलेऽप्युक्तानुरोधेन विशिष्टाभावस्यैव हेतुता। अन्यथा नियामकान्तराभावेन क्वचिद् विशिष्टाभावः क्वचिद् विशेषसामग्री हेतुरिति वैलक्षण्यानुपपत्तेरिति दिक्।

ननु सिद्धयभावस्यानुमितिरूपकार्यकालावृत्तित्वात् कथं हे(तुः?तुत्वं) प्रतिबन्धकाभावस्य कार्यसहभूतस्यैव हेतुत्वात्। अन्यथातिप्रसङ्गादिति चेद्, न। ज्ञानातिरिक्तप्रतिबन्धकाभावस्यैव फलबलेन सहभावेन हेतुताकल्पनादिति केचित्। वस्तुतस्तु — प्रतिबन्धकाभावत्वेन न हेतुतेत्यग्रे वक्ष्यते, किन्तु मण्याद्यभावत्वादिना। तथा च यत्रातिप्रसङ्गः, तत्र सहभावे प्रवेशितेऽपि सर्वत्र तत्प्रवेशे मानाभावः। इतरकारणवत् पूर्वभावमात्रेण कार्योत्पादसम्भवादिति तत्त्वम्।

इदं तु शङ्क्यते — सिद्धेरनुमिति(प्रति)बन्धकत्व एव मानाभावः, प्रत्यक्षादौ सिद्धेस्तदविरोधित्वात्। न चैवमनुमिनोमीत्यनुव्यवसायो न स्याद्, अनुमित्यनन्तरमनुमित्यन्तरसामग्र्या भिन्ने विषये प्रत्यक्षसामग्र्यपेक्षया प्रबलायाः सत्त्वेनानुमित्यन्तरस्यैवोत्पत्तेरिति वाच्यम्। द्वितीयानुमित्यनन्तरमनुमिनोमीत्यनुव्यवसाये बाधकाभावात्। तदा परामर्शरूपकारणाभावेनानुमित्यन्तरसामग्रीविर-

---

१. 'णा', २. 'णा' क. पाठः.

हात् । अत एवानुमितिधाराप्रसङ्गभिया सिद्धिः प्रतिबन्धिकेति निरस्तं, परामर्शाभावादेव तदभावसम्भवात् । न चानुमितिरेव लिङ्गविषयकतया परामर्श इति वाच्यम् । लिङ्गोपहितलैङ्गिकभानस्याग्रे निरस्यत्वादिति कथं पक्षतानुमितिहेतुरिति ।

अत्रोच्यते — एवं सति संशयोत्तरप्रत्यक्षानन्तरं साक्षात्करोमीत्यनुव्यवसायो न स्याद्, न स्याच्च तदनुरोधात् प्रत्यक्षसामग्रीबलवत्त्वकल्पनं, तत्प्रत्यक्षे व्याप्यस्यापि जनकीभूतविशेषदर्शनविषयस्य विषयतया परामर्शरूपतत्प्रत्यक्षादनुमित्युत्पादस्यैव सम्भवात् । भिन्ने विषयेऽनुमितिसामग्रीबलवत्त्वात् । तस्मात् तत्र सिद्धिसत्त्वान्नानुमितिरिति वाच्यम् । ततस्तदभावोऽवश्यमनुमितिहेतुः । किञ्च, यत्र व्याप्यवत्त्वं पक्षतावच्छेदकं, तत्रानुमितिपरम्परैव स्याद्, नानुमित्यनुव्यवसायः । पक्षतावच्छेदकतया व्याप्यस्यानुमितौ भानेन पूर्वपूर्वानुमितेः परामर्शात्मिकायाः सत्त्वादित्यवश्यं सिद्ध्यभावस्तत्र कारणमिति संक्षेपः ॥

इति पक्षधर्मतावादः ।

अथ परामर्शवादः ।

पक्षधर्मस्य व्याप्तिवैशिष्ट्यधीरनुमितिहेतुः । ननु व्याप्यतावच्छेदकरूपेण व्याप्तिधीस्तेनैव रूपेण पक्षताधीरप्यनुमितिहेतुः । न तु व्याप्तिविशिष्टपक्षधर्मताधीस्तत्र हेतुः । तद्धेतोरिति न्यायेन तज्जनकादुक्तादेवानुमितिसम्भवात् । न च व्याप्तिस्मृतौ धूमत्वरूपोपनायकदर्शने च पक्षधर्मे व्याप्तिवैशिष्ट्यज्ञानमावश्यकमिति तदेव हेतुरिति वाच्यम् । भिन्नविषयेऽनुमितिसामग्र्या बलवत्त्वेन परामर्शोत्पत्तिक्षणेऽनुमितिसामग्रीसत्त्वेनानुमितेरेवोत्पादात् । न च पक्षधर्मे व्याप्यभेदज्ञाने सत्यनुमितिर्नेति तदभेदधीर्हेतुरिति वाच्यम् । धूमत्वरूपव्याप्तिनियतधर्मज्ञाने व्याप्यभेदज्ञानस्यैवासम्भवात् । न च समानप्रकारकज्ञानं विरोधिधीप्रतिबन्धकमिति धूमत्वेन व्याप्तिज्ञानेऽपि तद्धूमत्वेन तदभावज्ञानमस्त्विति वाच्यम् । यद्धर्मावच्छेदेन यन्निश्चयः, तद्घटितधर्मप्रकारकतद्व्यतिरेकज्ञानस्यासम्भवात् । अन्यथा घटत्वावच्छिन्नं द्रव्यमिति ज्ञाने सत्ययं नीलघटो द्रव्यं न वेति ज्ञाना-

पत्तेः । भवतु वा व्याप्यपक्षधर्मयोर्भेदाग्रहोऽप्यनुमितिहेतुः, अभेदज्ञानजनकत्वेन तस्यावश्यकत्वात् तत एवानुमित्युत्पत्तावन्तराभेदज्ञानकल्पनायां गौरवात् । न च भेदग्रहस्यानुमितौ प्रतिबन्धकतायामभेदज्ञानस्य तत्र हेतुत्वमावश्यकं, जनकज्ञानं विघटयत एव ज्ञानस्य प्रतिबन्धकत्वादिति वाच्यम् । तथा सति परामर्शे भेदधीः प्रतिबन्धिका न स्यात्, तत्राभेदधीहेतुत्वस्य त्वयाप्यनभ्युपगमाद्, व्याप्तौ विशेषणान्तरप्रवेशे त्वप्रयोजकत्वादिति ।

अत्र मणिकृतः — अयमालोको वा धूमो वा । उभयथापि वह्निव्याप्य इति ज्ञानादनुमितिर्न स्याद्, धूमत्वालोकत्वयोर्व्याप्यतावच्छेदकयोः पक्षधर्मवृत्तितयानिर्णयात् । व्याप्यतावच्छेदकप्रकारकपक्षधर्मतानिर्णयस्य च त्वया हेतुत्वाङ्गीकारात् । धूमालोकान्यान्यत्वस्य च गौरवेण व्याप्यतानवच्छेदकत्वात् । किञ्च, वह्निव्याप्यवानयमित्यादिशाब्दपरामर्शादनुमितिर्न स्याद्, व्याप्यतावच्छेदकस्य धूमत्वस्यानिर्णयात् । अपि च यत्र स्मृतेर्धूमत्वव्याप्ती युगपत् पक्षधर्मे भासेते । तत्रास्ति व्याप्यत्वप्रकारकत्वम् । अस्ति च व्याप्यतावच्छेदकप्रकारकत्वम् । तत्र व्याप्यत्वप्रकारकपक्षधर्मताज्ञानत्वेन हेतुता कल्प्यते, लाघवात् । न तु व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वेन, गौरवादिति ।

अत्र वदन्ति — व्याप्तिनियतधर्मावच्छिन्नपक्षधर्मताज्ञानत्वेन हेतुता, व्याप्तिनियतं च धूमालोकान्यान्यत्वमपि भवत्येवेति तेन रूपेण ज्ञातेऽप्यनुमितिरिति न कश्चिद् दोषः । अत एव व्याप्यवानित्यत्राप्यनुमितिरविकलैव, व्याप्तेरेव व्याप्तिनियतत्वात् । न चैतदपेक्षया व्याप्त्यवच्छिन्नपक्षधर्मताज्ञानत्वमेव लाघवादवच्छेदकमस्त्विति वाच्यम् । उक्तापेक्षया तस्य विशेषत्वात् । गुरुण्यपि सामान्ये प्रमाणपक्षपातात् । कथमन्यथा घटत्वादिजातिसत्त्वेऽपि कर्तृजन्यतावच्छेदकं कार्यत्वमेवाङ्गीक्रियत इति ।

अत्राहुः — सामान्यविशेषयोस्तुल्यशरीरत्व एव सामान्यं विशेषापेक्षया लघु, यथा पृथिवीत्वापेक्षया द्रव्यत्वम् । इह तु सामान्यस्य विशेषापेक्षया गुरुशरीरत्वान्न तेन रूपेण हेतुत्वम् । अत एवाख्यातवाच्यतावच्छेदकं न व्यापारत्वं, किन्तु यत्नत्वमेवेति सिद्धान्तः । कर्तृजन्यतायां तु घटत्वादेरवच्छेदकत्वं न विशेषत्वात् त्यज्यते, किन्तु बहुत्वगौरवेण । तस्माद् व्याप्यत्वप्रकारकपक्षधर्मता-

ज्ञानत्वेनैव हेतुता, न तु तन्नियतधर्मप्रकारकपक्षधर्मताज्ञानत्वेनेति पक्षधरचरणाः।

वस्तुतस्तु — नीलधूमत्वादेरपि व्याप्त्यनतिप्रसक्तत्वरूपव्याप्तिनियतत्वसत्त्वात् तत्प्रकारकज्ञानादप्यनुमितिः स्यात्। तथा च व्यर्थतादोष इव न स्यात्। न च तादृशलघुधर्माघटितत्वमपि नियतत्वघटकम्। तथा सति व्याप्यतावच्छेदकप्रकारकज्ञानस्यैव हेतुतागमनाद्, अनतिप्रसक्तत्वे सति तादृशलघुधर्माघटितस्यैवावच्छेदकपदार्थत्वात्। तथा च धूमालोकान्यान्यत्वेन पक्षधर्मताज्ञानेऽनुमितिर्न स्यादिति मणिकृद्वर्णं वज्रलेपायितम्। किञ्च, व्याप्तिनियतत्वेन ज्ञायमानधर्मप्रकारकत्वमतिप्रसङ्गभीत्या वाच्यम्। तथा चातिगौरवमननुभवश्च। नहि धूमो वह्निव्याप्य इति ज्ञाने सति धूमत्वस्य वह्निव्याप्तिव्याप्यत्वाज्ञानेऽनुमितिर्न भवति। धूमस्य वह्निव्याप्तिग्रहसामग्रीतो धूमत्वस्य वह्निव्याप्तिव्याप्यत्वज्ञानसामग्र्या भिन्नत्वादिति सिद्धं लाघवादनतिप्रसङ्गाच्च व्याप्तिप्रकारकपक्षधर्मताज्ञानस्यानुमितिहेतुत्वमिति।

ननु व्याप्तिविशिष्टं पक्षधर्मं बोद्धुमशक्यं, पक्षीयसाध्यासन्निकर्षेण तन्नियतसामानाधिकरण्यात्मकव्याप्तेरिन्द्रियेणाग्रहात्। न च व्याप्तेरुपनीतभानमपि, पूर्वमज्ञानादिति चेद्, न। महानसीयधूमवह्निसहचारदर्शनादिना व्याप्तेः प्रागेव धूमत्वपुरस्कारेण ग्रहणात् पक्षधर्मधूमे धूमत्वदर्शनानन्तरं तदुपनयात्। यद्धर्मावच्छेदेन यद्धर्मग्रहः, तद्धर्मग्रहस्य तदुपनाय(क)त्वात्। विशेषणज्ञानविशेष्येन्द्रियसन्निकर्षतदुभयासंसर्गाग्रहरूपविशिष्टप्रत्यक्षसामग्र्याश्चाविकलत्वात्। न च व्याप्तिरूपविशेषणं न ज्ञातमिति वाच्यम्। व्याप्तेरेकतया महानसीयवह्निधूमग्रहादेव पूर्वं ग्रहणादिदानीं च तत्स्मरणानन्तरं पक्षधर्मधूमे तद्विशिष्टज्ञाने बाधकाभावादिति मणिकृतः।

अत्र वदन्ति — व्याप्तिः सामानाधिकरण्यात्मिका। सा च प्रत्येकं भिन्नेति पर्वतीयवह्निधूमसामानाधिकरण्यस्य प्रागज्ञानेन कथं तस्योपनयः। न च सामानाधिकरण्यावच्छेदकरूपवत्त्वं परम्परासम्बन्धेन व्यधिकरणसामानाधिकरण्यमपि व्याप्तिः, तस्य च प्रागपि ज्ञानादुपनय इति वाच्यम्। सामानाधिकरण्यज्ञानस्यैव तदुभयापेक्षया लघुत्वेन हेतुत्वात्। न च तज्ज्ञानासम्भवः। विशिष्याज्ञानेऽपि धूम-

वह्निसामानाधिकरण्यत्वेन ज्ञानस्य प्राक् सम्भवादिति महानसीयधूमपर्वतीयधूमयोरेकव्याप्तिपक्षोऽनुपपन्न इति ।

अत्रोच्यते — व्यर्थविशेषणताहेत्वाभासताया अवच्छेदकलक्षणव्याप्तिपक्ष एवोपपत्तेस्तदनुरोधात् तज्ज्ञानमेवानुमितिहेतुरिति वाच्यम् । तथा च तदभिप्रायेणैकैव हि सा व्याप्तिरिति मणिः । यद्वा, एकैव व्याप्तिरित्यस्य महानसीयधूमव्याप्त्या पर्वतीयधूमव्याप्तेरैक्यमिति नार्थः, किन्तु पूर्वानुभूतेदानीमनुभूयमानयोरैक्यम् । महानसीयधूमव्याप्तिग्रहस्थले धूमव्याप्तित्वेन पर्वतीयधूमव्याप्तेरपि ग्रहात् तदुपनये बाधकाभाव इति ।

केचित् तु — व्याप्त्या सह ज्ञानं न प्रत्यासत्तिः, प्रत्यभिज्ञानाभिन्नगुणप्रत्यक्षे संयुक्तसमवायस्यैव प्रत्यासत्तितया ज्ञानस्यानासत्तित्वात्, किन्तु पर्वतधूमसंयोगरूपव्याप्त्या सह संयुक्तसमवाय एव प्रत्यासत्तिरिति वदन्ति । तत्तु चिन्त्यम् । गुणाभावप्रत्यक्षे संयुक्तसमवायं विनापि गुणस्य भानेन त्वदुक्तनियमस्य व्यभिचारात् । न च तद्भिन्नत्वमपि विशेषणम् । सामान्यलक्षणादिजन्यप्रत्यक्षे तथापि व्यभिचारात् । न चासत्त्यन्तराभावे सत्येव ज्ञानस्यासत्तित्वमितीह संयुक्तसमवायसत्त्वान्न तदासत्तिरिति वाच्यम् । आसत्त्यन्तराभावस्थले ज्ञानस्यासत्तिता कल्प्यते । तत्र चासत्त्यन्तराभावस्य गौरवेणासत्तितावच्छेदकता न कल्प्यते । मानाभावात् । तस्मादिह ज्ञानं संयुक्तसमवायश्चोभयमपि प्रत्यासत्तिरिति ।

इदं त्ववधेयम् — विशिष्टसामानाधिकरण्या(त्मि ? त्म)कव्याप्त्या सह ज्ञानमेवासत्तिः, तावदंशे संयुक्तसमवायासम्भवात् । तदेकदेशेन संयोगेन सहोभयमपीति । यत्तु विशेषणसन्निकर्षः कारणमेव नेति किं व्याप्तिसन्निकर्षेणेति । तन्न । घटसन्निकर्षे सति पटप्रत्यक्षापत्त्या तत्प्रत्यक्षे तदिन्द्रियसन्निकर्षहेतुतासिद्धौ विशेषणसन्निकर्षस्यापि हेतुतासिद्धिरित्युक्तं प्रत्यक्षमणिसार इति दिक् ।

इदं तु विचार्यते — यथा धूमत्वावच्छेदेन व्याप्तिनिर्णयात् पक्षधर्मे धूमत्वनिर्णयोपनीतव्याप्तिभानं, तथा धूमवत्त्वावच्छेदेन वह्निमत्त्वनिर्णयात् पर्वते धूमवत्त्वनिर्णयानन्तरं प्रत्यक्षमेवास्तु, समानविषये प्रत्यक्षसामग्रीबलवत्त्वस्य सर्वाभ्युपग(म ? त)त्वादिति ।

अत्र केचित् — पर्वते वह्निप्रत्यक्षं लौकिकं न सम्भवति, लौकिकद्रव्यप्रत्यक्षे इन्द्रियसंयोगस्य हेतुत्वाद्, वह्नेश्चासंयुक्तत्वात् । नाप्यलौकिकम् । तथा सति नियतलिङ्गपरामर्शापेक्षा न स्यात् । उपनीतभानान्तरवदुपपत्तेः ।

किञ्च, मानान्तरविलयापत्त्या सर्वत्रोपनीतभानप्रत्यक्षसामग्री दुर्बलेति कल्प्यम्। तथा च कथं प्रत्यक्षमिति समादधते ।

तत्र शङ्क्यते — उपनीतवह्निप्रत्यक्षमस्तु। अस्तु च परामर्शापेक्षा। उपनायकधर्मज्ञानस्योपनीतभानेऽपेक्षितत्वात् । व्याप्यवत्त्वस्य चोपनायकत्वात् । न च धूमवत्त्वावच्छेदेन वह्निमत्त्वग्रहणात् तन्मात्रज्ञानमपेक्ष्यतां, न तु व्याप्त्युपनयपर्यन्तमिति तात्पर्यमिति वाच्यम्। प्रत्यक्षत्वाविशेषेऽपि चाक्षुषादिप्रत्यक्षे तत्तच्चक्षुराद्यसाधारणापेक्षावदनुमितिरूप उपनीतप्रत्यक्षे तृतीयलिङ्गपरामर्शापेक्षायां दोषाभावात्। पक्षधर्मधूमे धूमत्वज्ञानमात्रमपेक्षितं, न तु व्याप्त्युपनय इति वदन्तं प्रत्युक्तापादनस्येष्टापत्तिपराहतत्वाच्च । यच्च किञ्चेत्युक्तं, तदपि न। उपनीतभानेनान्यथासिद्धिमापादयतो मानान्तरविलोपस्येष्टत्वात्। किञ्च, उपनीतभानसामग्र्या इतरज्ञानसामग्र्यपेक्षया दुर्बलत्वे संशयानन्तरं भ्रमरूपविशेषदर्शने सति भ्रमरूपव्यापकप्रत्यक्षं न स्याद्, अनुमितिसामग्रीसत्त्वात् । न च दोषाघटितोपनीतप्रत्यक्षसामग्र्यपेक्षयानुमित्यादिसामग्री बलवतीति वाच्यम्। तथा सति भ्रमानुमितिः क्वापि न स्याद्, दोषघटितोपनीतप्रत्यक्षसामग्र्या एव तत्र सत्त्वात्। यदपि समाहितमुपनीतप्रत्यक्षाङ्गीकारे धूमवान् वह्निमानित्यनुमितिरेव स्यान्न तु पर्वतो वह्निमानिति, उपनायकधर्मावच्छिन्नत्वेनैव ज्ञाते धर्मिण्युपनीतप्रत्यक्षसामग्र्याः सत्त्वादिति। तदपि न। उपनायकधर्मविशिष्टे धर्मिण्युपनयो न तु तद्विशिष्ट एव, गौरवादिति पर्वतत्वभानसामग्र्या तद्ज्ञानमपि स्यादेव । किञ्चैवमिदं चन्दनं सुरभीत्युपनीतं प्रत्यक्षं न स्याद्, इदन्त्वावच्छेदेन सौरभ्याज्ञानादिति ।

अत्र नव्याः—वह्निमनुमिनोमीत्यनुव्यवसायेनानुमितित्वजातिः सिद्धा। सा च न मानसत्वव्याप्या। तथा सति साक्षात्करोमीति तदाकारापत्तेः। वह्निं न साक्षात्करोमि किन्त्वनुमिनोमीति तदाकारविरोधाच्च । तथा चानुमितिरूपविलक्षणज्ञानसिद्धावुपनीतप्रत्यक्षसामग्र्यास्तत्सामग्र्यपेक्षया दौर्बल्यं कल्प्यमिति । न चैवं सति प्रागुक्तदोषः। प्रत्यक्षमात्रप्रयोजकदोषाघटितोपनीतभानसामग्र्या अनुमित्यादिसामग्र्यपेक्षया दुर्बलत्वात्। संशयोत्तरभ्रमे च प्रत्यक्षस्यानुभूयमानतया तन्मात्रप्रयोजकदोषघटितैव सामग्रीति नानुपपत्तिः। अत एव न भ्रमानुमित्युच्छेदोऽपि, तत्रानुमितेरनुभूयमानतया प्रत्यक्षमात्रप्रयोजकदोषाघटिततया तादृशोपनीतभानसामग्र्या दुर्बलत्वाद्, दोषस्य फलबलकल्प्यत्वादिति वदन्ति ।

तच्चिन्त्यम्। उपनीतवह्निप्रत्यक्षे साक्षात्त्वजातिसत्त्वेऽपि तदभिव्यक्तेर्लौकिकसन्निकर्षजन्यज्ञानस्थल एव भावेन तत्राभावात्। अन्यथोपनीतपरमाणुज्ञानानन्तरं (तत्? तं) साक्षात्करोमीति प्रत्ययापत्तेः। अत एव वह्निं न पश्यामीति धीरपि परमाणुं न पश्यामीति प्रतीतिवल्लौकिकत्वाभावमवगाहते। प्रत्यक्षसामग्रीसत्त्वेन तदुत्पत्तिसिद्धौ तथा कल्पनादिति न किञ्चिदेतत्। यदपि कश्चिदवोचद्— अनुमिनोमीत्यनुव्यवसायानुगमात् पक्षतादिजन्यतावच्छेदकतया च सिद्धानुमितित्वजातिरेकैव। सा च न साक्षात्त्वव्याप्या, चाक्षुषत्वादिना परापरभावानुपपत्तेः। न च तद्व्याप्यमानसत्वव्याप्या। प्रमाणान्तरासहकृतमनोजन्यत्वस्य मानसत्वप्रयोजकत्वाद्, अत्र च व्याप्तिज्ञानरूपप्रमाणान्तरसहकारादतथात्वात्। तस्मादनन्यगत्यैवानुमितिः प्रत्यक्षविलक्षणाङ्गीकार्येति सिद्धमनुमानप्रामाण्यमिति। तदपि न भव्यम्। सन्निकृष्टमनोजन्यत्वस्यैव मानसत्वप्रयोजकत्वात्। तस्य ज्ञानरूपसन्निकर्षेण प्रकृतेऽपि सम्भवात्। अनुमितौ मनस एव प्रमाणतया व्याप्तिज्ञानस्य प्रमाणत्वाभावेन प्रमाणान्तरासहकृतमनोजन्यत्वस्यापि सत्त्वाच्च।

अपरे तु— अनुमिनोमीत्यनुव्यवसाया(द)नुमितित्वजातिः सिध्यति। सा चानुभवत्वव्याप्यैव साक्षात्। न त्वनुभवत्वव्याप्यप्रत्यक्षत्वव्याप्यमानसत्वव्याप्या, गौरवादिति पृथक् प्रमाणमनुमानमिति। तन्न। एवं सत्यर्थापयामीत्यनुव्यवसायादर्थापत्तित्वजातिः सिद्धा, तस्याश्च साक्षादनुभवत्वव्याप्यत्वापत्त्यार्थापत्तेरपि प्रमाणान्तरत्वप्रसङ्गात्। अनुमितिसामग्रीजन्यत्वेनानुमितित्वमर्थापत्तेर्यदि, तदा प्रत्यक्षसामग्रीजन्यत्वेनानुमितेरपि तत्त्वमवर्जनीयमिति। यत्तु— सिद्धिरनुमितौ प्रतिबन्धिकैवं सति न स्याद्, धारा(वगा? वा)हिकप्रत्यक्षानुरोधेन प्रत्यक्षे सिद्धिप्रतिबन्धकत्वानङ्गीकारादिति। तन्न। अनुमितित्वावच्छेदेनैव सिद्धेः प्रतिबन्धकत्वात्, प्रत्यक्षान्तरे तत्प्रतिबन्धकत्वे मानाभावादित्युपनीतप्रत्यक्षेणान्यथासिद्धमनुमानं न पृथक् प्रमाणमिति।

अत्रोच्यते— यद्व्यापकतया हेत्वभावो गृहीतः, हेतुना तदभावोऽप्रसिद्ध एव सिध्यतीत्यप्रसिद्धसाध्यकव्यतिरेकिस्थले साध्यस्य पूर्वाज्ञाततयोपनीतभानसामग्रीविरहादनुमानस्य पृथक्प्रामाण्यमित्यन्यत्राप्यनुमिनोमीत्यनुव्यवसायादुपनीतसामग्र्या दुर्बलत्वं कल्प्यत इति पर्वतादावपि न वह्न्यनुमितिर्दुर्भिक्षम्। किञ्च, अनुमितेरुपनीतान्तरवैलक्षण्यमुभयसिद्धम्। अन्यथा परामर्शाद्यनपेक्षापत्तेः।

तथा च ज्ञानरूपोपनीतान्तरप्रत्यक्षसामग्र्या तादृशं प्रत्यक्षं कुतो न स्याद्, यद्यनुमितिसामग्री तत्र न प्रतिबन्धिका। न चास्तु तादृशोपनीतप्रत्यक्षे उपनीतप्रत्यक्षविशेषरूपानुमितिसामग्र्याः प्रतिबन्धकत्वमिति वाच्यम्। अनुमितिसामग्रीप्रतिबन्ध्यतावच्छेदकतया तत्रोपनीतप्रत्यक्षत्वस्यैव कल्पनाद्, न त्वनुमितिभिन्नोपनीतप्रत्यक्षत्वस्य, गौरवात्। तद्बलाच्चानुमितेः प्रत्यक्षभिन्नत्वमपि कल्प्यते। अत एवानुमितित्वजातेरनुभवत्वसाक्षाद्व्याप्यत्वकल्पनापेक्षया तद्व्याप्यप्रत्यक्षत्वव्याप्यमानसत्वव्याप्यताकल्पनागौरवमपि न भवति। अत एव च वह्निं न साक्षात्करोमीत्यस्य न लौकिकप्रत्यक्षत्वाभावविषयत्वकल्पना, सामान्याभावविषयत्वेनोपपत्तेः। अनुमितेः प्रत्यक्षवैलक्षण्यस्योक्तयुक्त्या साधितत्वादिति दिक्।

ननु तथापि व्यापकत्वपरामर्शापेक्षया व्याप्यत्वपरामर्शस्यानुमितिहेतुत्वे किं विनिगमकं, प्रत्युत व्याप्यत्वे सामानाधिकरण्यभागस्याधिकस्य प्रवेशेन गौरवम्। न चैवं पर्वतवृत्तिधूमव्यापको वह्निरिति परामर्शाकारः स्यात्। तथा च तत्रोपसर्जनीभूतस्य पर्वतस्यानुमितौ विशेष्यता न स्याद्, जनकज्ञानोपसर्जनीभूतस्य जन्यज्ञानेऽपि तथात्वादिति वाच्यम्। भूतले घटाभाव इति ज्ञानजन्ये घटाभाववद् भूतलमिति ज्ञाने व्यभिचारेणोक्तव्याप्तेरभावात्। परामर्शस्वभावादेवानुमितेः पक्षविशेष्यकत्वोपपत्तेः।

अत्र मिश्राः—पर्वतवृत्तिधूमव्यापकत्वं वह्नौ तदा ज्ञातुं न शक्यते, वह्नेर्विशेष्यस्य लौकिकसन्निकर्षाभावेन बहिरिन्द्रियाप्रवृत्तेः। मनसश्च बहिरर्थे स्वातन्त्र्याभावात्। न च ज्ञानान्तरोपनीतपर्वतीयधूमव्यापकत्वं मनसा ग्राह्यमिति नास्वातन्त्र्यमिति वाच्यम्। यदि पर्वतीयधूमव्यापकत्वं स्मृतं सद् वह्नावुपनेयं, तदा तस्यापि वह्निवदनुमितिविषयतापत्तौ सर्वत्र तस्याः समूहालम्बनत्वापातात्। किञ्च, साध्यसामानाधिकरण्यं व्यापकत्वेऽपि प्रवेश्यमेव। अन्यथाकाशस्यापि व्यापकतापातात्। धूमवन्निष्ठाभावस्य प्रतियोग्यसमानदेशस्य घटाभावादेरप्रतियोगित्वादाकाशस्य। आकाशाभावस्य प्रतियोगिदेशाप्रसिद्ध्या समानदेशत्वाभावात्। तस्मादनियमादुभयपरामर्शो हेतुरिति वदन्ति।

तत् तु विचार्यम्। पर्वतीयधूमव्यापकत्वमुपनीयतां स्मृत्या। न चैतावता तद्धर्मिणोऽप्युपनयनियमः, येन तस्यानुमितौ भाने समूहालम्बनत्वं स्यात्। न चैकानुभव एव विशिष्टसंस्कारद्वारा विशिष्टस्मारक इति वाच्यम्।

कुण्डलादिविशिष्टदेवदत्तानुभवे सति विशेषणसंस्कारानुद्बोधवदुपपत्तेः । प्रमुष्टतत्ताकस्मृतिवदुपपत्तेश्च । गृह्यतां वा पर्वतीयधूमव्यापकं तद्भूपादेः(?)। न चैतावता तस्यानुमितिविषयतास्ति । तेषां प्रत्यक्षसिद्धतया सिद्धसाधनेनानुमित्युदयायोगात् । अस्तु वा प्रत्येकं स्मृतानां पदार्थानां वह्नौ धूमव्यापकत्वं धूमे च पक्षवृत्तित्वमिति विशेष्ये विशेषणमिति न्यायावताराद् ग्रहणमिति । यच्च किञ्चेत्युक्तं, तदपि न । आकाशस्य व्यापकत्वेऽपि क्षत्यभावः । बाधादेव तदननुमितेः । वस्तुतो व्यापकत्वमेव न, स्वप्रतियोगिसमानदेशभिन्नत्वस्याकाशाभावेऽपि सत्त्वात् । स्वोपादानेत्यादौ (?) तथैव स्वीकारात् । भवतु वाकाशव्यावृत्त्यर्थं साधिकरणत्वं विशेषणम्। तावतापि व्याप्यत्वापेक्षया लाघवमागतमेवेति ।

उपाध्यायास्तु — साध्याप्रतियोगिकसमानाधिकरणाभावकत्वमेव व्याप्यत्वमस्तु, तथा चात्रापि सामानाधिकरण्याप्रवेशान्न तदपेक्षया व्यापकत्वं लघ्विति न तद्धीर्हेतुः । किञ्च, कारणीभूतज्ञाने यावद्विषयकतया हेतुत्वं, तत्रोपसर्जनतया भातस्य कार्यभूतज्ञानेऽपि तथात्वमिति नियमः । भूतले घटाभाव इत्यादौ घटाभावादिविषयकत्वेन हेतुत्वान्न व्यभिचारः । तथा च व्यापकत्वपरामर्शहेतुतापक्षे पक्षविशेष्यकानुमितिर्न स्यादिति व्याप्यत्वपरामर्शो हेतुरित्याहुः ।

अत्र मिश्राः — व्याप्यत्वे सामानाधिकरण्याप्रवेशेऽपि व्यापकत्वापेक्षया विनिगमकमप्राप्तमेव । किञ्च, व्याप्यत्वे साध्याप्रतियोगिकसमानाधिकरणयावद्भावकत्वं प्रवेश्यम् । अन्यथा व्यभिचारिण्यतिव्याप्त्यापातात् । स्वसमानाधिकरणाभावाप्रतियोगित्वस्य सामान्याभावरूपस्य प्रवेशान्न तत्साधारण्यमिति न यावत्प्रवेश इति व्यापकत्वमेव लघ्विति तद्धीरेव हेतुरिति । यच्च जनकेत्यादिव्याप्त्या पक्षविशेष्यकत्वं न स्यादित्युक्तं, तदपि न । भूतले घटाभाव इत्यादिज्ञानजन्यज्ञानवद् विशेषणविशेष्याभावोपपत्तावुक्तव्याप्तेरप्रयोजकत्वादिति वदन्ति।(य?अ)त्र यद्यपि व्यापकत्वेऽपि यावत्त्वं प्रवेश्यमेव, अन्यथा हेतुसमानाधिकरणघटाभावप्रतियोगित्वसामान्याभावस्य व्यभिचारिण्यपि सत्त्वेनातिव्याप्त्यापातात् । तथा च व्यापकत्वे क लाघवम् । तथापि विनिगमनाविरह एव तात्पर्यम् । वस्तुतो भवतु सामानाधिकरण्याविशेषिता व्याप्तिः, तथापि सामानाधिकरण्यगर्भव्याप्तिधीहेतुत्वसिद्धान्तो गत एवेति तात्पर्यम् । तस्माद् व्याप्यत्वापेक्षया सामानाधिकरण्यागर्भत्वेन व्यापकत्वं लघ्विति तद्धीरेव हेतुरस्तु ।

अत्रोच्यते — सामानाधिकरण्यसंशये तद्व्यतिरेकनिश्चये च सति नानुमितिरित्यनुभवसिद्धम् । तथा च यत्संशयेत्यादिव्याप्त्या तद्धीरेव हेतुः । अत एव विरुद्धो हेत्वाभासः । अन्यथा जनकीभूतज्ञानाविरोधितया तस्याप्रतिबन्धकतापत्तेः । न च विरुद्धत्वेनाव्यभिचारज्ञानविघटनम् । ग्राह्याभावानवगाहित्वात् । न च विरुद्धत्वेन व्यभिचारानुमानम् । व्याप्तिज्ञानदशायां तदभावेनानुमित्यप्रतिबन्धापत्त्या प्रतिबन्धनियमघटितहेत्वाभासतानुपपत्तेः । एवं व्यभिचारधीप्रतिबन्धकत्वानुरोधादव्यभिचारांशधीरपि हेतुरित्यव्यभिचरितसामानाधिकरण्यधीहेतुत्वसिद्धिरिति ।

गौडास्तु — सामानाधिकरण्यग्रहविषयीभूतसाध्यसम्बन्धस्यैवानुमितौ भानात् तद्धीरवश्यं हेतुः, न व्यापकताधीमात्रम् । तथा सत्यनुमितौ साध्यसम्बन्धभाने नियमाभावेन सम्बन्धान्तरेण सामानाधिकरण्यज्ञाने सम्बन्धान्तरेण साध्यभानापातात् । न च यत्सम्बन्धेनाव्यभिचारग्रहः, तत्सम्बन्धेनानुमितौ साध्यभानमिति वाच्यम् । सम्बन्धद्वयेनाव्यभिचारग्रहेऽपि सामानाधिकरण्यविषयीभूतसम्बन्धस्यैव भानादिति वदन्ति ।

तच्चिन्त्यम् । सम्बन्धद्वयेन सामानाधिकरण्यद्वयग्रहस्थले सम्बन्धद्वयस्याप्यनुमितौ भानापातात् । तत्र चेष्टापादने अव्यभिचारधीविषयसम्बन्धद्वयस्यापि भाने तथात्वस्य वक्तुं शक्यत्वादिति संक्षेपः ।

इति परामर्शवादः ।

अथ लिङ्गकरणतावादः ।

अनुमितौ च लिङ्गपरामर्शः करणं, न तु परामृश्यमानलिङ्गम् । न च परामर्शमात्रं न हेतुः, किन्तु लिङ्गपरामर्श एव । तथा च विशिष्टकारणताग्राहकस्य विशेषणेऽपि कारणताग्राहकत्वम् । कथमन्यथा दण्डसंयोगहेतुतासिद्धिरिति वाच्यम् । तत्र हि दण्डं विना संयोगासत्त्वादुभयोरपि विनिगमनाविरहाद्धेतुत्वमुपपद्यते । ज्ञानविद्यमानता न विषयविद्यमानतानियता, येनात्रापि तथा सम्भाव्येत । अतीतादिलिङ्गज्ञानादप्यनुमितेः । न च तत्रापि लिङ्गध्वंसादिरपि व्याप्य एवेति स एव हेतुः । तस्याज्ञानात् । ज्ञातस्य च धूमस्यासत्त्वात् । अत एव धूमात्यन्ताभा-

वात्यन्ताभावत्वमेव त्रितयसाधारणं व्याप्यतावच्छेदकमिति निरस्तम् । धूमत्वप्रकारकज्ञानादनुमित्यनुत्पादापातात् । किञ्च, यत्र पर्वते धूमभ्रमाद् वह्निभ्रमः, तत्र व्याप्यं किमपि नास्तीति कथं तस्यानुमितिहेतुता । तथा च तत्र परामर्शस्य हेतुत्वात् तत्सत्यत्वादेव प्रमानुमित्युपपत्तेर्न यत्किञ्चिद्व्याप्यस्य प्रमानुमितौ गुणत्वेनापि हेतुत्वकल्पनम् । किं बहुना, यत्र भाविसृष्ट्यभावः सर्वमुक्त्यानुमीयते, तत्र भाविव्यतिरिक्तव्याप्याभावेनानुमितिर्न प्रमा स्यादिति लिङ्गकरणतापक्षो न क्षोदक्षम इत्युपेक्ष्यते । नन्वनुमितौ परामर्शश्चरमकारणतया निर्व्यापार इति न करणं, करणान्तरं च नास्त्येवेति कथमनुमानं प्रमाणमिति चेद्, न । व्याप्तिज्ञानस्य परामर्शव्यापारकस्यानुमितिकरणत्वादिति मणिकृतः ।

अत्र वदन्ति — पर्वतवृत्तिधूमे वह्निव्याप्तिरिति परामर्शे व्याप्तिविशेष्यके व्याप्तिज्ञानं न हेतुरिति तज्जन्यानुमितौ व्याप्तिज्ञानस्य व्यभिचारः । किञ्च, विशकलितव्यभिचाराभावसहचारदर्शनयोः सत्त्वे पर्वतीयधूमे वह्निसामानाधिकरण्यं वह्नौ धूमसमानाधिकरणभावाप्रतियोगित्वं च विशेष्ये विशेषणमिति न्यायेन यत्र गृहीत्वा परामर्श उत्पद्यते, तत्र परामर्शपूर्वं व्याप्तिज्ञानं नेति व्यभिचारः । अपि च, स्मृतिरूपपरामर्शादनुमितौ व्याप्तिज्ञानं व्यवहितत्वान्न हेतुः, संस्कारस्यानुमित्यहेतुतया तद्द्वाराव्यवधानस्यासम्भवात् । किं बहुना, व्याप्तिज्ञानहेतुत्व एव मानाभावः, परामर्श एव जनकत्वादन्यथासिद्धेः । न चानुमितेः सकरणत्वानुरोधात् तद्धीहेतुताकल्पनम् । पक्षधर्मताज्ञानादेरेव करणादनुमित्युपपत्तेरिति ।

अत्राहुः — व्याप्तिपक्षधर्मतादेः सर्वस्यापि ज्ञानमनुमितौ करणम् । तच्च न प्रत्येकम्, अननुगमात् । किन्तु, परामर्शजनकज्ञानत्वेन । तथा च यदेव यत्र परामर्शजनकीभूतं ज्ञानं, तदेव तत्र करणमिति न व्यभिचारः । न चानेन रूपेण हेतुत्वेऽन्यं प्रतीत्यन्यथासिद्धिरिति वाच्यम् । अन्यमित्यस्य व्यापारान्यमित्यर्थस्य बहुशो निवेदितत्वात् । अन्यथा दण्डत्वस्य हस्तादिसाधारण(स्य?)चक्रभ्रमिजनकत्वातिरिक्तस्य निर्वक्तुमशक्यतया तत्राप्यन्यथासिद्धयापत्तेः । यत्तु — तत्रापि चक्रभ्रमिजनकता येन रूपेण, तेनैव घटजनकताप्यस्तु । सा च न चक्रभ्रमिजनकत्वेन, आत्माश्रयादित्यन्यदेव तज्जनकतावच्छेदकमङ्गीकार्यमित्यन्यमित्यत्र व्यापारान्यत्वार्थत्वे मानाभाव इति । तन्न । भ्रमिं प्रत्यननुगतरूपेण विशेषतो हेतुत्वेऽपि घटत्वावच्छिन्नकार्यं प्रति भ्रमिजनकत्वेनानुगमे दोषाभावात् । न च स्मृतिरूपपरामर्शस्थले किं

ज्ञानं करणमिति वाच्यम् । पूर्वानुभवस्यैव तत्र करणत्वात् । न च संस्कारव्यवहितः स इति वाच्यम् । संस्कारद्वारा परामर्शं प्रति परामर्शद्वारा चानुमितिं प्रत्यव्यवधानात् । अस्तु वा परामर्शजनकत्वेनैव हेतुता, न तु ज्ञानत्वान्तर्भावः । तथा च संस्कार एव तत्र कारणम् । न च तज्जन्यत्वे स्मृतित्वापत्तिः । तत्त्वेन जन्यत्वस्यैव स्मृतित्वप्रयोजकत्वात् । अन्यथा तद्ध्वंसेऽतिप्रसङ्गात् । न चैवं परामर्शजनकस्य कालादेरपि करणत्वापातः । इष्टत्वात् ।

केचित् तु — व्याप्तिज्ञानत्वेन लाघवात् करणत्वे निश्चिते व्याप्तिविशेष्यकपरामर्शादेर्नानुमितिरित्येव कल्प्यत इति वदन्ति । तच्चिन्त्यम् । पक्षधर्मताज्ञानत्वादिनापि करणत्वे लाघवतौल्यात् । तस्माद् विनिगमनाविरहात् सर्वेषां करणत्वमित्युक्तक्रमेणैवानुगम इति तत्त्वम् । अत एवानुमितेः क्रियात्वेन करणजन्यत्वानुमाने लाघवान्मनःकरणत्वं विषय इति परामर्शव्यापारकं मनस्तत्र करणमित्युपाध्यायमतमपास्तम् । करणजन्यत्वानुमाने लाघवात् कालकरणत्वस्यैव विषयत्वापातात् । मनसामनेकत्वात् तदपेक्षया कालस्यैकत्वेन लघुत्वात् । एवं दिक्करणत्वेऽपि लाघवम् । तस्माद् विनिगमनाविरहात् सर्वेषामपि करणत्वमिति ।

मिश्रास्तु — मनःकरणत्वे मानसत्वापत्तिः । मानसत्वे मानान्तरासहकृतमनोजन्यत्वस्य तन्त्रत्वात् । न च सन्निकृष्टमनोजन्यत्वं तत्र प्रयोजकं, तच्च नेहेति वाच्यम् । परामर्शस्यैवात्र ज्ञानरूपसन्निकर्षत्वान्मानसत्वस्य दुर्वारत्वादित्याहुः । तत् तु न सम्यक् । वह्निमनुमिनोमि न साक्षात्करोमीति प्रतीत्या साक्षात्त्वाभावस्य निर्णयात् परामर्शस्यासत्तित्वाकल्पनात् सन्निकृष्टमनोजन्यत्वाभावेन मानसत्वाभावादिति ।

ननु परामर्श एवानुमितौ करणमस्तु । न च तस्य व्यापाराभावः । विषयपरिशोधकतर्कस्यैव तद्व्यापारत्वात् । न च तर्कः परामर्शजन्य इति न तद्व्यापार इति वाच्यम् । यदि निर्वह्निः स्यान्निर्धूमः स्यादित्याकारस्य तस्य धूमाभावापादनरूपस्य स्वारसिकधूमवत्त्वज्ञानजन्यतया तादृशतर्कस्य परामर्शजन्यत्वावश्यकत्वादिति चेद्, न । येन रूपेण कारणता, तेन रूपेण व्यापारस्य वाच्यत्वात् । कारणतायाश्च व्याप्तिविशिष्टपक्षधर्मताज्ञानत्वेन विवक्षितत्वात् । तर्कस्य च धूमवत्त्वज्ञानमात्रजन्यत्वात् । किञ्च, तर्कः शङ्काविधूननद्वारोपयोगी । शङ्का च न सर्व-

त्रेति नानुमितौ तस्य नियतपूर्वसत्तारूपहेतुतेति न परामर्शव्यापारत्वमिति तत्त्वम् ।

केचित् तु— विषयपरिशोधकतर्कस्यानुपयोग एव । क व्यापारता । न च विरोधिशङ्कानिवर्तकतया तदुपयोगी । ग्राह्यसंशयस्याविरोधित्वात् । विरोधित्वे वा परामर्शरूपविशेषदर्शनाच्छङ्काया एवाभावः, येन तन्निवृत्त्यर्थं तर्कान्तरापेक्षा स्यादिति वदन्ति ।

अत्र प्राञ्चः — विरोधिजिज्ञासानिवृत्त्यर्थं तर्कोऽपेक्ष्यते, तस्यास्त्वनिष्टप्रसङ्गात्मकतर्कना(व ?)श्यत्वात् । न च विरोधिजिज्ञासायाः प्रतिबन्धकत्वे मानाभावः । कामिनीजिज्ञासादिप्रतिबन्धकत्वानुरोधेन तदावश्यकत्वादित्याहुः । तच्चिन्त्यम् । कामिनीजिज्ञासावह्न्यभावजिज्ञासासाधारणस्य विरोधिजिज्ञासात्वस्यैकस्य ब्रह्मणापि निर्वक्तुमशक्यत्वात् । तस्मात् कामिन्यादिजिज्ञासायाः फलबलेन तद्रूपेण प्रतिबन्धकत्वेऽपि साध्याभावजिज्ञासायाः प्रतिबन्धकत्वे मानाभावादिति ।

मिश्रास्तु — शङ्का द्विविधा स्वरसवाहिनी आहिता च । तत्राद्याया अप्रतिबन्धकत्वेऽपि चरमायास्तथात्वमस्त्येव । अतः प्रकृतेऽपि साध्याभावसाधकनिबन्धना साध्याभावशङ्कानिष्टमुपनयता तर्केण निवर्त्यते । साध्याभावसाधकं किमपि नास्तीति तर्कावतारेण निर्णयाद्, आधायकशङ्काविरहे सत्याहितशङ्कानुत्पत्त्या चानुमानोपपत्तेरित्याहुः ।

अत्र कश्चित् — विरोधिनिर्णयत्वेनैव प्रतिबन्धकत्वात् स्वारसिकी अन्याहिता वा शङ्का न प्रतिबन्धिकेत्याह । तदसत् । एवं सत्युपाध्यादिसन्देहाहितव्यभिचारादिसन्देहस्य प्रतिबन्धकत्वाभावप्रसङ्गात् । तथा चान्याहितशङ्का प्रतिबन्धिकैवेति दिक् ॥

इति लिङ्गकरणतावादः ।

अथ केवलान्वयिवादः ।

लिङ्गं च त्रिविधं केवलान्वयिसाध्यकं केवलव्यतिरेक्यन्वयव्यतिरेकि चेति । तत्राद्यं यथा घटः प्रमेयो द्रव्यत्वादिति । अत्र केवलमन्वयसहचारे-

णैव व्याप्तिग्रहः । साध्यव्यतिरेकाप्रसिद्ध्या व्यतिरेकसहचारासम्भवात् । विचार-प्रयोजकसंशयोऽपि मेयत्वं घटनिष्ठाभावप्रतियोगि न वेत्येव, साध्यसिद्धिनिवर्त्य-संशयस्यैव तत्प्रयोजकत्वात् । ननु किमिदं केवलान्वयित्वम् । अत्यन्ताभा(व ? वा)-प्रतियोगित्वमिति चेद्, न । संयोगाभावाकाशाभावादावव्याप्तेः । तस्यापि संयोगादिरूपात्यन्ताभावप्रतियोगित्वाद्, अभावाभावस्य भा(वा ? वत्वा)दिति ।

अत्र कश्चिद् — अभावाभावो न प्रतियोगिरूपः । तथा सति घटवति भूतले घटान्योन्याभाववुद्धिर्न स्यात्, तदभावात्मकस्य प्रतियोगिनः सत्त्वात् । तस्मादभावाभावाभिन्न एव । स च संयोगाभावादेर्नास्तीति नाव्याप्तिरित्याह । तन्न । अत्यन्ताभावाभावस्य प्रतियोगिरूपत्वाद्, अन्योन्याभावाभावस्य प्रतियोगितावच्छेदकधर्मरूपत्वात्, तेनैव सह तस्य विरोधाद्, अभावप्रतियोगिकपृथगभाव-कल्पनायां गौरवादनवस्थाप्रसङ्गाच्चेति प्राञ्चः ।

अत्र पक्षधरमिश्राः — अत्यन्ताभावाभावो न प्रतियोगिमात्रम् । तथा सति संयोगेन घटसत्त्वे समवायेनापि तदभावस्यासत्त्वप्रसङ्गात् । प्रतियोगिनो विरोधिनः सत्त्वात् । न च तत्र मास्तु समवायारोप्यकघटाभाव इति वाच्यम् । तथा सति समवायेन घटो नास्तीति प्रतीतिविरोधात् । तथा चारोप्यसम्बन्धावच्छिन्नप्रतियो-ग्येवाभावाभावो वाच्य इत्यावश्यकत्वादारोप्यसम्बन्ध एवाभावाभावोऽस्त्विति वदन्ति ।

तत्र नव्याः — अभावाभावस्यारोप्यसम्बन्धरूपत्वे रूपसमवायवति वायौ रूपाभावो न स्यात् । समवायरूपस्याभावाभावस्य सत्त्वादिति दूषणमाहुः । तदभ-व्यम् । विशेषणताविशेषविशिष्टसमवायस्य तत्रारोप्यसम्बन्धत्वात्, तस्य च तत्रा-भावेन रूपाभावसत्त्वाविरोधादिति ।

इदं तु विचारयामः — सम्बन्धमात्रमपि नाभावाभावः । केवलपुरुषे भूतलसंयुक्ते सति दण्ड्यभावो न स्यात् । आरोप्यपुरुषसंयोगस्य सत्त्वात् । तथा च प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकारोप्यसम्बन्धो वाच्यः । तथा च विनिगमनाविरहेणारोप्यसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्न एवाभावा-भावोऽस्तु । न चान्योन्याभावाभावत्वं तादात्म्यरूपारोप्यसम्बन्धस्य कूटसमस्तीत्य-न्यत्रापि तथैव कल्प्यत इति वाच्यम् । तत्रापि तादात्म्यावच्छिन्नप्रतियोगिन एव तथात्वात् । किञ्चारोप्यसम्बन्धस्य विरोधनिर्वाहकत्वं, न तु प्रतियोगिकोटि-

प्रवेशोऽपि । अन्यथा समवायावच्छिन्नाकाशाभावाभावस्याकाशसमवायस्य समवायावच्छिन्नाकाशस्य वाप्रसिद्ध्यापातात् । अपि च, यो यदभावः स तदभाव इति व्याप्त्या प्रतियोग्येवाभावाभावः, न त्वारोप्यसम्बन्धः । प्रतियोगिनश्चारोप्यसम्बन्धेन (सह?)अभावविरोध इत्येकसम्बन्धेन प्रतियोगिसत्त्वे तदन्यसम्बन्धेन तदभावो न विरुद्धः । तस्मादभावाभावः प्रतियोग्येवेति संयोगाभावाकाशाभावादेरपि संयोगाकाशादिरूपाभावप्रतियोगित्वादत्यन्ताभावाप्रतियोगित्वं केवलान्वयिलक्षणमनुपपन्नमिति ।

अत्र मणिकृतः — वृत्तिमदत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वम् । आकाशश्च न वृत्तिमानिति नाकाशाभावाव्याप्तिरित्याहुः । नन्विदमनुपपन्नम् । वृत्तिमत्पदे दत्तेऽप्याकाशाभावाव्याप्तिस्तदवस्था । इदानीमाकाश इति प्रतीत्याकाशस्यापि वृत्तिमत्त्वात् संयोगेनाकाशस्य भूतलादिवृत्तित्वाच्च । एवं संयोगाभावेऽप्यव्याप्तिः, संयोगरूपाभावप्रतियोगित्वात्, संयोगस्य च वृत्तिमत्त्वादिति चेद्, न । स्ववृत्तिविरोधिवृत्तेरेव वृत्तिपदेन विवक्षितत्वात् । भवति च स्वरूपसम्बन्धाद्यवच्छिन्नाकाशवृत्तिः समवायावच्छिन्नाकाशाभावाविरोधिनीति विशिष्टाभावसत्त्वान्नाव्याप्तिः । अत एव संयोगाभावेऽपि नाव्याप्तिः, संयोगवृत्तेः संयोगाभाववृत्त्यविरोधित्वात् । न चैवं वृत्तिमत्पदमव्याप्तिवारकतया भागासिद्धिवारकत्वाद् व्यर्थम् । विशिष्टाभावतया सार्थकत्वादित्येके । अव्याप्तिवारकस्यापि व्यवहारे साध्येऽप्रसिद्धिवारकतया व्याप्तिग्रहोपाधिकत्वादित्यन्ये । वस्तुतोऽत्यन्ताभावाप्रतियोगित्वापेक्षया वृत्तिमदत्यन्ताभावाप्रतियोगित्वमधिकदेशवृत्तीति प्रमाविषयत्ववद् विकासकविशेषणत्वान्न व्यर्थतेति प्रत्यक्षमणिसारे विवेचितम् ।

मिश्रास्तु — वृत्तिमदिति विशेषणं नाव्याप्तिवारकं, किन्त्वप्रसिद्धिवारकम् । तथाहि — मेयत्वादेरपि समवायसम्बन्धारोप्यकात्यन्ताभावप्रतियोगित्वसत्त्वादत्यन्ताभावाप्रतियोगिनोऽप्रसिद्धिरेव । न च मेयत्वस्य सर्वत्र सत्त्वात् कथं तदत्यन्ताभाव इति वाच्यम् । समवायसम्बन्धेन तस्य क्वाप्यसत्त्वात् । तेन सम्बन्धेन तदभावस्य सर्वत्र सत्त्वात् । प्रतियोग्यवृत्तिसम्बन्धावच्छिन्नाभावस्य केवलान्वयित्वात् । न चैवं व्यधिकरणधर्मावच्छिन्नाभावाभ्युपगमापातः । प्रतियोगिताव्यधिकरणस्य तदवच्छेदकत्वानङ्गीकारात् । आरोप्यसम्बन्धत्वाङ्गीकारे बाधकाभावात् । प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिनोऽप्रसिद्धतया ज्ञानासम्भवेन व्यधि-

करणधर्मावच्छिन्नाभावानङ्गीकारः । इह त्वारोप्यसम्बन्धस्य न ज्ञानमपेक्षितं, येन व्यधिकरणसम्बन्धावच्छिन्नाभावोऽपि न स्यात् । संसर्गस्य सर्वत्राप्रसिद्धस्यैवारोप्यत्वादिति वदन्ति ।

अत्र शङ्क्यते — आकाशसमवायस्याप्रसिद्धस्य कथमारोपः । भूतलादौ च घटादिसंयोगोऽन्यत्र प्रसिद्ध एवारोप्यते । किञ्चाहार्योऽयमारोपः । स चाहरणसाध्यः । न चेच्छात्मकं तदज्ञाते सम्भवतीति न समवायसम्बन्धावच्छिन्नाकाशाद्यारोप इति ।

अत्र प्रतिभाति — घटसंयोगमात्रं नारोपविषयः, किन्तु भूतले घटसंयोगः । स च पूर्वाप्रसिद्ध एव । अप्रसिद्धावपि तस्यारोपे प्रमायां वा क्वापि नापेक्षा । संसर्गप्रसिद्धेरनङ्गत्वात् । न च संसर्गप्रसिद्धेरनङ्गत्वेऽप्याकाशसमवायस्यालीकस्य कथमारोप इति वाच्यम् । आकाशस्यैव समवायलक्षणसम्बन्धेनारोप्यत्वात् । आकाशस्य समवायस्य च सत्त्वेनालीकत्वाभावात् । अत एव किञ्चेत्यपास्तं, संसर्गज्ञानस्येच्छायां तन्त्रत्वाभावात् । अन्यथा सुखत्वप्रकारकज्ञानानन्तरं मम सुखमास्त्वितीच्छा न स्यात्, सुखसमवायस्य पूर्वमज्ञानादिति । वस्तुतोऽन्योन्याभावप्रतियोगितानवच्छेदकत्वं केवलान्वयित्वम् । घटाद्यवच्छिन्नान्योन्याभाववन्मेयत्वाद्यवच्छिन्नान्योन्याभावाभावादिति न क्वाप्यव्याप्तिरिति तत्त्वम् ।

वयं तु — एकजातीयसम्बन्धेन सर्ववृत्तित्वं केवलान्वयित्वम् । अस्ति च मेयत्वादेस्तथात्वं, स्वरूपसम्बन्धेन जगद्वृत्तित्वात् । घटादेस्तु न तथात्वं, क्वचित् संयोगेन क्वचित् समवायेन क्वचित् स्वरूपसम्बन्धेन वृत्तेः । न चैवं घटाभावस्यापि जगद्वृत्तित्वात् केवलान्वयित्वापातः । कपालादावपि सम्बन्धान्तरेण तदभावनियमादिति वाच्यम् । घटाभावत्वादिना केवलान्वयित्वस्येष्टत्वात् । संयोगाद्यवच्छिन्नघटाभावत्वादिना त्वतथात्वं, भूतलादाववृत्तेरिति ब्रूमः ।

ननु प्रमेयत्वं कथं केवलान्वयि, प्रमाविषयत्वरूपस्य तस्य प्रमातद्विषयत्वयोरननुगमेनाननुगतत्वादिति चेद्, न । प्रमात्वेनोपस्थिताः प्रमाव्यक्तयस्तद्विषयत्वानुगमिका इति प्राञ्चः ।

तत्र शङ्क्यते — प्रमात्वमपि यत्तद्व्यक्तित्वेनाननुगतं कथं प्रमाव्यक्त्यनुगमकमस्तु । किञ्च, विशेष्यतावच्छेदकं यद्येकं तदा परं विशेषणानुगमेनानुगमस्वीकारः । अन्यथा देवदत्तयज्ञदत्तौ छत्रिणाविति यत्रापि छत्रित्वेनोभयानुगमप्रसङ्गात् । तथा च विषयत्वानुगमः कथं प्रमात्वानुगतप्रमेयेति ।

अत्र प्रतिभाति — अचेतनाधिकरणक(?)प्रमापदवृत्तिनिमित्तत्वेन प्रमात्वस्यानुगमेनाद्यदोषनिरासः । किञ्चेत्यपि न । समासेनैकपदत्वे विशेषणानुगमे तन्निरूप्यस्याननुगतस्याप्यनुगमाङ्गीकारात् । अत एव छत्रिगमनमित्यादौ छत्रत्वेनानुगतं छत्रं गमनमनुगम(ये?य)त्येव । कथमन्यथा गन्धवत्त्वाद्युपाधीनामप्यनुगमः, गन्धादेरनेकत्वात् । यदि च गन्धत्वेनानुगमस्तदा प्रकृतेऽपि तुल्यम् । किञ्च, विषयत्वमपि ज्ञानमेव । तत्र च ज्ञानत्वमेवानुगमकमिति नानुपपत्तिः । वस्तुत ईश्वरप्रमाविषयत्वमेव प्रमेयत्वं, तस्या एकत्वेनाननुगमाभावात् । किं बहुना, सर्वमित्याद्यस्मदादिप्रमाविषयत्वस्यापि तथात्वे दोषगन्धाभावात् । यत्तु — घटत्वादिदृष्टान्तेन प्रमेयत्वादीनामपि धर्मत्वेन हेतुनात्यन्ताभावप्रतियोगित्वमनुमीयत इति केवलान्वयिधर्म एव नेति । तन्न । धर्मत्वस्यापि केवलान्वयितया तेनाकेवलान्वयित्वस्य व्याघातेन साधनासम्भवात् प्रमाविषयत्वाभावेऽसत्त्वापत्त्यानुमानस्य बाधितत्वाच्च । ईश्वरप्रमाया धर्मिग्राहकादेव जगद्विषयत्वसिद्धया तद्विषयत्वाभावस्य साधयितुमशक्यत्वाच्च ।

केचित् तु — अत्यन्ताभावप्रतियोगित्वमत्यन्ताभावप्रतियोगि, न वा । आद्ये यन्निष्ठात्यन्ताभावप्रतियोग्यत्यन्ताभावप्रतियोगित्वं, तस्यैवात्यन्ताभावाप्रतियोगित्वेन केवलान्वयितया तत्रैव धर्मत्वस्य हेतोर्व्यभिचारः । अन्त्येऽत्यन्ताभावप्रतियोगित्व एव व्यभिचार इति नेदमनुमानं सम्भवतीत्याहुः ।

इति केवलान्वयिवादः ।

अथ व्यतिरेकिग्रन्थः ।

केवलव्यतिरेकि तु व्यतिरेकसहचारग्राह्यव्याप्तिक इति मणिकृतः । तत्र शङ्कयते — अन्वयव्यतिरेकिणि लक्षणमिदमतिव्याप्तम् । न च व्यतिरेकसहचारमात्रग्राह्यव्याप्तिकत्वं तदर्थः । अन्वयव्यतिरेकिण्यपि कदाचिद् व्यतिरेकसहचारमात्रेण व्याप्तिग्रहात् । न च तदा स केवलव्यतिरेक्येवेति वाच्यम् । तथा सति यो यदा व्यतिरेकसहचारमात्रग्राह्यव्याप्तिकः, स तदा केवलव्यतिरेकीत्यर्थः पर्यवस्यति । तथा चायं संयोगाभाववान् विभागाभाववत्त्वादित्यत्र व्यतिरेकव्याप्तिग्रह-

काले व्यतिरेकित्वप्रसङ्गः । न चेष्टापत्तिः । तदा तस्य केवलव्यतिरेकित्वादेवेति वाच्यम् । केवलान्वयिसाध्यकत्वेन केवलान्वयितया तद्विरुद्धकेवलव्यतिरेकित्वायोगादिति ।

अत्र प्रतिभाति — केवलान्वयिभिन्नत्वे सति केवलव्यतिरेकसहचारग्राह्यव्याप्तिकत्वं यस्य यदा, स तदा केवलव्यतिरेकी । संयोगाभावसाध्यकं च केवलान्वय्येवेति न तत्रातिप्रसङ्गः । न च केवलव्यतिरेकिभिन्नत्वे सति केवलान्वयिसाध्यकत्वमेव केवलान्वयित्वमस्त्विति संयोगाभावसाध्यकः केवलव्यतिरेक्येवास्त्विति वाच्यम् । अन्वयसहचारमात्रेण व्याप्तिग्रहदशायां तस्य तदा केवलव्यतिरेकसहचारमात्रग्राह्यव्याप्तिकत्वाभावेन केवलव्यतिरेकित्वासम्भवेन केवलान्वयित्वस्यावश्यं वाच्यतया केवलव्यतिरेकिभिन्नत्वघटितलक्षणायोगादव्याप्तिः । अन्योन्याभावस्य तद्वत्त्वभावात् । न च तदातनकेवलव्यतिरेकिभिन्नत्वमर्थः । तच्चान्वयसहचारमात्रग्राह्यव्याप्तिकतादशायामस्त्येवेति नाव्याप्तिरिति वाच्यम् । एतदपेक्षया केवलान्वयिभिन्नत्वस्यैव लघुतया व्यतिरेकिलक्षणे प्रवेशौचित्यात् । तदातनत्वस्य तत्राप्रवेशात् । एवं सति केवलान्वयित्वकेवलव्यतिरेकित्वयोर्न सङ्करशङ्कापीति युक्तमुत्पश्यामः ।

अन्वयव्यतिरेकित्वं तु अन्वयव्यतिरेकोभयसहचारग्राह्यव्याप्तिकत्वमिति सर्वं । तदपि चिन्त्यते — प्रत्येकमन्वयो व्यतिरेकश्च यत्र व्याप्तिग्राहकस्तत्त्वमित्यर्थो वा मिलितौ यत्र तद्ग्राहकावित्यर्थो वाभिमतः । नाद्यः । केवलान्वयिनि केवलव्यतिरेकिणि चातिव्याप्तेः । नान्त्यः । वह्निसाध्यकेऽन्वयसहचारमात्रेण व्याप्तिग्रहदशायां तुरीयतापत्तेः । केवलान्वयित्वस्य केवलव्यतिरेकित्वस्य वा लक्षणाभावादिति ।

अत्र ब्रूमः — केवलान्वयिभिन्नत्वे सति केवलव्यतिरे(कि ? क)सहचाराग्राह्यव्याप्तिकत्वदशावर्तित्वमन्वयव्यतिरेकित्वम् । इदं लक्षणं च केवलमन्वयसहचारेण सहचाराभ्यां (वा) व्याप्तिग्रहदशायामस्तीति न कोऽपि दोषः ।

इदं त्ववधेयं — केवलव्यतिरेकित्वान्वयव्यतिरेकित्वयोः कालभेदेन सङ्करोऽस्त्येव । केवलान्वयित्वस्य केनापि सङ्करो नेति दिक् ।

ननु व्याप्तिविशिष्टपक्षधर्मताज्ञानत्वेनानुमितौ हेतुत्वाद् व्यतिरेकिस्थले व्याप्तिपक्षधर्मताज्ञानयोः व्यतिरेकान्वयविषयकत्वेन भिन्नविषयकत्वनियमात् कथ-

मनुमितिरिति चेद्, न । व्यतिरेकसहचारेणान्वयव्याप्तिग्रहणाद् व्याप्तिविशिष्ट-पक्षधर्मताधीसम्भवात् । न चान्यसहचारात् कथमन्यव्याप्तिधीरिति वाच्यम् । प्रतियोग्यनुयोगिभावस्य नियामकत्वाद् । यद्वा, व्यतिरेकसहचाराद् व्यतिरेक-व्याप्तिधीरेव । न चैवं परामर्शाभावादनुमित्यनुदयापातः । व्याप्तिज्ञानस्यानुमिति-त्वावच्छेदेन हेतुत्वाद् अन्वय्यनुमितौ परामर्शस्य व्यतिरेक्यनुमितौ साध्याभाव-व्यापकाभावप्रतियोगित्वज्ञानस्य विशेषसामग्रीत्वादिति मणिकृतः ।

अत्र वदन्ति — व्यतिरेकसहचारादन्वयव्याप्तिधीः कथम्, अधिकरणा-द्यसन्निकर्षात् । न च यत्राधिकरणादिसन्निकर्षस्तत्परः प्रथमः पक्षः, अन्यत्र तु द्वितीयः पक्ष इति वाच्यम् । तथाप्यन्वयसहचारव्यतिरेकसहचारयोरननुगमाद् व्याप्ति(तः?)ग्राहकत्वानुपपत्तिः । किञ्च, यत्र सहचाराभ्यां मिलित्वा व्याप्तिग्रहस्तत्र प्रत्येकसहचारधीजन्यव्याप्तिधियोर्वैलक्षण्यं वाच्यम् । तच्च विषयकृतं नेति जातिकृतं वाच्यम् । तच्च चाक्षुषत्वादिजात्या सङ्करादसम्भवीति ।

अत्राहुः — अन्वयव्यतिरेकसहचारयोर्न प्रत्येकं प्रयोजकता, येनोक्तदोषः प्रसज्ज्येत । किन्तु व्यभिचारज्ञानविरोधिसहचारज्ञानत्वेनानुगतेनैवेति नाननुगमो न वा जातिसङ्करोऽपि । नह्येकदण्डजन्यघटापेक्षया दण्डद्वयजन्यघटस्य वैलक्षण्य-मस्ति । तथा च सहचारद्वयधीजन्यव्याप्तिज्ञाने तथैवेति । यत् त्वत्र दूषणं सह-चारज्ञाने विद्यमानेऽपि वह्न्यादौ धूमव्यभिचारज्ञानान्न सहचारज्ञानं तद्धीविरोधीति कथमुक्तक्रमेणानुगम इति । तन्न । स्वाधिकरणे व्यभिचारधीविरोधित्वस्य विवक्षि-तत्वादिति प्रागेवोक्तत्वात् । यथा चैवं नातिप्रसङ्गस्तथा सहचारग्रन्थ एव व्युत्पा-दितम् । अत एव सहचारधीर्व्याप्तिग्रहे विशेषणज्ञानत्वेन हेतुरिति कथमविशेष-णीभूतव्यतिरेकसहचारस्यान्वयव्याप्तिग्राहकत्वमिति कस्यचित् प्रलपितमपास्तम् । विरुद्धस्थलीयव्याप्तिभ्रमानुरोधेन सहचारधीत्वेनापि हेतुत्वस्य प्राग् व्यवस्थाप-नात् । न चैवमपि स्वसहचारज्ञानत्वेनैव हेतुत्वेऽपि स्वव्यतिरेकसहचारज्ञानस्य हेतुत्वे मानाभाव इति वाच्यम् । स्वसहचारज्ञानस्यैव व्यभिचारज्ञानविरोधिसह-चारज्ञानत्वेन सामान्येन हेतुत्वात् । न च तस्य सामान्यत्वेऽपि स्वसहचारज्ञान-त्वस्य विशेष्यस्य लघुशरीरत्वमिति वाच्यम् । तथा सति प्रमेयत्वादिना स्वसह-चारज्ञानेऽपि व्याप्तिग्रहप्रसङ्गात् । तस्माद् व्यभिचारज्ञानविरोधिसहचारज्ञानं हेतु-र्वाच्यः । तथा च व्यतिरेकसहचारस्यान्वयव्याप्तिग्राहकत्वमवर्जनीयमिति दिक् ।

द्वितीयपक्षे तु शङ्क्यते — विशेषसामग्रीद्वयकल्पने मानाभावः । व्यतिरेकसहचारेण व्यतिरेकव्याप्तिग्रहपक्षेऽपि व्यतिरेकिण्यपि परामर्शस्यैव हेतुत्वसम्भवात् । हेतुनिष्ठव्यभिचारज्ञानविरोधिव्याप्तिवैशिष्ट्यविषयकपक्षधर्मताज्ञानस्यैव परामर्शत्वात् तस्य च सर्वानुमितिसाधारण्यादिति ।

अत्र मिश्राः — अन्वय्यनुमितौ व्यापकतावच्छेदकप्रकारकत्वस्य व्यतिरेक्यनुमितौ व्याप्यतावच्छेदकावच्छिन्नाभावत्वप्रकारकत्वस्य चानुभवसिद्धकार्यवैलक्षण्यस्यान्यथानुपपत्त्या विशेषसामग्रीद्वयमवश्यं कल्प्यमेव । अन्यथा कार्यवैजात्यमाकस्मिकं स्यात् । तथा च तत एवातिप्रसङ्गभङ्गे सामान्यसामग्र्यनुगमे मानाभावः । अत एव टीकादौ सर्वत्र नेदं निरात्मकं जीवच्छरीरमिति व्यतिरेकमुखेनैव व्यतिरेक्युपदर्शनमित्याहुः ।

तत्रेदं विचार्यते — एवं सत्यन्वयव्यतिरेकिणि व्यापकतावच्छेदकप्रकारिका व्याप्यतावच्छेदकावच्छिन्नाभावत्वप्रकारिका चैकानुमितिः स्यात् । तथा चानुभवविरोधः । न च व्यतिरेकसहचारात् तत्रान्वयव्याप्तिधीरेव, तत्सामग्रीभूताधिकरणसन्निकर्षसत्त्वादिति तत्र व्यापकतावच्छेदकवह्नित्वादिप्रकारिकैवानुमितिः, न वह्न्यभावाभावत्वादिप्रकारिकेति वाच्यम् । व्यतिरेकसहचारस्यान्वयव्यतिरेकोभयव्याप्तिग्रहं प्रति कसकारणभावत्वेनेतरसामग्रीसमवधाने सत्युभयव्याप्तिग्राहकत्वाविरोधादिति । न चान्वयव्यतिरेकिणि परस्परविरोधेनानुमितिरेव नोभयव्याप्तिग्रहदशायामिति वाच्यम् । अनुभवविरोधादिति ।

अत्र ब्रूमः — उभयव्याप्तिग्रहदशायामपि वह्निमानित्याकारानुमितेरेवोत्पत्त्या लाघवेन वह्नित्वप्रकारकानुमितेरेव निश्चयेन तत्सामग्र्या वह्न्यभावाभावत्वप्रकारकानुमितिप्रतिबन्धकता कल्प्यते । प्रतिबन्धकताया मण्यादिवत् प्रतिबन्धैककल्प्यत्वात् । यच्चात्र नव्यैर्दूषणमदायि — प्रतिज्ञानुमित्योः समानाकारतयेतरभेदाभावाभावत्वप्रकारकानुमितिसमानाकारा इतरभेदाभावाभाववती पृथिवीति प्रतिज्ञा स्यान्न त्वितरभेदवतीति । तदज्ञानात् । व्यतिरेकसहचारादन्वयव्याप्तिग्रहपक्षे इतरभेदवतीत्याकाराविरोधात् । व्यतिरेकव्याप्तिग्रहपक्षे तु नेदं निरात्मकं जीवच्छरीरमित्येव प्रतिज्ञाकारादिति । यत्तु — व्यतिरेकमुखेन व्याप्यतावच्छेदकावच्छिन्नाभावत्वप्रकारकानुमितिर्वाच्यैव । अन्यथा यत्र भ्रमेण प्रमेयत्वादिव्यतिरेकग्रहाद् व्यतिरेकसहचारज्ञानं, तेन व्यतिरेकव्याप्तिग्रहः, तत्र प्रमेयत्वप्रकारकानु-

मितिः स्यात् । न चेष्टापत्तिः । जनकीभूतव्याप्तिज्ञानस्य भ्रमत्वेन प्रमानुमित्यसम्भवादित्यनुमितिभ्रमत्वनिर्वाहार्थं प्रमेयत्वाभावाभावत्वप्रकारकत्वमनुमितेरङ्गीकार्यमेवेति । तत्तु न । वह्निमति धूलीपटले धूमभ्रमेण वह्न्यनुमितेर्विषयाबाधेन प्रमात्ववत् प्रमेयत्वप्रकारकानुमितेरपि प्रमात्वे बाधकाभावादिति न किञ्चिदेतत् ।

इदं तु शङ्क्यते—व्यतिरेकिणि साध्याभावव्यापकाभावप्रतियोगित्वं न नियामकम् । संयोगेन रूपानुमानापातात्, रूपाभावव्यापकसंयोगाभावप्रतियोगित्वात् संयोगस्य । संयोगाभावस्य केवलान्वयितया सर्वव्यापकत्वात् । एवं द्रव्यत्वेन संयोगानुमानं न स्यात् । संयोगाभावाव्यापकत्वाद् द्रव्यत्वाभावस्येति ।

अत्राहुः —प्रतियोगिविरुद्धसाध्याभावव्यापकप्रतियोगिविरुद्धाभावप्रतियोगित्वं नियामकम् । तथा चाद्याभावविशेषणादव्याप्तेर्द्वितीयाभावविशेषणादतिव्याप्तेश्च निरास इति ।

अत्रेदं चिन्त्यते —एवं सत्ययं संयोगविशेषाभाववान् विभागविशेषाभाववत्त्वादित्यत्र व्यतिरेकव्याप्तिग्रहदशायामनुमितिर्न स्यात् । साध्याभावहेत्वभावयोः संयोगविभागरूपयोः प्रतियोगिविरुद्धत्वाभावादिति ।

अत्र कश्चित्— तत्रानुमितिर्न भवत्येव, उक्तहे(तु?)त्वसंभवादिति । तत् तुच्छम् । निर्वचनासामर्थ्यमात्रेणैवानुभवापलापस्य बालप्रलापत्वादिति ।

अत्र ब्रूमः —संयोगाभावसाध्यकस्य केवलान्वयित्वेन तत्र व्यतिरेकसहचारादन्वयव्याप्तिग्रह इत्येव वाच्यम् । तथा च तत्र परामर्श एव हेतुः, न तूक्तं, तस्य व्यतिरेकसाध्यकानुमितावेव हेतुत्वात् । यद्वा, यत्राव्याप्यवृत्तितानियताभावप्रतियोगि साध्यं हेतुर्वा, तत्र प्रतियोगिविरुद्धत्वं न विशेषणम् । अनतिप्रसङ्गाल्लाघवाच्च । सकलसाधारणैकनियामकस्य ब्रह्मणापि वक्तुमशक्यत्वादिति ।

इदं तु विचारणीयं —किं वस्तुगत्या साध्याभावव्यापकत्वज्ञानमुपयोगि, उत साध्याभावत्वेन ज्ञायमानस्य व्यापकताज्ञानं वा । नाद्यः । यत्र पटादौ घटाभावत्वमारोप्य तद्व्यापकतया लोष्टत्वादि गृहीतं, तत्र लोष्टत्वाद्यभावेन घटानुमानापातात् । नान्त्यः । अप्रसिद्धसाध्यकाव्याप्तेः, तत्र साध्याप्रसिद्ध्या तदभावत्वेन ज्ञानासम्भवात् । एवं हेत्वभावेऽपि विकल्पनीयमिति ।

अत्रायं समाधिः — यद्रूपावच्छिन्नव्यापकतया यद्रूपावच्छिन्नं ज्ञायते, तद्रूपावच्छिन्नाभावत्वप्रकारिका तद्रूपावच्छिन्नोपस्थितिकाभावज्ञानादनुमितिः । अस्ति चैतदप्रसिद्धसाध्यकेऽपि । अप्रामाण्यत्वेनोपस्थिताप्रामाण्यव्यापकताज्ञानात् तदभावत्वेनानुमितेरारोपस्थलेऽप्युक्तमस्त्येवेति न काचिदनुपपत्तिः । अधिकं च प्रत्यक्षमणिसारे सुव्यक्तमिति नेह तन्यते ।

इदं त्ववधेयं — व्यतिरेकिणि व्यतिरेकव्याप्तिग्रहपक्षे पक्षतावच्छेदकस्य हेतुत्वे दोष एव ना(स्ति?स्तीति) पृथिवी इतरेभ्यो भिद्यते पृथिवीत्वादित्यनुमानमविरुद्धम् । अन्वयव्याप्तिग्रहपक्षेऽपि नानुपपत्तिः । पृथिवीत्वमितरभेदव्याप्यमिति ज्ञानेऽपि पृथिवीविशेष्यकेतराविशेषणेतरभेदविशेषणकज्ञानस्योद्देश्यस्याभावेन पक्षतावच्छेदकहेत्वभेदनिबन्धनसिद्धसाधनानवकाशात् । अनुमितिसमानाकारसिद्धेरेव प्रतिबन्धकत्वात् । व्याप्तिबुद्धौ पृथिवीत्वस्य विशेष्यत्वात् । इतरभेदस्य सामानाधिकरण्यविशेषणतया भानाच्चानुमितिसमानाकारताविरहात् । अस्तु वा समानविषयसिद्धिमात्रं प्रतिबन्धकम् । तथापि पृथिवीविशेष्यकेतरभेदविशेषणकसिद्धेरुद्देश्याया असिद्धत्वात् सिसाधयिषागर्भपक्षतासत्त्वमस्तीति नानुपपत्तिः । प्राञ्चस्तु — गन्धवत्त्वमेव पक्षतावच्छेदकं, न पृथिवीत्वमिति नोक्तदोष इत्याहुः ।

ननु पृथिवी इतरेभ्यो भिद्यते इत्यादिव्यतिरेकिणि साध्याप्रसिद्ध्या पक्षताघटकसंशयसाध्यरूपविशेषणज्ञानान्वयव्यतिरेकान्यतरव्याप्तिज्ञानात्मकानुमितिप्रयोजकानामभावात् कथं सेति चेत् । अत्र काश्चिद् — इतराप्रतियोगिकभेदाभाव एव साध्यः । इतराप्रतियोगिकभेदस्य घटभेदस्याभावो घट एव प्रसिद्धः । स च पृथिवीत्वावच्छेदेन सिध्यन्नेक एव सिध्यतीति न तत्तत्पृथिव्यां स्वस्वभेदाभावमादाय सिद्धसाधनम् । न चैवमुक्तो विशिष्टाभावः सिध्यतु, न त्वितरभेद इति वाच्यम् । भेदरूपविशेष्यवति विशिष्टाभावस्येतराप्रतियोगित्वरूपविशेषणाभावमादाय सिद्ध्येतरभेदसिद्धिरिति । तन्न । एवमपि विशिष्टाभावत्वप्रकारिकानुमितिः स्याद्, न त्वितरभेद(त्व)प्रकारिकेति ।

अत्र प्राञ्चः — पृथिव्यामेव साध्यप्रसिद्धिः । पृथिवी जलभिन्ना न वेत्यादित्रयोदशकोटिकैकसंशयेन तस्यां त्रयोदशभेदावगतेः । न चैवं पक्ष एव साध्यप्रसिद्ध्या सिद्धसाधनम् । निश्चयार्थं व्यतिरेकिप्रवृत्तेः । अन्यथा पक्षे साध्यसन्देहस्य सर्वत्र सत्त्वेनानुमानमात्रविलयापातादित्याहुः ।

तत्र मणिकृतः — साध्यनिश्चये सति साध्यव्यतिरेकनिश्चयो भवति। तत्संशये तु तत्संशयस्यैवोत्पत्तेर्न व्यतिरेकव्याप्तिनिश्चयः सम्भवति। संशयरूपसाध्यप्रसिद्ध्यभिधानं शिष्य(*यन्धन ?)मात्रमिति वदन्ति।

अत्रोपाध्यायाः — अभावज्ञानं प्रति लाघवात् प्रतियोगिज्ञानत्वेन हेतुता, न तु तन्निश्चयत्वेन। तथा च भेदसमुदायस्य पृथिव्यां सन्दिग्धस्य जलादौ व्यतिरेकनिश्चये बाधकाभावः। किञ्च, जलं जलादित्रयोदशान्योन्या(भावा)भाववत् तदेकदेशस्वभेदाभाववत्त्वात् यद्यदेकदेशाभाववत् तत्तत् समुदायाभाववदिति सामान्यतो व्याप्तिरिति व्यतिरेकव्याप्तिधीरानुमानिकी सम्भवत्येवेति संशयरूपसाध्यप्रसिद्धौ शिष्ययन्धनत्वाभिधानं शिष्ययन्धनमित्यवोचन्।

तत्र मिश्राः — साध्यनिश्चयं विना योग्यानुपलम्भाभावेनाभावनिश्चय एव न सम्भवति। प्रतियोगिनिश्चायकसमवधानस्यात्र योग्यानुपलम्भसम्पादकत्वात्। तन्निश्चयाप्रसिद्धौ निश्चायकस्याप्यप्रसिद्धेर्योग्यानुपलम्भासम्भव एवेति न व्यतिरेकव्याप्तिनिश्चयः। तथा च संशयरूपसाध्यप्रसिद्धौ शिष्ययन्धनत्वाभिधाने शिष्ययन्धनत्वाभिधानं स्वस्यैव शिष्ययन्धनमिति। किञ्चेत्यप्यसत्। यत्तद्व्यामनुगतव्याप्यतावच्छेदकव्यापकतावच्छेदकपुरस्कारं विना व्याप्तिग्रहाभावादित्याहुः।

अत्रेदं विचारणीयं — योग्यानुपलब्धिः स्वरूपसती हेतुः न ज्ञाता। तथा चेदानीं तन्निश्चयाप्रसिद्धावप्यग्रे भा(वा?वि)निश्चयमादाय निश्चायकसमवधानगर्भानुपलब्धिः साध्यसंशयदशायामप्यस्तीति कथं न जलादौ साध्याभावग्रह इति संशयरूपसाध्यप्रसिद्ध्यभिधानमाचार्याणां न शिष्ययन्धनमिति तत्र शिष्ययन्धनत्वारोप एव महतामनुचित इति।

अत्र नव्याः — आचार्यमते व्यतिरेकसहचारादन्वयव्याप्तिर्गृह्यते। तच्च पक्षे साध्यसंशये सति न भवति, तत्र साध्यसाधनसामानाधिकरण्यसंशयात्। तन्निश्चयस्य व्याप्तिनिश्चायकत्वादिति। तदनतिकोमलम्। तत्र साध्याभावसहचारनिश्चयस्य व्याप्तिनिश्चायकस्य सत्त्वात्। तस्य च जलादावुक्तक्रमेण भावात्। न हि व्यतिरेकसहचारेण व्याप्तिग्रहस्थले साध्यसाधनसहचारनिश्चयस्तन्त्रमिति कोऽपि

---

* 'यन्धन' इत्यस्य स्थाने 'यन्त्रण' इति वा 'बन्धन' इति वा पठनीयं भाति।

ब्रूते । अथायमाशयः साध्यसाधनसामानाधिकरण्यसंशयः प्रतिबन्धक इति । तदपि न । प्राङ्संशयस्याप्रतिबन्धकत्वात् ।

केचित् तु — विशिष्टज्ञाने विशेषणनिश्चयत्वेन हेतुता वाच्या । अन्यथा स्थाणुर्वा पुरुषो वेति संशयानन्तरं स्थाणुत्वविशेषणज्ञानात् स्थाणुरिति निश्चयज्ञानापातात् । तथा च प्रतियोगिनोऽप्यभावविशेषणतया तन्निश्चयं विना नाभावनिश्चय इति संशयरूपसाध्यप्रसिद्धिरकिञ्चित्करीति । तदप्यभव्यम् । संशयोत्तरं स्थाणुरिति विशिष्टप्रत्यक्षे विशेषदर्शनस्य हेतुतया तदभावादेव तदनुत्पादात् । तत्सत्त्वे चेष्टापादनात् । किञ्चैवं संशयानन्तरं संशयो न स्यात् । निश्चयरूपविशेषणज्ञानाभावात् ।

गौडास्तु — पृथिव्यां तदितरभेदसंशये कथं व्यतिरेकिप्रवृत्तिः, हेतोः साध्याभावसामानाधिकरण्यात्मकव्यभिचारसंशयात् । न चानुमानमात्रोच्छेदकतया हेतुमति साध्यसंशयो न विरोधीति वाच्यम् । व्यापकाभाववत्तया निश्चिते व्याप्यसंशयात्मकव्यभिचारसंशयस्य सन्दिग्धानैकान्तिकतानुरोधेन प्रतिबन्धकत्वाङ्गीकारात् प्रकृतेऽपि पृथिवीत्वाभावरूपव्यापकाभाववत्तया निश्चयादितरभेदाभावरूपव्याप्यसंशयस्यावश्यं प्रतिबन्धकत्वात् । तथा च संशयरूपसाध्यप्रसिद्धिर्न तन्त्रं, प्रत्युत विरोधिनीति वदन्ति । तदपि न भद्रम् । भवत्वेवं, तथापि व्यतिरेकव्याप्तिर्मा गृह्यतां, तत्रोक्तव्यभिचारसंशयस्य प्रतिबन्धकत्वात् । आचार्यास्तु व्यतिरेकसहचारादन्वयव्याप्तिग्रहं वदन्तो नैवं पर्यनुयोज्याः, निरनुयोज्यानुयोगप्रसङ्गात् । तस्मान्मात्सर्यमुत्सार्य सम्यग् विचारणीयमेतत् सूरिभिरिति ।

मणिकृतस्तु — नेह साध्याप्रसिद्धिः । घटादावेवेतरभेदस्य प्रत्यक्षसिद्धत्वात् । घटो न जलादिरिति प्रतीतेः । न चेतराकाशादेरयोग्यतया कथं तद्भेदः प्रत्यक्ष इति वाच्यम् । अयोग्यप्रतियोगित्वेऽपि योग्यानुपलब्धिसत्त्वेन ग्रहणसम्भवात् । प्रतियोगिसत्त्वप्रसञ्जनप्रसञ्जितप्रतियोगिकानुपलब्धेरेव तत्त्वात् । तस्याश्चात्रापि घटो यदि तत् स्यात्, तत्तयोपल(भेऽभ्ये)तेत्यादिना सत्त्वात् । अत एव स्तम्भे पिशाचान्योन्याभावः प्रत्यक्षः । न चैवं सिद्धसाधनं, घटस्यापि पक्षतया तत्र साध्यस्य सिद्धत्वादिति वाच्यम् । एकदेशे साध्यसिद्धावपि सर्वा पृथिवी इतरभिन्नेत्युद्देश्यप्रतीत्यभावेन सिद्धसाधनानवकाशात् । पक्षतावच्छेदकनानात्व एवांशतः सिद्धसाधनात् । अत एवानित्ये वाङ्मनसे इत्यत्र अनित्या वागिति सिद्धेरुद्दे-

श्रयायाः सिद्धावंशतः सिद्धसाधनम्। न च घटे साध्यनिश्चयात् संशयगर्भपक्षताविरहः। घटत्वेन संशयाभावेऽपि पृथिवीत्वेन तस्य साध्यसंशयसम्भवात्। समानप्रकारकनिश्चयस्य तादृशसंशयप्रतिबन्धकत्वात्। यद्वा, घटादिभिन्नपृथिवीत्वेन पक्षतेति न काप्यनुपपत्तिरित्याहुः।

अत्र वदन्ति — उक्तानुपलब्धेरभावग्राहकत्वे वायावुद्भूतरूपवदन्योन्याभावस्यापि रूपात्यन्ताभाववत् प्रत्यक्षतापातः, घटे मनस्त्वात्यन्ताभावप्रत्यक्षतापातश्च, उद्भूतरूपपरमाणौ महत्त्वाभावप्रत्यक्षतापातश्च। यदि वायुरुद्भूतरूपवान् स्याद् उपलभ्येतेत्यादिना, घटे यदि मनस्त्वं स्याद् घटत्ववद् योग्यवृत्तिजातितया गृह्येतेत्यादिना, उद्भूतरूपपरमाणौ यदि महत्त्वं स्यादवश्यं गृह्येतेत्यादिनोपलम्भापादनसम्भवादिति।

अत्र मिश्राः — तेऽप्यभावाः प्रत्यक्षा एव। उक्तयोग्यानुपलब्धिविषयाभावत्वेनैव योग्यत्वात्। योग्यानुपलब्धेः सहकारित्वेऽप्युद्भूतरूपादेरालोकसहकारिणस्तत्रावच्छेदकत्ववत् तत्सम्भवात्। यद्वा, यत्र यत्सत्त्वं तर्कितं यदुपलम्भापादकं, तत्प्रतियोगिकाभावस्तत्र योग्य इति नानुपलब्धेरवच्छेदकताप्रसङ्ग इत्याहुः।

उपाध्यायास्तु — घटे मनस्त्वाभावस्य वायौ रूपवदन्योन्याभावस्य उद्भूतरूपपरमाणौ महद्भेदस्य च योग्यानुपलब्धिरूपग्राहकसत्त्वेऽपि योग्यताविरहान्न ग्रहः। संसर्गाभावे योग्यप्रतियोगित्वस्यान्योन्याभावे योग्याधिकरणत्वस्य योग्यतावच्छेदकत्वात्। फलानुरोधात् तथा कल्पनादित्याहुः। अत्र यथानुभवं व्यवस्था द्रष्टव्या। वस्तुतस्तूपाध्यायमतेऽप्युद्भूतरूपपरमाणौ महत्त्वाभावग्रहः किं न स्यात्। तत्र चेष्टापत्तौ किमपराद्धं महद्भेदेनेति मिश्रमतमेव सम्यक्। अनुपलब्धिस्वरूपं च प्रत्यक्षमणिसार एव विवेचितमिति नेह विविच्यते।

नन्वाकाशभेदेऽपि घटस्यात्राकाशत्वमुपलभ्येतेत्यापादनं न सम्भवति, आकाशत्वस्यायोग्यत्वात्। तथा च कथमाकाशभेदो घटादौ योग्यानुपलब्धिग्राह्यः। न चाकाशत्वस्य योग्यव्यक्तिवृत्तित्वेन योग्यताप्यापाद्यैवेति वाच्यम्। गुरुत्वे व्यभिचारात्। जातित्वे सतीति विशेषणे चासिद्धेः। तस्य जातित्वाभावात्। तथा चोक्तानुपलब्ध्यसम्भव एवेति चेत्। अत्र मिश्राः — आकाश(त्व)स्य जातित्वे स्वस्वैकव्यक्तिवृत्तित्वमेव बाधकम्। तच्च घटाभेदापादने गतमेव।

तथा सति घटेऽप्याकाशत्वसत्त्वगमनादिति योग्यव्यक्तिवृत्तिजातितयोपलम्भापादनं तस्य घटे कर्तुं शक्यत एवेति कथं तद्भेदो न प्रत्यक्षः । एवं घटे यदि विशेष-(त्वं?वत्त्वं) स्याद्, ऐन्द्रियकवृत्ति स्यात् । तथा च प्रत्यक्षं स्यात् । अतीन्द्रियमात्रवृत्तित्वेनैव तस्यायोग्यत्वादिति विशेषादिविरहोऽपि प्रत्यक्ष इति वदन्ति ।

अत्र शङ्क्यते — यद्यापादितयोग्यतया उपलम्भापादनेनाभावः प्रत्यक्षः, तदा घटेऽणुपरिमाणाभावज्ञानापातः । अणुपरिमाणं यदि घटवृत्ति स्यात्, तदा योग्यवृत्तिपरिमाणत्वेन योग्यं स्यात् । तथा च गृह्येतेत्यापादनसम्भवादिति ।

अत्र ब्रूमः — यदधिकरणे आपाद्यमानं तस्यायोग्यतां नापादयति, तत्र तदभावो योग्यानुपलब्धिर्ग्राह्यः । अणुपरिमाणं च घटे आपाद्यमानं तस्यायोग्यतामेवापादयति, अणुपरिमाणवत्त्वेनैवायोग्यत्वात् । पिशाचत्वाकाशत्वादिकं च जातिरूपतयापाद्यमानमधिकरणयोग्यतान्तर्भूतयोग्यताकं न योग्याधिकरणे घटादावयोग्यतामापादयतीति तदत्यन्ताभावस्तद्वदन्योन्याभावो वा भवत्येव प्रत्यक्षः । अत एव यत्र प्रतियोग्यधिकरणयोरन्यतरस्मिन्नन्यतरसंसर्ग आपाद्यमानोऽन्यतरस्मिन् नायोग्यतामापादयति, तत्र तदधिकरणे तदभावः प्रत्यक्षो योग्यानुपलब्ध्या भवत्येवेति योग्यानुपलब्ध्यर्थः । अर्थान्तरस्य निर्वक्तुमशक्तेः । अत एव वायावुद्भूतरूपसंसर्ग आपाद्यमानस्तत्र योग्यतामेवापादयति, उद्भूतरूपवत्त्वेनैव बहिर्द्रव्यस्य योग्यतावत्त्वादिति तदभावः प्रत्यक्ष एव । अत एव च स्तम्भेऽपि पिशाचत्वसंसर्गे आपाद्यमानस्तत्र नायोग्यतामापादयति, व्यक्तियोग्यतायां जातियोग्यताया अतन्त्रत्वात् । प्रत्युत व्यक्तियोग्यतया तत्र पिशाचत्वस्यैव योग्यतापाद्यत इति तदत्यन्ताभावस्तद्वदन्योन्याभावो वा घटादौ प्रत्यक्ष इति किमधिकं पल्लवेनेति । यद्वा, आकाशत्वादिनाकाशभेदज्ञानाभावेऽपि पृथिवीतरत्वस्य पृथिव्यन्योन्याभाववत्त्वस्य योग्यतया तेन रूपेणोपलम्भापादनसम्भवात् तेन रूपेण भेदज्ञाने बाधकाभावः । येन रूपेण यत्र यदुपलम्भापादनं, तद्रूपावच्छिन्नतदभावस्य तत्र सामग्रीसत्त्वेन प्रत्यक्षत्वात् । अत एव घटो न रूपमित्यादिसर्वसाक्षिकः प्रत्ययः । अन्यथा रूपत्वावच्छिन्नाभावस्यातीन्द्रियप्रतियोगिकतया प्रत्यक्षत्वापातात् । तस्मादुक्तमेव नियामकमिति ।

इदं तु ध्येयं — पृथिवी इतरभिन्नेत्यत्रेतरत्वेनाभावस्याप्युपस्थितेस्तदन्योन्याभावोऽपि साध्यः, न तु तेन सह स्वरूपभेदः । साध्यभेदे मानाभावात् । न

च पृथिवीतरत्वं पृथिव्यन्योन्याभाववत्त्वम् । तच्च नाभावेऽस्ति । अभावप्रतियोगिकाभावाधिकरणयोरनङ्गीकारादिति वाच्यम् । पृथिवीत्वासामानाधिकरण्यावच्छिन्नमेयत्वरूपभावाभावसाधारणाधिकरणतावच्छेदकावच्छिन्नस्याभावाधिकरणस्याप्यभावस्याङ्गीकारे बाधकाभावात् । किं बहुना, पृथिवीभिन्नसर्वविषयकबुद्धिविषयत्वरूपभावाभावसाधारणाधिकरणतावच्छेदकावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नतया जलादिवदभावस्याप्यन्योन्याभावसाधनमप्रत्यूहमेव । युक्तं चैतत् । अभावप्रतियोगिकोऽभावाधिकरणको वा नाभावोऽभ्युपेयत इत्यत्र क्लृप्तप्रतियोगिनैव क्लृप्ताधिकरणेनैवोपपत्तेर्नातिरिक्तकल्पनमित्येव बीजम् । भावाभावसाधारणधर्मावच्छिन्नाभावप्रतियोगिकाभावाधिकरणकाभावातिरिक्ताभावस्यानङ्गीकारात् । अभावेन सह (स्व)रूपभेदस्य साध्यत्वादिति मणिकृद्वचनं चाभावप्रतियोगिकाभावानङ्गीकारेऽपि नानुपपत्तिरित्यभिप्रायेणेति ।

इदं तु विचार्यते — पक्षतावच्छेदकभेद एवांशतः सिद्धसाधनमिति यन्मणिकृतोक्तं, तन्न सङ्गच्छते । पक्षतावच्छेदकाभेदेऽपि यदि तत्सामानाधिकरण्यमात्रेण सिद्धिः साध्यस्योद्देश्या, तदैकदेशे साध्यसिद्ध्यानुमितिप्रतिबन्धादंशतः सिद्धसाधनं भवत्येव । पक्षतावच्छेदकभेदेऽपि यदि समूहालम्बनानुमितिरुद्देश्या, तदा अनुमितिरेकपक्षतावच्छेदकावच्छेदेन साध्यसिद्धावप्युत्पद्यत एवेति नांशतः सिद्धसाधनमित्यंशतः सिद्धसाधने पक्षतावच्छेदकभेदो न तन्त्रं, अन्वयव्यतिरेकव्यभिचारादिति ।

अत्र मिश्राः — सिसाधयिषागर्भपक्षतामाश्रित्य नायं विचारः, किन्तु सिद्ध्यभावांशमादाय । तत्र च समानप्रकारकसिद्धेः प्रतिबन्धकत्वात् तदभावः पक्षतात्वेन हेतुरिति वाक्त्वप्रकारकानित्यत्वज्ञानस्य जातत्वात् तत्र पक्षता नास्तीति तदंशेऽनुमितिप्रतिबन्धादंशतः सिद्धसाधनं पक्षतावच्छेदकभेदाद् भवति । पक्षतावच्छेदकाभेदे तु घटत्वेनेतरभेदज्ञानेऽपि पृथिवीत्वप्रकारकसिद्ध्यभावात् पक्षता न क्षतेति नांशतः सिद्धसाधनमिति वदन्ति । वस्तुतस्तु — पृथिवीत्वसामानाधिकरण्येन साध्यसिद्धेरुद्देश्यत्वे तस्याश्च घटादावेव जाततया सिद्धसाधनमेव, उद्देश्यांशासिद्धेः । अथ पृथिवीत्वावच्छेदेन साध्यसिद्धिरुद्देश्या, तदा तदसिद्ध्या नांशतः सिद्धसाधनमिति पक्षतावच्छेदकाभेदे उभयथाप्यंशतः सिद्धसाधनं नास्त्येव । यत्र तु पक्षतावच्छेदकावच्छेदेन साध्यसिद्धिरुद्देश्या, तादृशस्थले पक्षता-

वच्छेदकनानात्वे एकपक्षतावच्छेदकावच्छेदेन सिद्ध्यापरपक्षतावच्छेदकावच्छेदेनासिद्ध्या भवत्यंशतः सिद्धसाधनमिति पक्षतावच्छेदकनानात्वं तत्र तन्त्रमुक्तं, पक्षतावच्छेदकैक्ये सति सिद्धसाधनादेवेति दिक् ।

यच्चोक्तं मणिकृता — घटत्वेनेतरभेदनिश्चयेऽपि पृथिवीत्वेनेतरभेदसंशयो भविष्यतीति, तत् समानप्रकारकत्वेनैव संशयनिश्चययोः प्रतिबन्धकत्वमभिप्रेत्य । अत एव धूमवत्त्वेन वह्निमत्त्वनिश्चयेऽपि पर्वतत्वेन वह्निसंशय उदाहृतः । यद्यप्येवं सति घटत्वेन निश्चयानन्तरं प्रमेयघटोऽस्ति न वेति संशयापातः, एवं भूतले घट इति ज्ञानानन्तरं घटवद् भूतलं न वेति संशयापातः, निश्चयस्य भिन्नप्रकारकत्वेनाप्रतिबन्धकत्वात् । तथा च समानविषयकत्वेन प्रतिबन्धकता वाच्या । तथा च पृथिवीत्वेनापि घटे कथमितरभेदसंशयः, घटत्वेन रूपेण तन्निश्चयसत्त्वादिति । तथापि समानविषयकत्वेनापि प्रतिबन्धकताङ्गीकारे घटत्वेन निर्णयानन्तरं नीलघटत्वेन संशयो न स्यात् । तस्माद् यद्रूपेण निर्णयस्तद्रूपव्यापकत्वेन गृहीतो यो धर्मस्तदवच्छिन्नत्वेनोपस्थिते न संशय इति वाच्यम् । तथा च यत्र घटत्वव्यापकता पृथिवीत्वस्य न गृहीता, तादृशस्थले पृथिवीत्वेन संशयो भविष्यतीत्येतत्परोऽयं मणिः । अत एवेदंपर्वतत्वेन वह्निनिश्चये पर्वतत्वेन न वह्निसंशय इति सिद्धान्तः । पर्वतत्वस्य इदंपर्वतत्वव्यापकतया ग्रहात् । अत एव यदा पृथिवीत्वे घट(त्व)व्यापकतापि दैवाद् गृहीता, तत्र कथं पृथिवीत्वेन रूपेण संशय इत्याक्षेपं मनसि निधाय मणिकृता पक्षान्तरमुक्तं—यद्वा घटादिभिन्नपृथिवीत्वेन पक्षतेत्यास्तां ग्रन्थविस्तरः ।

नन्वेवमपि आकाशमितरेभ्यो भिद्यते आकाशत्वादित्यादिव्यतिरेकिणि साध्याप्रसिद्धिर्नोद्धृतैव । नहि पृथिव्येकदेशे घटादौ साध्यप्रसिद्धिवत् तत्राप्येकदेशे तथा अस्तीति चेत् । अत्र मणिकृतः — त्रयोदशान्योन्याभावात्त्रयोदशसु प्रत्येकं प्रसिद्धाः पृथिव्यादौ साध्यन्ते । यद्वा, जलं तेजःप्रभृतिद्वादशभिन्नप्रतियोगिकान्योन्याभाववद् द्रव्यत्वात् तेजोवदिति त्रयोदशभिन्नत्वस्य सामान्यतः सिद्धौ पृथिव्यां त्रयोदशभिन्नत्वं साध्यत इति न साध्याप्रसिद्धिरित्याहुः ।

अत्रोपाध्यायाः — प्रत्येकान्योन्याभावत्वमिह साध्यतावच्छेदकमुत समुदिताभावत्वम् । नाद्यः, असाधारण्याद् , जलादिभिन्नवाय्वादेः सपक्षात् पृथिवीत्वहेतोर्व्यावृत्तत्वात् । नान्त्यः, अभावसमुदायस्याप्रसिद्धत्वादिति प्रथमपक्षे दूषणं समर्पयन्ति ।

तत्र मिश्राः — साध्यतावच्छेदकावच्छिन्नसाध्यवद्व्यावृत्त्या नासाधारण्यं, किं त्वनुमितिविषयतावच्छेदकावच्छिन्नसाध्यवद्व्यावृत्त्या। तच्चेहाप्रसिद्धं, समुदितस्यानुमितिविषयस्यान्यत्राप्रसिद्धेरिति नासाधारण्यमिति भूषयन्ति। तच्चिन्तनीयम्। असाधारण्यं सत्प्रतिपक्षतया दोषावहम्। न च प्रत्येकं साध्यवद्व्यावृत्तत्वे तत् सम्भवति। अभावसमुदायरूपानुमितिविषयविरोधाभावादिति खलु मिश्राणामभिसन्धिः। स चायुक्तः। प्रत्येकं साध्यवद्व्यावृत्त्या प्रत्येकसाध्याभावसिद्धिसामग्र्या मिलितसाध्यसिद्धेः प्रतिबन्धनियमात्। समुदायाभावज्ञानस्य समुदायज्ञानविरोधित्वात्। किं बहुना, प्रत्येकसाध्यसाधने मिलितसिद्धिवत् प्रत्येकसाध्यवद्व्यावृत्त्या प्रत्येकाभावे साध्यमाने मिलिताभावसिद्धिरप्यनुमितिविरोधिनी दुर्वारैवेति नायं पन्थाः। तस्मादसाधारण्यं दशाविशेषे दोष इतीह विशेषदर्शनसत्त्वान्न तदवतार इत्येव समाधानम्।

वस्तुतस्तु — स्वस्वाधिकरणस्थितानामेव जलादिभेदानां त्रयोदशत्वं गृहीत्वा त्रयोदशत्वावच्छिन्नभेदाः पृथिव्यां साध्यन्ते। त्रयोदशत्वावच्छिन्नभेदवत्तया च न जलादेर्ज्ञानं, तद्भेदस्य तत्राज्ञानादिति नासाधारण्यम्। अत एव व्यतिरेकव्याप्तिग्रहोऽपि नानुपपन्नः। जलादौ व्यासज्यवृत्तित्रयोदशत्वरूपधर्मावच्छिन्नभेदाभावस्य सत्त्वात्। व्यासज्यवृत्तिधर्मस्य यत्किञ्चिदाश्रयासत्त्वेन सत्त्वाज्जलादौ स्वभेदाभावेन विशिष्टाभावसत्त्वात्। अत एव च नान्वयित्वशङ्कापि, त्रयोदशत्वावच्छिन्नभेदवतः सपक्षस्याभावादिति युक्तमुत्पश्यामः। यद्वेति द्वितीयपक्षे यद्यपि जलं तेजःप्रभृतिद्वादशभिन्नप्रतियोगिकान्योन्याभाववदित्यनेन पृथिव्यन्योन्याभावो जले सिध्यति, न तु जलान्योन्याभावः पृथिव्यामित्युद्देश्यासिद्धिः, तथापि तेजःप्रभृतिद्वादशभिन्ननिष्ठान्योन्याभावप्रतियोगित्वं तदर्थ इति भवति पृथिव्यां जलभेदस्यापि सिद्धिरिति मिश्राः।

वस्तुतस्तूक्तानुमानानन्तरं यद् यद्भिन्नं, तत् तन्निष्ठभेदप्रतियोगीति ज्ञानसहितेन मनसोत्तरकालं जलभेदोऽपि पृथिव्यां गृह्यत इति मणिकृदाशयः। वस्तुतस्तु इतरे भेदप्रतियोगिनः मेयत्वादित्यनुमानेन लाघवादेकभेदप्रतियोगित्वं विषय (इति) इतरत्वावच्छिन्नभेदः सामान्यतः प्रसिद्धः पृथिव्यां साध्यत इति न कोऽपि दोष इति प्रतिभाति।

प्राञ्चस्तु — अभावसाध्यको व्यतिरेकी क्वचित् साध्यप्रसिद्धिं विनापि सा-

धयितुं शक्यते, यत्र भावः सुप्रसिद्ध इतीहापीतरतादात्म्यजलत्वादिव्यापकतया पृथिवीत्वाभावग्रहात् तदभावरूपेण पृथिवीत्वेन तद्भेदः पूर्वाप्रसिद्ध एव सिध्यति, सामग्री(स)त्त्वादिति नान्वयित्वं, नासाधारण्यं, न व्याप्तिग्रहानुपपत्तिर्वेति वदन्ति।

अत्रेदं विचार्यते — इतरतादात्म्यजलत्वादिव्यापकतया हेत्वभावग्रहाद् हेतुना जलत्वा(द्य)त्यन्ताभावसिद्धिरस्तु। जलाद्यन्योन्याभावसिद्धिस्तु कुतः। व्यापकाभावेन व्याप्याभावस्यैव सिद्धेः, वह्न्यभावेन धूमाभाववादिति।

अत्रोपाध्यायाः — जलत्वाद्यत्यन्ताभाव एव जला(द्य)न्योन्याभावः, न तु भिन्नः, प्रमाणाभावात् कूपेनैव धर्मात्यन्ताभावेन धर्म्यन्योन्याभावबुद्ध्युपपत्तौ तन्नियामकधर्म्यन्तरकल्पनागौरवाच्चेति।

अत्र मिश्राः — धर्म्यन्योन्याभावधर्मात्यन्ताभावयोरैक्यं न घटते। तथा सति घटे पटत्वं न, घटः पटो न इति प्रतीत्योर्वैचित्र्यं न स्याद्, विषयभेदाभावात्। किञ्च, वायौ रूपात्यन्ताभावः प्रत्यक्षः, रूपवदन्योन्याभावस्तु न प्रत्यक्षः, अन्योन्याभावे योग्याधिकरणत्वस्य योग्यतावच्छेदकत्वादिति स्वोक्तिविरोधः। एकस्य योग्यत्वायोग्यत्वयोर्विरोधात्। अपि चैवं सति घटत्वात्यन्ताभावधीर्न स्याद्, घटत्वत्वरूपप्रतियोगितावच्छेदकप्रकारकधीसाध्यत्वात्। तस्य च घटेतरावृत्तित्वघटितस्य घटत्वात्यन्ताभावधीसाध्यतयात्माश्रयाज्ज्ञातुमशक्यत्वादिति समादधते।

अत्रेदं शङ्क्यते — घटे पटत्वं नेत्यत्र पटत्वसंसर्ग आरोप्यः। घटः पटो नेत्यत्र तु पटत्वमेव तादात्म्यरूपमारोप्यमित्येव भेदः। न त्वभावांशेऽपि भेदः। किञ्च, घटान्योन्याभावाभावो घटत्वमिति त्वयाप्युररीक्रियते। तथा च यो यदभावः स तदभाव इति व्याप्त्या घटत्वप्रतियोगिकत्वं तद्वदन्योन्याभावेऽवश्यमभ्युपेयमेवेति प्रतीतिर्वैचित्र्यं यथाकथञ्चित् समर्थनीयम्। यच्च वायौ रूपवदन्योन्याभावाप्रत्यक्षत्वेन स्वोक्तिविरोध इत्युक्तम्। तदपि न। अन्योन्याभावत्वप्रकारकप्रतीतावधिकरणयोग्यतायास्तन्त्रत्वस्य मयाङ्गीकाराद् वायौ रूपवदन्योन्याभावत्वप्रकारकप्रतीतिर्नास्तीति तद्ग्रन्थार्थाद् विरोधगन्धाभावात्। यच्चोक्तं घटत्वात्यन्ताभावधीर्न स्यादेवमिति। तदपि न। घटत्वात्यन्ताभावत्वप्रकारकज्ञान एव घटत्वत्वज्ञानस्य हेतुतया घटत्वविशिष्टज्ञानाद् घटान्योन्याभावत्वप्रकारकप्रतीत्यनन्तरं घटेतरत्वघटितघटत्वत्वज्ञानसम्भवेन घटत्वात्यन्ताभाव(त्व)प्रकारकप्रतीतेरुपपत्तेः। किं बहुना, प्रतियोगितावच्छेदकप्रकारकज्ञानमेवाभावधियं जनयतीति न नियमः। तथा सति प्रमे-

यमिह नेति मत्यनापत्तेः । किन्तु सप्रकारकप्रतियोगिज्ञानमभावधीहेतुः । तथा च घटवृत्तित्वादिरूपातिप्रसक्तधर्मप्रकारकघटत्वज्ञानादपि घटत्वात्यन्ताभावधीः सम्भवतीति न घटेतरावृत्तित्वज्ञानं नियमतोऽपेक्ष्यत इत्यलमतिविस्तरेणेति ।

अत्र नव्याः — यदि धर्मात्यन्ताभावधर्म्यन्योन्याभावयोरैक्यं, तदा वृक्षे संयोगाभाववत् संयोगवदन्योन्याभावोऽप्यस्तीति भेदाभेदापत्त्या सिद्धान्तव्याकोपः, भेदस्य स्वरूपभेदव्याप्यतया तस्य द्वित्वादिसङ्ख्योत्पत्तिनियामकतया द्वाविति बुद्धिप्रसङ्गश्चेति वदन्ति । तच्चिन्त्यं — सिद्धान्तव्याकोपस्यापि युक्त्यभावेन धर्मिद्वयकल्पनागौरवेण च सोढव्यत्वात् । अत्यन्ताभावविशेषवदन्योन्याभावविशेषस्यैव स्वरूपभेदव्याप्यत्वाच्चैकस्मिन् वृक्षे द्वित्वाद्यनुत्पत्तेरित्यस्यापि वक्तुं शक्यत्वादिति ।

अत्रेदं प्रतिभाति — वस्तुभेदे सर्वत्र प्रतीतिरेव प्रमाणम् । सा च यथा घटपटयोरयं घटः, अयं पट इत्याकारा विलक्षणेति तयोर्भेदः, तथा घटत्वात्यन्ताभावे घटत्वप्रतियोगिकतया घटान्योन्याभावे घटप्रतियोगिकतयानुभूयमाने विलक्षणेति कथं तयोर्न भेदः । अन्यथा घटप्रतियोगित्वानुभवो भ्रा(न्तः? न्तिः) स्यात् । न चेष्टापत्तिः । प्रमात्वेनैवोपपत्तौ भ्रमत्वाकल्पनात् । न चात्यन्तान्योन्याभावयोर्धर्मिणोर्भेदकल्पनागौरवात् प्रतीतेर्भ्रमत्वं कल्प्यमिति वाच्यम् । एवं सति घटपटयोरपि भेदो न स्याद्, वैलक्षण्यप्रतीतेरुक्तक्रमेण भ्रमत्वकल्पनात् । धर्मिद्वयकल्पनागौरवस्य प्रतीतिबलात् प्रामाणिकत्वमिति यदि, तदा प्रकृतेऽपि तुल्यम् । न च यो यदभावः स तदभाव इति व्याप्त्या घटत्वाभावो घटान्योन्याभाव इति वाच्यम् । तादात्म्यसम्बन्धावच्छिन्नघटस्यैव घटान्योन्याभावाभावरूपतया घटत्वस्य तदभावरूपत्वाभावात् । किञ्च, सहभावनियतधर्मात्यन्ताभावधर्म्यन्योन्याभावयोरैक्ये तथाभूतवस्तुद्वयोच्छेदः सर्वत्र प्रसज्येत । विलक्षणप्रतीत्योरपि त्वदुक्तरीत्या ध(र्मै?र्मि)द्वयकल्पनागौरवेण वस्तुद्वयाव्यवस्थापकत्वात । व्यवस्थापकत्वे प्रकृतेऽपि स्यादिति दिक् ।

नन्वेवं सति प्रकृते कथं जलाद्यन्योन्याभावसिद्धिरित्याक्षेपस्य कथं परिहार इति चेद्, इत्थं — तादात्म्यरूपसम्बन्धेनेतरं प्रति व्यापकतया पृथिवीत्वाभावग्रहात् तदभावरूपेण पृथिवीत्वेन तादात्म्यसम्बन्धावच्छिन्नेत(र? रा)भावस्य सिद्धेः । यत्सम्बन्धावच्छिन्नव्यापकतया यद्ग्रहः, तत्सम्बन्धावच्छिन्नाभावस्यैव तदभावेनानुमितेः स एवान्योन्याभाव इति नानुपपत्तिः । किञ्च, यद्व्यापकतया

हेत्वभावग्रहः, तद्विरोध्यभावस्तद्धेतुना सिध्यतीति प्रत्यक्षमणिसारे व्युत्पादितम् । तथा च जलत्वा(द्य)त्यन्ताभाववद् जलाद्यन्योन्याभावोऽपि जलत्वादिविरोध्यवश्यं सिध्यतीति सङ्क्षेपः । व्यतिरेक्युदाहरणस्थलान्तरं चातिविस्तारभिया नेह विशिष्य विविच्यत इति वेदितव्यम् ॥

इति व्यतिरेकिग्रन्थः ।

अथार्थापत्तिनिरासः ।

एवं व्यतिरेकिणि निरूपितेऽर्थापत्तिर्नानुमानान्तर्भूतेति भट्टादिमतमपास्तम् । अर्थापत्तेरपि केवलव्यतिरेक्यनुमानरूपत्वात् । नन्विदमयुक्तं — ज्योतिःशास्त्रोदितलिङ्गादिना देवदत्तः शतवर्षजीवीति ज्ञात्वा प्रत्यक्षेण जीवी गृह एवेत्यवधार्य योग्यानुपलब्ध्या च गृहे नास्तीति यत्र निश्चितं, तत्र जीवित्वग्राहकगृहसत्त्वनियमग्राहकप्रमाणयोर्विरोधे इदं वा प्रमाणमिदं वेति संशयात् स जीवति न वेति संशयः, तदनन्तरं जीवनकल्पने लाघवावतारे ज्योतिःशास्त्रप्रामाण्यरक्षादिरूपतर्कावतारे च जाते जीवनोपपादकबहिःसत्त्वं तत्र कल्प्यते । तत्र प्रमाणसहकारिता तर्कस्य, तच्चान्यत्रेति प्रमाणद्वयविषयकप्रामाण्यसंशयस्य तज्जन्यजीवनादिसंशयस्य वा सहकारी स इति संशयकारणिकार्थापत्तिरवश्यमङ्गीकार्या, अनुमितिसामग्रीविरहादिति चेत् । अत्र वदन्ति — 'प्रमाणयोरनयोरेकं बाध्यं, विरुद्धार्थग्राहित्वादि'ति सामान्यतो दृष्टमवश्यमुभयसिद्धावतारमुररीकार्यम् । अन्यथार्थद्वयकल्पनाप्रसङ्गात् । तथा चात्रानुमाने जीवनतर्कादिसहकृते गृहनियमग्राहिणो बाध्यत्वं विषय इति निष्परिपन्थिजीवनग्राहिप्रमाणाज्जीवित्वलिङ्गनिश्चयाद् अनुमान एव बहिःसत्त्वं ज्ञायते देवदत्तो बहिरस्ति जीवित्वे सति गृहासत्त्वादिति (कथ?कृत)मर्थापत्त्या ।

नन्वनयोरेकं प्रमाणमिति ज्ञानानन्तरं जीवनादिसंशयानन्तरं च यत्र तर्कावतारस्तत्र तदा सामान्यतो दृष्टावतारस्य नष्टत्वात् संशयसहकार्येव तर्क इति कुतो नार्थापत्तिर्मानमिति चेद्, न । संशयानन्तरमपि तर्कावतारो विमर्शसाध्य इति किञ्चिद् विलम्बावश्यकत्वे पुनः संशयस्त्वयापि कल्प्यः । तद् वरं कृतप्रमाणभावस्य सामान्यतो दृष्टस्यैवावतारः कल्प्यतां, किमर्थापत्त्या मानान्तरेण ।

एवमनुपपत्तिकर(णता?णा)प्यर्थापत्तिरपास्ता । जीविनो गृहासत्त्वं बहिःसत्त्वं विनानुपपन्नं तत् कल्पयतीति हि सा । सा च पूर्वानुमानेनैव गतार्था । ननु गृहेऽभावनिश्चयो बहिःसत्त्वं देवदत्ते कथमनुमापयतु, व्यधिकरणत्वात् । पक्षधर्मताज्ञानस्यानुमापकतायां तन्त्रत्वात् । न च गृहनिष्ठाभावप्रतियोगित्वं देवदत्तवृत्ति तत्र बहिःसत्त्वानुमापकमिति वाच्यम् । तस्य ग्रहणानियमादिति चेद् । अत्राहुः — गृहे देवदत्तस्याभाव इति ज्ञाने षष्ठ्यर्थसम्बन्धस्य प्रतियोगित्वस्य प्रकारतया गृहनिष्ठाभावप्रतियोगित्वस्य लिङ्गस्यावश्यमुपस्थानादनुमानप्रवृत्तिरिति न सामग्रीदुर्भिक्षमिति नार्थापत्तिस्तद्बहिर्भूतेति ।

अत्रेदमालोचयामः — गृहे देवदत्तस्याभाव इत्यत्र षष्ठ्यर्थप्रतियोगित्वरूपसम्बन्धभानेऽपि प्रतियोगित्वत्वभाने मानाभावः । षष्ठ्याः सम्बन्धत्वेनैव सम्बन्धोपस्थापकत्वात् । अन्यथा नानार्थत्वप्रसङ्गात् । किञ्च, गृहे देवदत्तो नेति ज्ञानस्थलेऽनुमितिसामग्र्यसम्भव एव । संसर्गमर्यादया प्रतियोगित्वरूपलिङ्गस्य भानेऽपि प्रतियोगित्वत्वरूपलिङ्गतावच्छेदकप्रकारकज्ञानस्यानुमितिहेतोरसम्भवात् । न च बहिःसत्त्वं विना गृहनिष्ठाभावप्रतियोगित्वमनुपपन्नमिति ज्ञानमर्थापत्तिवादिनापि हेतुतया वाच्यं, तथा च प्रतियोगित्वत्व(रूप?)प्रकारकज्ञानमुभयसमाधेयमिति वाच्यम् । गृहे देवदत्ताभावो देवदत्ते बहिःसत्त्वं विनानुपपन्न इति ज्ञानस्यार्थापत्तिवादिना हेतुत्वेनाङ्गीकारेण तन्मते प्रतियोगित्वत्वप्रकारकज्ञानानावश्यकत्वात् । न च संसर्गमर्यादया प्रतियोगित्वभानानन्तरं मानसं तत्प्रकारकज्ञानमस्तु, प्रमाणान्तरकल्पनातो लाघवादिति वाच्यम् । सामग्रीबलेन प्रमाणान्तरसिद्धावीदृग्गौरवस्य फलमुखत्वेनादोषत्वात् । अन्यथोपनीतभानेनान्यथासिद्धमनुमानमपि मानान्तरं न स्यात् । अनुमिनोमीत्यनुव्यवसायवदर्थापयामीत्यनुव्यवसायस्यात्रापि सत्त्वात् । एवञ्च यदोपरि सविता तदा भूमेरालोकवत्ता, यदा नद्यां पूराधिक्यं तदा तत्पूर्वदेशे वृष्टिरित्यादिसर्वमर्थापत्तिरेव । व्यधिकरणेनानुपपत्तेरर्थापत्तित्वात् । अत्र च सामानाधिकरण्यज्ञानाजन्यतयानुमितित्वजातेरभावात् । एवमिह साध्याधिकरणवृत्तिताज्ञानमनपेक्षितमित्यनुमित्यपेक्षया वैलक्षण्यम् । तस्मादनुमानं *सामानाधिकरण्येनावश्यम्भावधीः, अर्थापत्तिश्च व्यधिकरणेनावश्यम्भावधीरिति परस्परवैलक्षण्यात् तयोर्वैलक्षण्यमिति पृथक् प्रमाणमेवार्थापत्तिरिति ।

---

* 'समानाधिकरणेन' इति वा स्यात् ।

अत्रेदं तत्त्वम् — अनुमितिस्थलेऽप्यवश्यम्भावधीर्हेतुरस्तु, न तु सामानाधिकरण्यधीः । तथा चानुमितिवैलक्षण्यं नागतमेवेति न पृथक् प्रमाणमेवार्थापत्तिः । यत्राधिकरणे यत्सत्ता यत्र यत्सत्तां विना न सम्भवति, तदधिकरणे तज्ज्ञानं तस्मिन्नधिकरणे तत्सत्त्वं ज्ञापयतीत्येव समानाधिकरणव्यधिकरणानुपपत्तिसाधारणमनुमितिकारणमिति सर्वत्राप्यनुमितेरेवोदयात् । भूमावालोक उपरि सवितारं विनानुपपन्नः तं व्यधिकरणमेव गमयति, धूमस्तु स्वाधिकरणे धूमध्वजं विनानुपपन्नः तत्र स्वाधिकरणे तं बोधयति । उक्तसामग्र्या उभयसाधारण्यात् । यदि च सामानाधिकरण्यधीहेतुत्वे दुराग्रहः, तदापि नानुपपत्तिः । साक्षात्परम्परासाधारणसम्बन्धेन सर्वत्र तत्सत्त्वात् । न चातिप्रसङ्गः । यत्राधिकरणे यत्सत्त्वमित्याद्युक्तविशेषसामग्रीत एव तद्बुद्धात् । नहि पर्वते वह्निं न साक्षात्करोमीतिवद् अत्र नानुमिनोमीत्यनुव्यवसाय इति जिगीषामन्तरेण वक्तुं शक्यते, येनात्रापि यथाकथञ्चिन्मानवैलक्षण्यं कल्पनीयमिति युक्तमुत्पश्यामः ।

इत्यर्थापत्तिनिरासः ।

अथ न्यायलक्षणम् ।

तच्चेदमनुमानं पराहङ्कारशामकं न्यायतदवयवद्वारेति न्यायस्तदवयवाश्च निरूप्यन्ते — तत्रानुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञान(जन)कवाक्यं न्याय इति मणिकृतः ।

अत्र मिश्राः — अनुमितौ कर्तव्यायां स्वोत्तरोत्पत्तिकज्ञानान्तरानपेक्षत्वं तच्चरमकारणत्वं, तद्वान् यः परामर्शः, तज्जनकजनकं यच्छाब्दज्ञानं, तज्जनकवाक्यत्वं लक्षणार्थः । तेन परामर्शे जातेऽपि कामिन्याद्युत्कटवस्तुजिज्ञासायामनुमित्यनुत्पादाद् नानुमितिचरमकारणं तदिति दूषणं परास्तम् । प्रतिबन्धकाभावापेक्षणेऽप्युक्तचरमकारणत्वस्य तत्राबाधात् । अनुमितिचरमकारणपदप्रयोजनं चोपनयान्ते चतुरवयवे न्यायत्वं मा प्रसाङ्क्षीदित्येतदर्थम् । अनुमितिचरमकारणत्वं च तत्र नास्ति, अबाधितत्वाद्यविषयकत्वाच्चतुरवयवप्रयोज्यपरामर्शस्य । अबाधितत्वादिविषयकस्यैव तस्य चरमकारणत्वात् । चरमकारणता च परामर्श-

स्यैवेति तदुपात्तं, न तु तद्व्यवच्छेदक(त्व?)म्। तज्जनकजनकतापर्यन्तमसम्भवापनुत्तये। अन्यथानुमितिचरमकारणपरामर्शजनकीभूतं मानसज्ञानं, शाब्दं नेति तज्जनकवाक्यत्वमसम्भव्येव स्यात्। यथा च शाब्दज्ञानमेवाहृत्य चरमकारणपरामर्शं जनयति, तथा वक्ष्यते। शाब्दज्ञानपदं तु 'नायमाभासः, तल्लक्षणायोगादि'ति न्यायबहिर्भूतकण्टकोद्धारवाक्यातिव्याप्तिवारणाय। तदपि चरमकारण(क?)परामर्शजनक(जनक)योग्यताजनकमेव। न च शाब्दमपि तज्ज्ञानं भवत्येवेत्यतिव्याप्तिस्तदवस्थैवेति वाच्यम्। शाब्दज्ञानत्वेन तत्प्रयोजकत्वस्य विवक्षितत्वात्। न्यायजन्यज्ञानस्य शाब्दज्ञानत्वेनैव तथात्वात्। कण्टकोद्धारजन्यज्ञानस्य च योग्यताज्ञानत्वेनैव तत्प्रयोजकत्वाच्छाब्दमशाब्दं वा भवत्वित्यत्र न कश्चिद् विशेषः। वाक्यपदं चातोक्ते वह्निव्याप्यवानयमबाधितामिरिति वाक्यावयवावयवेऽतिव्याप्तिवारणाय। तदर्थश्च वाक्यान्तराघटकवाक्यत्वमिति नातिव्याप्तिः। नन्वेवमपि, पर्वते वह्निः, धूमो यतः, धूमश्च वह्निमन्मात्रवृत्तिः, अतस्तादृशधूमे पर्वतवृत्तित्वं, तस्मादस्ति पर्वते वह्निरित्यादिन्यायसमानार्थकन्यायानात्मक(त्व?)वाक्येऽतिव्याप्तिरिति चेद्, न। तत्र सर्वसम्प्रदायमवमत्यानेन कृत इत्थं प्रयोग इति विरोधिजिज्ञासया परामर्शानुत्पादात् तत्प्रयोजकत्वगर्भलक्षणाभावेनातिव्याप्तिनिरासादिति तात्पर्यं वर्णयन्ति।

अत्र नव्याः — न्यायजन्यज्ञानस्यापि विशेषणज्ञानत्वेनैव परामर्शं प्रति प्रयोजकत्वं, न तु शाब्दत्वेनेत्यसम्भवः। न चान्वयव्यतिरेकाभ्यां वादिनस्तथाविधपरामर्शं प्रति शाब्दत्वेनैव प्रयोजकत्वम्। तथा सति कृतसमयवाद्युक्तप्रयोगप्रयोज्यपरामर्शं प्रति कण्टकोद्धारजन्यज्ञानस्यापि शाब्दज्ञानत्वेनैव प्रयोजकत्वमित्यतिव्याप्तितादवस्थ्यात्। किञ्च, पर्वते वह्निः, धूमो यत इत्यादिन्यायसमानार्थके वाक्येऽतिव्याप्तिस्तदवस्थैव। न च प्रागुक्तरीत्या तद्वारणम्। सभाक्षोभादिना तादृशसंप्रदायविस्मरणे विरोधिजिज्ञासानुत्पादेन तादृशवाक्यस्यापि परामर्शप्रयोजकशाब्दज्ञानजनकतानपायादतिव्याप्तेर्वज्रलेपत्वादिति।

अत्रेदं प्रतिभाति — सम्प्रदायाभिज्ञासम्भ्रान्तवादिप्रयोगप्रयोज्यपरामर्शत्वावच्छिन्नप्रयोजकं यच्छाब्दज्ञानं, तज्जनकवाक्यत्वं विवक्षितम्। कण्टकोद्धारवाक्यं तु न तथा। समयमन्तरेण वादप्रवृत्तौ तज्जन्यशाब्दज्ञानं विनाप्युक्तपरामर्शोत्पत्त्योक्तपरामर्शत्वावच्छिन्नप्रयोजकज्ञानजनकताविरहात्। एवं न्यायसमाना-

र्थकवाक्येऽप्यतिव्याप्तिरपास्ता। सम्प्रदायाभिज्ञासम्भ्रान्तस्य तादृशवाक्यश्रवणाद् विरोधिजिज्ञासया परामर्शानुत्पादात्। अत एवाबाल्यं न्यायसमानार्थकवाक्य एव व्युत्पन्नो यस्तस्य विरोधिजिज्ञासानुत्पत्त्यातिव्याप्तिरिति निरस्तम्। तस्य सम्प्रदायानभिज्ञत्वात्। तत् प्रति तन्न्यायत्वस्येष्टापत्तिपराघातादापादयितुमशक्यत्वादित्यपि कश्चित्।

इदं तु शङ्क्यते — तादृशपरामर्शप्रयोजकत्वं फलोपधानं स्वरूपयोग्यता वा। नाद्यः। दैवात् प्रतिबन्धादिवशाद् यत्र न परामर्शोत्पादः, तत्र न्यायलक्षणाव्याप्तेः। नान्त्यः। स्वरूपयोग्यतावच्छेदकापरिचयात्। परिचये च तदेव लक्षणमस्तु। किमनेन। किञ्च, प्रतिज्ञादिष्ववयवेष्वतिव्याप्तिः। वाक्यसमुदायरूपस्य न्यायस्य समुदायिप्रतिज्ञाद्यनतिरिक्तत्वात्, तज्जन्यज्ञानस्य प्रतिज्ञादिजन्यत्वादिति।

अत्र ब्रूमः — वाद्युक्तप्रयोगस्थलीयपरामर्शव्यतिरेकप्रयोजकव्यतिरेकप्रतियोगिज्ञानजनकतापर्याप्त्यधिकरणत्वं विवक्षितम्। तच्च क्वचित् परामर्शानुत्पादेऽप्यस्त्येवेति नाव्याप्तिः। प्रत्येकावयवानां च तादृशज्ञानजनकतापर्याप्त्यधिकरणत्वं नास्तीति न प्रत्येकावयवातिव्याप्तिरिति दिक्। एतल्लक्षणेन प्रतिज्ञादिवाक्यपञ्चकत्वमुपलक्ष्यत इति केचित्। तन्न। प्रतिज्ञादिवाक्यस्य न्यायघटितत्वेनात्माश्रयादिदोषप्रसङ्गात्। आकाङ्क्षा(प्र!)क्रमोक्तवाक्यपञ्चकत्वमुपलक्ष्यत इत्यपरे। तदपि न। पर्वते वह्निरित्यादिवाक्यपञ्चकातिव्याप्तेः, प्रतिज्ञावाक्यस्याकाङ्क्षाक्रमं विनाप्यभिधानाच्चेति।

ननु न्यायजन्यज्ञानं साक्षादेवानुमितिचरमकारणपरामर्शं जनयतु, किं मध्ये ज्ञानान्तरेण। एवं च लक्षणे जनकत्वमेव प्रवेशयितुमुचितं, न तु जनकजनकत्वमिति चेद्। अत्र मिश्राः — न्यायजन्यज्ञानस्य वादिवाक्यजन्यतया नित्यमप्रामाण्यशङ्काकलङ्कितत्या विशिष्टवैशिष्ट्यबोधे न सामर्थ्यमिति तेन पदार्थोपस्थितिरूपेण धूमविशिष्टे वह्निवैशिष्ट्यमित्यादिज्ञानं व्याप्त्यादिविषयकं जन्यते। तेन विशिष्टवैशिष्ट्यावगाहिपरामर्श उत्पद्यत इति न्यायजन्यज्ञानं परामर्शप्रयोजकमेव न तु तज्जनकमिति नानुपपत्तिरिति वदन्ति।

अत्र शङ्क्यते — अप्रामाण्यसंशयोऽपि धर्मिज्ञानकोट्युपस्थित्यादिसाध्यतया सर्वत्र नावश्यक इति यत्रैव न धर्म्यादिधीः, तत्र तदभावेन न्यायजन्यज्ञाना-

दनुमितिचरमकारणपरामर्श एव साक्षादुत्पाद्यतां, किमन्तरा विशिष्टवैशिष्ट्यानवगाहिपरामर्शस्वीकारेण । न चैवं शाब्दपरामर्श एवानुमितिहेतुरस्तु । व्याप्तिविशिष्टलिङ्गे पक्षवैशिष्ट्यावगाहिपरामर्शस्यानुमितिहेतोः शाब्दरूपत्वाभावान्मानसपरामर्शस्वीकारात् । उदाहरणोपनीतव्याप्तेरुपनयोपनीतपक्षधर्मतायाश्चैकत्र द्वयमिति न्यायेन न्यायजन्यपरामर्शेन विषयीकरणात् तस्य विशिष्टवैशिष्ट्यानवगाहित्वात् । न चोपनयावयवोपनीतव्याप्तिविशिष्टपक्षधर्मत्वं कुतो न विषयीकरोति तदिति वाच्यम् । उपनयस्योदाहरणोपनीतव्याप्त्यंशेऽनुवादरूपतया तदुपनायकत्वाभावात् । अननुवाद्यस्य वाक्योपनेयत्वाद् इत्युपाध्यायमतमेव रमणीयामिति ।

अत्रेदं प्रतिभाति — न्यायजन्यज्ञानेऽप्रामाण्यशङ्काविरहे तत एवानुमित्युत्पत्तौ मानसः परामर्शः सर्वथा व्यर्थ एव । न चोक्तगत्या तत्सार्थकता । अवान्तरवा(क्यस्यो?क्यार्थस्यो)पस्थितत्वमात्रस्यैव महावाक्यार्थबोधविषयतायां तन्त्रत्वाद्, अननुवाद्यत्वस्य तत्प्रवेशे गौरवात् । न चैवमनुवाद्यस्यापि वाक्यप्रतिपाद्यत्वे 'लोहितोष्णीषा ऋत्विजः प्रचरन्ती'त्यत्र लौहित्यवदुष्णीषस्यापि सोष्णीषा इति वाक्यान्तरप्राप्तस्य प्रतिपाद्यत्वापत्तिरिति वाच्यम् । लोहितोष्णीषा इति वाक्यजन्यप्रतीतिविषयत्वस्य प्रतिपाद्यत्वस्य लौहित्यवदुष्णीषेऽपि सत्त्वेन तदापादनस्येष्टापत्तिपराहतत्वात् । तद्वाक्यतात्पर्यविषयत्वलक्षणप्रतिपाद्यत्वस्य त्वन्यतः प्राप्ते उष्णीषे लौहित्यवदभावात् । तस्मादुपाध्यायमतं न साधु । मिश्रमतमप्यप्रामाण्यशङ्काक्रान्तत्वस्य परामर्शेऽनावश्यकतया क्वाचित्कपरमेव । तथा च क्वचिन्न्यायजन्यपरामर्शात् साक्षादेवानुमितिहेतुपरामर्शोत्पत्तिः, क्वचिन्मध्यवर्तिमानसपरामर्शजनकद्वारा । तथा चानुमितिचरमकारणपरामर्शव्यतिरेकप्रयोजकव्यतिरेकप्रतियोगित्वं जनकजनकसाधारणं लक्षणं विवक्षितमिति पक्षधरमिश्राभिप्रायः ।

नन्वेवमपि, यत्राप्रामाण्यशङ्काविरहेण न्यायजन्यपरामर्शादेवानुमितिः, तत्र न्याये लक्षणमिदमव्याप्तमेवेति चेद्, अत्र ब्रूमः — वादिप्रतिवाद्यापन्नानुमितित्वावच्छिन्नं प्रति जनकत्वप्रयोजकत्वान्यतरवद् यच्छाब्दज्ञानं, तज्जनकत्वस्य लक्षणार्थत्वात् । तच्च साक्षादनुमितिजनकत्वात् तज्जनकपरामर्शप्रयोजकत्वाद् वेति न किञ्चिदनुपपन्नम् । नव्यास्तु — शब्दपरामर्शस्याबाधितत्वादिविषयकत्वाभावेन ततो नानुमितिः, किन्तु मानसोऽबाधितत्वादिविषयकपरामर्शोऽवश्यं वाच्य एवेत्याहुः ।

इदं तु विचार्यते — ईश्वरास्तित्वज्ञानवतो नैयायिकस्य तन्नास्तित्वबोधकवादिवाक्यादन्वयबोध एव न, अयोग्यतानिर्णयमत्त्वात् । तथा च शाब्दज्ञानजनकत्वं कथं न्यायलक्षणमिति ।

अत्रोच्यते — मदीयं येनेश्वरसत्त्वज्ञानं प्रमाणेन जनितं, तदेतदीयनास्तितावोधकप्रमाणाद् दुर्बलं बलीयो वेति संशयेनाहितात् स्वज्ञानाप्रामाण्यसंशयादास्कन्दितं तदयोग्यताज्ञानं शाब्दज्ञानप्रतिबन्धाय न प्रभवतीति शाब्दज्ञानं न्यायवाक्यादुत्पद्यत एव । बाधकाभावात् ।

नव्यास्तु — बाधस्यानाहार्यज्ञानविरोधितया प्रत्यक्षादिवदनाहार्यशाब्दादिविरोधित्वेऽपि वादिवाक्यादाहार्यशाब्दज्ञाने बाधकाभावः । एवं सत्प्रतिपक्षादावप्याहार्यानुमितिद्वयमुत्पद्यत एवेति समादधते ।

नन्विदमनुपपन्नम् । प्रत्यक्षे भिन्नरूपेण बाधस्य विरोधित्वमिति तत्रानाहार्यप्रत्यक्षत्वस्य तत्प्रतिबध्यतावच्छेदकत्वेऽपि परोक्षत्वरूपबाधसामान्यप्रतिबध्यतावच्छेदकेऽनाहार्यत्वविशेषणे मानाभावात् कथमाहार्यं परोक्षं बाधे सत्युत्पद्यतामिति चेद्, अत्र प्रतिभाति — साक्षात्का(रि?र)निर्णये साक्षात्का(रि?र)बाधत्वेन, साक्षात्का(रि?र)निर्णयान्यज्ञाने बाधत्वेनावश्यं प्रतिबन्धकता वाच्या । अन्यथा संशयसाधारणप्रतिबध्यतावच्छेदकालाभप्रसङ्गात् । तत्र विरोधिज्ञानमात्रस्यानुमित्यादिवत् प्रतिबन्धकत्वात् प्रत्यक्षान्तरसाधारण्यविरहात् । तथा चा(हा)र्यसंशयानुरोधाद् द्वितीयप्रतिबध्यतावच्छेदकेऽप्यनाहार्यत्वविशेषणमावश्यकमिति बाधे सत्यप्याहार्यशाब्दज्ञाने बाधकाभाव इति ।

इदं तु चिन्त्यं — शाब्दज्ञानं प्रति योग्यताधीर्हेतुरिति कथमयोग्यतानिर्णये सति शाब्दधीः, योग्यताज्ञानविरहात् । न चाहार्ययोग्यताज्ञानादेवाहार्यशाब्दधीरिति वाच्यम् । विशेषसामग्रीकल्पने मानाभावात् । फलस्याप्यनिर्णयात् । न च लाघवाद् योग्यताज्ञानमेव हेतुः, तच्चाहार्यसाधारणमिति वाच्यम् । एवं सत्याहार्ययोग्यतानिर्णयादनाहार्यशाब्दधीप्रसङ्गात् । तस्मादाहार्यनिर्णयभिन्नयोग्यताज्ञानत्वेनानाहार्यशाब्दधीहेतुत्वमङ्गीकार्यम् । तत्र लाघवाच्छाब्दधीत्व मेव तत्कार्यतावच्छेदकमस्तु । न त्वाहार्ययोग्यताज्ञानत्वेनाहार्यशाब्दज्ञानहेतुता, प्रमाणाभावाद् गौरवाच्चेति दिक् ।

अनुमितिचरमकारणपरामर्शप्रयोजकशाब्दज्ञानजनकत्वरूपयोग्यतावच्छेद-

कावाच्छिन्नवाक्यत्वं लक्षणम् । तच्च बाधादिवशादजनितान्वयबोधेऽप्यस्त्येवेति नानुपपत्तिः । योग्यतावच्छेदकं तु प्रतिज्ञादिपञ्चकगोचरधीविशेष्यतापर्याप्त्याधिकरणत्वमिति वस्तुगतिरिति सङ्क्षेपः ॥

इति न्यायलक्षणम् ।

अथावयवलक्षणम् ।

अवयवलक्षणं तु न्यायजन्यज्ञानजनकशाब्दज्ञानजनकवाक्यत्वम् । न च न्यायावयवप्रतिज्ञाद्यवयवातिव्याप्तिः । तस्य न्यायजन्यज्ञानजनकशाब्दज्ञानाजनकतया तज्जनकत्वाभावादिति केचित् । तन्न । प्रतिज्ञाजन्यज्ञानस्य तदवयवजन्यत्वात् समुदायिभिन्नसमुदायाभावादतिव्याप्तितादवस्थ्यात् । तस्माद् न्यायभिन्नवाक्यान्तराघटकवाक्यत्वं विवक्षितम् । तच्चावयवावयवे नास्तीति नातिव्याप्तिः । अवयवावयवस्यावयवघटकत्वादिति नव्याः । तदपि न भव्यम् । न्यायान्तर्भूतावयवद्वयरूपवाक्यघटकतयावयवेऽप्येतल्लक्षणासत्त्वात् । किञ्च, न्यायजन्यज्ञानजनकयोग्यताज्ञानजनके कण्टकोद्धारवाक्येऽतिव्याप्तिः । न च यज्जन्यज्ञानस्य वाक्यजन्यज्ञानत्वेन न्यायजन्यज्ञानजनकता, तत्त्वं विवक्षितम् । अत एव चाक्यपदमपि । योग्यताज्ञानस्य च न वाक्यजन्यज्ञानत्वेन तथात्वमिति वाच्यम् । शाब्दज्ञानपदेनैव तदर्थलाभे वाक्यपदानर्थक्यप्रसङ्गात् । भवतु वा यथाकथञ्चित् तद्दोषोद्धारः । अवयवावयवातिव्याप्तिर्दुरुद्धरा । न च न्यायजन्यज्ञानजनकजनकतापर्याप्त्यधिकरणत्वं लक्षणार्थः । तच्च नावयवावयवे, किन्तु समुदित इति नातिव्याप्तिरिति वाच्यम् । तथा सत्यसम्भवापातात् । न्यायजन्यज्ञानजनकजनकतायाः प्रतिज्ञादिष्वपर्याप्तिरिति ।

तस्मादिदमत्र तत्त्वं — न्यायान्तर्भूतप्रतिज्ञादिपञ्चकस्य परस्परसाकाङ्क्षत्वमिति सर्वसिद्धम् । तथा च न्यायान्तर्भूतप्रतिज्ञादिपञ्चकपरस्पराकाङ्क्षापर्याप्त्यधिकरणत्वं लक्षणम् । अवयवावयवे च न तथा, प्रत्येकाकाङ्क्षायाः प्रत्येकावयव एव पर्याप्तेः । यद्वा, प्रतिज्ञादिपञ्चकप्रतियोगिकान्योन्याभाववत्प्रतियोगिकान्योन्याभाववत्त्वं प्रतिज्ञादिपञ्चकविशेष्यकधीविशेष्यतावच्छेदकधर्मवत्त्वं (वा) लक्षणम् । तच्च प्रतिज्ञात्वादिकमेवेति न कोऽपि दोष इति दिक् ॥

इत्यवयवलक्षणम् ।

अथ प्रतिज्ञाग्रन्थः ।

अवयवाश्चोदाहरणान्तास्त्रय इति मीमांसकाः । उदाहरणोपनयौ द्वावेवावयवाविति बौद्धाः । आकाङ्क्षाक्रमानुरोधाद् अवयवपञ्चकमिति वृद्धाः । ते च प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि । तत्र प्रतिज्ञात्वं न्यायघटकत्वे सत्यनुमित्यन्यूनानतिरिक्तविषयकशाब्दज्ञानजनकपदसमुदा(यः? यत्वम्) । प्रतिज्ञैकदेशे च समुदायत्वाभावान्नातिव्याप्तिः । सत्यन्तेनोदासीनप्रतिज्ञासमानाकारवाक्यव्युदासः । पाषाणमयः पर्वतो वह्निमानित्यत्र पक्षोपस्थापकपदसमुदायेऽनुमित्यनतिरिक्तविषयकशाब्दज्ञानजनकेऽतिव्याप्तिवारणायान्यूनपदम् । न चावयवान्तरस्य पक्षतावच्छेदकाबोध(क)तयानुमित्यन्यूनपदादेव वारणेऽनुमित्यनतिरिक्तपदवैयर्थ्यमिति वाच्यम् । सर्वनामपदस्य बुद्धिस्थप्रकारवाचितया तस्मादयं वह्निमानित्यत्र पर्वतत्वप्रकारकबोधादतिव्याप्त्यानतिरिक्तपदस्यावश्यकत्वात् । न चैवमपि अयं वह्निमान् इति निगमनैकदेशातिव्याप्तिस्तदवस्थैवेति वाच्यम् । निगमनैकदेशान्यत्वस्यापि विशेषणत्वात् । न च प्रतिज्ञायां ज्ञानलक्षणयानुमित्यनतिरिक्तविषयकज्ञानजनकत्वासत्त्वादसम्भव इति वाच्यम् । तत्रापि प्राथमिकबोधस्य मुख्यार्थविषयकस्य (ज्ञानस्य? जनक)तयैव लक्षणस्य नेयत्वात् । हेत्ववयवग्रहणानन्तरं चानुपपत्त्योत्तरकालं ज्ञानलक्षणाकल्पनात् ।

इदं तु शङ्क्यते — मेयत्वं सर्ववृत्ति केवलान्वयिधर्मत्वादित्यादिप्रतिज्ञायामव्याप्तिः । तत्र सर्वस्यैवानुमितिविषयतया तदतिरिक्ताप्रसिद्धेरिति ।

अत्राहुः — अनुमितिविषयतासमव्याप्तिविषयताकत्वमन्यूनानातिरिक्तविषय(कत्वे? केत्यने)न विवक्षितमिति न क्वाप्यप्रसिद्धिर्न वातिव्याप्तिरिति । नन्वेवमपि व्यतिरेकिप्रतिज्ञायामव्याप्तिः । अनुमितेः साध्याभावाभावत्वप्रकारकतया प्रतिज्ञाया न्यूनविषयकत्वादिति चेत् । तत्र प्रतिज्ञाया अपि नेदं निरात्मकं जीवच्छरीरमित्येवमाकाराया एव प्रयोगात् । क्वचित् तथाप्रयोगस्तु व्यतिरेकसहचारादन्वयव्याप्तिग्रहाभिप्रायेणेति द्रष्टव्यम् । यद्वा, यन्न्यायावयवत्वावच्छेदेन लिङ्गविषयकशाब्दज्ञानजनकतानियमः, तदन्यन्यायावयवत्वं प्रतिज्ञात्वमिति क्वापि नातिप्रसङ्गः । अत्र च विप्रतिपत्तिवाक्यादेव साध्यस्योपस्थितौ प्रतिज्ञावयवो व्यर्थ इति देश्यमनादेयम् । विप्रतिपत्तिवाक्यस्य पक्षपरिग्रहादिना व्यवधानात् । आवृत्ति-

कल्पना च साध्योपस्थापकपदस्यैव । सैव प्रतिज्ञारूपेति क्व व्यर्थता । किञ्च, विप्रतिपत्त्या साध्यतदभावोपस्थित्या क्व हेत्वन्वयः । योग्यतया वादिवाक्येऽन्वयानियमात् । अपि च, प्रतिज्ञावाक्ये हेतुत्वान्यथानुपपत्त्या ज्ञानलक्षणेति वक्ष्यते । तथा च न विप्रतिपत्त्या तदन्यथासिद्धिः, भिन्नविषयकत्वादिति सङ्क्षेपः ॥

इति प्रतिज्ञाग्रन्थः ।

अथ हेतुग्रन्थः ।

साध्यनिर्देशानन्तरं कुत इत्याकाङ्क्षायां हेतुताव्यञ्जकविभक्तिमल्लिङ्गवचनमेवोचितं, पक्षधर्मतादेस्तदाकाङ्क्षाविरहेण तत्प्रतिपादकपदोपादानेऽप्रामाणिकतापातादिति प्रतिज्ञानन्तरं हेतूपन्यासः । हेतुत्वं च न्यायप्रविष्टत्वे सति साध्याविषयकशाब्दधीजनकहेतुविभक्तिमच्छब्दत्वमिति मणिकृतः । नन्वत्र सत्यन्तेन हेतुसमानाकारोदासीनवाक्यं, साध्याविषयकत्वेन तस्मादिति निगमनांशः, हेतुविभक्तिमदित्यनेन यो यो धूमवानित्युदाहरणैकदेशश्च वार्यतां नाम । शब्दोऽनित्यः सामान्यवत्त्वे सत्यस्मदादिबाह्यकरणप्रत्यक्षत्वादित्यत्र हेतुचरमांशातिव्याप्तिः केन वारणीया । किञ्च, इदं प्रमेयवद् घटादित्यत्र हेतावव्याप्तिः । प्रमेयरूपसाध्याविषयकज्ञानाप्रसिद्धेः । अपि च, वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यत्राव्याप्तिः, साध्यविषयकशाब्दधीजनकत्वादिति ।

अत्रोच्यते — चरमशब्दपदाद् य(द)वच्छेदेन हेतुविभक्तिसमभिव्याहारः, तदवच्छिन्नशब्दत्वं लक्षणं सूचितम् । सामान्य(व)त्त्वे सतीत्यत्र सतीसप्तम्याः सामानाधिकरण्यार्थिकाया बलेन विशिष्ट एव हेतुविभक्तिसमभिव्याहार इति न विशिष्टे लक्षणाव्याप्तिः । न च चरमांशेऽतिव्याप्तिः । साध्याविषयकत्वं च साध्यतावच्छेदकावच्छिन्नाविषयकत्वम् । तच्च प्रमेयसाध्यकेऽप्यस्त्येवेति न तत्राव्याप्तिः । साध्याविषयकेत्यत्र न(न्तो ? ञो) व्यत्यासः । तेन साध्याविषयकशाब्दज्ञानजनकता यस्य न्यायप्रविष्टस्य नियता, तद्भिन्नमित्यर्थः पर्यवस्यति । हेतुरूपन्यायप्रविष्टस्य च न सर्वत्र साध्याविषयकज्ञानजनकत्वमिति प्रत्यक्षस्पर्शादित्यादौ नाव्याप्तिः । तस्मादिति निगमनांशस्य च सर्वत्र साध्यविषयकज्ञानजनकतेति तद्भिन्नत्वाभावान्न तत्रातिव्याप्तिरिति दिक् ।

यच्च मणिकृता लक्षणान्तरमुक्तं पञ्चम्यन्तलाक्षणिकपदवदनुमितिपरवाक्यत्वमिति । तत्र वदन्ति — न्यायाप्रविष्टवाक्यमनुमितिपरपदेन न्यायप्रविष्टत्वार्थेन वार्यतां, निगमनातिव्याप्तिश्च लाक्षणिकपदेनापाक्रियतां, तत्र तस्मादिति सर्वनाम्नः सर्वशक्ततया च लक्षणाविरहात् । प्रतिज्ञायां चातिव्याप्तिवारणाय पञ्चम्यन्तपदं यदुपात्तं, तत् कुतः । न च प्रतिज्ञायां ज्ञानलक्षणासत्त्वादतिव्याप्तिर्मा भूदित्ये(तत्?)तदर्थं पञ्चम्यन्तपदमिति वाच्यम् । हेतुपदेन ज्ञापकहेतोरभिधानात् पञ्चम्यापि ज्ञापकत्वस्य प्रतिपादनात् । तथा च धूमप्रयोज्यज्ञानविषयत्वं वह्नौ साध्यत्वमिति किं लक्षणया । एवं वह्निविषयकज्ञानजनकज्ञानविषयत्वरूपं वह्निज्ञापकत्वं धूमे पञ्चम्या प्रतिपाद्य(त) इति हेतावपि न लक्षणेत्यसम्भवो लक्षणस्य । किञ्च, हेतुपदेन ज्ञानलक्षणायां वृत्तिद्वयविरोधापत्त्या ज्ञानमात्रस्योपस्थितिर्वाच्या । तथा च लिङ्गस्यानुपस्थित्या तस्य गमकत्वाकाङ्क्षा न स्यात् । प्रत्युत ज्ञान एव गमकत्वाकाङ्क्षा स्यात् । अपि च, 'स्वायत्ते शब्दप्रयोगे किमित्यवाचकपदं प्रयो(ज्याम?क्ष्यामहे)' इति न्यायाद् धूमज्ञानादिति प्रयोगापत्तिः । तस्मात् प्रयोजकत्वे पञ्चमीत्येव साधु, न तु ज्ञानलक्षणेति ।

अत्र मिश्राः — हेतुत्वशक्तायाः पञ्चम्याः प्रयोजकत्वे न शक्तिः, मानाभावादिति लक्षणा वाच्या । तच्च न सम्भवति, सुब्विभक्तौ लक्षणाविरहस्य शब्दखण्डे प्रतिपाद्यत्वात् । न चैवं 'तत्त्वज्ञानान्निःश्रेयसाधिगम' इत्यत्र तत्त्वं ज्ञायतेऽनेनेति व्युत्पत्त्या तत्त्वज्ञानं शास्त्रमिति व्याख्यानात् तस्य च निःश्रेयसाहेतुत्वात् कथं पञ्चमीसङ्गतिरिति वाच्यम् । तत्रानन्यथासिद्धत्वांशविशेषणं परित्यज्य नियतपूर्ववृत्तित्वरूपविशेष्यांशोपस्थितौ लक्षणाविरहात् । विशेष्ये चैकदेशेऽप्याकाङ्क्षासत्त्वेनान्वयात् । अस्तु वा तदनुरोधा(द्) नियतपूर्ववर्तित्वमात्रे पञ्चमीशक्तिः । उक्तरूपप्रयोजकत्वशक्तौ मानाभावात् । यच्च लक्षणापक्षे वृत्तिद्वयविरोधाद् न लिङ्गोपस्थितिरिति दूषणमदायि, तदपि न । ज्ञानलक्षणयैव तदुपस्थितेस्तत्र गमकत्वाकाङ्क्षासम्भवात् । अन्यथा पाकाद् रक्तमित्यनन्वितं स्यात् । पाकस्य रक्तिमगुण एव हे(तु)त्वान्वयात् । तस्य च गुणिलाक्षणिकरक्तपदाद् वृत्तिद्वयविरोधादनुपस्थितेः । तस्माद् गुणिलक्षणयैव तदुपस्थितिर्वाच्या । तथा च प्रकृतेऽपि समानम् । न चैवं लक्षणया प्राधान्येनोपस्थिते ज्ञान एव गमकत्वाकाङ्क्षा स्यादिति वाच्यम् । व्याप्तिविषयकत्वेन खलु ज्ञानं गमकम् । तच्च तदा, यदि धूमो

व्याप्य इति । तद्भमकत्वाकाङ्क्षायामेवोदाहरणप्रवृत्तेः । अस्तु वा विशेषणतयाप्युपस्थिते लिङ्गे गमकत्वाकाङ्क्षा, उपस्थितिमात्रस्यैव तत्र तन्त्रत्वात् । यच्च धूमज्ञानादित्याकारकप्रयोगापत्तिरित्युक्तं, तदपि न । तथा सति तज्ज्ञानलाभापातात् । हेतुविभक्तिसमभिव्याहृतधूमादिपदे ज्ञानलक्षणाया निरूढत्वाङ्गीकारात् । अत एव घटं करोतीत्यादाववयवलक्षणायामपि न घटावयवं करोतीति प्रयोग इति समादधते ।

तत्रेदं विचार्यते — प्रतिज्ञायामेका ज्ञानलक्षणा हेतौ चापरेति लक्षणाद्वयं कल्प्यताम् उत हेतुत्वशक्तपञ्चम्यां प्रयोजकत्वमात्रलक्षणेति । तत्रान्त्ये लाघवात् तदेवास्तु । तद्बलाच्च सुब्विभक्तौ लक्षणा नेत्यस्य तत्राभावः कल्प्यते । न च पञ्चम्या ज्ञापकत्वमुपस्थाप्यम् । तत्र चैकदेशो ज्ञानमिति साध्यस्य पदार्थस्य तेन कथमन्वयोऽस्तु, 'पदार्थः पदार्थेने'ति व्युत्पत्तेरिति वाच्यम् । ससम्बन्धिकस्थले एकदेशान्वयस्यापि स्वीकारात् । अन्यथा चैत्रमातेत्यादौ चैत्रस्य जनकत्वेन पदार्थैकदेशान्वयो न स्यादिति । यच्च ज्ञानलक्षणया विषयस्य लिङ्गस्याप्युपस्थितिरिति समाहितं, तदपि न । अन्यवृत्त्यान्योपस्थितावतिप्रसङ्गात् । न चैवं पाकाद् रक्तमित्यत्रापि गुणिलाक्षणिके गुणस्यानुपस्थितौ कथं तत्र पाकहेतुत्वान्वय इति वाच्यम् । तत्र 'गुणे शुक्ल' इत्यनुशासनाद् गुणिन्यपि रक्तादिपदस्य शक्त्या तयैवोभयोपस्थितौ पाकहेतु(क !)त्वस्य गुणेऽन्वयसद्भावात् । यच्चोक्तं हे(तु ?)त्ववयवे निरूढलक्षणेति, तदपि न । निरूढत्वानिरुक्तेः । नियततदर्थतात्पर्यमेव तदिति चेद्, न । तात्पर्यस्य पुरुषाधीनतया तदसम्भवात् । न चान्यत्रवृत्तित्वेऽप्यसाधुत्वमित्येव निरूढत्वं, बहुव्रीह्यादिपदवदिति वाच्यम् । एवं सति धूमपदस्यात्र निरूढतया स्वार्थे क्वापि साधुत्वं न स्यात् । न च न्यायप्रविष्टहेत्ववयवत्वावच्छेदेन तथा, न सर्वत्रेति वाच्यम् । एवं सति घोषादिपदसमभिव्याहारावच्छिन्नगङ्गादिपदानामपि निरूढत्वापत्त्या गतं निरूढानिरूढविभागेनेति ।

अत्र प्रतिभाति — विषयाधिक्याल्पत्वकृतं हि गौरवं लाघवं वावतरति, न तु लक्षणैक्यानैक्यकृतम् । तथा च प्रकृते प्रतिज्ञाहेतुपदयोर्ज्ञानलक्षणायां ज्ञानद्वयं विषयः । हेतुत्वज्ञापकपदमात्रे प्रयोजकत्वलक्षणायाश्च ज्ञानजनकज्ञानविषयत्वं विषय इति ज्ञानद्वयं जनकत्वं विषयत्वं च विषय इति महद् गौरवमिति पदद्वयलक्षणैव लघीयसी । न चैवं धूमपदाद् ज्ञानोपस्थितिरेव स्याद्, न तु धूमो-

स्थितिः, अन्यवृत्त्यान्योपस्थित्यभावादित्युक्तमिति वाच्यम्। किञ्चिन्नियामकसत्त्वेऽन्यवृत्त्याप्यन्योपस्थितेः। कथमन्यथा गङ्गांशस्यावच्छेदकतया भानम्। कथं वा तीरत्वांशभानम्। तत्र लक्षणाविरहस्य शब्दपरिच्छेदे सुव्यक्तत्वात्। तथा च यद्धीति न्यायाद् ज्ञानलक्षणया विषयोपस्थितिरस्तु। किञ्च, मणिकृन्मते वृत्तिद्वयविरोधो न दोषायेति शक्त्या धूमो लक्षणया ज्ञानमुपस्थितमस्तु। दोषाभावात्। भवतु वा वृत्तिद्वयविरोधः क्वचिद् दोषाय, न तु सर्वत्र। अन्यथा लम्बकर्णादिपदात् कर्णस्यानुपस्थितौ तदानयनाद्यभावप्रसङ्गात्। यच्च रक्तादिपदस्य गुणिनि शक्तिरेवेत्युक्तं, तदपि न। किं रक्तपदस्य रक्तत्वविशिष्टरक्तगुण एका गुणिनि चापरा शक्तिः, तत्रापि शुद्धगुणिनि वा रक्तत्वविशिष्टरक्तगुणविशिष्टगुणिनि वा, रक्तत्वविशिष्टरक्तगुणविशिष्टगुणिन्येवैका शक्तिर्न गुणांशे पृथक् शक्तिरिति। नाद्यः। एकयैव शक्त्योपपत्तौ शक्तिद्वये गौरवात्। न च सा गुणिन्येवास्तु। शुद्धस्य गुणिनो रक्तादिपदादनुपस्थितौ रक्तत्वादिविशिष्टरक्तादिविशिष्टे सा वाच्या। तथा च लाघवाद् रक्तत्वादिविशिष्टे एव सास्तु। अत एवान्त्यपक्षोऽप्यपास्तः। न चैवमनुशासनविरोधः। अनुशासनस्य साधुत्वज्ञापकत्वात्। शक्तेश्चानन्यलभ्यत्वादिकल्प्यत्वात्। न चैवं लक्षणया सर्वं सर्वत्र साधु भवत्येवेत्यनुशासनं विफलं स्यादेवेति वाच्यम्। लक्षणयापि तत्रैव साधुत्वमिति ज्ञापयितुमनुशासनाद् व्यत्ययानुशासनवदिति शब्दपरिच्छेदे वक्ष्यमाणत्वात्। किं बहुना, पाकाद् गन्धो घट इत्यादौ का गतिः। गन्धपदस्य गुणिनि शक्तेः केनाप्यनङ्गीकारात्। तस्मात् तत्र गुणिलक्षणयैव गुणस्योपस्थितौ पाकहेतुत्वान्वय इति। यच्च निरूढत्वं निर्वक्तुमशक्यमित्युक्तं, तदपि न। हेतुपञ्चम्यन्तत्वावच्छेदेन ज्ञाने नियतानादितात्पर्यस्यैव निरूढत्वनियामकत्वाद्, अनादितात्पर्यपूर्वकलक्षणाया एव निरूढलक्षणात्वात्, तादृशस्य पदस्य लक्ष्यादन्यत्रासामर्थ्यनियमात्। न चैवं गङ्गापदं समभिव्याहारविशेषावच्छिन्नं निरूढलाक्षणिकं स्यादिति वाच्यम्। तादृशस्य सत्त्वे इष्टत्वात्। शुद्धस्य चातथात्वादित्यलमतिविस्तरेण। एतेन "पञ्चम्यन्तलाक्षणिकपदवदनुमितिपरवाक्यत्वं हेतुलक्षणमनुपपन्नम्। अयमात्मा ज्ञानादित्यत्र ज्ञानज्ञानस्य शक्त्यैवोपस्थितौ लक्षणाविरहेणाव्याप्तेः। किञ्च, अयं सुखी कामिनीसाक्षात्कार(व)त्त्वादित्यत्र सुखरूपसाध्यं प्रति कामिनीसाक्षात्काररूपहेतोः कारणत्वमस्त्येवेत्यनुपपत्त्यभावात्। प्रतिज्ञावाक्ये हेतुवाक्ये वा न लक्षणेत्यव्याप्तिः। तत्त्वादित्यादिहेतावप्यव्याप्तिः।

सर्वनामपदे लक्षणाविरहादि"त्यादिदूषणमपास्तम् । न्यायप्रविष्टहेतुपञ्चम्यन्तत्वावच्छेदेनैव निरूढलक्षणाङ्गीकारात् । शक्तेस्तदपेक्षया दुर्बलत्वात् । अत एव सर्वनामपदेऽपि तत्र लक्षणास्त्येवेति न काप्यतिप्रसङ्ग इति सङ्क्षेपः ।

अत्र च कथायां पक्षधर्मताप्रतिपादनाय मीमांसकवद् मतुपः प्रयोगो न कार्यः । अनाकाङ्क्षितपक्षधर्मताप्रतिपादनाय प्रथमं तदभिधानेऽप्राप्तकालतापातात् । एतदभिप्रायेणैव मणिकृतोक्तं — कथायां धूमादित्येव प्रयोक्तव्यं न धूमवत्त्वाद् (इति), मतुपो व्यर्थत्वादिति । न च तत्र धूमवत्त्वे व्यर्थविशेषणतया व्याप्तिर्ग्रहीतुं न शक्यत इत्येवाभिप्राय इति वाच्यम् । धूमसम्बन्धस्यापि धूमवद् वह्निव्याप्यतया व्यर्थत्वासम्भवात् । समानाधिकरणलघुगुरुद्वयसन्निवेश एव व्यर्थत्वस्य दोषत्वादिति बहुशो निवेदनात् । न चैवमपि धूमवत्त्वादित्युक्ते परं प्रत्यप्राप्तकालत्वरूपो निग्रहो दातुं न शक्यते, यावता धूमवत्त्वमेवाहमत्र हेतुमकरवं न तु मतुपा पक्षधर्मतां प्रतिपादयामीति वादिना वक्तुं शक्यत्वादिति वाच्यम् । उदाहरणोपनयाभ्यां हेतुतानिर्णये निग्रहस्य दातुं शक्यत्वात् । नहि धूमवत्त्वे हेतुत्वेन विवक्षिते यो यो धूमवानित्युदाहरणं धूमवांश्चायमित्युपनयो वा युज्यते । अपि तु धूमवत्वानित्युदाहरणं, धूमवत्त्ववांश्चायमित्युपनय इति दिक् ॥

इति हेतुग्रन्थः ।

अथोदाहरणग्रन्थः ।

हेतावुक्ते कथमस्य गमकत्वमित्याकाङ्क्षायां व्याप्तिपक्षधर्मतयोरुपदर्शनप्राप्तौ व्याप्तेरनुमितिजनकीभूतपरामर्शविशेषणतया प्रथमोपस्थिततया पक्षधर्मतायाश्च तत्संसर्गतयोपस्थित्यनियमात् प्रागुपस्थितिक्रमप्राप्ताकाङ्क्षावशात् प्रथमं व्याप्तेः प्रदर्शनार्थमुदाहरणम् । तत्र यद्यप्युदाहरणे व्याप्तिरभावादिनानापदार्थगर्भो न पदार्थो न वाक्यार्थ इति तत्प्रदर्शनार्थमुदाहरणं न घटते, तथापि यो य इत्यादिना हेत्वधिकरणे सर्वत्र साध्यसंबन्धप्रतिपादनात् तत्र साध्याभावसंबन्धरूपव्यभिचारशङ्का न भवति । सहचारश्च साक्षादेवोदाहरणवाक्येन प्रतिपाद्यत इति व्यभिचारज्ञानविरहसहकृतसहचारज्ञानसहकृतेन मनसा भवति व्याप्तिग्रह

इत्युदाहरणं व्याप्तिग्रहौ(पाधि?पयि) कं, न तु साक्षात् तत्प्रतिपादकमिति वृद्धाः । यावत्साधनाश्रयाश्रितसाध्यसंबन्धो व्याप्तिः । सा चोदाहरणवाक्यात् साक्षादेवावगम्यत इति नव्याः । उदाहरणलक्षणं व्याप्यतावच्छेदकावच्छिन्नवद्धर्मित्वावच्छिन्नमुद्दिश्य व्यापकतावच्छेदकावच्छिन्नवत्त्वविधायकन्यायावयवत्वम् । उपनये व्याप्यवति व्यापकसंबन्धस्याविधेयत्वात् तत्र पक्षधर्मतामात्रस्यैव विधेयत्वाद् व्याप्यत्वांशस्यानूद्यत्वान्नातिव्याप्तिः । अत एव यो नीलधूमवान् स वह्निमानित्युदाहरणाभासेऽपि नातिव्याप्तिः । नीलधूमत्वस्य व्याप्यतानवच्छेदकतया तत्रोक्तलक्षणाभावात् । उदाहरणसमानाकारवाक्यं च न न्यायावयव इति न तत्रातिव्याप्तिरिति तत्त्वम् ।

अत्र प्राञ्चः — उदाहरणवाक्ये व्यभिचारशङ्कावारणाय यो य इति वीप्सा कार्या । सा च यत्र व्यभिचारशङ्का तत्रैव । अन्यत्र तु केवलान्वय्यादौ व्यभिचारशङ्का नास्तीति न तत्र वीप्सेत्याहुः । तेषां चायमाशयः — यो य इति वीप्सितशब्दश्रवणानन्तरमनुवादतया प्रयोजनजिज्ञासायां व्याप्तिग्रहप्रयोजनकत्वेऽवसिते यो य इति प्रथमयत्पदोपस्थाप्यधूमाधिकरणभिन्नं सर्वं धूमाधिकरणं द्वितीययत्पदेन विशिष्य सामान्यतो वोपस्थाप्यते । तथा च सर्वत्र साध्यसंबन्धज्ञानाद् व्यभिचारशङ्का न भवतीति भवति मनसा व्याप्तिग्रह इति केवलान्वयिस्थले वीप्सा न कार्येति । (तत्) तु न सम्यक् । तथा सति तत्र सामानाधिकरण्यप्रदर्शनमपि व्यर्थमेव स्यात् । केवलान्वयित्वेन ज्ञाते सामानाधिकरण्येऽप्यविप्रतिपत्तेः । तस्मात् तत्रापि वीप्सा कार्यैव वादिना । स्वकर्तव्यस्य निर्वाहयितुमुचितत्वात् । कथमन्यथा केवलान्वयिसाध्यकहेतुकन्याये उदाहरणावयवप्रवृत्तिः । व्याप्तिग्रहप्रतिबन्धकीभूतव्याप्त्यादिशङ्काविरहात् तद्बोधकावयवानां त्वदुक्तरीत्या वैयर्थ्यस्य दुरुद्धरत्वात् । असाधकतामात्रयोगे सर्वसंप्रदायसिद्धतया न व्याप्त्यादिप्रदर्शकावयवोपन्यास इति न तत् प्रतिबन्धकमिति दिक् ।

मणिकृतस्तु — वीप्सायामपि व्यभिचारशङ्कानादवस्थ्याद् न सा कार्या । यदि वा कार्या, तदा यत्पद एव, न तु तत्पदेऽपि । नानायत्पदोपस्थाप्यस्यैकतत्पदेनैव परामर्शसंभवात् । तथा च 'यद् यत् पापं प्रतिजहि जगन्नाथ! नम्रस्य तन्मे' इत्यादाविति वदन्ति । तेषामयमभिप्रायः — वीप्सायामपि सर्वाधिकरणोपस्थिति(तेः?ति)रनुवादेन व्याप्तितात्पर्यकत्वग्रहद्वारा, न साक्षात् । तथा च यद्योगप्राथ-

म्याम्यामेव व्याप्तितात्पर्यकत्वग्रहोऽस्तु । तथा चैकयत्पदेनैव सर्वमपि हेत्वधिकरण-मुपस्थाप्यताम् । कृतं वीप्साघटितगुरुशरीरेणोदाहरणेनेति । यदि च कथकसंप्रदा-यसिद्धत्वादुपाय्योपायान्तरादूपकत्वाच्च यत्तदवीप्सादरः । त(था?दा) च तत्पद-वीप्सायामतिगौरवम् । एकेनैव तत्तदेनोभयोपस्थितिसंभवादिति ।

इदं त्ववधेयं —यत्पदतत्पदयोरुभयोरपि समयबन्धेन वीप्सा कार्या । अन्य-तरसमयबन्धेनान्यतरवीप्सा वा । समयबन्धेन विना वीप्सा क्वापि न कार्येति ।

अत्र च यो यो धूमवानित्युदाहरणवाक्यं न घटते । धूमः कथं गमक इत्याकाङ्क्षायामुदाहरणप्रवृत्तेस्तेन धूमसामानाधिकरण्यप्रतिपादनस्योचित-त्वात् । धूमवानित्यनेन मतुबर्थसामानाधिकरण्यप्रतिपत्तेः । मतुबर्थसंबन्धस्य पदा-र्थतया तत्संबन्धस्यैव वाक्यार्थत्वादिति यत्र यत्र धूम इत्येवोदाहरणमर्हतीति मिश्राः । तच्च न मनोज्ञम् । एवं सति पर्वतो वह्निमान् इति प्रतिज्ञा वह्नि-व्याप्यधूमवांश्चायमित्युपनयो वह्निमानिति निगमनं च विरुध्येत, ततो वह्न्या-दिसंबन्धविधेयताया एव प्रतीतेः । तस्मादत्र कथकसंप्रदायानुरोध एव शरण-मिति दिक् ॥

इत्युदाहरणग्रन्थः ।

अथोपनयग्रन्थः ।

उदाहरणानन्तरं व्याप्तेः सहकारिणी पक्षधर्मता वर्तते न वेत्याकाङ्क्षायां तत्सहकारिणीं पक्षधर्मतां प्रतिपादयितुमुपनयः । तत्रानुमितिकारणीभूतपरामर्शज-नकावयव उपनय इति मणिकृतः ।

नन्विदमयुक्तम् । अनुमितिहेतुमानसपरामर्शस्योपनयवाक्याजन्यत्वादिति चेद् । अत्र वदन्ति — अनुमितिहेतुपरामर्शसमानाकारपरामर्शजनकावयवत्वमुक्त-लक्षणार्थः । अस्ति चोपनयजः यपरामर्शस्य व्याप्तिविशिष्टपक्षावगाहिनः तादृशमान-सपरामर्शस्य समानाकारतेति नासंभव इति ।

अत्रेदं शङ्क्यते — तस्माद् वह्निमानिति निगमने लक्षणमिदमतिव्या-प्तम् । तस्मादित्यनेन व्याप्तिविशिष्टपक्षधर्मतापरामर्शेनोक्तसमानाकारज्ञानजननात् ।

किञ्च, समानाकारता यावत्तद्विषयविषयकतया यत्किञ्चित्तद्विषयविषयकतया वा । नान्त्यः । अतिप्रसङ्गात् । नाद्यः । मानसपरामर्शविषयाबाधितत्वादेरुपनयजन्यपरामर्शविषयतयासंभवापातादिति ।

अत्र प्रतिभाति — अबाधितत्वासत्प्रतिपक्षितत्वातिरिक्तांशो यावान् मानसपरामर्शस्य यथा विषयः, तावान् तज्जन्यपरामर्शस्य तथैव विषयः, तादृशावयव उपनयः । निगमनजन्यज्ञाने च साध्यांशस्य परामर्शे व्याप्तिविशेषणतया विषयस्य स्वातन्त्र्येणापि भानाद् न तत्रातिव्याप्तिः । न च तत्सादित्यंशे तथाप्यतिव्याप्तिरिति वाच्यम् । अवयवपदेनैव तद्व्युदासात् । तत्त्वावयवावयवत्वात् ।

अत्र च हेत्ववयवेनैव पक्षधर्मता प्रतिपाद्यतां, किं तत्प्रतिपादकोपनयेनेति देश्यमनादेयम् । हेत्ववयवत्व कारणमात्राकाङ्क्षाप्रवृत्ततया पक्षधर्मताबोधकत्वाभावात् । आकाङ्क्षाक्रमेणैव तदर्थस्य प्रतिपादयितुमुचितत्वादिति दिक् ॥

इत्युपनयग्रन्थः ।

अथ निगमनग्रन्थः ।

उपनयानन्तरं निगमनम् । तच्च न्यायावयवत्वे सति व्याप्तिविशिष्टपक्षधर्मताज्ञानप्रयुक्तसाध्य(ज्ञानज्ञान?)धीजनकम् । प्रतिज्ञावदत्रापि ज्ञानलक्षणासत्त्वादसिद्धिर्न भवति । प्रतिज्ञायां च न व्याप्त्यादिधीप्रयुक्तं तज्जनकत्वमिति न तत्रातिव्याप्तिः ।

ननु व्याप्तिविशिष्टपक्षधर्मत्वस्यावयवान्तरेणैव प्रतिपादनाद् निगमनं किमर्थमिति चेद्, न । अबाधितत्वादि(न्ति?)धीजनकत्वेनास्योपयोगात् । अबाधितत्वादिज्ञानस्याप्यनुमितिविघ्नत्वात् । यद् यदभावे सति न भवति, तत् तदभावावगमसाध्यमिति मणिकृतः । तेषां चायमाशयः — अबाधितत्वादौ निगमनेन प्रतिपादिते सति न बाधादिज्ञानमनुमितिप्रतिबन्धकीभूतं जायत इति व्याप्तिविशिष्टपक्षधर्मताज्ञानं बाधादिज्ञानाभावसहकृतमनुमितिं जनयतीति तदनुकूलत्वान्निगमनं (न) व्यर्थमिति । एतेनाबाधितत्वज्ञानस्यानुमितिहेतुत्वे तद्विषयकत्वमपि परामर्शे स्वीकार्यम् । तथा च परामर्शविषयाभावत्वेनासिद्धिमध्यपातो बाधादेः

स्यादित्यप्यसिद्धान्तः । किञ्चाबाधितत्वज्ञानं साध्यज्ञानमेव । तथा च साध्यज्ञानं साध्यज्ञानहेतुरिति फलितमिति सिद्धसाधनादनुमित्यनवतार एव स्यादित्यादिदूषणमपास्तम् । अबाधितत्वज्ञानहेतुत्वस्य मणिकारानभिप्रेतत्वेनोक्तदोषविरहात् । यथा चैवं सति न निगमनानर्थक्यं, तथा च व्युत्पादितमेव ।

केचित्तु — अनुमितावबाधितत्वप्रमाया गुणत्वेन हेतुत्वमिति संशयनिश्चयसाधारणमबाधितत्वज्ञानमनुमितित्वावच्छेदेन हेतुरेव । अत एव न सिद्धसाधनमपि । यथा चैवंसति नासिद्धावन्तर्भावस्तथाग्रे वक्ष्यत इति यथाश्रुत एव मणिः साधीयानित्याहुः ।

ननु निगमनेन कथमबाधितत्वासत्प्रतिपक्षितत्वभानम् । साध्यप्रतिपादकतामात्रेण तथात्वे प्रतिज्ञाया अपि तथात्वापातादिति चेद्, न । प्रतिज्ञावाक्येन साध्यस्य प्रतिपादनेऽपि साध्याभावांशव्युदासकत्वानुपदर्शनाद् न ततः साध्याभावव्युदासावगमः । इह तु तस्मादित्यनेन व्याप्यधूमसमुद्भावयता वह्निव्याप्यदर्शनस्यैव जनकाद् नात्र वह्न्यभावोऽस्तीति ज्ञायते । तच्च ज्ञानं मानसमानुमानिकं वेति न कश्चिद् विशेषः । यद्वा, साध्ये पुनर्वचनस्यानुवादतया प्रयोजनजिज्ञासायां बाधाद्यभाव एव प्रयोजनं पारिशेष्यादवसीयते । तथैव व्युत्पत्तेः । बाधादिविरहज्ञानं च पूर्वोक्तप्रकारेणैव । साक्षान्निगमनासंभवात् । अपदार्थत्वादवाक्यार्थत्वाच्च । यद्यपि व्युत्पत्तिस्तात्पर्यज्ञानं, तच् शब्दोपात्तं विना वादिवाक्ये न निर्वहति । तथाप्यनादितात्पर्यं व्युत्पत्तिः । सा चानादिलक्षणावद् वादिवाक्येऽपि संभवत्येवेति न कोऽपि दोष इति ।

इदं तु ध्येयं — न्यायवाक्ये नायं हेत्वाभासः तल्लक्षणायोगादिति कण्टकोद्धारकवाक्यं, यथा महानस इत्यादिदृष्टान्तप्रयोगश्च सामयिक इति सङ्क्षेपः ॥

इति निगमनप्रबन्धः ।

अथ हेत्वाभाससामान्यनिरुक्तिः ।

अथ हेत्वाभासास्तत्त्वनिर्णयविजयप्रयोजकत्वान्निरूप्यन्ते । तत्रानुमितिकारणीभूतभावप्रतियोगिकयथार्थज्ञानविषयत्वं हेत्वाभासत्वमिति मणिकृतः । तन्नि-

दमयुक्तं, व्यभिचारादिज्ञानाभावत्यानुमित्यहेतुत्वात् करणविवटकहेत्वाभासमात्राव्याप्तेः । न चानुमितिप्रतिबन्धनियतयथार्थज्ञानविषयत्वमेव लक्षणार्थः, स च व्यभिचारादावप्यस्तीति नाव्याप्तिरिति वाच्यम् । यथार्थपदेन व्यभिचारित्वभ्रमविषयसद्धेत्वतिव्याप्तिनिरासेऽपि घटधूमौ वह्निव्यभिचारिणावित्येकांशयथार्थविषयतामादाय सद्धेतुधूमातिव्याप्तेस्तथापि दुर्वारत्वात् । न च यल्लिङ्गविषयतया यज्जन्यानुमितिप्रतिबन्धकत्वं तल्लिङ्गांशे यथार्थत्वं ज्ञानस्य विवक्षितमिति वाच्यम् । बाधितलिङ्गासङ्ग्रहापत्तेः । तत्र पक्षनिष्ठसाध्याभावविषयकतया तज्ज्ञानस्य प्रतिबन्धकतया लिङ्गविषयतया प्रतिबन्धकत्वाभावात् । किञ्च, सत्प्रतिपक्षेऽव्याप्तिः । प्रतिबन्धकीभूतविरोधिव्याप्त्यादिज्ञानस्यायथार्थत्वादिति ।

अत्र केचिद् — बाधायामपक्षधर्मो हेतुरनैकान्तिको वेति न्यायाद् व्यभिचारित्वानुपाधिनैव तस्य सङ्ग्रह इति नाव्याप्तिः । सत्प्रतिपक्षेऽप्यसिद्ध्यादिसङ्कीर्णेऽसिद्धत्वादिनैव सङ्ग्रहः । सद्धेतुसत्प्रतिपक्षे तु स्वीयव्याप्त्यादिधीरेव दशाविशेषे विरोधिनीति तद्यथार्थत्वादेव लक्षणं नेयम् । एवमसाधारणेऽपीति । तच्चिन्त्यम् । यदि बाधितत्वेन सामान्यलक्षणेन न सङ्ग्रहः, तदा विशेषलक्षणेनापि तेन रूपेण सङ्ग्रहो न स्यात् । सामान्यलक्षणोपगृहीतस्यैव विशेष(लक्ष)णेन परिग्रहात् । किञ्च, अग्रे वक्ष्यमाणासङ्कीर्णबाधोदाहरणस्थलेऽव्याप्तिः सुदृढैव । तत्र व्यभिचारित्वाद्यभावेन तथा सङ्ग्रहाभावात् । यच्च सद्धेतुसत्प्रतिपक्षादौ स्वीयव्याप्तिधीरेव विरोधिनीत्यवादि । तत्र । स्वीयव्याप्त्यादिज्ञानस्य स्वसाध्यानुमित्यनुकूलतया तदप्रतिबन्धकत्वात् । न च विरोधिव्याप्त्यादिधीसमवधानावच्छिन्नस्वीयव्याप्त्यादिज्ञानत्वेनास्तु प्रतिबन्धकतेति वाच्यम् । तथा सत्यावश्यकतया विरोधिव्याप्त्यादिधिय एव प्रतिबन्धकतौचित्यात् । अन्यथा मणिसमवधानावच्छिन्नवह्नेरपि दाहप्रतिबन्धकत्वापातादित्यलमसङ्ग्रहेण ।

मिश्रास्तु — ज्ञानेऽनुमितिप्रतिबन्धकतावच्छेदको धर्म इह यद्विशिष्टे ज्ञानेऽनुमितिप्रतिबन्धावश्यंभावः स विवक्षितः । स च प्रतिबन्धकज्ञानविषयस्तदविषयश्च । तत्राद्यो व्यभिचारादिः । अन्त्यः सत्प्रतिपक्षादौ विरोधिसामग्रीकालीनत्वादिः । पारिभाषिकप्रतिबन्धकतावच्छेदकत्वस्य गुरुण्यपि तत्राविरोधात् । तथा चानुमितिप्रतिबन्धकतावच्छेदकधर्मवत्त्वगोचरयथार्थज्ञानविषयत्वस्य लक्षणार्थस्य सत्प्रतिपक्षादावपि सत्त्वात्र तत्राव्याप्तिः । अत एव नोपाधावतिव्याप्तिः । उपाधि-

ज्ञानेऽपि व्यभिचाराज्ञानदशायाननुमितिप्रतिबन्धाभावेन तन्नियमघटितप्रतिबन्धकतावच्छेदकशून्यत्वात्। अत एव न सिद्धिविषयसाध्यस्यापि हेत्वाभासता, प्रतिबन्धानियमात्। सिद्धावपि सिसाधयिषायामनुमितेः। अत एव च नाज्ञानरूपासिद्ध्याद्यतिप्रसङ्गोऽपि। अनुमितिप्रतिबन्धनियमसत्त्वेऽपि ज्ञाननिष्ठप्रतिबन्धकतावच्छेदकस्यात्र लक्षणे प्रवेशात् तस्याश्च स्वरूपसत्या एव तथात्वात्। यद्वा, प्रतिबन्धकज्ञानविषय एव ज्ञाने प्रतिबन्धकतावच्छेदकोऽस्तु। तथापि सत्प्रतिपक्षे नाव्याप्तिः। विरोधिव्याप्त्यादेरेव प्रतिबन्धकतावच्छेदकस्य प्रतिबध्यलिङ्गे ज्ञानलक्षणसंबन्धेन वृत्तेः। तच्च ज्ञानं परामर्श एव। तेन संबन्धेन च तद्वत्त्वधीर्यथार्थैव। अथवा लिङ्गं स्वज्ञानद्वारानुमितिप्रयोजकम्। तच्च हेत्वाभासेन बाध्यते। तथा च लिङ्गस्यानुमित्यप्रयोजकतावच्छेदकधर्मवत्त्वं तद्वत्त्वगोचरयथार्थधीविषयत्वं वा लक्षणार्थः। तथा च सत्प्रतिपक्षादावपि लिङ्गनिष्ठानुमित्यप्रयोजकतावच्छेदको धर्मो लिङ्गनिष्ठ एव वाच्यः। अन्यनिष्ठाप्रयोजकत्वस्यान्यनिष्ठधर्मानवच्छेद्यत्वात्। समानाधिकरणस्यैवावच्छेदकत्वात्। तथा चानुमित्यप्रयोजकतावच्छेदकः सत्प्रतिपक्षे गुरुरपि विरोधिसामग्रीकालीनत्वादिरेव। एवं बाधितेऽपि साध्याभाववत्पक्षवृत्तित्वमिति नाव्याप्तिरित्याचक्षते।

अत्रेदं शङ्क्यते — भवत्वविषयीभूतमपि पारिभाषिकप्रतिबन्धकतावच्छेदकं, तथाप्यव्याप्तिः। यत्रातीतेना(ना)गतेन वा लिङ्गेन सत्प्रतिपक्षः, तत्र विरोधिज्ञानसामग्रीकालीनत्वस्य तादृशलिङ्गेऽसत्त्वात्। किञ्च, व्यभिचारित्वस्याप्युक्तप्रतिबन्धकतावच्छेदकत्वाभावादव्याप्तिः। व्यभिचारज्ञाने परामर्शोत्तरजाते सत्यप्यनुमितिप्रतिबन्धाभावात्। करणस्य परिपूर्णतया तद्विघटनाभावात्। न च परामर्शानन्तरं व्यभिचारधीरसंभविनी, ग्राह्याभावज्ञानात्। किञ्च, तदानुमितिसामग्रीसत्त्वादनुमितिरेव, न तु व्यभिचारधीरिति वाच्यम्। शाब्दसिद्ध्यनन्तरं यत्र शाब्द एव परामर्शस्तदनन्तरं प्रात्यक्षिकव्यभिचारधीः, तत्र तद्दोषसंभवात्। तत्र परामर्शस्य शाब्दतया प्रात्यक्षिकव्यभिचारज्ञानाप्रतिबन्धकत्वात्। ग्राह्यप्रत्यक्षे ग्राह्याभावप्रत्यक्षस्यैव प्रतिबन्धकत्वात्। न च व्यभिचारधीकालेऽनुमितिसामग्र्यपि। परामर्शपूर्वोत्पन्नया परामर्शसमानकालीनया सिद्ध्या प्रतिबन्धादिति प्रथमपक्षो न घटते। द्वितीयपक्षोऽपि न क्षोदक्षमः। विरोधिव्याप्त्यादेः प्रतिबध्यलिङ्गेन सह ज्ञानसंबन्धकल्पने मानाभावः। भावे वा धूमो वह्निव्यभिचारीति

भ्रमस्यापि व्यभिचारेण सह धूमस्य संबन्धत्वं प्रसज्ज्येत। तथा च सद्धेतौ लक्षणातिव्याप्तिः। न च ज्ञानं न सर्वत्र सम्बन्धः, किन्तु फलबलात् क्वचिदेव। तथा चेदमनेन सत्प्रतिपक्षितमिति ज्ञानस्य यथार्थत्वव्यवहारात् तज्ज्ञानं संब(न्धे?न्धत्वे)न कल्प्यते। धूमो वह्निव्यभिचारीति ज्ञानस्यायथार्थत्वव्यवहारान्न तज्ज्ञानं तत्संबन्धरूपमिति नव्यदूषणं न भव्यमिति वाच्यम्। उक्तपरामर्शरूपज्ञानस्य विरोधिलिङ्गनिष्ठव्याप्त्यादिसम्बन्धत्वे एकहेतौ बाधावतारेऽपि सत्प्रतिपक्षस्य दुर्वारत्वापातात्। तज्ज्ञानस्य तदाप्यविशिष्टत्वात्। किञ्च, अनुमितिप्रतिबन्धकतावच्छेदको धर्मो व्यभिचारित्वादिः, तद्वत्त्वमाश्रयाश्रयिभावेन, ज्ञानरूपप्रतिबन्धकतावच्छेदकत्वं च विषयविषयिभावेनेत्यननुगमः। यथाकथञ्चित् तद्वत्त्वमात्रस्य चातिप्रसङ्गपराहतत्वादिति। तृतीयपक्षोऽप्ययुक्तः, धूमस्यापि व्यभिचारभ्रमदशायां वह्यनुमित्यप्रयोजकतया तन्निष्ठस्य व्यभिचारभ्रमकालीनत्वस्याप्यनुमित्यप्रयोजकतावच्छेदकतया तद्वत्त्वज्ञानमादाय सद्धेतावतिव्याप्तेर्वज्रलेपायितत्वादिति।

अत्रायमाशयो मिश्राणां — विरोधिज्ञानसामग्रीकालीनत्वं तत्कालीनव्याप्त्यादिमत्तया ज्ञायमानत्वम्। तच्चातीतानागतलिङ्गस्थलेऽप्यस्त्येवेति न तत्र सत्प्रतिपक्षेऽव्याप्तिः। यद्वा, तत्कालसम्बन्धो विरोधिसामग्रीवैशिष्ट्यं (न?)तत्र प्रतिबन्धकतावच्छेदकम्। तच्च तत्राप्यस्त्येव, अनेनेदं सत्प्रतिपक्षितमिति प्रतीतेः। यच्च व्यभिचारज्ञाने सत्यपि प्रतिबन्धानियमात् तत्राव्याप्तिरित्यवादि, तदपि न। परामर्शानुत्पत्तिकालीनयद्विशिष्टज्ञानेऽवश्यं प्रतिबन्धनियमः, तद्वत्त्वस्यात्र प्रतिबन्धकतावच्छेदकत्वेन विवक्षितत्वात्। अस्ति चैतद् व्यभिचारेऽपि। परामर्शपूर्वं ज्ञातेऽनुमित्यनुत्पादनियमात्। न च बाधस्य परामर्शोत्तरं प्रतिबन्धकत्वात् तत्राव्याप्तिः। तदुत्तरं प्रतिबन्धकत्वेऽपि तत्पूर्वमपि प्रतिबन्धकत्वाविरोधात्। उपाधौ तु परामर्शपूर्वं ज्ञाते अनुमितिप्रतिबन्धो नावश्यकः। व्यभिचारज्ञानानावश्यकत्वात्।

नन्विदमप्ययुक्तं — परामर्शपूर्वमन्योन्याभावगर्भव्यभिचारज्ञाने सत्यप्यत्यन्ताभावगर्भव्याप्तिज्ञानादनुमित्युत्पत्तेरिति चेद्, न। अन्योन्याभावगर्भव्यभिचारज्ञाने सत्यत्यन्ताभावगर्भव्याप्तिज्ञानस्यासम्भवात्। *तच्च साक्षात् तद्गर्भव्य-

---

* तच्च असंभवनं च।

भिचारोन्नायक(तां?तया) वेति न कश्चिद् विशेषः । यत्र — विषयीभूतप्रतिबन्धकतावच्छेदकस्य लिङ्गेन सह ज्ञानं विरोधिव्याप्त्यादेर्यदि सम्बन्धः, तदा बाधावतारेऽपि सत्प्रतिपक्षत्वापत्तिः, ज्ञानस्य तदापि सत्त्वादिति दूषणमुक्तम् । तदपि न । ज्ञानस्य हि व्यवहारबलादगत्या तत्सम्बन्धरूपत्वाभ्युपगमेन बाधावतारदशायां तत्सम्बन्धरूपताविरहात् । घटसत्त्वदशायां भूतलस्य घटाभावसम्बन्धत्वानभ्युपगमवदत्रापि कदाचित् सम्बन्धरूपत्वे दोषाभावादिति । यदपि — तद्वत्ता कदाचिदाश्रयाश्रयिभावेन क्वचिच्च विषयविषयिभावेनेत्यननुगम इति दूषणमभ्यधायि । तदपि न । यादृशसम्बन्धेन तद्वत्तामादाय व्यभिचारितामिदं सत्प्रतिपक्षितमिदमिति धीः, तादृशसम्बन्धस्य लक्षणप्रवेशात् । स च क्वचिदाश्रयाश्रयिभावः, क्वचिद् विषयविषयिभाव इति । वस्तुतस्तु — सर्वत्रानुमितिप्रतिबन्धकतावच्छेदकधर्मनिरूपितस्वरूपसम्बन्धविशेष एव तद्वत्तानियामकः । स च तादृशसम्बन्धत्वेनानुगत इति ना(न)नुगमः । अत एव यत्र निरन्तरपरामर्शद्वयरूपसत्प्रतिपक्षः, तत्र विषयविषयिभावेऽपि विरोधिलिङ्गेन सह तज्ज्ञानमासत्तिरिति दिक् ।

इदं तु शङ्क्यते — लक्षणामिदं व्यभिचारादौ धर्मेऽतिव्याप्तं, धर्मिण एवात्र लक्ष्यत्वात् । न च हेत्वभिमतत्वे सतीत्यपि तद्वारकविशेषणं देयमिति वाच्यम् । कदाचित् कस्यचिद् व्यभिचारादिधर्मस्यापि हेत्वभिमतत्वात् । सर्वदा सर्वधर्मिणोऽपि हेतुत्वेनानभिमतत्वात् । किञ्च, ज्ञानविषयत्वं विशेषणमुपलक्षणं वा । नाद्यः । तादृशज्ञानाभावकाले नित्यदोषस्य साधारणादेरहेत्वाभासत्वप्रसङ्गात् । नान्त्यः । असाधारणसत्प्रतिपक्षादेरनित्यदोषत्वापि विशेषदर्शनदशायामपि हेत्वाभासत्वापातात् । किञ्च, यत्पुरुषीयतादृशज्ञानविषयत्वं यस्य तस्य तं प्रत्येव हेत्वाभासत्वम्, अन्यं प्रत्यपि वा । नाद्यः । विरुद्धादेर्नित्यदोषस्य तथाग्राहिपुरुषं प्रत्यनाभासताप्रसङ्गात् । नान्त्यः । असाधारणादेर्विशेषादर्शनात् तथा ज्ञायमानस्य विशेषदर्शिनं प्रत्यपि दोषताप्रसङ्गात् ।

अत्राहुः — अनुमितिप्रतिबन्धकतावच्छेदकधर्मवत्त्वगोचरयथार्थधीविशेष्यत्वं विवक्षितम् । व्यभिचारादयस्तु धर्मास्तादृशधीविशेषणभूता इति नातिव्याप्तिः । तादृशधीविशेष्यत्वं च विशेषणमेव । तच्च ईश्वरज्ञानविशेष्यत्वमादाय विरुद्धादिनित्यदोषे सर्वदास्तीति नाव्याप्तिः । सत्प्रतिपक्षादौ त्वनित्यदोषत्वनिर्णयादीश्वरधीविरहकल्पनात् । फलैकोन्नेयत्वात् तस्याः । पुरुषान्तरीयतादृशधियमा-

दाय पुरुषान्तरे च नाभासता । विशेषतः पुरुषादेरत्राप्रवेशात् । तादृशज्ञानविषयस्य हेत्वाभासत्वमित्येवाङ्गीकारात् । तत्पुरुषादिहेत्वाभासत्वस्य विशि(ष्य ? ष्या)निरूपणादिति ।

नन्वेवमपि बाधसामग्र्यां लक्षणमतिव्यापकमेव । तस्या अपि विरोधिज्ञानसामग्रीत्वेनानुमितिप्रतिबन्धकत्वात् । एवं प्रत्यक्षसामग्र्यामतिव्याप्तिः । संशयोत्तरप्रत्यक्षे तस्या अनुमितिप्रतिबन्धकत्वकल्पनादिति चेद्, न । अनुमितिप्रतिबन्धकत्वं हि न सर्वानुमितिप्रतिबन्धकत्वम् । असिद्धेः । हेत्वाभासेनाप्यसाधकतानुमित्युत्पादनात् । नापि प्रकृतानुमितिप्रतिबन्धकत्वं, सिद्ध्यसिद्धिव्याघातात् । किन्तु तत्पक्षकतत्साध्यकतल्लिङ्गकानुमितित्वावच्छिन्नप्रतिबन्धकत्वम् । तच्च न प्रत्यक्षसामग्र्याः, तस्या भिन्नविषयकतादृशानुमित्यप्रतिबन्धकत्वात् । समानविषयकप्रत्यक्षसामग्र्या एव बलवत्त्वात् । बाधसामग्र्याश्च विरोधिज्ञानसामग्रीत्वेन प्रतिबन्धकता । तथा च सत्प्रतिपक्ष एवान्तर्भावः । न तु विरोधिबुद्ध्युपहितसामग्रीत्वं सत्प्रतिपक्षविलक्षणं तत्र प्रतिबन्धकतावच्छेदकम् । मानाभावाद्, अन्यत्र सिद्धधर्मावच्छेदेनैव त(त्र क ? त्क)ल्पनौचित्यात् । विरोधिबुद्ध्युपधानमिह स्वकारणान्न सत्प्रतिपक्षस्थल इत्यन्यदेतदिति तत्त्वम् ।

वयन्तु विवेचयामः — अनुमितिप्रतिबन्धकतावच्छेदकधर्मपदमिह व्यभिचारादिपञ्चकपरमेव । सामान्यपदस्य विशेषपरत्वात् । तथा चैतत्पञ्चकरूपानुमितिप्रतिबन्धकतावच्छेदकधर्मवदिदं पञ्चकं हेतुत्वाभिमतमिति *समूहालम्बनरूपविशेष्यत्वमुक्तलक्षणार्थ इति नोपाध्यादौ कुत्राप्यतिप्रस(ङ्गात् ? ङ्ग)संभावनापीति । इदं त्ववश्यं वाच्यमेव । अन्यथोपाध्यादावतिप्रसङ्गो ब्रह्मणापि दुर्वार एव । तथाहि — ज्ञा(न? ना)विषयीभूतप्रतिबन्धकतावच्छेदकपक्षे सत्प्रतिपक्षे विरोधिज्ञानसामग्रीकालीनत्वस्य स्वरूपसतः प्रतिबन्धकतावच्छेदकत्ववद् उपाधावपि स्वरूपसद्व्यभिचारानुमित्युपाधानकालीनत्वस्य तादृशत्वेनातिव्याप्तेः । तादृशे सत्युपाधिज्ञानेऽनुमितिप्रतिबन्धकतानियमात् । किं बहुना, व्याप्तिज्ञानकालावच्छिन्नलिङ्गज्ञानेऽसत्यनुमित्यनुत्पादनियमादज्ञानरूपासिद्ध्यतिव्याप्तिः । एवं सिसाधयिषाविरहकालीनत्वविशिष्टे साध्यज्ञाने सत्यनुमितिप्रतिबन्धनियमात् सिद्धिविषयमाध्यस्यापि हेत्वाभास-

---

* समूहालम्बनरूपेति समूहालम्बनरूपज्ञानेत्यर्थः ।

तापत्तिरित्येवं बहुविप्लवः प्रसज्ज्येत । एवं प्रतिबन्धकज्ञानविषयत्वेव प्रतिबन्धकतावच्छेदकत्वमिति पक्षेऽपि किमेकदेशज्ञानस्य प्रतिबन्धकत्वे तद्विशिष्टस्यापरस्याज्ञायमानस्यापि प्रतिबन्धकतावच्छेदककोटिप्रवेशः, उत यावत एव ज्ञानं प्रतिबन्धकं तावत एव तत्र प्रवेश इति । नान्त्यः । साधारणत्वादेरपि प्रतिबन्धकतावच्छेदकत्वं न स्यात् । साध्याभावांशनिश्च(यविष)यीभूतसाध्याभाववद्वृत्तित्वस्य साधारणत्वस्य साध्यांश(स्य ?)निश्च(यविष)यीभूतसाध्यवद्वृत्तित्वस्यासाधारणत्वस्य च साध्याभावनिश्चयसाध्यनिश्चयघटिततया तस्य चाज्ञायमानस्यैव तत्र प्रवेशाङ्गीकारात् । नाद्यः । स्वरूपसद्व्यभिचारानुमित्युपधानावच्छिन्न(स्य) साध्यव्यापकत्वादेर्ज्ञायमानस्योपाधेः, स्वरूपसत्तिसमाधियिषाविरहावच्छिन्नस्य साध्यस्य ज्ञायमानस्य सिद्धसाधने, स्वरूपसद्गृहीतव्याप्त्याश्रयत्वविशिष्टस्य (ज्ञायमानस्य) हेतोरज्ञानादावनुमितिप्रतिबन्धकतावच्छेदकत्वापातादित्यतिप्रसङ्गस्य दुर्वारत्वात् । तस्मादुक्तार्थ एव ग्राह्य इति सङ्क्षेपः ॥

इति हेत्वाभाससामान्यनिरुक्तिः ।

अथ सव्यभिचारसामान्यनिरुक्तिः ।

ते च सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पञ्च । तत्र सव्यभिचारस्त्रेधा साधारणासाधारणानुपसंहारिभेदात् । तत्र व्यभिचारत्वोभयकोट्युपस्थापकतावच्छेदकरूपवत्त्वं लक्षणमिति मणिकृतः । अस्यायमर्थः — साध्यव्याप्तिनिश्चयविरोधिसंशयजनकोभयकोट्युपस्थितिजनकज्ञानविषयतावच्छेदकधर्मवत्त्वम् । तेन केवलान्वयिसाध्यकानुपसंहारिणि नाव्याप्तिः । तत्र साध्यतदभावसंशयासम्भवेऽपि साध्ये पक्षवृत्तित्वतदभावसंशयस्य व्याप्तिनिश्चयविरोधित्वात् । केवलान्वयिसाध्यकानुपसंहार्यत्र लक्ष्य एव नेत्यपि कश्चित् । तादृशधर्मः सपक्षविपक्षवृत्तित्वं, सपक्षविप(क्ष ? क्षावृत्ति)त्वं, साध्यसंशयविषयमात्रवृत्तित्वमिति त्रितयन(पि ? भि)संहितम् । नन्वात्मत्वादिसाध्ये सद्धेतुभूतज्ञाने लक्षणमिदमतिव्याप्तं, साध्यसंशयजनककोटिद्वयोपस्थितिरूपप्रामाण्याप्रामाण्यकोट्युपस्थितिजनकज्ञानविषयतावच्छेदकज्ञानत्वरूपधर्मवत्त्वाज्ज्ञानत्वापीति चेद्, न । साध्यसंशयविषयवृत्तितया य-

ज्ञानस्य तादृशकोट्युपस्थापकत्वमित्यर्थात्। ज्ञानत्वज्ञानं तु प्रामाण्यसंशयविषयवृत्तितया तादृशसंशयजनककोट्युपस्थापकं, न साध्यसंशयविषयवृत्तितया। विवक्षितं च प्रकृते तदिति न ज्ञानत्वरूपधर्मवति ज्ञानेऽतिप्रसङ्ग इति वदन्ति।

अत्र कश्चिद् — व्यभिचारत्वस्यापि साधारणधर्मदर्शनादित्वेनैव तादृशतदुपस्थापकता, न तु संशयविषयवृत्तित्वं तदुपस्थापकतायां तन्त्रमित्यसिद्धं लक्षणमिति दूषणमाह। तन्न। साध्यसंशयविशेष्यवृत्तितानियता यस्य तादृशकोट्युपस्थापकतेत्यर्थात्। भवति च साधारणे वह्न्यादौ गृहीते इदं धूमवन्न वेति संशय इति तस्य साध्यसंशयधर्मिवृत्तितानियतैव तदुपस्थापकता। ज्ञानत्वं (नः) तु साध्यसंशयविशेष्यावृत्त्यपि प्रामाण्यसंशयविशेष्यवृत्तितामात्रेण तदुभयकोट्युपस्थापकमिति ज्ञानपक्षकानुमित्यादौ ज्ञानत्वस्य संशयाविषयवृत्तित्वेऽपि तन्नियमाभावान्नातिप्रसङ्ग इति तत्त्वम्। यत्तु — यत्तूभयकोट्युपस्थापकतावच्छेदकत्वं प्रामाण्य एवातिप्रसक्तमित्याशङ्क्योक्तक्रमेण परिहरन्ति केचिन्। तद्भ्रान्त्या। प्रामाण्याद्युपस्थितेरेवोभयकोट्युपस्थितिरूपतया तज्जनकज्ञानविषयत्वस्य प्रामाण्येऽभावेन शङ्कानुत्था(यः)नादिति केचित्। तदपातितः। प्रामाण्योपस्थित्यनन्तरमर्थोपस्थितेरपि भावेन तज्जनकज्ञानविषयत्व य प्रामाण्ये शङ्कितुं शक्यत्वात्। तस्मात् तत्रेदं दूषणं — प्रामाण्यस्यार्थमात्रकोट्युपस्थापकत्वमेव, अप्रामाण्यस्य चार्थाभावकोट्युपस्थापकत्वमेवेति प्रामाण्येऽप्रामाण्ये वा नोभयकोट्युपस्थापकत्वं शङ्कितुं शक्यत इति।

नन्वेवमपि शब्दोऽनित्यः शब्दत्वादित्यत्र पक्षे साध्यनिश्चयदशायां शब्दत्वस्यानित्यत्वव्याप्तिर्यत्र शाब्दादिना गृहीता, तद्दशायामतिव्याप्तिः सपक्षघटादिव्यावृत्तत्वस्य शब्दत्वे तदापि ज्ञानादिति चेद्, न। व्याप्तिग्रहस्यैव सपक्षवृत्तित्वज्ञानत्वेन तद्दशायां सपक्षव्यावृत्तत्वाज्ञानात्। न च तत्र व्यतिरेकसहचारात् व्यतिरेकव्याप्तिग्रहः, तद्दशायां सपक्षव्यावृत्तत्वज्ञानादतिव्याप्तिरिति वाच्यम्। व्यतिरेकसहचारादन्वयव्याप्तिग्रहमत एवान्य लक्षणत्वात्। अन्वयव्याप्तिग्रहस्य च साध्यनिश्चयं विनासम्भवात् पक्ष एव साध्यनिश्चय इति तद्व्यावृत्तत्वस्य तदा ज्ञानासंभवादिति। यद्वा, विशेषादर्शनदशायामेव सपक्षव्यावृत्तत्वज्ञानं संशय-

---

१. 'त्र भ' क. पाठः.

कोऽ्युपस्थापकमिति विशेषदर्शनदशायां सपक्षव्यावृत्तत्वज्ञानेऽपि न लक्षणाति-व्याप्तिशङ्केति दिक् । यत्तु दूषणमिह नवैरभ्यधायि — सपक्षव्यावृत्तत्वादिज्ञानं नोभयोपस्थापकम् । असाधारणे परस्परप्रतिबन्धेनैकस्याप्यनुपस्थितेरिति । तदसत् । कोऽ्युपस्थितौ परस्परप्रतिबन्धाभावात् । अन्यथा क्वापि न स्यादित्यसाधारणस्थले विशिष्य दोषाभिधानस्यात्यन्तासङ्गतत्वात् । न च संशये परस्परप्रतिबन्धः । तथा सति संशयोत्पादः क्वापि न स्यादेव । विरुद्धनिर्णयसामग्र्यैव तदुत्पादनादिति न किञ्चिदेतत् ।

इदं तु दूषणमिह संभवति — साधारणत्वं न सपक्षविपक्षवृत्तित्वम् । अयं गौरश्वत्वादिति विरुद्धसङ्कीर्णसाधारणाव्याप्तेः । किन्तु विपक्षवृत्तित्वमात्रम् । तच्च साध्याभावकोटिमात्रोपस्थापकं, तत्साहचर्यात् । न तु साध्यकोऽ्युपस्थापकमपीत्युभयकोऽ्युपस्थापकत्वं तत्राव्याप्तमिति ।

अत्र प्रतिभाति — विपक्षवृत्तित्वं दूषकतावीजम् । विभाजकोपाधिस्तु विरुद्धव्यावृत्तं सपक्षविपक्षवृत्तित्वमेव । एवमसाधारणस्यापि सपक्षविपक्षव्यावृत्तत्वमेव विभाजकोपाधिः । दूषकतोपाधिस्तु सपक्षव्यावृत्तत्वमेवेति तत्त्वम् । वस्तुतस्तु साध्यव्याप्यत्वनिश्चयविरोधिसाध्याभाववद्वृत्तिमात्रवृत्त्यन्यहेत्वाभासतोपाधित्वमनै-कान्तिकत्वम् । तादृशोपाधिश्च विपक्षवृत्तित्वादित्रयमेव । साध्यसमानाधिकरणेऽपि तत्त्रयस्य वृत्तेः साध्याभाववद्वृत्तिमात्रावृत्तित्वात् । न चैवमपि व्याप्यत्वासिद्ध्यतिव्याप्तिः । तदन्यत्वस्यापि विशेषणत्वादिति दिक् ॥

इति सव्यभिचारसामान्यनिरुक्तिः ।

अथ साधारणग्रन्थः ।

तत्र साधारणत्वं विपक्षवृत्तित्वमिति मणिकृतः । विपक्षत्वमिह साध्यवदन्यत्वम् । अन्योन्याभावगर्भव्याप्तिज्ञानस्यानुमितिहेतुत्वादिति केचित् । तन्न । अन्योन्याभावगर्भव्याप्तिज्ञानस्यैव हेतुत्वमिति पक्षेऽपि अत्यन्ताभावगर्भव्यभिचारज्ञानस्यान्वयव्यतिरेकाभ्यां ग्राह्याभावानवगाहिनोऽपि प्रतिबन्धकत्वात् । वस्तुतोऽत्य-

---

१. 'दन्त्यं स' क. पाठः.

न्ताभावादिगर्भव्याप्तिधीरपि हेतुरेवेति यावदभावगर्भा व्याप्तिस्तावदभावगर्भं विपक्षत्वम् । न चैवमननुगमः । सहचारज्ञानसहकार्यभावप्रतियोगिज्ञानविषयतावच्छेदकत्वेनानुगमात् । व्यभिचारज्ञानाभावसहकृतसहचारज्ञानस्य व्याप्तिधीहेतुत्वादित्यन्ये । तच्चिन्त्यम् । असहचरि(त)त्वनिश्चयाव्याप्यत्वनिश्च(य)योरप्यभावस्य व्याप्यत्वनिश्चयहेतुतया सहचारधीसहकारित्वस्य तदभावेऽपि सत्त्वेन विरुद्धव्याप्यत्वासिद्ध्यतिव्याप्तेः । तस्मात् सहचाराप्रतियोगित्वे सतीत्यपि विशेषणं देयम् । असहचारविशिष्टासहचारयोश्च[1] विरुद्धव्याप्यत्वासिद्ध्योः सहचारनिरूप्यत्वादतिव्याप्तिनिरासात् । यद्वा, अनुमितिहेतुव्याप्तिज्ञाने ग्राह्याभावावगाहि यज्ज्ञानं संशयसाधारणं प्रतिबन्धकं, तत्त्वं साधारणत्वम् । विरुद्धत्वादिसंशयश्च न प्रतिबन्धक इति नातिव्याप्तिरिति तत्त्वम् ।

अत्रोपाध्यायाः — साध्याभाववद्वृत्तित्वज्ञानमात्रं प्रतिबन्धकं, लाघवात् । न तु निश्चयमात्रं, गौरवादिति वदन्ति । तन्न । तथा सति संशयरूपव्यभिचारज्ञानस्य पक्षीयस्य सर्वत्र सत्त्वादनुमानमात्रविलयापातादित्युक्तत्वात् । न च तर्काच्छङ्कानिवृत्तावनुमानप्रवृत्तिः । अनुभवविरोधात् । सन्दिग्धसाध्यवति सर्वत्र तर्कापेक्षाया अदर्शनादिति प्रागेवोदितत्वात् । किञ्च, विद्यमानव्यभिचारशङ्का न तर्कनाश्या । तस्याः स्वोत्तरभाविगुणा(न?)न्तरमात्रनाश्यत्वेन तर्कपर्यन्तानपेक्षणात् । नाप्यनागतशङ्कानुत्पादकत्वं तर्कस्येति वाच्यम् । तथा सति विद्यमानशङ्काया अनुमानप्रतिबन्धस्य दुर्वारत्वापातात् । न च तर्काभावविशिष्टव्यभिचारधीः प्रतिबन्धिकेति व्यभिचारसंशयः सन्नपि तर्ककाले न प्रतिबन्धक इति वाच्यम् । तथा सति व्यभिचारनिश्चयस्यापि तर्ककाले प्रतिबन्धकता न स्यादिति संशये उत्तेजको वाच्य इति तस्य पृथक् प्रतिबन्धकताकल्पनेऽतिगौरवमिति ।

मिश्रास्तु — साध्याभावांशनिश्चयीभूतसाध्याभाववद्वृत्तित्वज्ञानत्वेन प्रतिबन्धकता । तेन व्यभिचारसंशयात् पक्षीयाद् नानुमानविलयः । नापि साध्याभाववत्त्वेन निश्चिते हेतुसंशयस्याप्रतिबन्धकत्वमिति वदन्ति । तदपि चिन्त्यम् । व्यभिचारनिश्चयत्वेनैव घटाभावादि(ति?)निश्चयवद् ग्राह्याभावनिश्चयत्वेन प्रतिबन्धकत्वम् । न तु संशयस्यापि । विशिष्य तथा कल्पने मानाभावात् । न चैवं

---

१. 'का' क. पाठः.

सति सन्दिग्धानैकान्तिकोच्छेदः । उपाध्यादिसन्देहाहितव्यभिचारसंशयस्य सन्दिग्धानैकान्तिकत्वात् । तस्य चान्याहितसंशयत्वेन ग्राह्यान्तरसंशयसाधारण्येनैव प्रतिबन्धकत्वात् । तस्मात् स्वारसिकः साध्याभाववति हेतुसंशयो वा हेतुमति साध्याभावसंशयो वा न दोषः । अन्याहितम्तु प्रतिबन्धक एव । न केवलमिहैव तत् । किन्तु घटाभावादिसंशयेऽप्येवं रीतिरिति प्रतिभाति । यत्त्वत्र कश्चिद् — व्यभिचारज्ञानस्य न ग्राह्याभावज्ञानत्वेन प्रतिबन्धकता । तथा सत्यत्यन्ताभावगर्भव्याप्तिज्ञानेऽन्योन्याभावगर्भव्यभिचारज्ञानं प्रतिबन्धकं न स्यादिति व्यभिचारज्ञानस्य पृथक् प्रतिबन्धकता वाच्या । तथा चान्यत्राकृष्टो ग्राह्याभावसंशयः प्रतिबन्धकतया कल्प्यते । ज्ञानत्वेन प्रतिबन्धकतायां लाघवादित्यवोचत् । तदभद्रम् । व्यभिचारज्ञानत्वेन प्रतिबन्धकतायां पक्षीयव्यभिचारसंशयेनानुमानोच्छेदस्योक्तत्वात् । साध्याभावांशनिश्चयीभूतत्वविशेषणे च विपरीतगौरवात्, तदपेक्षया साध्याभाववद्वृत्तित्वनिश्चयत्वस्य लघुत्वात् । किञ्च, कदाचिदस्तु व्याप्तिः । सर्वस्यामपि हेत्वधिकरणत्वावच्छेदेन साध्यवत्त्वं ग्राह्यम् । तथा चात्यन्ताभावगर्भायामप्यन्योन्याभावगर्भव्यभिचारधीर्ग्राह्याभावावगाहितयैव प्रतिबन्धिका । अत्यन्ताभावज्ञाने ग्राह्याभावज्ञानत्वेन प्रतिबन्धकत्वात् । साध्यवदन्योन्याभावाभावात्मकसाध्यज्ञाने तद्वदन्योन्याभावज्ञानस्यापि तदत्यन्ताभावज्ञानवत् तत्त्वेन प्रतिबन्धकत्वौचित्यात् । अवश्यं चैतदभ्युपेयमेव । अन्यथा घटान्योन्याभावज्ञानस्य घटत्वज्ञानप्रतिबन्धकता न स्यात् । तदन्योन्याभावस्य ग्राह्यघटत्वाभावानात्मकत्वादि-[1]त्यलम् । किं बहुना, एवं च साध्याभावांशनिश्च(यविष)यीभूतसाध्याभाववद्वृत्तित्वस्य साधारणोपाधित्वे निश्चयांशस्यानित्यत्वादनित्यदोषतापसङ्गः । अन्यथा सपक्षव्यावृत्तत्वरूपासाधारणत्वोपाधिकस्यासाधारणस्याप्यनित्यदोषता न स्यादिति दूषणं शङ्कापथमेव नाधिरोहति । साध्याभाववद्वृत्तित्वस्यैव साधारणोपाधितया निश्चयस्याप्रवेशेनोक्तदोषाभावात् । न चैवमसाधारणत्वमपि साध्यवद्व्यावृत्तत्वमेवास्त्विति तत्रापि निश्चयाप्रवेशाद् नित्यदोषतापात इति वाच्यम् । एवं सति सद्धेतोः शब्दत्वस्यानित्यत्ववतः सर्वस्माद् व्यावृत्तत्वाभावेनासाधारणत्वाभावप्रसङ्गादिति दिक् । यत्तु मिश्रैः समाहितं — याद्विषयतया ज्ञानं प्रतिबन्धकं, तद्विषय-

१. 'त्यत्वदो' क. पाठः.

त्वावच्छिन्ने तस्मिन् सति यत्र प्रतिबन्धनियमस्तत्र तज्ज्ञानविषयस्य नित्यदोषत्वम् । अस्ति चैतत् साधारणत्वे । तज्ज्ञाने सति व्याप्तिज्ञानस्य कदाप्यसंभवात् । असाधारणे तु सपक्षव्यावृत्तत्वज्ञानेऽपि विशेषदर्शनदशायामप्रतिबन्धान्न नित्यदोषत्वमिति । तत्तु विचार्यम् । यादृशस्य ज्ञानस्य विरोधिता, तादृशे सति प्रतिबन्धनियमे सति नित्यदोषत्वमित्येव वाच्यम् । अन्यथा व्यभिचारज्ञाने यत्राप्रामाण्यशङ्का, तत्र प्रतिबन्धकत्वस्याभावात् तस्याप्यनित्यदोषतापातात् । अस्ति चैतदप्रामाण्यशङ्काशून्यव्यभिचारज्ञानवद् विशेषादर्शनविशिष्टसपक्षव्यावृत्तत्वज्ञानस्य प्रतिबन्धकत्वनियम इति नित्यदोषता तस्य दुर्वारैवेति सङ्क्षेपः ॥

इति साधारणग्रन्थः ।

अथासाधारणग्रन्थः ।

असाधारणत्वं तु सपक्षविपक्षव्यावृत्तत्वम् । तत्र च विपक्षव्यावृत्तिरनुकूलैव । सपक्षव्यावृत्तिर्दूषणम् । तच्च साध्यतदभावोत्थापकतया दूषणमिति मणिकृतः । अत्र साध्यतदभावोभयानुमित्यनुकूलव्याप्तिविशिष्टपक्षधर्मताज्ञानविषयत्व साध्यतदभावोत्थापकत्वम् । अनुमितिश्च परस्परप्रतिबन्धेन न जायते । अत एवायं तर्हि सत्प्रतिपक्ष एवेत्याशङ्कां मनसि निधाय सत्प्रतिपक्षे द्वौ हेतू अत्र त्वेक एवेति ततो भेद इत्युक्तं मणिकृतेत्युपाध्यायाः ।

अत्र मिश्राः — हेत्वैक्यानैक्यमकिञ्चित्करं हेत्वाभासैक्यानैक्ये । किन्तु प्रतिबन्धकतावच्छेदकैक्यानैक्यम् । तच्च सत्प्रतिपक्षसमानमेवेति कथं तद्भेदः । किञ्च, एकस्य कथं परस्परविरुद्धसाध्यतदभावव्याप्तिग्रहः । एकत्र विरुद्धोभयाज्ञानादिति नैवं व्याख्या युज्यते । किन्तु साध्यतदभावोत्थापकत्वमिह तदुभयानुमित्यनुकूलतदुभयव्याप्तिग्रहसामग्रीसहकृतत्वम् । तथा चात्र साध्याभावहेत्वभावसहचारग्रहः साध्यहेत्वभावसहचारग्रहश्च साध्यतदभावव्याप्तिग्रहकारणं हेतौ (मत?स्त) इति परस्परविरुद्धव्याप्तिग्राहकसामग्र्या नैकत्रापि व्याप्तिग्रह

१. 'यत्तस्य' क पाठः.

इत्यसाधारणस्य दूषकतावीजम् । अत एव यद्येवं तदा सत्प्रतिपक्षे कथं परस्परविरुद्धव्याप्तिग्रह इत्याशङ्कायामुक्तं सत्प्रतिपक्षे द्वाविति । तथा चैकस्मिन् परस्परविरुद्धव्याप्तिग्रहो न संभवति, न तु भिन्नेऽपीति न विरोध इत्याहुः ।

अत्र चैतत् तत्त्वम् — अन्वयव्याप्तिग्रहः प्रकृते शङ्कितोऽपि न । एकहेतोः साध्यतदभावोभयनियतसामानाधिकरण्यस्य साध्यतदभावयोरैकाधिकरण्ये पर्यवसन्नस्य विरुद्धतया ज्ञातुमशक्तेः । व्यतिरेकव्याप्तिग्रहस्तु संभवति । शब्दत्वाभावे नित्यत्वानित्यत्वव्यापकत्वग्रहे बाधकाभावात् । तदपि वृत्तिमत्त्वास्फूर्तिदशायाम् । वृत्तिमत्त्वस्फूर्तावपि यद् वृत्तिमत् तन्नित्यानित्यान्यतरवृ(त्तिरि?त्ती)त्याकारकव्याप्तिस्मृत्यभावे सत्युभयव्यापकत्वग्रहो न विरुद्ध इति तादृशस्थले सत्प्रतिपक्षतयैवासाधारणस्य दोषता । तदभिप्रायिकैवोपाध्यायोक्तिरपि । यदि च वृत्तिमद् नित्यानित्यान्यतरवृत्त्येवेति स्फूर्तिः, तदा व्यतिरेकव्याप्तिग्रहोऽप्यसंभवी । सकलनित्यव्यावृत्तत्वस्य सकलानित्यव्यावृत्तत्वस्य च शब्दत्वे वृत्तिमत्त्वेन ज्ञाते ज्ञातुमशक्यत्वात् । तथा च सपक्षविपक्षव्यावृत्तत्वज्ञानरूपसाध्यतदभावव्याप्तिग्रहसामग्रीसंभवे सत्प्रतिपक्षान्न व्याप्तिनिश्चयः । किन्तु परस्परव्याप्तिसंशय इत्यसाधारणस्य दूषकतावीजम् । इदमेवाभिप्रेत्य व्याप्तिग्रहसत्प्रतिपक्षः पक्षधरमिश्रैरुक्त इति ।

इदं त्ववधेयं — विरुद्धव्याप्तिग्राहकसामग्रीत्वेनासाधारणस्य दूषकतापक्षेऽपि हेत्वैक्यमकिञ्चित्करम् । हेतुनानात्वेऽपि तत्संभवात् । यथा अयमनित्यः पटत्वाद्, नित्योऽयं तन्तुसमवेतद्रव्यत्वादित्यत्र । इहैकत्रैवाधिकरणे उभयहेत्वोरुभयसाध्यव्याप्तिग्रहप्रसक्तौ विरोधेन तदग्रहात् । अत्र त्वेक एवेति मणेरेकाधिकरण एवेत्यर्थादिति दिक् ॥

इत्यसाधारणग्रन्थः ।

अथानुपसंहारिग्रन्थः ।

अनुपसंहारी च केवलान्वयिधर्मावच्छिन्नपक्षक इति वदन्ति । अस्यार्थः —

१. 'क्यं कि' क. पाठः

स्वरूपसत्साध्यसिद्धिनिवर्त्यसंशयविषयोपस्थितेया(त ? व)द्वस्तुवृत्तिस्वव्याप्तिग्राहकसत्ताकत्वम् । अत एव केवलान्वयिसाध्यकानुपसंहारिण्यपि नाव्याप्तिः । साध्यसिद्धिनिवर्त्यसंशयस्य प्रमेयत्वमिह न वेत्यादिरूपस्य तत्रापि प्रसिद्धेः । अत एव च यत्र वह्निसन्देहस्तत्र सर्वत्र धूमस्य सकलवृत्तित्वेनाज्ञानान्न(?)व्याप्तिसम्भावना, तत्रापि व्याप्तिग्राहक(त्व ?)स्य धूमसत्त्वस्य धूमाभावसत्त्वस्य च सर्वत्र ज्ञानात् । ननु तथापि सकलधूमाधिकरण एव यत्र वह्निसन्देहः, तदनन्तरं सर्वं धूमवद् वह्निमदित्यनुमितिः, तदानुपसंहारित्वं न स्यात् । यावदुपस्थितवस्तूनां साध्यसंशयाविषयत्वादिति चेद्, न । तत्र व्यतिरेकसहचारेणान्वयव्याप्तिग्रहसम्भवादनुपसंहारित्वाभावस्येष्टत्वादिति । यथाश्रुते तु सर्वं प्रमेयमित्यादीनां विशेषदर्शनदशायामपि केवलान्वयिधर्मावच्छिन्नपक्षकत्वेनानुपसंहारित्वापत्तिः, सर्वं धूमवद्वह्निमदित्यस्य विशेषादर्शनदशायामप्यनुपसंहारित्वाभावापत्तिः, केवलान्वयिधर्मावच्छिन्नपक्षत्वाभावादित्यादि दूषणं द्रष्टव्यम् ।

अत्र वदन्ति — अनुपसंहारी न हेत्वाभासः । हेतुमति सर्वत्र साध्यसंशयात् सहचारनिश्चयाभावेन व्याप्तिनिर्णयाभावः । कारणाभावादेव कार्याभावोपपत्तौ प्रतिबन्धककल्पनात् । किञ्च, हेतुमति साध्यसन्देहो व्यभिचारसंशयः । स च न प्रतिबन्धकः । पक्षीयसाध्यसंशयेनानुमानमात्रोच्छेदप्रसङ्गात् । भवतु वा प्रतिबन्धकः । तथापि साधारण एवायमन्तर्भूतो न पृथग् हेत्वाभास इति ।

अत्र मिश्राः — हेतुमति सर्वत्र साध्यसन्देहोऽनुपसंहारी । स च हेतौ साध्यसामानाधिकरण्यसंशयसामग्रीत्वेन प्रतिबन्धकः । हेतुमति साध्यसंशयानन्तरं हेतुः साध्यसमानाधिकरणो न वेति संशयस्यौचित्यावर्जितत्वात्, प्रामाण्यसंशयवदिति वदन्ति ।

अत्र कश्चित् — संशयसामग्री न निर्णयप्रतिबन्धिका । कारणाभावादेव तदा निर्णयाभावात् । तथा च सहचारनिश्चये कथनस्य प्रतिबन्धकत्वं, येन हेत्वाभासता स्यादित्याह । त(न्नि ?न्न । नि)श्चयद्वयसामग्र्या एव संशयजनकतया तदप्रतिबन्धकत्वे संशयकाले निर्णयायातस्य वज्रलेपायितत्वादिति ।

१. 'तविषयात' क. पाठः ।

अन्ये तु — हेतुमति सर्वत्र साध्यसंशयः साध्यसामानाधिकरण्यसंशयसामग्रीत्वेन यदि प्रतिबन्धकः, तदा प्रथमसंशयसामग्र्यपि प्रतिबन्धिकास्तु । संशयसामग्रीत्वाविशेषादिति । तदपि न । हेतुमति साध्यसन्देहस्य स्वारसिकस्याप्रतिबन्धकतया तत्सामग्र्या न प्रतिबन्धकता । प्रतिबन्धकसामग्रीत्वाभावात् । हेतुमति साध्यसन्देहाहितस्य हेतुसाध्यसामानाधिकरण्यसंशयस्यान्याहिततया प्रतिबन्धकत्वेन तत्सामग्रीभूतस्य प्रथमसन्देहस्य प्रतिबन्धकत्वौचित्यादिति दिक् ॥

इत्यनुपसंहारिग्रन्थः ।

अथ विरुद्धग्रन्थः ।

विरुद्धश्च साध्यव्यापकाभावप्रतियोगीति मणिकृतः । नन्विदं लक्षणमाकाशाद्यवृत्तिसाध्यकविरुद्धाव्याप्तम् । साध्याधिकरणाप्रसिद्ध्या हेत्वभावे तद्व्यापकत्वासंभवात् । न च तन्यासंग्राह्यत्वमेवास्तु । दूषकताबीजसामानाधिकरण्यज्ञानविरोधित्वस्य सत्त्वेनासंग्राह्यत्वाभिधानस्य निर्वचनासामर्थ्यद्योतकत्वात् । किञ्च, साध्यव्यापकाभावप्रतियोगिसंबन्धकत्वज्ञानमपि सामानाधिकरण्यज्ञानविरोधिहेत्वाभावज्ञानान्तरं स्यात् । उक्तविरुद्धोपाध्यनन्तर्भावादिति ।

अत्र वदन्ति — साध्यव्यापकाभावप्रतियोगित्वं न सकलविरुद्धसाधारणं विभाजकत्वेनोक्तम् । किन्तु क्वचिदेतत् क्वचिदन्यदित्युक्तदोषाभावः । न चैवं विभाजकोपाधिः सर्वसाधारणो न प्राप्त इति वाच्यम् । हेतुनिष्ठसामानाधिकरण्यधीप्रतिबन्धकनिश्चय(तो?)विषयतावच्छेदकधर्मवत्त्वेन सर्वसाधारणानुगमकरणात् । अत एव किञ्चित्यादिदोषोऽपि निरस्तः ।

अत्र केचित् — हेतुमति साध्यस्य ग्राह्यतया हेतुमति साध्याभावज्ञानं (साध्य)ग्रहप्रतिबन्धकं, ग्राह्याभावगाहित्वात् । न तु साध्यवति हेतुर्ग्राह्यः, येन साध्यवति हेत्वभावधीर्विरोधिनी स्यात् । किञ्च, सद्धेतावपि साध्य(वाक्य?वत्य)योगोलकादौ धूमाभावगत्त्वात् तत्रापि सामानाधिकरण्यज्ञानं न स्यादिति । तद(प्यु?प्यनु)पपत्तिविलसितम् । साध्यहेतुसामानाधिकरण्यस्य ग्राह्यस्य हेतुमति

सर्वत्र साध्याभावज्ञानाद्वा साध्यवति सर्वत्र हेत्वभावज्ञानाद्वा विघटनात् । ऐकाधिकरण्यस्य तत्रापि विरोधे सत्यसंभवात् । अत एव न (सि?स)द्धेतावतिप्रसङ्गः । तत्र साध्यवति क्वचिदेव हेत्वभावज्ञानात् । सर्वत्र तज्ज्ञानस्यैव सामानाधिकरण्यज्ञानविरोधित्वात् । अत एव च न व्यभिचारसङ्करोऽपि । हेतुमति साध्याभावज्ञानस्य सामानाधिकरण्यज्ञानाविरोधित्वात् । अत एव 'हेतुमति सर्वत्र साध्याभावज्ञानस्य व्यभिचारज्ञानत्वेनैव प्रतिबन्धकत्वम् । अन्यत्र कल्पनात् । (न) विरुद्धज्ञानत्वेन' इत्यपि कस्यचित् प्रलपितमपास्तम् । हेतुमति सर्वत्र साध्याभावज्ञानस्योभयरू(पत्वेना?पेणा)पि प्रतिबन्धकत्वात् । साध्यवति सर्वत्र हेत्वभावज्ञानस्य सामानाधिकरण्यधीविरोधिज्ञानत्वेन पृथक्प्रतिबन्धकत्वकल्पनात् । व्यभिचारस्य तत्रासंस्पर्शात् । साध्याभावानवगाहित्वात् ।

केचित्तु — हेतुमति साध्याभावज्ञानं व्यभिचारज्ञानतया, हेतुमति साध्याधिकरणत्वाभावज्ञानं ग्राह्यसामानाधिकरण्याभावावगाहितया प्रतिबन्धकम् । तथा च नानयोः सङ्कर इत्याहुः ।

अत्र नव्याः — साध्याधिकरणत्वाभावज्ञानमपि हेतुमति साध्याभावावगाहितया व्यभिचारज्ञानत्वेनैव प्रतिबन्धकं, न तु विरुद्धत्वज्ञानत्वेनेति दूषयन्ति । तन्न । हेतुमति साध्याभावज्ञानस्याव्यभिचारज्ञानविरोधित्वेन प्रतिबन्धकत्ववद् हेतुमति साध्याधिकरणत्वाभावज्ञानस्यापि सामानाधिकरण्यज्ञानविरोधितया प्रतिबन्धकत्वात् । ग्राह्याभावावगाहित्वस्य समानत्वात् । विनिगमकान्तरस्याभावात् । वस्तुतः साध्याधिकरणे हेत्वभावज्ञानस्य व्यभिचारज्ञान(स्य?त्व)शङ्कापि नास्तीति तत्रैव विरुद्धस्यासाङ्कर्यमित्यवधेयम् । यत्तु — व्यभिचारज्ञानं संशयसाधारणं प्रतिबन्धकं, विरुद्धत्वज्ञानं च निश्चयरूपमेवेति भेद इति । तन्न । व्यभिचारज्ञानस्यापि संशयरूपस्य प्रतिबन्धकत्वे मानाभावात् । ग्राह्यान्तरसाधारण्येनैव प्रतिबन्धकत्वसम्भवे व्यभिचारज्ञानस्य पृथक् प्रतिबन्धकत्वाकल्पनादिति पूर्वमेवावेदितत्वादिति सङ्क्षेपः ॥

इति विरुद्धग्रन्थः ।

अथ सत्प्रतिपक्षग्रन्थः ।

सत्प्रतिपक्षता च साध्यविरोध्युपस्थापनसमर्थसमानबलोपस्थित्या प्रतिरुद्धकार्यलिङ्गतेति मणिकृतः । अत्र बाधसामग्र्या प्रतिरुद्धकार्ये हीनबलबलिङ्गेऽति व्याप्तिर्मा भूत् । अतः समानपदम् । तदर्थश्च निर्णयाजनकत्वम् । बाधसामग्री च बाधरूपनिर्णयजनिकैवेति वदन्ति ।

अत्रोपाध्यायाः — बाधसामग्रीमादाय हीनबलेऽतिव्याप्तिवारणाय समानपदमित्युक्तम् । (तन्न[1]) अधिकबलत्वस्य सापेक्षतयाधिकबलत्वस्य ज्ञानदशायामत्र न्यूनबलत्वज्ञानस्यावश्यकत्वात् तेनैव तत्रानुमित्यनुत्पत्तावधिकबलत्वज्ञानस्य प्रतिबन्धकत्वे मानाभावात् । तस्मात् पारिभाषिकमिह प्रतिबन्धकत्वम् । सा च विरुद्धत्वे सति विद्यमानत्वम् । तच्चाप्रतिबन्धकीभूतायामप्यधिकबलोपस्थितावस्तीति तामादाय न्यूनबलातिव्याप्तिवारणाय समानपदमित्याहुः ।

अत्र मिश्राः — अधिकबलत्वं हि गृहीतप्रमात्वम् । तच्चैकलिङ्गस्य यदा, तदापरलिङ्गस्य गृहीताप्रमात्वरूपं न्यूनबलत्वमित्यत्र मानाभावः । तदुभयलिङ्गज्ञानप्रमात्वाप्रमात्वयोर्भिन्नविषयकतया समानग्रहसामग्रीत्वाभावात् । तस्मादधिकबलत्वज्ञानं विरोध्येवेति प्राच्यं व्याख्यानं भव्यमेव । स्वीयपरिभाषा तु न भव्या । एवं सति हीनबलोपस्थितेरपि पारिभाषिकप्रतिबन्धकतामादायाधिकबलोपस्थितौ लक्षणातिव्याप्तेर्दुष्परिहरत्वात् । नहि समानपदाद् हीनबलोपस्थितिर्वारयितुं शक्यते । निर्णयाजनकत्वरूपसमानत्वस्य तत्र सत्त्वादिति दूषयन्ति ।

अत्र नव्याः — यदा चैकपरामर्शे प्रमा(त्व)ग्रहः, तदापरपरामर्शे(न?) च नाप्रमात्वग्रहः । तथासति प्रतिबन्धकत्वं सत्प्रतिपक्षतयैव । प्रमात्वाग्रहस्याकिञ्चित्करत्वात् । अप्रामाण्यशङ्काशून्यत्वस्योभयसाधारणत्वात् । तथा च न तदतिव्याप्तिशङ्कापि । सत्प्रतिपक्षतयैव सङ्ग्राह्यत्वात् । अथ यदैकत्र प्रमात्वग्रहः तदा भिन्नग्रहसामग्रीकमप्यप्रमात्वं प्रतिबध्यलिङ्गपरामर्शे गृह्यत इति मतं, तदा कारणीभूताप्रमात्वशङ्काशून्यपरामर्शाभावादेवानुमित्यनुत्पाद इत्यधिकबलोपस्थितेः

---

१. "त्व" क पाठः,

प्रतिबन्धकत्वं नास्त्येवेति न तमादाय न्यूनबलोपस्थितावतिव्याप्तिरित्युपाध्यायोक्तदूषणं समीचीनमेवेति वदन्ति ।

अत्र ब्रूमः — यत्रोभयोरपि परामर्शयोरप्रामाण्यशङ्का नास्ति, एकत्र च प्रमात्वं गृहीतं, तत्राप्रामाण्यशङ्काशून्यत्वस्योभयसाधारणतया प्रमात्वग्रहस्याधिकबलत्वसम्पादकता संभवत्येव । विपक्षबाधकतर्कबलत्वात् । तथा च तत्र गृहीतप्रमात्वपरामर्शप्रतिरुद्धकार्येऽगृहीतप्रमात्वे परामर्शान्तरेऽतिव्याप्तिः संभवत्येवेति तदर्थं समानपदमिति मिश्राशयात् । वस्तुतो यज्ज्ञानं यत्र प्रतिबन्धकं, तत्सामग्र्यपि तत्र प्रतिबन्धिकेति बाधसामग्र्याः कथं न प्रतिबन्धकत्वम् । बाधप्रतिबन्धकत्वस्य व्यवस्थाप्यत्वात् । यथा च तथा सति बाधसामग्री न हेत्वाभासः, तथोक्तं हेत्वाभासलक्षणे । यत्तूपाध्यायपरिभाषापक्षे मिश्रैर्दूषणमुक्तं — हीनबलोपस्थितिमादायाधिकबलोपस्थितावतिव्याप्तिरिति । तत्तु(न।) अन्यूनाधिकत्वरूपस्य समानत्वस्योपाध्यायाभिप्रेतत्वात्, तस्य च न्यूनबलोपस्थितावधिकबलोपस्थितौ वा विरहेणानतिप्रसङ्गादिति दिक् । अत्र च नायं व्याप्यपक्षधर्मः पर्वतवृत्तित्वादित्यत्रायं व्याप्यपक्षधर्म इति निर्णयाजनकबाधरूपबलोपस्थित्या प्रतिरुद्धकार्ये पर्वतवृत्तित्वरूपलिङ्गेऽतिव्याप्तिर्मा भूत्। अतः साध्यविरोध्युपस्थापनसमर्थेति विशेषणम् । व्याप्तिविशिष्टपक्षधर्मतोपस्थितिजननस्वरूपयोग्यत्वं प्रथमविशेषणार्थः । तेन केवलान्वयिसत्प्रतिपक्षे नाव्याप्तिः ।

नन्वाद्यं विशेषणं तथापि व्यर्थमेव । व्याप्तिविशिष्टपक्षधर्म इति बाधरूपोपस्थितेः बलोपस्थितित्वेन प्रतिबन्धकत्वाभावात् । तथा विवक्षायाश्चावश्यकत्वात् । अन्यथा अनित्यत्वव्याप्यं कृतकत्वमिति सत्प्रतिपक्षात्मके परामर्शे नित्यत्वविरुद्धं जन्यत्वमित्यपि यत्र दैवादवसितं, तत्र विरुद्धत्वेन ज्ञाते जन्यत्वेऽतिव्याप्तिप्रसङ्गात् । विरुद्धत्वज्ञानस्य समूहालम्बनरूपत्वेन बलोपस्थितिरूपत्वसत्त्वादिति चेद्, न । बलोपस्थितित्वस्य स्व(बलो ! परो)पस्थितिसाधारण्येन प्रतिबन्धकतानवच्छेदकतया साध्यविरो(धित्वा ? धीत्या)देरावश्यकत्वात्। तथा च तद्बलात् साध्यविरोधिनोऽन्यूनबलोपस्थि(त ? ति)त्वं प्रतिबन्धकतावच्छेदकं लभ्यते । तदयं लक्षणार्थः—साध्यविरोध्यन्यूनव्याप्तिपक्षधर्मतोपस्थितित्वावच्छिन्नप्रतिबन्धकता(यन्निष्ठा,)निर्णयाजनकताद्यनुपस्थितिप्रतिरुद्धकार्यालिङ्गत्वमिति । सत्प्रतिपक्षे तु परामर्शद्वयं क्वचित् क्वचिदेक एव परामर्शः सामग्रीबलाद् भवति । न चाद्यपक्षे द्वितीय-

यपरामर्शोत्पत्तिकाले प्रथमेनानुमितिरेव न कुत इति वाच्यम्। सिद्ध्यनन्तरं प्रथमपरामर्शोत्पादात् सिद्धिप्रतिबन्धेनाव्यवधानेनानुमित्यजननात्। द्वितीयपरामर्शे(न) प्रतिबन्धे(न?) विनश्यदवस्थेन प्रथमेनानुमित्यजननात्। यद्वा द्वितीयपरामर्शोत्पत्तिकाले कार्यतः सहभूतस्य तदभावस्याभावेनानुमित्यनुत्पत्तिः। अन्यथा विशेषदर्शनकाले संशयापत्तेरिति मणेरप्यत्र स्वरसात्।

नन्वसंभवग्रस्तमिदम्, एकत्र परस्परविरोधिसाध्यतदभावयोरिव तद्व्याप्ययोरपि ज्ञानासंभवादिति चेद्, न। उभयव्याप्यज्ञानानन्तरं साध्ययोर्यत्र विरोधस्फूर्तिः, तत्रानुपपत्त्यभावात्। न चैवं विरो(धि?ध)स्फूर्तिकाल एवानुमित्यापातः, परामर्शस्य वृत्तित्वादिति(?) वाच्यम्। विरोधज्ञानस्य प्रतिबन्धकत्वादिति बहवः। तच्चिन्त्यम्। तथा सति विरोधधियः प्रतिबन्धकत्वं, न तु परामर्शात्मकसत्प्रतिपक्षस्य। मानाभावात्। तस्मात् साध्ययोर्विरोधावधारणेऽपि हेत्वोर्विरोधानवधारणे एकत्रोभयोपनयः संभवत्येवेति ज्यायः। उत्तरकाले चानयोर्विरोधिव्याप्यतायामेकाधिकरण्यानुपपत्तिः। तदुपपत्तौ च विरोधिव्याप्यतानुपपत्तिरिति व्याप्तिपक्षधर्मतान्यतरभङ्गः कल्प्यते। न चैवं तदेव दूषणमस्तु। व्याप्त्यभावज्ञानस्य करणविघटकतयास्य च परामर्शोत्तरभाविनया प्रतिबन्धकत्वायोगाद् ग्राह्याभावव्याप्यज्ञानस्याप्यन्यत्र प्रतिबन्धकतया कल्पनात् प्रतिबन्धकत्वाभावस्य वक्तुमशक्यत्वाच्च। तस्मात् सत्प्रतिपक्षे परस्परव्याप्यज्ञानं परस्परनिर्णयाय यत्र वृत्तं, (तत्र) परस्परविरोधिव्याप्यज्ञानप्रतिबन्धान्नैकमपि ज्ञानं जनयितुमीष्ट इति सिद्धान्तः।

अत्र र(क्त?त्न)कोशकृतः — विरोधिनिर्णयद्वयसामग्र्याः संशयजनकत्वकल्पनात् परस्परगोचरा संशयरूपानुमितिरिहाप्युत्पद्यताम्। सत्प्रतिपक्षार्थोऽप्ययमेव, यत् परस्परप्रतिबन्धाद् व्याप्ययुगलज्ञानं निर्णयाजनकमिति वदन्ति।

अत्र मणिकृतः — साध्यतदभावयोर्विरोधज्ञानाद् यथैकज्ञानं परज्ञानविरोधि, तथा तद्व्याप्ययोरपि साध्यादिविरोधितया तज्ज्ञाने सति संशयरूपमपि साध्यादिज्ञानमसंभवि। प्रतिबन्धकसत्त्वे कार्योत्पादस्य वक्तुमशक्यत्वादित्याहुः।

अत्र वदन्ति — यथा ग्राह्याभावव्याप्यबुद्धेः अनुमितौ प्रतिबन्धकता, तथा विरुद्धनिर्णयसामग्र्याः संशयजनकतापि कल्पितेति संशयरूपानुमितिरावश्यका। न च विशेषादर्शनसमवहिता निर्णयसामग्री संशयजनिका, इह तु विशेषदर्शनसमवधानात् कथं संशयं जनयत्विति वाच्यम्। अन्यतरकोटिविशेषदर्श-

नस्यैव संशयप्रतिबन्धकत्वात् । न तूभयकोटिविशेषदर्शनस्य । तथा सति स्थाणुत्वपुरुषत्वोभयांशे विशेषदर्शने सति संशयानुत्पादप्रसङ्गात् । तस्माल्लाघवाद् विरोधिनिर्णयसामग्रीत्वेन संशयजनकताकल्पनाद् अन्यतरव्याप्तिज्ञानस्यानुमित्यादौ प्रतिबन्धकता (न) कल्प्यत इति ।

अत्र केचिद् — यदि विरुद्धनिर्णयसामग्रीत्वेन संशयजनकता, तथा सति विरुद्धस्मृतिसामग्रीतः संशयरूपस्मृत्यापत्तेः । तादृशस्मृतेश्चाननुभवेनेष्टापत्तेः कर्तुमशक्यत्वात् । तस्माद् विरुद्धप्रत्यक्षसामग्रीत्वेन संशयजनकता कल्प्यत इति कथं विरुद्धानुमितिसामग्र्या संशय इति । तच्चिन्त्यम् । एतावतापि विरुद्धानुभवसामग्रीत्वेन संशयजनकतायां बाधकाभावात् । परे तु — गुणविरोधस्थले विरोधिसामग्र्याः प्रतिबन्धकत्वं दृष्टम् । तत्र च परस्परप्रतिबन्धेन गुणान्तरानुत्पत्तिरेव दृष्टा । तथेहापि ज्ञानानुत्पत्तिरेव युज्यत इति न संशयरूपानुमितिरिति । तदपि चिन्त्यम् । तत्र विरोधिगुणसामग्रीत्वेन प्रतिबन्धकत्वाद् इह तु स्वाभावज्ञानसामग्रीत्वेन प्रतिबन्धकत्वाद् उभयसाधारणस्य विरोधिसामग्रीत्वस्य निर्वक्तुमशक्यत्वात् । यदपि कैश्चित् समाहितं — प्रत्यक्षे ग्राह्याभावप्रत्यक्षेणैव प्रतिब(न्धकी? न्धः)। अनुमित्यादौ तु ग्राह्याभावज्ञानमात्रेण प्रतिबन्धः । तत्रापि ग्राह्याभावज्ञानत्वापेक्षया ग्राह्यविरोधिज्ञानत्वं लघ्विति तदेव प्रतिबन्धकतावच्छेदकं कल्प्यते। ग्राह्यविरोधित्वं च तदधिकरणानधिकरणत्वम् अभावतद्व्याप्यसाधारणमिति कथं विरोधिनिर्णयसामग्र्याः संशयजनकत्वेऽपि व्याप्यदर्शनरूपप्रतिबन्धके सति संशयरूपानुमितिरिति । तदपि चिन्त्यम् । तदधिकरणानधिकरणज्ञानस्यानुमितिप्रतिबन्धकत्वे वह्नि(रु? रनु)ष्ण इत्यादि भ्रमानुमितिर्न स्यात् । वह्नित्वस्यानुष्णत्वाधिकरणानधिकरणस्य ज्ञानात् । तदधिकरणानधिकरणत्वेन ज्ञानस्य प्रतिबन्धकत्वे कथं ग्राह्याभावसाधारण्यं, तज्ज्ञानस्य तत्त्वेनाप्रतिबन्धकत्वात् । ग्राह्याभावस्य तत्त्वेन ज्ञातस्य प्रतिबन्धकत्वमिति बहुशो निवेदितत्वात् । किञ्च, बाधस्याधिकबलत्वार्थं पृथक् प्रतिबन्धकतावश्यिका । तथा च किं साधारणप्रतिबन्धकताकल्पनेन । अपि च, व्याप्यज्ञानं भवतु प्रतिबन्धकम् । तथापि तत्प्रतिबध्यतावच्छेदकं संशयसाधारणं तन्निश्चयरूपप्रत्यक्षव्यावृत्तं प्रत्यक्षनिश्चयभिन्नग्राह्यज्ञानत्वं वाच्यम् । तथा चोभयविशेषदर्शनकाले स्थाणुपुरुषसंशयानुत्पादप्रसङ्गः । तथा च तदनुरोधादन्यतरव्याप्यदर्शनत्वं विरोधितावच्छेद(कत्वं? कं) वाच्यम् ।

तच्चोभयव्याप्यदर्शनकाले नास्तीति कथं न संशयरूपानुमितिः । यदपि च — निश्चयद्वयसामग्रीतः संशय इति सत्यम् । किन्तु यादृशो निश्चयस्य सामग्री, तादृशसंशयं प्रसूते । विशेषदर्शनं चावधारणात्मकनिश्चयसामग्रीत्यवधारणद्वयरूपसंशयः स्यात् । कोटिस्मृत्यादीन्द्रियसन्निकर्षादिकं तु प्रत्यक्षमात्रे सामग्रीति तैः प्रत्यक्षमात्रं जन्यते । तच्च संशयसामग्र्यभावे निश्चयरूपमेव । तत्सत्त्वे च संशयरूपमेवेति तत्र नायं दोषः । न चोभयव्याप्यदर्शनस्थले तत्राप्यवधारणरूपसंशयापत्तिरिति वाच्यम् । तत्रोभयव्याप्यदर्शनस्य परस्परप्रतिबन्धेन मूकत्वात् सामान्यसामग्र्या च संशयोत्पादादिति । तदप्यालोचनीयम् । अवधारणज्ञानत्वं न विशेषदर्शनजन्यतावच्छेदकं, व्यर्थत्वात् । अनुमितौ च तदुपस्थापकाभावादुपनीतभानस्य तत्रानङ्गीकारात् । भवतु वा विशेषदर्शनबलादेवानुमितौ व्यवच्छेदभानम् । तत् संशयरूपानुमितावप्यस्तु । विरुद्धयोः साध्यतदभावयोरिव व्यवच्छेद(क?)स्यापि भाने दोषाभावात् । अनुभूयते च किमयं स्थाणुरेव, किं पुरुष एवेति । (तस्माद्) नायं युक्तिमहः पन्थाः । यत्तु — संश(यरूपे) कोट्योर्विरो(धो)ऽपि भासते । अनुमितौ व्याप्तिपक्षधर्मतानुपनीततया न तद्भानमिति कथं संशयरूपानुमितिरिति । तदपि न । संशयसामग्र्या एव विरोधभानम् । तत्र (तया?) तदुभयव्याप्यदर्शनस्य तद्भानसामग्रीत्वात् ! वस्तुतो विरुद्धत्वेन ज्ञातयोः संशयकोटिता । विरोधभानं तु संशये सामग्रीसत्त्वासत्त्वाभ्यामनियतमित्येव तत्त्वम् । यच्च कैश्चिदुक्तम् — अनुभवानुसारेण न तावत् संशयरूपानुमितिः सत्प्रतिपक्षस्थले । अनुमिनोमीत्यनुव्यवसायाभावात् । अत एव न विरुद्धानुभवसामग्रीत्वेन संशयजनकताकल्पनम् । तथा सति तत्रानुमिनोमीत्यनुव्यवसायापातात् । तस्मात् फलबलाद् विरुद्धसत्प्रतिपक्षसामग्रीत्वेन संशयजनकतेति न संशयरूपानुमितिरिति । तदप्यसारम् । एवं सति संशयस्थले साक्षात्करोमीत्यनुव्यवसायाभावात् तत्रापि साक्षात्त्वजातिर्न स्यात् । यदि च सामग्रीबलात् साक्षात्त्वसिद्धौ व्यञ्जकाभावान्न तदभिव्यक्तिः, तदा प्रकृतेऽपि मात्सर्यमुत्सार्य दीयतां दृष्टिः । तस्मात् संशयरूपानुमित्यनङ्गीकारो निष्प्रमाणक इति ।

अत्र ब्रूमः — निश्चयसामग्री संशयजनिकेत्येवासङ्गतम् । अन्यसामग्र्या अन्यत्राजनकत्वात् । न चैवं संशयः क्वापि न स्यादेवेति वाच्यम् । घटतदभावज्ञानसामग्र्या विशेषणज्ञानादिरूपायाः सत्त्वेन तदुत्पत्तौ बाधकाभावात् । घटवि-

शिष्टज्ञानत्वादेरेव तद्विशेषणज्ञानादिजन्यतावच्छेदकत्वात् । तस्य च संशयसाधारण्यात् । इयानेव विशेषः—यद् भावाभावोभयज्ञानसामग्रीसत्त्वे तदुभयज्ञानं संशयात्मकम् । अन्यथा निश्चयात्मकमिति । न चात्रापि विशेषदर्शनद्वयरूपसाध्यतदभावज्ञानसामग्र्या संशयात्मकतदुभयानुमितौ बाधकाभाव इति वाच्यम् । विशेषदर्शनस्य साध्यादिनिश्चयसामग्रीत्वेन संशयजनकत्वासंभवात् । संशयान्यज्ञानसामग्र्याः संशयजनकत्वस्य वक्तुमशक्यत्वात् । न च विशेषदर्शनमपि संशयसाधारणज्ञानमात्रसामग्रीति शङ्कितुमपि शक्यते । तथा सति कोटिस्मृतिविशेषणज्ञानादिज्ञानसामान्यसामग्रीवद् विशेषदर्शनस्यापि संशयविरोधितानापत्तेः । न चैवं कोटिद्वयविशेषदर्शने सति स्थाणुपुरुषयोरपि (संशयो) न स्यादिति वाच्यम् । भावानवबोधात् । तत्रापि न निश्चयसामग्रीभूतविशेषदर्शनद्वयस्य कार्यजनकता । परस्परप्रतिबन्धात् । संशयस्तु सामान्यसामग्रीभूतकोटिस्मृत्यादेरेव । न च तत्रैव विशेषदर्शनात् प्रतिबन्धः कुतो न भवतीति वाच्यम् । नहि विशेषदर्शनत्वेन तस्य संशयविरोधिता । अपि तु विरोधिनिश्चयसामग्रीत्वेन । तच्चैक(विंशे? विशेष)दर्शनस्य तदा नास्ति । विशेषदर्शनान्तरप्रतिबन्धात् । एवमपरविशेषदर्शनस्यापि । तस्मादुभयविशेषदर्शनं तत्र विरोधिगुणस्थलवत् परस्परप्रतिरुद्धमेव । सामान्यसामग्र्या संशयः । इह तु विशेषदर्शनद्वयमनुमितिद्वयसामग्रीभूतं प्रतिरुद्धमेव । अन्या च वानुमितिसामग्री नास्त्येवेति कथं संशयरूपानुमितिरुत्पद्यतां, सामग्रीविरहादिति दिक् ॥

इति सत्प्रतिपक्षग्रन्थः ।

अथासिद्धिग्रन्थः ।

असिद्धिभेदास्तु व्याप्यत्वासिद्ध्याश्रयासिद्धिस्वरूपासिद्धयः प्रत्येकमेव दोषा इति मणिकृतः । इदमुपलक्षणम् । व्याप्तिविशिष्टपक्षधर्मत्वाभावः, व्याप्तौ साध्यप्रतियोगिकत्वाभावः, हेतौ पक्षसम्बन्धाभावः, पक्षे हेतुसम्बन्धाभावः, व्याप्तिपक्षधर्मतयोः सामानाधिकरण्याभाव इत्येवं परामर्शविषयीभूततत्तत्पदार्थप्रतियोगि-

---

१. 'स्य न का' क. पाठः.

काभावाः सर्वेऽप्यसिद्धमध्यप्रविष्टा इति बोद्धव्यम् । नन्वेवं हेत्वाभासानन्त्यं स्यात् । असीप्सितव्यावृत्तपरम्परानुगतैकधर्माभावात् । न च परामर्शविषयाभावत्वं सर्वसाधारणं मणिकृदुक्तमेवानुगतमिति वाच्यम् । अस्यानुगतत्वेऽपीतरव्यावृत्तत्वाभावात् । बाधविरुद्धव्यभिचाराणामुक्तधर्मवत्त्वात् । साध्यतत्सामानाधिकरण्या(म?)व्यभिचाराणां परामर्शविषयत्वात् । न च यद्रूपावच्छिन्नविषयत्वेन परामर्शस्यानुमितिहेतुता, (य?त)द्रूपावच्छिन्नाभावो विवक्षितः । साध्यप्रतियोगिकव्याप्तित्वप्रकारावच्छिन्नव्याप्तिविषयतया परामर्शस्य हेतुतेति व्याप्तित्वावच्छिन्नव्याप्यभावो भवत्यसिद्धः, न तु तद्घटकीभूतसाध्यतत्सामानाधिकरण्याव्यभिचाराणामभावादय इति वाच्यम् । एवं सति व्याप्त्यभावस्याप्यसिद्धत्वं न स्यात् । परामर्शस्य व्याप्तिविशिष्टपक्षधर्मतावगाहित्वेनैवानुमितिहेतुतया केवलव्याप्तित्वाद्यवच्छिन्नव्याप्त्यादिविषयतया तस्यानुमित्यहेतुत्वात् । परामर्शस्यानुमितिहेतुतावच्छेदकशरीरप्रवेशमात्रेण व्याप्तेरभावस्यासिद्धत्वे साध्याभावादेरपि तत्त्वं दुर्वारमेवेति ।

अत्रोच्यते — विरुद्धत्वान्यत्वे सति परामर्शं प्रति ग्राह्याभावनिश्चयत्वावच्छिन्नप्रतिबन्धकताकज्ञानविषयतावच्छेदकपर्याप्त्यधिकरणत्वं व्यभिचारादिव्यावृत्तमुक्तसर्वा(द?)सिद्धिसाधारणमसिद्धित्वम् । व्यभिचारज्ञानस्य संशयसाधारणस्य प्रतिबन्धकतया ग्राह्याभावनिश्चयत्वावच्छिन्नप्रतिबन्धकत्वाभावात् । बाधादेश्च परामर्शं प्रति तथाप्रतिबन्धकत्वात् । विरुद्धस्य तथात्वेऽपि तदन्यत्वविशेषणादेव वारणात् । एवमपि व्याप्त्यादिप्रविष्टत(था?या) व्यभिचारादावतिव्याप्तिर्मा भूत् । अतः पर्याप्त्यधिकरणत्वपर्यन्तमिति न कोऽपि दोषः ।

केचित् तु — विरुद्धत्वादिहेत्वाभासचतुष्टयोपाधिभिन्नहेत्वाभासतोपाधित्वमुक्तसर्वासिद्ध्यनुगमकम् । अतो नातिव्याप्तिरित्याहुः ।

आश्रयासिद्धश्च व्योमकमलं सुरभीत्यादाविति प्राञ्चः । तन्न । व्योमकमलस्यालीकस्य सत्त्वाभावात् । तदुक्तं — 'सचेतसां मूकतैवोचिते'ति । कथं तर्ह्येतादृशप्रयोगस्य दुष्टत्वम् । अपार्थत्वादित्यवधारय । यदि च कमले व्योमीयत्वं पक्षतावच्छेदकीकृत्य सुरभित्वं साध्यते, तदाश्रयासिद्धिः । आश्रयविशेषणासिद्ध्या चाश्रयासिद्धिरसङ्गीर्णेति मणिकृताप्यभिधानात् । अत्र च पक्षतावच्छेदकाभावज्ञानं बाधान्तर्भूतमेव । तत्सामानाधिकरण्यस्य साध्ये ग्राह्यतया तत्रैव ग्राह्याभावावगाहितया तस्य प्रतिबन्धकत्वात् । न तु व्याप्यवत्त्वज्ञानेऽपीति परामर्शाविशेषात्तत्रामि-

द्धावन्तर्भाव इति मूढानां प्रलापो नादर्तव्यः । हेतुपक्षतावच्छेदकसामानाधिकरण्यस्य परामर्शेऽपि ग्राह्यतया हेतुमति पक्षतावच्छेदकाभावज्ञानस्य तत्र ग्राह्याभावज्ञानतया प्रतिबन्धकत्वात् । अत एव हेतुमति पक्षतावच्छेदकाभाव आश्रयासिद्धिः । पक्षतावच्छेदकवति हेत्वभाव स्वरूपासिद्धिरिति । यत्त्वाश्रयविशेषणं पक्षता, तस्यासिद्धिः सिद्धसाधनमेवाश्रयासिद्धिरिति । तन्न । सिद्धेर्ज्ञानगर्भलक्षणाभावेन हेत्वाभासत्वायोगात् । सिद्धिविषयसाध्यस्य च यज्ज्ञाने सत्यनुमितिप्रतिबन्धनियम इति हेत्वाभासलक्षणविरहादिति वदन्ति ।

मम तु प्रतिभाति — सिसाधयिषाविरहविशिष्टसाध्यं भवत्वाश्रयासिद्धिः ज्ञानगर्भलक्षणसद्भावेन हेत्वाभासश्च । न च [1]सिसाधयिषाविरहांशज्ञानस्याप्रतिबन्धकत्वाद् न तद्विशिष्टं साध्यं हेत्वाभास इति वाच्यम् । एवं सति व्यभिचारादेरपि हेत्वाभासत्वाभावप्रसङ्गात् । तदुपाधिघटकसर्वांशज्ञानस्य प्रतिबन्धकत्वाभावात् । साध्याभावांशनिश्चयीभूतत्वादेः स्वरूपसत एव तत्र प्रवेशात् । यथा चैवं सति व्यभिचारानुमित्युपहितस्योपाधेरिष्टापत्त्यादिविरहसहकृतस्य प्रतिकूलतर्कविषयस्य च न हेत्वाभासता, तथा ज्ञानविशेषगर्भहेत्वाभासलक्षणकरणादेवोपपादितम् । नन्वुपाधौ हेत्वाभासत्वाभावव्यवहारवत् सिद्धिविषयेऽपि तथा व्यवहारोऽस्ति, येन तद्व्यावृत्तमपि हेत्वाभासत्वं वक्तव्यं स्यात् । यदि वा तत्रा(त्र) तथा व्यवहारः, तथापि पृथग् हेत्वाभासत्वाभावमादाय समर्थनीयः । आश्रयासिद्धावेवोक्तक्रमेणान्तर्भावादिति ।

ननु पर्वतो धूमवान् वह्नेरित्यादिव्यभिचारिणि विरुद्धे वा कथं व्याप्यत्वासिद्धिः । सा हि न यत्किञ्चिद्व्याप्तिविरहः, सद्धेतुसाधारण्यात् । किन्तु वह्निमन्निष्ठाभावाप्रतियोगिधूमसामानाधिकरण्याभावः । स च प्रतियोग्यप्रसिद्ध्या न संभवतीति चेद्, न । साध्ये हेतुसमानाधिकरणाभावाप्रतियोगित्वविशिष्टहेतुसामानाधिकरण्यस्य हेतुव्यापके प्रसिद्धेस्याभावो व्याप्यत्वासिद्धिः । तस्य च विशेषणाद्यभाववद् ग्राह्याभावावगाहितया परामर्शप्रतिबन्धकज्ञानविषयत्वात् ; न चैव-

१. 'द्धाभा'क. पाठः.

---

[1] 'सिसाधयिषा' इत्यकृतषत्वाः परदर्शनाः शब्दा इह प्रयुक्ताः । तेषां साधुत्वं कालानुसारेण बोद्धव्यम् । ते हि साधधातुमपोपदेशं पठन्ति । किन्तु तत्र [illegible] इति माधवो दूषयति ।

मप्यवृत्तिव्याप्यत्वासिद्धिसङ्ग्रहो नेति वाच्यम् । तस्य विरुद्धत्वादिनैव सङ्ग्राह्यत्वादिति केचित् । वस्तुतो हेतौ साध्यप्रतियोगिकात्यन्ताभावासामानाधिकरण्यावच्छिन्नस्य सामानाधिकरण्यस्य च साध्यव्याप्ये प्रसिद्धस्याभावो व्याप्यत्वासिद्धिरिति नावृत्तेर्हेतुकाव्याप्तिशङ्का । नन्वेवमपि व्याप्यत्वासिद्धेर्व्यभिचाराद्यसङ्करो नास्तीति न पृथग् हेत्वाभासतेति चेद्, न। वस्त्वसाङ्कर्याभावेऽपि ज्ञानासांकर्यस्य सत्त्वात्। न च विशिष्टाभावरूपव्याप्यत्वाभावस्य विशेषणा(भावा)द्यन्यतरज्ञाननियतज्ञानतया न तदसङ्करोऽर्पाति वाच्यम्। विशेषणाद्यभावमज्ञात्वापि शब्दादिना विशिष्टाभावज्ञानसंभवेनासाङ्कर्यसंभवात्। वस्तुतस्तु — व्यर्थविशेषणत्वव्यर्थविशेष्यत्वस्थल एव व्याप्यत्वासिद्धेर्व्यभिचाराद्यसङ्करः । नहि नीलधूमे वह्निव्यभिचारो वह्न्यसहचारो वास्ति। ननु नीलधूमे यथा न व्यभिचारादिः, त(दा?था) व्याप्यभावोऽपि नेति कथमेतदिति चेद्, इत्थं — वह्नित्वावच्छिन्ने नीलधूमत्वावच्छिन्नव्याप्तिप्रतियोगित्वाभावस्य धूमत्वावच्छिन्ने नीलधूमत्वावच्छिन्नव्याप्यभावस्यात्र विवक्षितत्वात् । तथा च नीलधूमत्वस्य व्याप्यतानवच्छेदकत्वाद् भवति तत्र व्याप्तिविग्रहः । नन्वे तज्ज्ञानं व्याप्तिधीविरोध्येव नेति चेद्, न ; धूमत्वावच्छिन्नव्याप्तिज्ञाने तस्याविरोधित्वापादन इष्टापत्तेः । नीलधूमत्वावच्छिन्नव्याप्तिज्ञाने च विरोधित्वं तस्य वज्रलेपायितमेव । न चाव्यभिचरितसामानाधिकरण्यात्मकव्याप्तेः कथमनेन विघटनमिति वाच्यम् । व्यर्थविशेषणादिदूषकत्वानुरोधेन व्यधिकरणधूमवह्न्यादिसङ्ग्रहानुरोधेन च सामानाधिकरण्यावच्छेदकतद्धर्मवत्त्वं व्याप्तिरिति प्रागेवोक्तत्वात् । तज्ज्ञाने चावच्छेदकत्वाभावज्ञानस्य साक्षादेव विरोधित्वात् । यदि चावच्छेदकलक्षणेन व्याप्तिः, तदानुपपत्तिरेव नेति । यथा च नीलधूमत्वस्यानतिप्रसक्तत्वेऽपि तादृशलघुधर्मोपस्थितिकत्वान्नावच्छेदकत्वं, तथोपपादितम् । वक्ष्यते चाग्रे।

इदं त्ववशिष्यते — यथा व्याप्त्यभावज्ञानं पक्षधर्मत्वाभावज्ञानं वा परामर्शविघटकमिति तयोर्हेत्वाभासता, तथा तदुभयव्याप्यज्ञानमपि तद्विघटकमिति तद्विषयस्यापि हेत्वाभासतास्तु । बाधकाभावादिति ।

अत्र मिश्राः — व्याप्त्यादिविरहव्याप्यवत्ताधीः व्याप्त्यादिप्रत्यक्षविरोधितयानुमितिप्रतिबन्धिका व्याप्त्याद्यनुमितिविरोधितया वा । नाद्यः । प्रत्यक्षे ग्राह्याभावव्याप्यज्ञानस्याप्रतिबन्धकत्वाद् ग्राह्याभावप्रत्यक्षस्यैव तत्र प्रतिबन्धकत्वा-

१. 'नस्यासांक' क. पाठः.

दिति बहुशो निवेदितत्वात् । नान्त्यः । व्याप्तिव्याप्यपरामर्शासत्त्वे तदभावादेव कार्याभावेन प्रतिबन्धकत्वाभावात् । तत्सत्त्वे च सत्प्रतिपक्ष एवान्तर्भावात् पृथग् हेत्वाभासत्वासम्भवादिति वदन्ति ।

अत्र नव्याः — हेतुव्याप्त्यभावव्याप्यस्य हेतुव्याप्त्यनुमितौ सत्प्रतिपक्षत्वेऽपि हेतुना साध्यानुमितावसत्प्रतिपक्षत्वात्, साध्यानुमितौ साध्यविरहव्याप्यस्यैव सत्प्रतिपक्षत्वाद्, व्याप्तिविरहव्याप्त्यादेरनुमितौ परामर्शविघटकतया प्रतिबन्धकत्वेन साक्षात्प्रतिबन्धकत्वाभावेन सत्प्रतिपक्षत्वासम्भवादिति व्याप्त्यभावव्याप्त्यादेः साध्यानुमितौ पृथग् हेत्वाभासत्वे बाधकाभाव इति वदन्ति । तच्चिन्त्यम् । विरोधिव्याप्तिग्राहकसामग्र्या प्रतिरुद्धव्याप्तिग्रहत्वस्यासाधारणलक्षणतया तत्रैव व्याप्त्यभावव्याप्यस्यान्तर्भावेन पृथग् हेत्वाभासत्वायोगादिति मिश्राभिसन्धानात् । पक्षधर्मत्वाभावव्याप्यव्यावर्तनाय तु तथापि गत्यन्तरं चिन्तनीयमेवेति तु चिन्त्यम् ।

केचित्तु — यज्ज्ञाने सत्यनुमितिप्रतिबन्धनियमः, स एव हेत्वाभासः । अत एवोपाध्यादिर्न तथा । तथा च व्याप्त्यभावादिव्याप्ये गृहीतेऽपि प्रात्यक्षिकस्य व्याप्त्यादिज्ञानस्य सम्भवेनानुमित्युत्पादाद् न तयोर्हेत्वाभासत्वमिति वदन्ति । तदपि चिन्त्यम् । परामर्शोत्पत्त्यनन्तरं व्यभिचारज्ञाने सत्यप्यनुमित्यप्रतिबन्धकत्वात् तस्यापि हेत्वाभासत्वानापत्तेः । परामर्शात् पूर्वं यज्ज्ञाने सत्यनुमितिप्रतिबन्धनियम इत्युक्तौ च सत्प्रतिपक्षाव्याप्तेः । तस्मात् स्वप्रतिबध्यप्रतिबन्धद्वारा हेत्वाभासता । तच्च व्याप्त्यभावादिव्याप्यस्यास्त्येव । व्याप्त्याद्यनुमितिप्रतिबन्धकत्वादिति । वस्तुतस्तु — व्याप्त्यभावादिव्याप्यस्य करणविघटकत्वमापाद्यते हेत्वाभासत्वपर्यन्तमपि वा । आद्य इष्टापत्तिः । अन्त्ये ज्ञानविशेषविशेष्यत्वमिति हेत्वाभासलक्षणायोगादप्रसक्तिरेव, सिद्धसाधनोपाध्यादिवत् । (ननु) त(दा?था) लक्षणमेव किमिति कृतं, येन व्याप्त्यभावादिव्याप्यं व्यावर्त्यत इति चेद्, न । स्वतन्त्रेच्छस्य नियोगपर्यनुयोगानर्हत्वात् । सत्प्रतिपक्षेतरस्यानुमितौ परामर्शे ग्राह्याभावानवगाहितया प्रतिबन्धकस्य हेत्वाभासत्वेनासङ्ग्रहात् । अत एव सिद्धसाधनोपाधिपक्षधर्मताभावव्याप्यव्याप्त्यभावव्याप्यप्रतिकूलतर्कविषयादीनां सर्वेषां व्युदास इति सङ्क्षेपः ॥

इत्यसिद्धिग्रन्थः ।

अथ बाधग्रन्थः ।

बाधः साध्याभाववत्त्वप्रमाविषयपक्षकत्वमिति प्राञ्चः । तन्न । वृक्षः संयोगीत्यादावतिव्याप्तेः । केवलान्वयिसाध्याभावाप्रसिद्ध्या तद्धर्मबाधासिद्धेरबाधितत्वस्याभावप्रसङ्गात् । किन्तु पक्षनिष्ठप्रमाविषयत्वप्रकाराभावप्रतियोगिसाध्यकत्वम् । अभावे च प्रतियोगिव्यधिकरणत्वं विशेषणम् । तेन न पूर्वोक्तातिव्याप्तिः । केवलान्वयिनि च बाधितत्वस्योक्तरूपस्यान्यत्र प्रसिद्धस्यान्यत्वमस्त्येवेति नाबाधितत्वव्या(पको? कोपः।) न वा तदर्थकनिगमनवैयर्थ्यमिति ।

अत्र च पक्षे साध्याभावज्ञानदशायां हेतुर्ज्ञातश्चेद् व्यभिचारधीरिव । अथ न ज्ञातस्तदा कारणाभावादेव कार्याभावः । अथ हेत्वभावादवृत्तिस्तदा स्वरूपासिद्धिरिति बाधो न पृथग् हेत्वाभास इति पूर्वः पक्षः ।

तत्र कश्चित् — पर्वतो वह्निमान् धूमादित्यत्र सलिङ्गपरामर्शजन्यवह्न्यनुमितौ यत्र वह्न्यंशे उपनीतकाञ्चनमयत्वादिबाधितवस्तुभानं, तत्रा(सत्य?)नुमितेरप्रमात्वम् । तच्च हेत्वाभासाधीनम् । न च व्यभिचारधीस्तत्रास्तीति काञ्चनमयवह्न्यभाव एव दोष इत्याह । तन्न । काञ्चनमयवह्नेरप्रसिद्ध्या तदभावासम्भवात् । काञ्चनमयत्वरूपव्यधिकरणधर्मावच्छिन्नवह्न्यभावमादाय बाधोपपादने(पु? तु) तादृशव्यभिचारस्याप्युपपादयितुं शक्यत्वात् । किञ्चानुमितावुपनीतभानानङ्गीकारात् कथं काञ्चनमयत्वादिभानम् । अथानङ्गीकारमात्रं न वस्त्वभावसाधकम्, अतिप्रसङ्गात् । किन्तु प्रमाणाभावः । न चात्र सोऽस्ति । प्रत्यभिज्ञादौ तत्तादिभानानुरोधेनावश्यमुपनीतभानमङ्गीकरणीयम् । तत्र चोपनयस्य प्रत्य(क्ष)मात्रे सहकारिता वा मानमात्रे वेति संशये सामान्यादुत्तरपक्षस्यैव प्रबलत्वादनुमितावप्युपनीतभाने बाधकाभावादिति ।

अत्र मिश्राः — उपनयः प्रत्यक्षे सहकारी सन्निकर्षतया सम्भवति । अनुमाने सन्निकर्षस्यातन्त्रतया व्याप्तिपक्षधर्मतोपनीतार्थस्यैव विषयतयोपनीतभानाभावादिति वदन्ति ।

तत्र केचित् — प्रत्यक्षेऽपि ज्ञानं सन्निकर्षतया न हेतुः । किन्तु सविकल्पकानन्तरं प्रमाणजन्यज्ञानत्वावच्छेदेनामंस(र्गः? र्गा)ग्रहे सति . सविकल्पकविषयवैशिष्ट्यं भासत इति सामान्यत एव नियमात् तदुपयोगः । तच्चानुमानादिसाधारणमिति तत्राप्युपनीतार्थभाने बाधकाभाव इति ।

अत्रोच्यते — सामान्यनियमस्वीकारेऽपि तत्तादिप्रत्यक्षे तदिन्द्रियसन्निकर्षो वाच्य एव। (अ)सन्निकृष्टस्य प्रत्यक्षाविषयत्वात्। तथा च ज्ञानस्येन्द्रियसन्निकर्ष(जन्य?)त्वमवश्यमभ्युपेयमेव। तथा च सामान्यनियमस्वीकारो गौरवपराहत इति। नन्वेवं लाघवोपनीतस्याप्यनुमितौ भानं न स्यादिति चेद्, न। सम्भवल्लघुगुरुविषयकमानत्वावच्छेदेनैव लाघवज्ञानस्य सहकारितया लाघवोपनीतस्य सर्वत्र भानसम्भवात्। उपनयान्तरस्य च तथात्वाभावादिति दिक्।

अत्रायं सिद्धान्तः — साध्याभावज्ञानप्रमात्वज्ञानं विना हेतुविषयकमपि साध्याभावज्ञानं प्रामाण्यशङ्काकवलितं न प्रतिबन्धाय समर्थम्। अतो व्यभिचारज्ञानत्वेनापि प्रतिबन्धकतायां साध्याभावज्ञानप्रमात्वज्ञानमवश्यमुपजीव्यम्। तथा च उपजीव्यतया तदेव दोषः। न च प्रमात्वज्ञानमपि साध्याभावविषयकतयैव दोषः, प्रमात्वस्य विषयघटितस्मृतितया तज्ज्ञाने तज्ज्ञाननियमादिति वाच्यम्। विषयघटितत्वेऽपि ज्ञाननिरूपितस्वरूपसम्बन्धविशेषविषयत्वस्यैव तत्र प्रयोजकत्वात्। साध्याभावविषयत्वस्याप्रामाण्यशङ्काकलङ्किततज्ज्ञानसाधारणतया प्रतिबन्धाप्रयोजकत्वात्। नन्वेवमप्रामाण्यशङ्काशून्यसाध्याभावज्ञानं प्रतिबन्धकमस्तु। न तु साध्याभावज्ञानप्रमात्वज्ञानमिति चेद्, न। अप्रामाण्यशङ्काशून्यत्वापेक्षया गृहीतप्रमात्वस्य लघुत्वात्। ननु गृहीतप्रमात्वसाध्याभावज्ञानस्य प्रतिबन्धकत्वे यत्र प्रमात्वज्ञान एवाप्रमात्वशङ्का, तत्रापि प्रतिबन्धापत्तिः। न च तत्रापि गृहीतप्रमात्वप्रमात्वज्ञानत्वेन प्रतिबन्धकता। तर्हि तत्राप्येवमेवेत्यनवस्थापातः। तस्मादनन्यगत्या क्वचिद्गत्वा अप्रामाण्यशङ्काशून्यत्वमनवस्थाभिया वक्तव्यम्। तर्हि प्रथममेव तदस्तु। किं प्रमात्वज्ञानप्रतिबन्धकत्वेनेति नायं सिद्धान्तो युक्तिसह इति चेद्, न। साध्याभावज्ञानस्य हेतुविषयकतानियमाभावेन बाधस्य व्यभिचारसाङ्कर्यासम्भवात्। परामर्शानन्तरं स्मृत्या शब्देन वा यत्र साध्याभावोपस्थितिस्तत्र हेतूपस्थापकाभावात्। न च परामर्शानन्तरमनुपनिसामग्रीबल(ब)त्त्वादनुमितिरेव, न तु साध्याभावस्मृत्यादिकमिति वाच्यम्। यत्र पूर्वक्षणे सिद्ध्यादिप्रतिबन्धकसत्ता, तत्रानुमित्यनुदयेन स्मृत्यादिसम्भवात्। किञ्च, यथा व्यभिचारधीः प्रतिबन्धिका, तथा साध्याभावधीरपि। आह्याभावज्ञानस्य शाब्दादौ प्रतिबन्धकत्वकल्पनात्। न चैवं साधारणप्रतिबन्धकस्यापि तथा न हेत्वाभासता। साधारणप्रतिबन्धकस्यापि हेत्वाभासलक्षणसत्त्वेन तत्त्वे बाधकाभावाद् हेतुनिष्ठत्वेनासाधारण्य-

सम्भवाच्च । वस्तुतः परामर्शपूर्वं साध्याभावधियः व्यभिचारज्ञानत्वेन प्रतिबन्धकत्वसम्भवेऽपि तदुत्तरं तत्त्वेन प्रतिबन्धकत्वमसम्भवि । व्यभिचारज्ञानस्य करणविघटकतया दोषत्वात् । अत एव करणे परिपूर्णे किमसिद्धयेति हेत्वाभासलक्षणे मिश्रैरुक्तम् । तस्मात् परामर्शोत्तरसाध्याभावज्ञानस्यानुमितौ ग्राह्याभावविषयकत्वेनैव विरोधिता, न व्यभिचारज्ञानत्वेन । तत्प्रतिबध्यस्य परामर्शस्योत्पन्नत्वात् । न च तत्र परामर्शेऽप्रामाण्यशङ्का साध्याभावज्ञानेनाधीयत इति वाच्यम् । अप्रामाण्यशङ्कायाः कोट्युपस्थित्याद्यनियमेनानावश्यकत्वाद्, बाधाप्रतिबन्धकत्वेऽप्रामाण्यशङ्काकाल एवानुमितिप्रसङ्गाच्च । न च संशयसामग्र्या बलवत्त्वात् तत्र संशय एव, न त्वनुमितिरिति वाच्यम् । प्रत्यक्षे तथाभावेऽप्यनुमितौ तस्याः प्रतिबन्धकत्वे मानाभावात् । प्रत्युत भिन्नविषयकानुमितिसामग्र्याः सर्वज्ञानसामग्र्यपेक्षया बलवत्त्वाद् अनुमितिरेव भवेद् यदि बाधो न प्रतिबन्धकः । किं बहुना, एवं सति सत्प्रतिपक्षेऽपि परामर्शाप्रामाण्यशङ्कैवाधीयतामिति सोऽपि हेत्वाभासो न स्यात् । कोट्याद्यनुपस्थित्या संशयकालानुमित्यापत्त्या च तस्य पृथक् प्रतिबन्धकत्वमङ्गीक्रियते यदि, तदा बाधेऽपि मात्सर्यमुत्सार्य दृष्टिराधीयतामित्यलं वाचालतया ।

मणिकृतस्तु — व्यभिचारेण सह न बाधस्य साङ्कर्यनियमः । पर्वतो वह्निमान् इत्यनुमितौ पक्षधर्मताबलाद् धूमेन वह्निः पर्वतीयः साध्यते यत्र, तत्र महानसीयवह्नेरेव सिद्धिः कुतो न स्याद् यदि बाधो न प्रतिबन्धकः । नहि वह्नौ साध्ये धूमस्य व्यभिचारोऽस्ति । न च पर्वतीयधूमस्य महानसीयवह्निना सह व्यभिचार एव । महानसीयवह्नित्वेन साधने तथात्वेऽपि वह्नित्वेन साधने तदभावात् । साध्यतावच्छेदकावच्छिन्नसाध्याभावसामानाधिकरण्यस्य व्यभिचा(रि ? र)त्वात् । तस्मात् तत्र महानसीयवह्न्यादिभानं बाधेनैव प्रतिरुध्यत इति वदन्ति ।

अत्र वदन्ति — यदि पर्वते महानसीयादिवह्निभानं, तदानुमितिरयथार्था स्यात् । न च भवदीयप्रयोजनक्षतिरकिञ्चित्करी, सामग्रीतः कार्यावश्यकत्वादिति वाच्यम् । सत्यलिङ्गपरामर्शस्य प्रमानुमितावेव योग्यतया तेनाप्रमानुमितेर्जनयितुमशक्यत्वात् । नहि शालिबीजाद् यवाङ्कुरः संभाव्यतेऽपि । यदि च नैवं, तदा बाधप्रतिबन्धकत्वाङ्गीकारेऽपि महानसीयवह्नित्वेन बाधावतारात् तेन रूपेणानुमितिविषयता मास्तु। वह्नित्वेन बाधानवतारात् तेन रूपेण वह्नि(मान् ? भानं)

दुर्वारमेव । न च बाधस्य समानविषयकतया प्रतिबन्धकत्वाद् महानसादिवह्निर्न केनापि रूपेण भासत इति वाच्यम् । एवं सति प्रमेयत्वेन विश्वं जानतो घटत्वादिना संशयादिकं न स्यात् । तथा चानुभवविरोध इति ।

अत्राहुः — न सत्यलिङ्गपरामर्शस्य प्रमानुमितिजनकतानियमः । घटः सकर्तृकः कार्यत्वादित्यत्र लाघवभ्रमादेककर्तृकत्वविषयानुमितौ सत्यपरामर्शे सत्यपि प्रमात्वाभावात्, कूटलिङ्गजानुमितौ विषयाबाधेन सत्यपरामर्शे विनापि प्रमात्वाच्च । तस्मादबाधितत्वप्रमाभ्रमौ तत्प्रमाप्रमा(त्व)प्रयोजकौ । अत एव प्रतिबन्धकाभावत्वेनानुमित्यादौ बाधाद्यभावः प्रयोजकः, न त्वबाधितत्वादिज्ञानमित्यपास्तम् । गुणानुरोधेनाबाधितत्वज्ञानस्यानुमित्यादौ हेतुत्वात् । यच्चोक्तं — समानविषयकत्वेन बाधस्य प्रतिबन्धकत्वे मेयत्वप्रकारकघटादिज्ञानानन्तरं घटत्वादिना संशयादि न स्यादिति । तदपि न । लाघवेन समानविषयकत्वेन बाधस्य प्रतिबन्धकत्वसिद्धौ संशयादिविषयभिन्नस्यैव प्रमेयत्वेन ज्ञानं जातमिति कल्पनात् । अन्यथा समानप्रकारकतापक्षेऽपि भूतले घटो नास्तीति ज्ञानेऽपि घटत्वं भूतलाश्रितवृत्तीति ज्ञानस्य दुर्वारत्वापातात् । अत एव समानविषयकत्वेन प्रतिबन्धकतापक्षे पर्वतातिरिक्तवृत्तिवह्निः पर्वते नास्तीति ज्ञानानन्तरं धूलीपटले धूमभ्रमा(त्य ? द् अन्य)भ्रमानुमित्तिर्न स्यात् । वह्न्यन्तरे बाधावतारात् । पर्वतीयवह्नेर्मा(ध ? धित)त्वेनाविषयत्वात् । तस्मात् समानप्रकारकत्वेन प्रतिबन्धकत्वमङ्गीकरणीयमिति वह्नित्वेनाबाधितस्यैव वह्नेस्त(त्रा ? त्र) भानमिति नि(स्तरं ? रस्तम्) । तत्रापि वह्नित्वेन वह्निभिन्नस्यैव पर्वतीयरूपादेर्भानादिति ।

इदं तु शङ्क्यते — यत्र वह्निभिन्ने वह्नित्वं नास्ति, पक्षान्यवह्निश्च पक्षे नास्तीति धीः, तत्र भ्रमानुमितिः कथं स्यात् । विषयस्य वह्न्यवह्निसाधारणस्य बाधितत्वावगमादिति ।

अत्रेदं तत्त्वं — समानप्रकारकत्वेन विरोधपक्षेऽपि इदम्पर्वतत्वादिना निश्चये पर्वतत्वादिना वह्न्यादिसंशयः स्यात् । तथा च निष्कम्पप्रवृत्त्यादिविरोधः । भूतले घटो नेति ज्ञानानन्तरं भूतलं घटवदिति ज्ञानापत्तिश्च । तस्मादुक्तयुक्त्या लाघवेन च समानविषयत्वेन प्रतिबन्धकत्वे सिद्धे पर्वतान्यवह्निः पर्व(तो ? ते) नास्तीत्यादिबाधोऽनुमितिविषयवह्निमवह्निं वा न गोचरयतीति कल्प्यते । अत एव व्यतिरेकिणि यत्र घटे इतरभेदनिश्चयः, तत्र पृथिवीत्वेनापि रूपेण

संशयो न युज्यत इत्यभिप्रेत्यैव मणिकृतोक्तं — 'यद्वा घटादिभिन्नपृथिवीत्वेन पक्षते'ति। अत एव च केवलान्वयिनि प्रमेयत्वं घटनिष्ठाभावप्रतियोगि न वेत्यादिसंशयः पक्षताघटक उक्तः। समानविषयसंशयत्वेन साध्यसिद्धिनिवर्त्यत्वात्। अन्यथा समानप्रकारकतापक्षे तदसङ्गतेः। वस्तुतस्तु समानविषयत्वेन प्रतिबन्धकत्वमित्युत्सर्गः। स च यावद्विषयबाधेन बाधकेनापोद्यते। तथा च यत्र यावद्विषये विशिष्य बाधग्रहेऽपि सामान्यतो ज्ञानं, तत्रागत्या समानप्रकारकत्वेन प्रतिबन्धकत्वेऽपि लाघवेनोक्तयुक्त्या समानविषयत्वेनैव प्रतिबन्धकत्वमिति विषयविभागः। अत एव पर्वतान्यवह्निः पर्वते नेति ज्ञाने वह्निभिन्ने वह्नित्वं नेति ज्ञाने च भवति वह्न्यनुमितिर्वह्नित्वेन रूपेण बाधितवह्निविषयिण्येवेति न काचिदनुपपत्तिरिति। केचित्तु — गुणानुरोधादत्र परामर्शात् प्रमेत्यसङ्गतमेवेति महानसीयादिवह्निभानं भवेदेवेति समानविषयकत्वेनैव बाधप्रतिबन्धकत्वमङ्गीकार्यम्। न च सत्यपरामर्शस्वभावादेव महानसीयादिवह्निधीर्नेत्येव न कुत इति वाच्यम्। महानसीयादिवह्निभानेऽप्यनुमितौ प्रमात्वसंभवात्। वह्नित्वेन रूपेण महानसीयवह्नेः पर्वते भानात्। यत्र यद्धर्मावच्छिन्नयदभावः, तत्र तद्धर्मावच्छिन्नतज्ज्ञानस्य भ्रमत्वादिति। तच्चिन्त्यम्। यत्र यदस्ति, तत्र तज्ज्ञानस्य प्रमात्वात्। न च पर्वते महानसीयवह्निर्वह्नित्वेनापि रूपेणास्ति। तस्मादत्र तज्ज्ञानं भ्रमरूपं भवतु मा वा। प्रमारूपं (न) भवतीति निश्चितमेवेति न तदनुरोधात् समानविषयकत्वेन प्रतिबन्धकत्वसिद्धिरिति दिक्।

अन्यच्च बाधासङ्कीर्णस्थलान्तरमुक्तं मणिकृता — 'गन्धप्रागभावावच्छिन्नो घटो गन्धवान् पृथिवीत्वादि'त्यादि। नहि तत्र पृथिवीत्वे गन्धव्याप्यताविरहो न वा पक्षधर्मताविरह इति बाध एव तत्र प्रतिबन्धकोऽसङ्कीर्ण इति।

तत्र केचिद् — गन्धप्रागभावविशिष्टघटस्य पक्षत्वे तत्र गन्धाभावेन हेतोश्च सत्त्वे व्यभिचार एव। हेतोरसत्त्वे चासिद्धिरेव। न च गन्धप्रागभावोपलक्षि(ता? तस्य पक्षत्वम्।) तदा तत्र साध्य(स्य) सिद्धत्वेन सिद्धसाधनमेव, न तु बाध इत्यसङ्गतमिदमिति।

अत्राहुः — गन्धप्रागभावकाल एवात्र विशेषणतया पक्षतावच्छेदकत्वेन विवक्षितः। तद्विशिष्टे च घटेऽस्ति पृथिवीत्वं हेतुरिति नासिद्धिः, न वा सिद्धसाधनं, तद्विशिष्टे साध्यासत्त्वात्। अतस्तत्र बाध एव प्रतिबन्धक इति।

अत्र नव्याः — प्रागभावोपलक्षितकालस्य पक्षतावच्छेदकत्वे तद्विशिष्टघटे गन्धवत्त्वस्य सिद्धत्वात् सिद्धसाधनमेव, न बाधः । प्रागभावविशिष्टकालस्य पक्षतावच्छेदकत्वे तादृशकालविशिष्टे पृथिवीत्वहेतोरसिद्धिरेव । प्रागभावांशे तदसत्त्वादिति नैतद्बा(ध?धा)सङ्कीर्णस्थलमुक्तमिति ।

अत्र प्रतिभाति — प्रागभावः स्वाधारकालविशेषपरिचायकः । तथा च कालविशेषविशिष्टो घटः पक्षः, तत्र पृथिवीत्वं हेतुरस्त्येवेति नासिद्धिर्न वा सिद्धसाधनं, तद्विशिष्टे गन्धाभावादिति बाध एव तत्र दोष इति न किञ्चिदेतत् । अत एव प्रागभावकालावच्छिन्नघटे गन्धरूपसाध्याभावेन हेतोश्च सत्त्वेन व्यभिचार एवात्र, न तु बाध इत्यपि दूषणमपास्तम् । पृथिवीत्वगन्धयोर्ग्राह्यसामानाधिकरण्यप्रविष्टसम्बन्धस्य समवायतया तत्सम्बन्धावच्छिन्नहेतुमति तत्सम्बन्धावच्छिन्नसाध्यस्यापि सत्त्वेन व्यभिचाराभावात् । ग्राह्यसामानाधिकरण्यप्रविष्टसम्बन्धेन हेत्वधिकरणे तत्सम्बन्धारोप्यकसाध्याभावस्यैव व्यभिचा(रि?र)त्वात् । अन्यथा धूमाधिकरणेऽपि समवायादिना वह्न्यभावेन व्यभिचारप्रसङ्गादिति । यच्चात्र दूषणं — पक्षधर्मताबलाद् अनुमितौ साध्यादिभानं, सा च पक्षे हेतुस्तत्र साध्यं विनानुपपन्न इत्याकारेति पक्षीयसाध्यभाने पक्षतावच्छेदकसाध्यसामानाधिकरण्यमर्थादनुमितिविषय इति प्रकृतेऽपि प्रागभावकालीनत्वसामानाधिकरण्येन घटे गन्धः सिध्यत्येवेति नात्र बाधगन्धोऽपीति । तदपि न । पक्षतावच्छेदकविशिष्टे साध्यसिद्धेरौत्सर्गिकत्वात् । बाधेनैव तस्य बाधनात् । अत एव पर्वतो वह्निमानित्यादावपि पर्वतत्वाद्यंशेऽपि साध्यसिद्धौ बाधः प्रतिबन्धक एव । किं बहुना, प्रमाणमात्रस्यैव विशिष्टवैशिष्ट्यान्वयबोधजनकतायामुत्सर्गः । अत एवारुणया गवेत्यादावारुण्यादिविशिष्टगोरेव सोमक्रयसाधनत्वमिति सिद्धान्तः । वस्तुतस्तु वृक्षः संयोगी द्रव्यत्वादित्यादावव्याप्यवृत्तिसाध्यके सद्धेतौ साध्याभावप्रदेशे साध्यसिद्धिर्यत्र न भवति, तत्र बाध एव प्रयोजकः । प्रतियोगिविरुद्धसाध्याभावसहचारस्य व्यभिचारतया तत्र तदभावात् । अत एव व्याप्तिलक्षणे पक्षधरमिश्रैरिदमपि बाधासङ्कीर्णस्थलमित्युक्तम् । किञ्च, पक्षतावच्छेदकवति साध्याभावरूपस्य बाधस्य व्यभिचारसङ्करेऽपि साध्यवति पक्षतावच्छेदकाभावज्ञानस्य न व्यभिचारज्ञानसाङ्कर्यम् । साध्याभा(व?वा)ज्ञानेन तत्र तद्धर्मव्यभिचाराज्ञानात् । अन्यच्च ज्ञानासाङ्कर्यं प्रागुक्तमेवास्तीति नेह वितन्यत इति संक्षेपः ॥

इति बाधग्रन्थः ।

अथ हेत्वाभासानामसाधकतासाधनम् ।

हेत्वाभासानामसाधकतासाधकतया सदुत्तरत्वम् । जात्यादीनां च(स्य! स्वा)साधकतासाधारण्येन परासाधकतासाधकतया असदुत्तरत्वम् । यद्यप्युद्देश्यपरानुमितिप्रतिबन्धो व्यभिचारादिज्ञानादेवेत्यसाधकतानुमितिर्व्यर्था, तथाप्यसाधकतानुमानेनात्यन्तापकर्षः प्रतिवादिनः सूच्यत इति कथकसम्प्रदायसिद्धत्वासाधकत्वसाधनस्याप्युद्देश्यत्वमिति तदपि कार्यम् । न चैवमितरानुमानवदत्रापि पञ्चावयवप्रयोगः किमिति न क्रियत इति वाच्यम् । अत्र दूषणस्यासाधकत्वव्याप्तेः वादिप्रतिवाद्युभयसम्मततया दूषणस्यासाधकत्वव्याप्तिर्मास्त्विति शङ्कोत्थापने व्याघातेन च व्याप्त्युपदर्शकावयवस्य व्यर्थत्वादिति वदन्ति । वस्तुतस्तु कथकसम्प्रदायो यत्र यादृशः, तत्र तथा प्रयोग इत्येव मूलयुक्तिरनुसन्धेया । अन्यथा पक्षधर्मत्वाबाधितत्वादिबोधकयोरुपनयनिगमनयोः करणं कुतोऽत्र न स्यादिति तत्त्वम् । असाधकत्वं चोद्देश्यानुमितिप्रतिबन्धकतावच्छेदकधर्मवत्त्वमेव । स च धर्मो विरुद्धत्वादिरेव । न चैवमिदमसाधकं विरुद्धत्वादित्यादौ साध्याविशेषः इति वाच्यम् । रूपान्तरेणैकस्यापि साध्यसाधकभावाविरोधात् । इदं विषासोपशमनसमर्थतावच्छेदकरूपवत् तोयत्वादित्यादिवत् । समानप्रकारकसिद्धत्वादेरेव प्रतिबन्धकत्वेन साध्याविशेषदोषप्रयोज्यदोषस्यासम्भवादिति दिक् ॥

इति हेत्वाभासानामसाधकतासाधनम् ।

इति श्रीगोपीनाथविरचिते मणिसारेऽनुमानखण्डः ।

शुभं भूयात् ।

---

१. 'चास्य' क. पाठः.

शुद्धिपत्रम् ।

पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
५	२८	यद्य	यद्वा व्य
६	१७	भव्यं	(न) भव्यं
७	३	सिद्धिनै	सिद्धिरे
९	१४	जन्नक	जनन
११	२४	(वा)	(वत्वा)
१४	२२	दक	दक (विशिष्ट)
२२	११	रिति	रिति(न)
२७	१६	त्मत्व	त्म
,,	१७	त्वमसमानाधिकर-णात्म(त्व)	त्वसमानाधिक-रणात्म
४०	८	ग्रा	(?) ग्रा
५३	२४	सम्बन्धि (क?)	(स) सम्बन्धिक
५९	२५	सुरभित्वा	सुरभि(त्व)त्वा
६४	३	ले	लें
७१	७	च । ला	च ला
,,	१७	रसेक	रेक
७३	,,	राय	राय (?)
७७	,,	पक्षता	पक्ष (धर्म) ता
८९	९	वाभिन्ने ए	वो भिन्न ए
९५	१७	कप्त	कृप्त
१२३	१६	(ज्ञान ज्ञान ?)	ज्ञान (ज्ञान ?)

00047477

Digitized with financial assistance from
Shri Brihad Bhartiya Samaj
on 11 March, 2020